न् तं नान्वविंदत क्वचित्कस्यचिद्दोषस्य सद्भावात् तदेवाह नूनमिति त्रिभिः १८ मन्युर्निर्जयो नास्ति दुर्वासःप्रभृतिषु बृहस्पतिशुक्रादिषु
संगवर्जितं ज्ञानं नास्ति महत्त्वपि ब्रह्मसोमादौ न कामनिर्जयः परतो व्यपाश्रयः पराधीन इन्द्रादिः स किमीश्वरः १९ न भूतसौहृदं पर

मेघा मृदंगपणवमुरजानकगोमुखान् व्यनादयन् शंखवेणुवीणास्तुमुलनिःस्वनान् १२ ततोऽभिषिषिचुर्देवीं श्रियं पद्म
करां सतीं दिगिभाः पूर्णकलशैः सूक्तवाक्यैर्द्विजेरितैः १३ समुद्रः पीतकौशेयवाससी समुपाहरत् वरुणः स्रजं वैज
यन्तीं मधुना मत्तषट्पदां १४ भूषणानि विचित्राणि विश्वकर्मा प्रजापतिः हारं सरस्वती पद्ममजो नागाश्च कुंडले १५
ततः कृतस्वस्त्ययनोत्पलस्रजं नदद्द्विरेफां परिगृह्य पाणिना चचाल वक्त्रं सुकपोलकुंडलं सव्रीडहासं दधती सुशोभ
नं १६ स्तनद्वयं चातिकृशोदरी समं निरंतरं चंदनकुंकुमोक्षितं ततस्ततो नूपुरवल्गुशिंजितैर्विसर्पती हेमलतेव सा बभौ
१७ विलोकयंती निरवद्यमात्मनः पदं ध्रुवं चाव्यभिचारिसद्गुणं गंधर्वयक्षासुरसिद्धचारणत्रैविष्टपेयादिषु नान्वविंद
त १८ नूनं तपो यस्य न मन्युनिर्जयो ज्ञानं क्वचित्तच्च न संगवर्जितम् क्वचिन्महांस्तस्य न कामनिर्जयः स ईश्वरः किं परतो
व्यपाश्रयः १९ धर्मः क्वचित्तत्र न भूतसौहृदं त्यागः क्वचित्तस्य न मुक्तिकारणं वीर्यं न पुंसोस्त्यजवेगनिष्कृतं न हि द्वितीयो
गुणसंगवर्जितः २० ॥ राम

शुकादिषु न मुक्तिकारणं त्यागः शिबिप्रभृतिषु पुंसः कार्तवीर्यादेर्वीर्यमस्ति अजवेगनिष्कृतं कालवेगेन परिहृतं तन्न भवति गु
णसंगवर्जितः सनकादिः द्वितीयः समवरोनहि समाधिनिष्ठत्वात् २०

चित्तप्रसादकत्वात् क्वचित्तदप्यस्ति दृश्यते ॥ तत्त्वं स्यादसौ सुखकं नमः शीलमंगलं नास्ति इंद्रियदमनशीलत्वात् क्वचित्तदप्यस्ति दिशाषु श्रुतो ग्रायफलस्य स्थैर्यं नवेद्यं दुर्ज्ञानं श्रीभगवद्दे
षणात्मकत्वात्तस्य मृत्युसंभवात् यदुक्तं च श्रीहरिइमार्कण्डेयादिव देहेंद्रियदमनाद्यभावात् शीलमंगलं चिरायुः फलं निःश्रेयसमभयमिति मस्ति
नवान्यःसर्वोत्तमः कश्चिद्दोषः तथापि सोप्यमंगलः समग्रानुवासाद्यमंगलवेष्टितः श्रीमुकुंदेरलक्ष्मीहृत्पाद कस्त्वित कश्चिन्त्वमंगल
:निरवद्यश्च सर्वमानद्धिकाततः प्रात्मारामत्वात् २१ एवंविमृश्यपरमानिरपेक्षमपि मुकुंदमेववरं ववृते तस्मिन् सर्वाभिचारिभिः सद्भिर्धर्म
ज्ञानादिभिर्गुणैर्निजैकाश्रयतयाचनिरपेक्ष्यमावरं सर्वोत्तमं तत्रदेवरगुणाश्रयं ह्युतिगुणातीतपाठान्तरेनिजैकाश्रयसद्गुणा

क्वचिच्चिरायुर्नहि शीलमंगलं क्वचित्तदप्यस्ति नवेद्यमायुषः यत्रोभयं कुत्रच सोप्यमंगलः सुमंगलः कश्च न कांक्षते
हि मां २१ एवं विमृश्याव्यभिचारिसद्गुणैर्वरं निजैकाश्रयतया गुणाश्रयं ववे वरं सर्वगुणैरपेक्षितं रमा मुकुंदं निरपेक्ष
मीप्सितं २२ तस्यांसदेशउशतीं नवकंजमालां माद्यन्मधुव्रतवरूथगिरोपघुष्टां तस्थौ निधाय निकटे तदुरः स्व
धाम सव्रीडहासविकसन्नयनेन याता २३ ॥ राम ॥ राम ॥

अयमयमेवार्थः अतएव स्वसेप्सितं किंच सर्वगुणैरणिमादिभिरपेक्षितं तदत्रमर्यभावः यद्यपि स्वयमात्मारामत्वेनान्यनिर
पेक्षः तथाप्याश्रिताय अणिमादिसिद्धीर्यथा नोपेक्षते तथा मामपि नोपेक्षेत तावत्तैवच तत्त्वेव यादृक् हृतार्थी स्यां किमन्यैः प्राहु
ते रितितमेव वृतवतीतितद्वाद २२ तस्यांसदेशे कमनीयां नवकंजमालां निधाय तदनुग्रहं स्पतीत्समाणा हसंतीतस्य निकटे
तस्थ्यौ कथंभूतां मालां माद्यतो ये मधुव्रताः तेषां वरूथस्य गिरा उपघुष्टां नादितां कथंभूता श्रीः सव्रीडहासेन विकसन्नयने तेन ततः
सा उरः स्वधाम याता मतीवृतः प्रतीत्समाणा तस्याविति यर्थः २३ ॥ राम ॥ राम ॥

दृष्टांतं विवृण्वन्निंद्रियादिलये न निर्विकारात्मोपलब्धिं दर्शयति अंडेष्विति पेशिषु जरायुजेषु तरुषु उद्भिज्जेषु अवि
निश्चितेषु स्वेदजेषु उपधावति अनुवर्तते एवं दृष्टांते निर्विकारत्वं प्रदर्श्य दार्ष्टांतिकेपि दर्शयति कथं तदेवात्मा स
विकार इव प्रतीयते यद्यदा जागरे इंद्रियगणः इदा च स्वप्ने तत्संस्कारवानहंकारः यदा तु प्रसुप्तं तदा तस्मिन्प्रसु
प्ते इंद्रियगणे सत्रालीने अहमि च अहंकारे च सन्ने कूटस्थः निर्विकार एवात्मा कुतः आशयमृते लिंगशरीरमुपाधिं वि

अंडेषु पेशिषु तरुष्वविनिश्चितेषु प्राणो हि जीवमुपधावति तत्र तत्र सन्ने यदिंद्रियगणेऽहमे
व प्रसुप्ते कूटस्थ आशयमृते तदनुस्मृतिर्नः ३९ ॥ ॥ ॥

नाविकारहेतोरुपाधेरभावादित्यर्थः ननु अहंकारपर्यंतस्य सर्वस्य लये शून्यमेवावशिष्यते न तु कूटस्थ आ
त्मा अत आह तदनुस्मृतिर्नः तस्य विशेषज्ञानशून्यस्य सुखात्मनः सुषुप्तिसाक्षिणः स्मृतिर्नोऽस्माकं भवति
एतावंतं कालं सुखमहमस्वाप्सं न किंचिदवेदिषमिति अतोऽननुभूतस्यास्मरणादस्त्येव सुषुप्तावात्मानुभवः
विषयसं[illegible]भावात्तु न स्पष्टतेति भावः तथा च श्रुतिः यद्वै तन्न पश्यति पश्यन्वै तद्द्रष्टव्यं न पश्यति नहि

मा १

भा ए.
१९

ननु यदि सकृज्ज्ञोत्तरस्यात्मानुभवो भवन् कथं पुनरपि संसारः स्यात् अविद्यातत्संस्काराणां विद्यमानत्वादिति चेत्
कदा न हि तत्त्रिवर्गकोऽनुभवो भवेत् अत आह यर्हीति विक्षेपणादि विहाय केवलमब्जनाभस्यैव चरणैषणया या ऊरुभ-
क्तिस्तया पुमान् चेतसो मलानि विधमेन्नाशयेत् चेत एव कर्तृ स्वगतानि मलानि तया भक्त्या क्षालयेत् तदा तस्मिन्
विशुद्धे चेतसि तस्मिन्साक्षादव्यवधानेनात्मतत्त्वमुपलभ्यते अमलयोर्दृशोरसत्योर्यथा सूर्य एव सिद्धः सवितृप्रकाश
इति ४० भक्तेः कर्मयोगाधीनत्वात्तं पृच्छति कर्मयोगमिति नैष्कर्म्यं कर्मनिवृत्तिसाध्यं ज्ञानं ४१ प्रश्नोत्तरमाह एवमिति।

यर्ह्यब्जनाभचरणैषणयोरुभक्त्या चेतोमलानि विधमेद्गुणकर्मजानि तस्मिन्विशुद्ध उपलभ्यत ।
आत्मतत्त्वं साक्षाद्यथामलदृशोः सवितृप्रकाशः ४० राजोवाच कर्मयोगं वदत नः पुरुषो येन संस्कृतः
विधूयेहाशु कर्माणि नैष्कर्म्यं विन्दते परं ४१ एवं प्रश्नमृषीन्पूर्वमपृच्छं पितुरन्तिके नाब्रुवन्ब्रह्मणः पु-
त्रास्तत्र कारणमुच्यतां ४२ आविर्होत्र उवाच कर्माकर्मविकर्मेति वेदवादो न लौकिकः वेदस्य चेश्वरात्म
त्वात्तत्र मुह्यन्ति सूरयः ४३

नरद्गूढत्वमर्थे पितुरिक्ष्वाकोर्ब्रह्मणः पुत्राः सनकादयः सर्वज्ञा अपि नाब्रुवन् ४२ गहनत्वद्योतनाय प्रश्नं संहितो।
यत्प्रश्नस्योत्तरमाह कर्मेति कर्म विहितं अकर्म तद्विपरीतं निषिद्धं विकर्म विगतं कर्म अविहिताकरणं ईश्वरात्मत
त्वात् ईश्वरात्मकत्वात् अपौरुषेयत्वादित्यर्थः पुंवाक्ये हि वक्तुरभिप्रायेणार्थज्ञानं शक्यं अपौरुषेये तु केवलं वा।।
क्यार्थविचारेणैव तात्पर्यावधारणं तच्च दुष्करमिति तत्र कर्मादौ विद्वांसोऽपि किमुतान्ये अतस्त्वं तदा बालत्वान्नेवाब्रुव

राम
१९

मुखेतः संमुखमासीनः प्रादिशब्देन भूतशुद्ध्यादि पिंडं देहं विशोध्य संन्यासैः कृतारक्षो येन सः ॥५०॥ अर्चादावेव द्रव्याणि शुद्ध्या
दीनि जलादिप्रोक्षणेन क्षितिं संमार्जनादिना आत्मानमव्यग्रतया लिंगं मूर्तिं अनुलेपक्षालनादिना निष्पाद्य योग्यानि कृत्वा ॥५१॥
पाद्यादिपात्राण्युपकल्प्य संनिधाप्य हृदि संपूजितं श्रीमूर्तौ ध्यात्वा ॥ हृदादिभिः हृदयशिरःशिखाकवचनेत्रास्त्रमंत्रैः मूलमंत्रे
ण चैतैर्वा कृतन्यासो मूलमंत्रेणार्चयेत ॥५२॥ अंगानि हृदयादीनि उपांगानि सुदर्शनादीनि तत्सहितां सपार्षदां सपरिवारां केरूपा

शुचिः सन्मुखमासीनः प्राणसंयमनादिभिः ॥ पिंडं विशोध्य संन्यासैः कृतरक्षोर्चयेद्धरिं ॥५०॥ अर्चादौ हृदये वापि
यथालब्धोपचारकैः ॥ द्रव्यक्षित्यात्मलिंगानि निष्पाद्य प्रोक्ष्य चासने ॥५१॥ पाद्यादीनुपकल्प्याथ संनिधाप्य समा
हितः ॥ हृदादिभिः कृतन्यासो मूलमंत्रेण चार्चयेत ॥५२॥ सांगोपांगां सपार्षदां तां तां मूर्तिं स्वमंत्रतः ॥ पाद्यार्घ्याच
मनीयाद्यैः स्नानवासोविभूषणैः ॥५३॥ गंधमाल्याक्षतस्रग्भिः धूपदीपोपहारकैः ॥ सांगं संपूज्य विधिवत् स्त
वैः स्तुत्वा नमेद्धरिं ॥५४॥ आत्मानं तन्मयं ध्यायन् मूर्तिं संपूजयेद्धरेः ॥ शेषमादाय शिरसा स्वधाम्न्युद्वास्य सत्कृ
तं ॥५५॥ एवमग्न्यर्कतोयादावतिथौ हृदये च यः ॥ यजतीश्वरमात्मानमचिरान्मुच्यते हि सः ॥५६॥ इति श्रीभागव
तेएकादशस्कंधे तृतीयोध्यायः ॥३॥

येरर्चयेत् ॥ नटादरूपायेति ॥ पाद्यपाद्येन मधुपर्कमाचमनेन च ॥५३॥ अक्षताः तिलकालंकारैर्न तु पूजायां ॥ नादैर्नैरर्चयेद्धि सनं
केतकामदैश्च वंडइति निषेधात् ॥ उपहाराः नैवेद्यं शेषं निर्माल्यं स्वधाम्नि स्वस्थाने देवं हृदि मूर्तिकरंडके उद्वास्य स्थापयित्वा पूजा
विधिं समापयेदिति शेषः ॥५४॥ तांत्रिकं कर्मयोगमुपसंहरति ॥ एवमिति ॥५५॥ ३ ॥ श्रीभावार्थप्रकाशके तृतीयः ॥३॥ ॥

श्री॰ चतर्थेत्ववतारेहाप्रश्नसेोत्तरमन्त्...वान् ॥ जयंतीनंदनोनाम्नाद्रुमिलोनवसप्तमः ॥ २ ॥ मूर्त्याभिमतयात्मन इत्यनेर
भा॰पु॰ नात्मनः प्रियमवतारज्ञानमपेक्षितं तथ्यास्तवैः स्तुत्वानमेद्धरिमित्युक्ते गुणकर्मज्ञानंचोपेदितं ॥ अतः एकैकतियानियानि
टी॰ नीतिकर्त्ताकरिष्यति ॥ त्वयाप्रष्टानिकालत्रयसंबंधिसकलावतारगुणकर्माणिकथयितमशक्यानि ॥ संक्षेपतस्तुकानि
२८ चित्कथयिष्यामीत्याह ॥ योवाइत्यादिना ॥ अनंतस्यमिथ्यन्गणयितमिच्छतियः ॥ सतुबालानामिवबुद्धिर्यस्यसमंदमतिः काले

राजोवाच ॥ ॥ यानियानीहकर्माणियैर्यैः स्वच्छंदजन्मभिः ॥ करोतिकर्त्तीवाहुर्विस्तानिब्रुवंतुनः ॥ २ ॥ द्रुमि
लउवाच ॥ ॥ योवाअनंतस्यगुणाननंताननुक्रमिष्यन्सतुबालबुद्धिः ॥ रजांसिभूमेर्गणयेत्कथंचित्काले
ननैवाखिलशक्तिधाम्नः ॥ ३ ॥ भूतैर्यदापंचभिरात्मसृष्टैः पुरंविराजंविरचय्यतस्मिन् ॥ स्वांशेनविष्टः पुरुषाभि
धानमवापनारायणआदिदेवः ॥ ४ ॥ ॥ राम ॥ ॥

नमहताकोपमहामतिः रजांसिगणयेदपि ॥ अखिलशक्तिधाम्नः ॥ सर्वशक्त्याश्रयस्यभगवतोगुणांस्तुनैवगणयेत् ॥ तथाच
श्रुतिः ॥ विष्णोर्नुकंवीर्याणिप्रवोचंयः पार्थिवानिविममेरजांसीत्यादि ॥ २ ॥ तत्रादौपुरुषावतारमाह ॥ भूतैरितियदास्वसृ
ष्टैर्भूतैर्विराजंब्रह्मांडंपुरंनिर्मायतस्मिन्स्वांशेनजीवेनयदाप्रविष्टः ॥ नारायणस्तदापुरुषाभिधानमवापलीलयाप्रवि राम
ष्टः नतुभोक्तृत्वेनप्रकृतगुणपरजीवस्यतत्रभोक्तृत्वात् ॥ ४ ॥ राम ॥ २८

त्रस्य गुणकर्मोत्पादद्वयेन ॥ यत्काय इति । यस्याधिष्ठेयः कायः एषः काये इति सप्तमी वा ॥ तत्र भूतसमष्टिव्यष्टिजीवानां ज्ञानकर्मे
न्द्रियाणि यस्य स्वतः स्वरूपभूतात्सर्वात्मनस्तद्भूतं ज्ञानं यस्य स्वतः सिद्धं ज्ञानमिति वा यस्य श्वसनतः प्राणात् बलं देहशक्तिः ओजः
इन्द्रियशक्तिः ईहा क्रिया यस्य सत्त्वादिभिः विश्वस्थितिलयोद्भवे आदिकर्ता ॥ आदिकर्तेत्यनेनैव तत्सर्वकर्तृत्वं नरमपि सूचितं ॥ ४ ॥ तद
र्पितं गुणावतारद्वारा चराचरसृष्ट्यादिकर्तृत्वमाह ॥ आदाविति यस्येति अनुषंगः ॥ यस्य रजसा अस्य जगतः सर्गकार्ये शत

यत्काय एष भुवनत्रयसन्निवेशो यस्येन्द्रियैस्तनुभृतामुभयेन्द्रियाणि ॥ ज्ञानं स्वतः श्वसनतो बलमोज ईहा सत्त्वा
दिभिः स्थितिलयोद्भव आदिकर्ता ॥ ४ ॥ आदावभूच्छतधृती रजसास्य सर्गे विष्णुः स्थितौ क्रतुपतिर्द्विजधर्मसेतुः
रुद्रोऽप्ययाय तमसा पुरुषः स आद्य इत्युद्भवस्थितिलयाः सततं प्रजासु ॥ ५ ॥ धर्मस्य दक्षदुहितर्यजनिष्ट मूर्त्यां ना
रायणो नर ऋषिप्रवरः प्रशान्तः ॥ नैष्कर्म्यलक्षणमुवाच चचार कर्म योऽद्यापि चास्त ऋषिवर्यनिषेवितांघ्रिः ॥ ६ ॥

धृतिर्ब्रह्माभूत् स्थितौ च विष्णुः यस्य सत्त्वेनेति शेषः क्रतुपतिः तत्फलदाता द्विजातीनां तद्धर्माणां च सेतुः पालक इत्यर्थः यस्य
तमसा अस्याप्ययाय रुद्रोऽभूत् इति एतैर्ब्रह्मादिभिः त्रिभिर्भूतैः प्रजासु उद्भवस्थितिलया भवन्ति ॥ स आद्यः पुरुष इत्यन्वयः ॥ ५ ॥ धर्म
स्य भार्यायां दक्षदुहितरि मूर्तिसंज्ञायां नारायणो नर इति मूर्तिद्वयेन अजनिष्ट जातः तच्चरितमाह ॥ नैष्कर्म्यम् आत्मस्वरूपं लक्ष
णं येन तत्कर्म निर्दोषरूपं वा उवाच नारदादिभ्यः स्वयं च चचार च ॥ योऽद्यापि कर्माचरन्नास्ते ॥ ऋषिवर्यैर्निषेविता अंघ्री यस्य सः ॥ ६ ॥
राम ॥ राम ॥ राम ॥ ॥ ॥ ॥ ॥ ॥ ॥

श्री॰ भा॰ स्कं॰ टी॰ १९

भगवदवतारत्वद्योतकं परमोपशमं दर्शयितुमितिहासमाह ॥ इंद्र इति त्रिभिः धाम स्थानं तपसा ग्रहीतुमिच्छतीति विशंक्य
तपोनाशाय कामं सपरिवारं प्रेषयामास सः कामः बदरीभिरुपाख्यायते यः ॥ तं तस्याश्रमं अप्सरोगणादिभिः सह गत्वा स्त्रीणां
प्रेक्षणान्येव इषवो बाणास्तैः न तस्य महिमानं जानाति ॥ अतन्महिज्ञः अक्रमं अपराधं अहो अहं धीर इति विस्मयो गर्वः त
द्रहितः ॥ एजमानान् शापभिया कंपमानान् ॥ भो विभो स मर्य हे देववध्वः मा भैष्ट बलिं आतिथ्यं तान्प्रार्थयन्ते इममस्माकं

इंद्रो विशंक्य मम धाम जिघृक्षतीति कामं न्ययुंक्त सगणं स बदर्युपाख्यं ॥ गत्वाप्सरोगणवसंतसुमंदवातैः
स्त्रीप्रेक्षणेषुभिरविध्यदतन्महिज्ञः ॥ ७ ॥ विज्ञाय शक्रकृतमक्रममादिदेवः प्राह प्रहस्य गतविस्मय एज
मानान् ॥ मा भैष्ट भो मदन मारुत देववध्वो गृह्णीत नो बलिमशून्यमिमं कुरुध्वं ॥ ८ ॥ इत्थं ब्रुवत्यभयदे नरदे
व देवाः सव्रीडनम्रशिरसः सघृणं तमूचुः ॥ नैतद्विभो त्वयि परेऽविकृते विचित्रं स्वारामधीरनिकरानतपाद
॥ पद्मे ॥ ९ ॥ राम ॥॥

माश्रमं ॥ आतिथ्याभावे शून्यप्रायः स्यादित्यर्थः ॥ ८ ॥ हे नरदेव ॥ अभयदे श्रीनारायणे इत्थं ब्रुवति सति ॥ देवाः कामादयः
सव्रीडानि नम्राणि शिरांसि येषां ते ॥ लज्जाभरेणैवावनतशिरस्का इत्यर्थः ॥ सघृणं यथा भवति ॥ कृपाजनयंत इत्यर्थः कृ
पायुक्तमिति वा ॥ मायातः परे अतो विकृते स्वारामाश्च ते धीराश्च तेषां निकरैरानतं पादपद्मं यस्य तस्मिन् ॥ ९ ॥ राम ॥॥ राम १९

त्वयि एतन्न स्यात् दोर्भञ्जकं पादिन विघ्नं अस्माकं चापराधाचरणं स्वभावत्वान्न विघ्नमित्याह ॥ त्वामिति ॥ त्वां सेवतां सेवमानानां स्वैरै
विघ्नादिभिः कृतान्तराया विघ्ना भवंति ॥ कस्मादित्यत आह ॥ स्वौकइति ॥ स्वस्थाने स्वर्गमतिक्रम्य परमं तत्वस्थानं व्रजतां नान्यस्य वा
मे सेवमानस्य आह ॥ वर्द्धि विघ्ने स्वभागान् नूत्रैर्दोज आदीन् बलीन् करान् कृषिकङ्गवराजेशादिभ्यो ददतः प्रयच्छतः ॥ तर्हि किमङ्गको
विघ्नेभ्यः पतिनेत्याह ॥ धन्न इति ॥ घटीति निश्चये ॥ यतस्त्वं सर्वस्वराधीश्वरो विनारत्नकः ॥ अतो मे विघ्नानां भूम्यां परमं घ्नं धन्नेकृतः उ
नः त्वयि विघ्नशंके निभावः ॥ २ ॥ वरभक्तानां तत्केवलेन तपश्चरतां त्वयीशतिः ॥ अस्माकं चाव शं यांति क्रोधस्य वा ॥ तत्रास्मद्दशाः कामो

त्वां सेवतां स्वरकृतां वद्दवों तरायाः स्वौको विलंघ्य परमं व्रजतां पदं ते ॥ नान्यस्य वर्द्धि विबलीन् ददतः स्वभागा
न् धन्नेपरं त्वमवितायदि विघ्नहर्षि ॥ २ ॥ त्वद्दृष्टिकालगुणमारुतनैकशैत्यान स्मानपारजलधीनतितीर्थकेवि
त क्रोधस्य यांति विफलस्य वशं पटेगाः ॥ मज्जंति दुस्तरतपश्चरणैर्यजंति ॥ ३ ॥ राम ॥ ॥ ॥

पभोगमपि नावरत्तु भवंति क्रोधस्य वशाः ३ नरति मंदा इत्याह ॥ त्वद्दृष्टिति त्वच्छत्रइव त्रिकालगुणाच्छुशीतो सुवर्षा गिमा
रुतश्चशैलविद्यावाजेकः जिन भोगाच्छु शैत्याः ३ शीतापभोगाच्छुष्णतानसमानपार जलधि हपान तितीर्थविलंघ्यगोच्छदेम
ज्जंति ॥ ज्जतः यतः क्रोधस्य विफलस्य वशं यांति गतेति किं च नले मज्जतो घ्याविवशाः सं तोमस्तकारोपितं भारमुत्सृजंति ॥ त
स्या दृष्यानमोता यन वभोगाच्छ्राय्यादिना उत्सृजेतपउत्सृजंति ॥ हे भगवन् सर्वे साधनं कृपा अपि त्वत्सेवादीनाः संसारं नतरा

स्त्रियः योगनिर्मिताः स्त्रीः शुश्रूषां कुर्वतीः स्वर्चिताः सुष्ठुचालंकृताः तेषां स्वलावण्यादिदर्पोपशमाय दर्शयामास ॥१२॥ रू
पिणीः मूर्तिमतीः श्रीरिवताः स्त्रीर्दृष्ट्वा तासां तद्रूपसौदार्येण महत्त्वेन हृता श्रीः कांतिर्येषां ते ॥१३॥ वृंध्वं वृणीध्वं वा वयं
वराकाः कुचेमाः इति चेत्तत्राह ॥ सवर्णां समानरूपां नेकाप्यस्मदनुरूपेति चेत्तमाभवत् ॥ तथापि स्वर्गस्य भूषणरूपां
णां ॥ सुरवंदिनः देवभृत्याः ॥१५॥ इंद्रायेइंद्रं प्रतिनारायणबलमूचुः ॥ प्राक्षः तत्रास तत्रासं प्राप्तः विस्मितास्तत्र विस्मि

इति प्रगृणतां तेषां स्त्रियो त्यद्भुतदर्शनाः ॥ दर्शयामास शुश्रूषां स्वर्चिताः कुर्वतीर्विभुः ॥१२॥ ते देवानुच
रा दृष्ट्वा स्त्रियः श्रीरिवरूपिणीः ॥ गंधेन मुमुहुस्तासां रूपौदार्यहतश्रियः ॥१३॥ तानाह देवदेवेशः प्र
णतान्प्रहसन्निव ॥ आसामेकतमां वृंध्वं सवर्णां स्वर्गभूषणां ॥१४॥ ॐ इत्यादेशमादाय नत्वा तं सुरवंदिनः
उर्वशीमप्सरःश्रेष्ठां पुरस्कृत्य दिवं ययुः ॥१५॥ इंद्रायानम्य सदसि शृण्वतां त्रिदिवौकसां ॥ ऊचुर्नारायण
बलं शक्रस्तत्रास विस्मितः ॥१६॥ हंसस्वरूप्यवदद्च्युत आत्मयोगं दत्तः कुमार ऋषभो भगवान्पिता नः ॥ विष्णुः
शिवाय जगतां कलयावतीर्णस्तेनाहृता मधुभिदा श्रुतयो हयास्ये ॥ १७ ॥॥॥ रामाय नमः ॥॥ ॥१७॥

तत्रासेति वा ॥१६॥ अन्यानप्यवतारांस्तच्चरितानि चाह ॥ हंसस्वरूपीति दत्तः दत्तात्रेयः कुमारः सनकादिः नः पिता ऋ
षभः च ॥ ॥ विष्णुरेव कलयावतीर्णः सन्नात्मयोगमवदत् ॥ तेन विष्णुना हयास्ये हयग्रीवावतारे मधुभि
दा समनाततः पातालतः सनातनाः श्रुतयः आहृताः ॥१७॥ रामाय नमो नमः ॥ ॥ राम ॥ ॥१७॥

हृत्वा एषीरो वधयघट्टगमाः क्रौडेवनादावुनारे ग्रादात्नगनेरमस्तुवत्नमोचयामास एवमादौ ॥ यज्ञावतारनामा क्लिन्नविस्तः
शिवायजरनातांकलयावतीणड्रत्यनुवतेनीय ॥ सेलन्वतःस्तुतिंऊवींणानृसखीनूबालखिल्यान् कश्यपार्थ्यसमिधाहरतोगा
भेदेनिमग्नानिंद्रेणापदस्तितानुधृत्वा पद्मेमोचयत ॥ तमसिनुस्तदत्वायांप्रविष्टंमोचयामास ॥ भ्रस्तरगदेपिदितानिरुद्धाया।

नुप्तेप्यवेमतुरिलैायधयस्यमात्वक्रौडेहेतादितिजउद्धरतांभसःसा ॥ कौर्मेधृतोद्रिमृतोन्मथनेस्वपृष्ठेषुग्रा।
ह्रान्मपङ्क्रसिभराजमग्नंवदांते ॥ २७ ॥ सेत्तन्वतोक्षिंपतितान्नृश्रमणानृषीश्च शक्रे च हृत्रवधतस्मसिमविष्टं
देवस्त्रियोसुरगृहेपिहिताश्चनाथाजघ्नेसुरेंद्रभयायसतांनृसिंहे ॥ २८ ॥ देवासुरेषुयुधि च दैत्यपतीन्सुरार्थे।
हत्वांतरेषुभुवनान्यदधात्कलाभिः ॥ भूत्वाथवामनइमामहरद्बलेःसांयाच्ञाछलेनसमदाददितेःसुते।
भ्यः ॥ २९ ॥ निःक्षत्रियांमकृतगां च त्रिःसप्तकृत्वो रामस्तु हैहयकुलाप्ययभार्गवाग्निः ॥ सोब्धिंबबंधदशवक्त्रम
हन्नलंकेसीतापतिर्जयतिलोकमलघ्नकीर्तिः ॥ ३० ॥ राम ॥ ॥ ॥ राम ॥ ॥

भूर्तिभिर्भुवनानिअदधात् अपालयत्तु इमांस्याम सम
देवस्त्रियासाध्याश्चवदनेकावतारैः ॥ अंतरेषुसर्वेमन्वंतरेषुकलाभिर्मूर्तिभिर्भुवनानिश्रदधात् अपालयत् इमांस्याम सम
दाहदंडा ॥ हैहया नांकुलस्याप्ययायभार्गवह्नेपाग्निः ॥ सरामोदाशरथिः सत्रु सलंकंलेकायांस्थितंसचजयतिवर्तमानका
लीनो ७ अवतारउत्पत्तिः ॥ ३१ ॥ ॥ ॥

श्री· भा· ए· टी· २१

भाविनं रामकृष्णावतारमाह ॥ भूमेरिति बुद्धावतारमाह वादैरिति ॥ अतदर्हान् यज्ञानर्हांश्च दैत्यान् विमोहयिष्यति कल्क्यव
तारमाह शूद्रानिति निहनिष्यति ॥ २३ ॥ इति श्रीभागवतटीकायामेकादशे चतुर्थोऽध्यायः ॥ ४ ॥ पंचमे भक्तिहीनानां कानिर्
ष्ठा को युगेयुगे ॥ सृज्याविधिरिति प्रश्नद्वयस्योत्तरमुच्यते ॥ त्वां सेवतां सुरकृता बहवोंतराया इत्यनेन श्रीहरिभक्ता विघ्नमूर्ध्नि
पदं दत्वा परां गतिं यांति ॥ अभक्तानां तु विघ्ना न भवंतीत्युक्ते तर्हि तेषां का गतिर्भवतीति पृच्छति भगवंतमिति द्वे आत्मवित्तमाः वृद्धो भक्त

भूमेर्भरावतरणाय यदुष्वजन्मा जातः करिष्यति सुरैरपि दुष्कराणि ॥ वादैर्विमोहयति यज्ञकृतोऽतदर्हान् ॥ शू
द्रान्कलौ क्षितिभुजो न्यहनिष्यदंते ॥ २२ ॥ एवंविधानि कर्माणि जन्मानि च जगत्पतेः ॥ भूरीणि भूरियशसो व
र्णितानि महाभुज ॥ २३ ॥ इति श्रीभागवते महापुराणे एकादशस्कंधे चतुर्थोऽध्यायः ॥ ४ ॥ राजोवाच ॥
भगवंतं हरिं प्रायो न भजंत्यात्मवित्तमाः ॥ तेषामशांतकामानां कानिष्ठाविजितात्मनां ॥ १ ॥ श्रीचमस उवाच
मुखबाहूरुपादेभ्यः पुरुषस्याश्रमैः सह ॥ चत्वारो जज्ञिरे वर्णा गुणैर्विप्रादयः पृथक् ॥ २ ॥ य एषां पुरुषं साक्षा
दात्मप्रभवमीश्वरम् ॥ न भजंत्यवजानंति स्थानाद्भ्रष्टाः पतंत्यधः ॥ ३ ॥ ॥ राम ॥ ॥ राम ॥

अविजितात्मनामत एवाशांतकामानां का निष्ठा किं फलमित्यर्थः ॥ स्वजनकस्य गुरोर्भगवतो नादरात् भ्रष्टा दुर्गतिं यां
तीति वक्तुं भगवतः सकाशाद्वर्णाश्रमाणामुत्पत्तिमाह ॥ मुखेति गुणैः सत्वेन विप्रः सत्वरजोभ्यां क्षत्रियः रजस्तमोभ्यां वैश्
यः तमसा शूद्र इति ॥ एषां मध्ये ये ज्ञात्वा न भजंति ये च ज्ञात्वाप्यवजानंति ॥ आत्मनः प्रभवो जन्म यस्मात्तं वदभजने कृतघ्नता
मप्याह ईश्वरमिति ॥ स्थानाद्वर्णाश्रमाद्भ्रष्टाः ॥ ३ ॥ राम २१

तत्र येऽज्ञाः ते भगवद्विधानामनुग्राह्या इत्याह ॥ दूर इति ॥ दूरे हरिकथाश्रवणं येषां ते ॥ अत एव दूरे च अच्युतकीर्तनं येषां ते दू-
रे अच्युतकीर्तनाश्चेति वा ॥ ज्ञानलवदुर्विदग्धास्तु विविक्तिस्तान्त्वाद उपेक्ष्या इत्याशयेनाह ॥ विप्रा इति ॥ श्रौतेन उपनयनाख्ये-
न उपलक्षणमेतत् ॥ अध्ययनादिनापि हरेः पदांतिकं न इह जन्मनि माधिका वेदाः प्रामाण्यपि मुह्यंति ॥ कर्मफलेषु सज्जंते ॥ कुतः आ-
म्नाये वेदे अर्थवादाः अर्थवादाः ते मोहकत्वाद्या विद्यंते येषां ते ॥ तदुक्तं गीतासु ॥ यामिमां पुष्पितां वाचं प्रवदंत्यविपश्चितः ॥ वेदवा-
दरताः पार्थ नान्यदस्तीति वादिन इत्यादिना भक्तिमार्गरोधाय ॥ तेषां मोहं प्रपंचयन्निंदति ॥ कर्मणीत्यादिना ॥ अकोविदाः

दूरे हरिकथाः केचिद्दूरे चाच्युतकीर्तनाः ॥ स्त्रियः शूद्रादयश्चैव तेऽनुकंप्या भवादृशां ॥ ४ ॥ विप्रा राजन्य-
वा वैश्या हरेः प्राप्ताः पदांतिकं ॥ श्रौतेन जन्मनाथापि मुह्यंत्याम्नायवादिनः ॥ ५ ॥ कर्मण्यकोविदाः स्तब्धा मू-
र्खाः पंडितमानिनः ॥ वदंति चाटुकान्मूढा यया माध्व्या गिरोत्सुकाः ॥ ६ ॥ ६ ॥ ॥ ॥

अशक्ताः
यथावद्बंधकं न भवति ॥ तथा कर्मेमज्ञाः नवाभिज्ञान् इति यतस्तत्त्वाअनम्राः स्तब्धाः सत्त्वेदेन ॥ यतो मूर्खाश्च अपि पंडिता वय-
मिति मानवंतः ॥ अत अपाम सोममममृता अभूम ॥ अक्षय्यं ह वै चातुर्मास्ययाजिनः सुकृतं भवति ॥ यत्र नेत्यलं न वशीतस्या-
न्नम्रानिर्नोप्यरातय इत्यादिकया यया माध्व्या गिरोत्सुकाः संतो मूढा अलया चाटुकान् अप्सरोभिः सह विचरिष्याम इत्या-
दिभिर्यान शह्णान्वदंति ॥ ९ ॥ ॥ ८ ॥ ॥ राम ॥ राम ॥

श्री·
भा· ए·
टी·
११

किंच तेषां कर्माभिनिवेशात्कामक्रोधदंभादयो वर्द्धंत इत्याह ॥ रजसेति रजसा घोरा अभिचारादिसंकल्पा येषां ते अहिवन्मन्यवो येषां ते ॥ कामुकत्वं प्रपंचयति वदंतीति ॥ उपासिताः स्त्रियो यैः न तु वृद्धाः ते मैथुन्यं मिथुनसुखमेव परं न त्वातिथ्यादि येषु एवंभूतेषु गृहेषु आशिषो वदंति ॥ इदमद्य मया लब्धमिमं प्राप्स्ये मनोरथं ॥ इदमस्तीदमपि मे भविष्यति पुनर्धनमित्याशिषः ॥ दांभिकत्वं प्रपंचयति यजंतीति ॥ असृष्टान्नविधानदक्षिणं न सृष्टाः न संपादिता अन्नविधान

रजसा घोरसंकल्पाः कामुका अहिमन्यवः ॥ दांभिका मानिनः पापा विहसंत्यच्युतप्रियान् ॥ ७ ॥ वदंति तेऽन्योन्यमुपासितस्त्रियो गृहेषु मैथुन्यपरेषु चाशिषः ॥ यजंत्यसृष्टान्नविधानदक्षिणं वृत्त्यै परं घ्नंति पशूनतद्विदः ॥ ८ ॥ श्रिया विभूत्याभिजनेन विद्यया त्यागेन रूपेण बलेन कर्मणा ॥ जातस्मयेनांधधियः सहेश्वरान् सतोऽवमन्यंति हरिप्रियान्खलाः ॥ ९ ॥ सर्वेषु शश्वत्तनुभृत्स्ववस्थितं यथा खमात्मानमभीष्टमीश्वरं वेदोपगीतं च न शृण्वतेऽबुधा मनोरथानां प्रवदंति वार्तया ॥ १० ॥ ॥ ॥ रामायनमः ॥ ॥ ॥ राम ॥

दक्षिणं यथा स्यात्तथा यजंति तदा च वृत्त्यै जीविकार्थं परं केवलं पशून्घ्नंति अतद्विदः हिंसादोषानभिज्ञाः मानित्वं प्रपंचयति ॥ श्रियेति ॥ श्रिया धनादिसंपदा विभूत्या धर्मपुत्रादिना जातो यः स्मयो गर्वस्तेन अंधा धीर्येषां ते ईश्वरसहितान् सतः अवमन्यंते किंच ॥ एवं वर्तमानास्ते वेदतत्त्वं यदस्फुटमपि न जानंतीत्याह ॥ सर्वेष्विति केन रूपेणावस्थितं तत्राह आत्मानमीश्वरं आत्मत्वेनेश्वरतया चावस्थितं ॥ एवमप्यसंगतामाह ॥ यथा खं प्रकाशार्थतामाह अभीष्टमस्फुटत्वमाह वेदोपगीतं चेति ॥ न तु ततः यतो म

राम
११

नानासाधनसाध्यक्रियायामेकसाधनप्राप्तावप्राप्तस्यापरसाधनस्य प्रापको विधिर्नियमविधिः यथाहुः विधिरत्यन्तमप्राप्तौ नियमः पाक्षिके सति तत्र चान्य
त्र च प्राप्तौ परिसंख्येति गीयते इति अस्यार्थः प्रमाणान्तरेणाप्राप्तस्य प्रापको विधिरपूर्वविधिः यथा यजेत स्वर्गकाम इत्यादिः स्वर्गार्थकयागस्य प्रमाणा
न्तरेणाप्राप्तस्यानेन विधानात् पक्षेऽप्राप्तस्य प्रापको विधिर्नियमविधिः यथा व्रीहीनवहन्तीत्यादिः कथमस्य पक्षेऽप्राप्तप्रापकत्वमिति चेदित्थं

ननु व्यवायादीनामपि ऋतौ भार्यामुपेयात् ऋतुशेषं भक्तयेदित्यादिना विहितत्वात्किमेवं निंद्यते अत आह लोक इति व्यवायः स्त्रीसंगः नित्
याः रागतः एव नित्यप्राप्ताः ॥ जंतोः प्राणिमात्रस्य ॥ अतस्तत्र तासु चोदना विधिर्नास्ति न तु ऋतावुपेयादित्यादि विधिर्दर्शितः ॥ सत्यं न त्वयम
पूर्वविधिः ॥ रागतः प्राप्तत्वात् ॥ किंतु नियमविधिरूपेणापि ताभ्यामभ्यनुज्ञामात्रं क्रियते तदाह व्यवस्थितिरिति ॥ तेषु व्यवायादिषु केः वि
वाहयज्ञसुराग्रहैः ॥ विवाहविषय एव व्यवायः कार्यः ॥ यज्ञ एवामिषसेवा सौत्रामण्यां सुराग्रहान्गृह्णातीति श्रुतेस्तत्रैव मद्यसेवे

लोके व्यवायामिषमद्यसेवा नित्यास्तु जंतोर्न हि तत्र चोदना ॥ व्यवस्थितिस्तेषु
विवाहयज्ञसुराग्रहैरासु निवृत्तिरिष्टा ॥११॥ ॥ रामाय नमः ॥ ॥११॥

ति नियमः क्रियते ॥ ननु च नियमपक्षे प्यावश्यकत्वान्न निंदा युक्ता अत आह ॥ आसु निवृत्तिरिष्टेति अयं भावः ॥ नायं नियमवि
धिरपि नित्यप्राप्तत्वात् ॥ अतो निवृत्तिः परिसंख्येव व्यवायामिषमद्यसेवासु विधिविषयः कथं तर्हि व्यवस्थितिरित्युक्तं उच्यते न तावत्परिसंख्याविधिना श्रुत्या निवृत्तिरुच्यते तथा सति स्वार्थत्यागः परार्थकल्पना प्राप्तबाधश्चेति दोषत्रयं स्यात् ॥ अतः क्वचित्प्राप्य
तोप्यर्थस्य प्रापणमनर्थकमित्यपूर्वविधिद्वारा तु निवृत्तिः ॥ फलतो भवति ॥ तद्यथा ॥ ॥ ॥ राम ॥ ॥ ॥ राम ॥ ॥ ॥

वनखभक्षणापरं तस्य रागतः प्राप्तत्वात् नापि नियमपरं पंचनखाऽपंचनखभक्षणस्य युगपत्प्राप्तेः पक्षेऽप्राप्त्यभावात् अत इदं अपंचनख
भक्षणनिवृत्तिपरमिति भवति परिसंख्या सा च द्विधा श्रौती लाक्षणिकी चेति तत्रात्रैव यंनीति श्रौती परिसंख्या एवकारेण एवमाना
ति पैतृकोऽत्र ब्याह्वे नेरमित्यानात् पंचपंचनखा भक्ष्या इति लाक्षणिकी ... निवृत्ति ... भावात् अत एवैषा त्रिदोषग्रस्ता दोषत्रयं
च श्रुतहानिरश्रुतकल्पना प्राप्तबाधश्चेति श्रुतस्य पंचनखभक्षणस्य हानात् अश्रुताया अपंचनखभक्षणनिवृत्तेः कल्पनात् प्राप्तस्य चापंचनखभक्ष

इमामगृभ्णन्रशनामृतस्येत्यश्वाभिधानीमादत्त इत्यश्वरशनालिंगतो गर्दभाश्वाभिधानीरशनाद्वये प्राप्ते तो मंत्रस्या
पूर्वविधिद्वारापरिसंख्योच्यते॥ यथोक्तं मंत्रवार्त्तिके॥ अप्राप्तविधिरेवायमतो मंत्रः स निश्चितः परिसंख्याफले नो ज्ञान
विशेषः पुनः स्मृतेरिति॥ क्वचित्तु रागतो नित्यप्राप्तस्याप्राप्तांशपूरणात्मकतया नियमफलस्याप्यभावान्नियमविधि
द्वाराफलतः परिसंख्या भवति यथा पंच पंचनखा भक्ष्या इति॥ तथा रागतो नित्यवत्प्राप्तस्य व्यवायादेर्विवाहादिनियम
नाभ्यनुज्ञाद्वारापरिसंख्यैवेति॥ ननु च यद्यभ्यनुज्ञामात्रमेतत्स्यात् तर्हि ऋतुकालातिरिक्तेपि भार्यासंनिधौ नोपगच्छति॥ घोरायां भ्रूणहत्या
यां प्रपद्यते नात्र संशय इत्यादिदोषश्रवणात् न स्यात् नैष दोषः मनसि कामे सत्यपि तस्यामृतुस्नानादि पातित्यावतामनुपगच्छतो दोषश्रवा
णोपपत्तेरिति सर्वमनवद्यं दोषरहितं वेदं ज्ञातव्यमित्यर्थः॥ तदेवं व्यवायादिमनोरथाकुलितत्वादभीष्टमात्मानं न स्मृत्वा च सभिद्रित
धनं च धर्मैकफलं यतो वै ज्ञानं सविज्ञानमनुप्रशांति॥ गृहेषु युंजंति कलेवरस्य मृत्युं न पश्यंति दुरंतवीर्यं॥१४॥ यद्घ्रा
णभक्षो विहितः सुरायाः तथा पशोरालभनं न हिंसा॥ एवं व्यवायः प्रजया न रत्या इमं विशुद्धं न विदुः स्वधर्मं॥१५॥
मतं इदानीं धनस्यापि धर्मद्वारा परमात्मप्रापकस्य दृष्टोपभोगार्थे विनियोगमन्वात्मज्ञानुगंधोपीत्याह धनं चेति धर्म एव फलम
पवैकाः फलं यस्य तत् अतः यतः धर्मात्तु सविज्ञानं सपरोक्षज्ञानसहितं दृष्टोपयोगं ज्ञानं भवति कथंभूतं अनुप्रशांति॥ अनुअनंतरमेव प्रक
ष्टा प्रशांतिः॥ निर्वाणलक्षणा यस्मात्तत्॥ एवंभूतं धनं गृहेषु देहादार्थं युंजंति॥१४॥ किं च व्यवस्थायापि व्यवायाद्यभ्यनुज्ञानं न यथेष्ट
ष्टं अपितु नमयैवेत्याह यदिति यस्मात्सुरायाः ॥ घ्राणभक्षः अवघ्राणं स एव विहितः न पानं॥ तथा पशोरपालभनमेव विहि
तं न तु हिंसा॥ यावदृवि
हितं न तु हिंसा॥ अयमर्थः देवतोद्देशेन यत्पशुहननं तदालभनं॥ वायव्यं श्वेतमजमालभेतेत्यादिश्रुतेः॥ न तु हिंसा॥ यावद्वि
हिता हिंसा सा न हिंसेति कीर्त्यत इति वचनात्॥ भक्षणोद्देशेन तु क्रियमाणा लौकिकं हननं तु हिंसैव॥ अतस्त्वालभनमेव विहितं
न तु हिंसा अतो न यथेष्टभक्षणाभ्यनुज्ञेत्यर्थः॥ व्यवायोपि प्रजया निमित्तभूतया न तु रत्या अतो मनोरथवादिन इमं विशुद्धं स्वधर्मं न

राम
२३

एवंभगवत्याशास्त्रवोनांबहुदोषतांप्रपंच्यतन्निषेधंप्रपंचयतिपंचभिः ॥ येत्विति अन्येवंविदः ॥ नएवंधर्मेविंदंतियेतेविसृष्टाः
निःशंकाः अनेनमनोरथोभविष्यतीतिविसृष्टास्तावा ॥ इदानींतत्रपोषणेनवातैः पश्वभिर्विसृष्टाः तेपशवः श्वेत्यस्त्रवचनात्
खादंतिमांसभक्षयितामुत्रयस्यमांसमिहाद्म्यहम् ॥ एतन्मांसस्यमांसत्वंप्रवदंतिमनीषिणःइतिवचनात् ॥२४॥ अभिचारादिना
हिंसंतः मृतकेदेहे ॥ सानुबंधेपुत्रादिसहिते ॥२५॥ अज्ञाः तत्वज्ञैरनुकंपिताः तरंतितत्वज्ञास्तत्स्वतः ॥ येनज्ञात्वेतमज्ञाः नेचतत्

येत्वनेवंविदोसंतस्तब्धाः सदभिमानिनः ॥ पशून्द्रुह्यंतिविसृब्धाः प्रेत्यखादंतितेचतान् ॥२४॥ द्विषंतः परका
येष्वात्मानंहरिमीश्वरम् ॥ मृतकेसानुबंधेस्मिन्बद्धस्नेहाः पतंत्यधः ॥२५॥ येकैवल्यमसंप्राप्तायेनाती
ताश्चमूढताम् ॥ त्रैवर्गिकाह्यक्षणिकाआत्मानंघातयंतिते ॥२६॥ एतआत्महनोशांताअज्ञानेज्ञानमानिनः
सीदंत्यकृतकृत्यावैकालध्वस्तमनोरथाः ॥२७॥ हित्वात्यायासरचितागृहापत्यसुहृच्छ्रियः ॥ तमोविशंत्यनिच्छं
तोवासुदेवपराङ्मुखाः ॥२८॥ ॥ राम ॥

त्वज्ञाः तेंतरालवर्तिनः पतंतीत्याहयइति कैवल्यंतत्वज्ञानमसंप्राप्ताः ॥ अत्रहेतुः त्रिवर्गप्रधानाः अक्षणिकाः उपशांति
रहिताः देहादिस्थैर्यबुद्धयोवातेस्वयमेवस्वात्मानंघातयंति ॥२६॥ तदाहएतइति आत्महनः आत्मापह्नवकर्तारः अ
ज्ञानेकर्मणि ॥ तथाचश्रुतिः ॥ असूर्यानामतेलोकाअंधेनतमसावृताः ॥ तांस्तेप्रेत्यापिगच्छंतियेकेचात्महनोजनाः इति
२७ ॥ गृहदारापत्यसुहृच्छ्रियस्ताहित्वा ॥ ॥ ॥२८॥ ॥ ॥ श्रीरामायनमोनमः ॥ ॥ राम ॥ ॥ राम

श्री॰ भा॰ ए॰ टी॰ २४

तदेवं भगवद्भक्तिरेव कर्तव्येति स्थिते॥ तत्र विशेषं पृच्छति कस्मिन्काले इति॥ किंवर्णः कीदृग्वर्णवान् कीदृशः कीदृगाका
रः केन वा नाम्ना केन वा विधिना॥ एषु कृतादिकालेषु नानाप्रकारा वर्णाभिधाकारा यस्य सः॥ नानैव विधिना विविधेनैव मा

नू२

श्रीराजोवाच॥ कस्मिन्काले स भगवान्किंवर्णः कीदृशो नृभिः॥ नाम्ना वा केन विधिना एज्यते तदिहोच्यतां॥१९॥
करभाजन उवाच॥ कृतं त्रेता द्वापरं च कलिरित्येषु केशवः॥ नानावर्णाभिधाकारो नानैव विधिनेज्यते॥२०॥
कृते शुक्लश्चतुर्बाहुर्जटिलो वल्कलाम्बरः॥ कृष्णाजिनोपवीताक्षान्बिभ्रद्दंडकमंडलू॥२१॥ मनुष्यास्तु तदा
शान्ता निर्वैराः सुहृदः समाः॥ यजंति तपसा देवं शमेन च दमेन च॥२२॥ हंसः सुपर्णो वैकुंठो धर्मो योगेश्वरोऽम
लः ईश्वरः पुरुषोऽव्यक्तः परमात्मेति गीयते॥२३॥ त्रेतायां रक्तवर्णोऽसौ चतुर्बाहुस्त्रिमेखलः॥ हिरण्यकेश
स्त्रय्यात्मा स्रुक्स्रुवाद्युपलक्षणः॥२४॥ तं तदा मनुजा देवं सर्वदेवमयं हरिम्॥ यजंति विद्यया त्रय्या धर्मिष्ठा
ब्रह्मवादिनः॥२५॥ राम॥

गेण॥१९॥ तदेव वर्णादिचतुष्टयमाह कृत इत्यादिना॥२०॥ कृष्णाजिनादीन् बिभ्रदिति॥२१॥ ब्रह्मचारिवेषो दर्शितः तपसा ध्या
नेन॥२२॥ त्रिगुणादीनां राभूतामेखला यस्य सः यज्ञमूर्तिः हिरण्यकेशः पिशंगकेशः॥२४॥ त्रय्या विद्यया वेदत्रयोक्तकर्म राम २४

देगृहमेधिनि अपि वा किं वा गृहेषु धर्मादेः किंचिदमंगलमिति काकाप्रश्नः यत्र येषु गृहेषु अयोगिनामपि योगः स्वधर्मादिना योगफलं भ
वति ५ किं वा तया अर्जिता एव गृहाद्याताः ६ नार्चिताः संतो निर्गच्छंतीति फेरुराजः सृगालनाथः तदीयविवरतुल्याः ७ वेलायां होमका
लिकर्हिचिन्नहुताः ८ किं भवत्या आत्मानं मे स्वस्थ अप्रकृतिस्थं लक्षणेः तुच्छान्यादिभिर्लक्षयामि १० अस्वास्थ्यकारणमन्यद स्तौ

अपि वाऽमंगलं किंचिद्गृहेषु गृहमेधिनि धर्मस्यार्थस्य कामस्य यत्र योगो ह्ययोगिनां ५ अपि वातिथयोऽभ्येत्य कुटुंबासक्त
यातया गृहादर्जिता याताः प्रत्युत्थानेन वा क्वचित् ६ गृहेषु येष्वतिथयो नार्चिताः सलिलैरपि यदि निर्यांति ते नूनं फेरु
राजगृहोपमाः ७ अप्यग्नयस्तु वेलायां न हुता हविषा सति त्वयोद्विग्नधिया भद्रे प्रोषिते मयि कर्हिचित् ८ यत्पूजया कामदु
घान्याति लोकान्गृहान्वितः ब्राह्मणोऽग्निश्च वै विष्णोः सर्वदेवात्मनो मुखं ९ अपि सर्वे कुशलिनः तव पुत्रा मनस्विनि लक्ष
येऽस्वस्थमात्मानं भवत्या लक्षणैरहं १० अदितिः। भद्रं द्विजगवां ब्रह्मन्धर्मस्यास्य जनस्य च त्रिवर्गस्य परं क्षेत्रं गृहमेधिन्गृ
हा इमे ११ अग्नयोऽतिथयो भृत्या भिक्षवो ये च लिप्सवः सर्वं भगवतो ब्रह्मन्ननुध्यानान्न रिष्यति १२ को नु मे भगवन्कामो न सं
पद्येत मानसः यस्या भवान्प्रजाध्यक्ष एवं धर्मान्प्रभाषते १३ तवैव मारीच मनःशरीरजाः प्रजा इमाः सत्त्वरजस्तमोजुषः स
मो भवांस्तास्वसुरादिषु प्रभो तथापि भक्तान्भजते महेश्वरः १४ तस्मादीश भजंत्या मे श्रेयश्चिंतय सुव्रत हृतश्रियो हृतस्था
नान्सपत्नैः पाहि नः प्रभो १५ परैर्विवासिता साहं मग्ना व्यसनसागरे ऐश्वर्यं श्रीर्यशः स्थानं हृतानि प्रबलैर्मम १६

तिवकुं तत्र गृहमभद्रादि केनास्तीत्याह भद्रमिति द्वाभ्यां इमे गृहाः त्रिवर्गस्य परं क्षेत्रं उत्पत्तिस्थानं त्रिवर्गो पि यथावद्वर्तत इत्यर्थः भगवतस्त्व
वानुध्यानं यन्मया क्रियते तस्मात् अग्नयोऽतिथय इत्यादि सर्वं न रिष्यति न क्षीयते ११ सर्वं टीका १२ प्रश्नं तं विज्ञापयति को न्विति १३ ॥
संपाद्य कामम् आह तवैवेति चतुर्भिः १४ सपत्नैर्दैत्यैर्हृता श्रीर्येषां हृतं स्थानं येषामिति पुत्रानभिप्रायेण बहुवचनं १५

देगृहमेधिनि अपिवाकिंवागृहेषुधर्मादेः किंचिदकुशलमितिकाक्काप्रश्नः यत्रयेषुगृहेषु अयोगिनामपियोगः स्वधर्मादिनायोगफलंभ
वति ५ किंवात्वयाऽपूजिताएवगृहाद्याताः ६ नार्चिताः संतोनिर्गछंतीति फेरुराजः सृगालनाथः तदीयविवरतुल्याः ७ वेलायांहोमका
लेकर्हिचिन्नहुताः ८ किंभवत्याआत्मानंमेस्वस्थंअप्रहृतिस्थं लक्षणेर्मुखम्लान्यादिभिर्लक्षयामि १० अस्वास्थ्यकारणमन्यदसौ

अपिवाकुशलंकिंचिद्गृहेषुगृहमेधिनि धर्मस्यार्थस्यकामस्ययत्रयोगोह्ययोगिनां ५ अपिवातिथयोभ्येत्यकुटुंबासक्त
यात्वया गृहादपूजितायाताः प्रत्युत्थानेनवाक्वचित् ६ गृहेषुयेष्वतिथयोनार्चिताः सलिलैरपि यदिनिर्यांतितेनूनंफेरु
राजगृहोपमाः ७ अप्यग्नयस्तुवेलायांनहुताहविषासति त्वयोद्विग्नधियाभद्रेप्रोषितेमयिकर्हिचित् ८ यत्पूजयाकामदु
घान्यातिलोकान्गृहान्वितः ब्राह्मणोग्निश्चवैविष्णोः सर्वदेवात्मनोमुखं ९ अपिसर्वेकुशलिनः तवपुत्रामनस्विनि लक्ष
येस्वस्थमात्मानंभवत्यालक्षणैरहं १० अदितिः। भद्रंद्विजगवांब्रह्मन्धर्मस्यास्यजनस्यच त्रिवर्गस्यपरंक्षेत्रंगृहमेधिन्गृ
हाइमे ११ अग्नयोतिथयोभृत्याभिक्षवोयेचलिप्सवः सर्वंभगवतोब्रह्मन्ननुध्यानान्नरिष्यति १२ कोनुमेभगवन्कामोनसं
पद्येतमानसः यस्याभवान्प्रजाध्यक्षएवंधर्मान्प्रभाषते १३ तवैवमारीचमनः शरीरजाः प्रजाइमाः सत्वरजस्तमोजुषः स
मोभवांस्तास्वसुरादिषुप्रभोतथापिभक्तंभजतेमहेश्वरः १४ तस्मादीशभजंत्यामेश्रेयः चिंतयसुव्रत हृतश्रियोहृतस्था
नान्सपत्नैः पाहिनः प्रभो १५ परैर्विवासितासाहंमग्नाव्यसनसागरे ऐश्वर्यंश्रीर्यशः स्थानंहृतानिप्रबलैर्मम १६

तिवक्तुंतत्पृष्टमभद्रादि केनास्तीत्याह भद्रमितिद्वाभ्यां इमेगृहास्त्रिवर्गस्यपरंक्षेत्रंउत्पत्तिस्थानंत्रिवर्गोपियथावदुद्वर्धतइत्यर्थः भगवतस्त
वानुध्यानेयन्मयाक्रियतेतस्मात् अग्नयोतिथयइत्यादिसर्वंनरिष्यतिनक्षीयते ११ सर्वंटीका १२ प्रस्तुतंविज्ञापयतिकोन्विति १३ ॥
संपाद्यंकाममाह तवैवेतिचतुर्भिः १४ सपत्नैर्दैत्यैर्हृताश्रीर्येषांहृतंस्थानंयेषामितिपुत्राभिप्रायेणबहुवचनं १५ राम॰

श्री भा॰ स्कं॰ टी॰

नित्यवयः ताम्हएयरूपवंसोउमार्य्ययासांताः रूपवत्रार्थः स्वलंकृताः स्त्रियः यत्रयस्यां भ्राजंते १८ सुरस्त्रीणां केशेभ्यः विभ्रष्टानां नवसौगंधिकस्रजा
मामोदे १९ हेमगवाक्षेभ्यो निर्गच्छता धूमेन सुरप्रियाग्रुपरसः २० मुक्तामयैर्वितानैर्मणिहेममयैः केतुभिश्च धुजैर्नानापताकाफलभिर्व
लभीभिश्च विमानानां पुरोभागैरवृता या प्रांवैमानिकस्त्रीणां कलगीतैर्मंगला २१ उपरवानां गंधर्वादीनां गीतैर्के च मनोरमा जिताप्रभा।

यत्रनित्यवयोरूपाः श्यामा विरजवाससः भ्राजंते रूपवन्नार्य्यो ह्यर्चिभिरिव वह्नयः १८ सुरस्त्रीकेशविभ्रष्टनवसौगंधिकस्र
जां यत्रामोदमुपादाय मार्ग आवाति मारुतः १९ हेमजालाक्षनिर्गच्छद्धूमेनागुरुगंधिना पांडुरेण प्रतिच्छन्नमार्गे या
ति सुरस्त्रियः २० मुक्तावितानैर्मणिहेमकेतुभिर्नानापताकावलभीभिरावृता शिखंडिपारावतभृंगनादिता वैमा
निकस्त्रीकलगीतमंगला २१ मृदंगशंखानकदुंदुभिस्वनैः सतालवीणामुरजेष्टवेणुभिः नृत्यैः सवाद्यैरुपदेवगीतके
र्मनोरमा स्वप्रभया जितप्रभा २२ यां न व्रजंत्यधर्मिष्ठाः खला भूतद्रुहः शठाः मानिनः कामिनो लुब्धा एभिर्हीना व्रजंति।
यत् २३ तां देवधानीं स वरूथिनीपतिर्बहिः समंताद्रुरुधे पृतन्यया आचार्यदत्तं जलजं महास्वनं दध्मौ प्रयुंजन्भयमिंद्र
योषितां २४ मघवांस्तमभिप्रेत्य बलेः परममुद्यमं सर्वदेवगणोपेतो गुरुमेतदुवाच ह २५ भगवन्नुद्यमो भूयान्बलेर्नः पू
र्ववैरिणः अविषह्यमिमं मन्ये केनासीत्तेजसोर्जितः २६ नैनं कश्चित्कुतो वापि प्रतिव्योढुमधीश्वरः पिबन्निव मुखेनेदं लिहन्निव
दिशो दश दहन्निव दिशो दृग्भिः संवर्ताग्निरिवोत्थितः ब्रूहि कारणमेतस्य दुर्धर्षत्वस्य मद्रिपोः २७ ओजः सहो बलं तेजो य
न त एतत्समुद्यमः २८ श्रीगुरुः जानामि मघवन्शत्रोरुन्नतेरस्य कारणं शिष्यायोपभृतं तेजो भृगुभिर्ब्रह्मवादिभिः २९

सात्वाहीभिर्धिष्ण्याणी देवता यया तांश्चैरजितप्रभामिति वा पाठांतरे जिताः ग्रहाः सूर्यादयो यया २२ यत्तया २२ पृतन्यया सेनया २३
केनदत्तेन नाणवतेजसा ऊर्जित आसीत् २५ प्रतिवोढुमपाकर्तुं यतः कारणादेतस्य ओजसा २६ उपभृतं संभृतं २८ ॥ राम

राम॰ ३१



रः एतत्समुद्यमः

हेमांगदाभ्यांलसंतौबाहूयस्यधिस्पस्थः वनेप्रज्वलितः कुंडस्थः आह्वनीयइवेतिच ९ तुल्यमैश्वर्यंबलंचश्रीश्चयेषांतैर्देत्यपृथपैर्वृतो यथाविवितिहृयोरन्वयः परिधीर्दिशः १० स्वह्रामतिसप्रहृदो ११ धियाम्यस्तवंतथाविधांपुरीमकस्मादेवपरित्यज्येंद्रादयः पलायिताइति वैराग्यार्थमिदपुरीमनुवर्णयति रम्यामितिसार्धैरेकादशभिः उपवनानिफलप्रधानानिनिकटानिवाउद्यानानिपुष्पप्रधानानिदूरस्था निचतैरम्यांकूजंतिविहंगमिथुनानियेषुगायंतीमत्तामथफव्रतायेषु १२ प्रवालादीनांउरुभारायासतताःशाखायेषांतेश्रमरद्रुमायेषु

हेमांगदलसद्बाहुः स्फुरन्मकरकुंडलः स्वाजरथमारूढोधिस्प्यस्थइवहव्यवाट् ९ तुल्यैश्वर्यवयःश्रीभिः स्वैर्थैर्दैत्ययूथ पैः पितम्रिविवत्वहभिर्दहद्भिःपरिधीनिव १० वृतोविकर्षन्महतींआसुरींध्वजिनींविभुः यथाविंद्रपुरींस्वह्रांकंपयन्निवरोद सी ११ रम्यामुपवनोद्यानैःश्रीमद्भिर्नंदनादिभिः कूजद्विहंगमिथुनैर्गायन्मत्तमधव्रतैः १२ प्रवालफलपुष्पोरुभा रशाखामरद्रुमैः हंससारसचक्राह्वकारंडवकुलाकुलाः १३ नलिन्यायत्रक्रीडंतिप्रमदाःसुरसेविताः आकाशगंगो गयादेव्याहतांपरिधिभूतया १४ प्राकारेणाग्निवर्णेनसाट्टालेनोन्नतेनच रुक्मपट्टकपाटैश्चद्वारैःस्फाटिकगोपुरैः १५ जुष्टांविभक्तप्रपथांविश्वकर्मविनिर्मितां सभाचत्वररथ्याढ्यांविमानैर्न्यर्बुदैर्युतां १६ शृंगाटकैर्मणिमयैर्वज्रविद्रुम

तैः १३ यत्रयासुसुरसेविताःप्रमदाःक्रीडंतिताः हंसादिकुलैराकुल्याआपानलिन्यः सरांसियत्रयेषुसंतितैरुपवनोद्यानैरम्यामितिश्लै वेनान्वयः किंचपरिखाभूतयाआकाशगंगयाहृतां १४ प्राकारेणसौवर्णेनचाहृतांअट्टालाःप्राकारोपरिरचितान्युन्नतानिस्थानान्य निततसहितानिरुक्मपट्टानिकपाटानियेषुतैर्द्वारैः अवांतरैःस्फटिकमयैर्गोपुरैश्चप्रद्वारैर्जुष्टां १५ विभक्ताःप्रपथाराजमार्गायस्यांता निचत्वराण्यंगनानिरथ्याउपमार्गाःतैराढ्यांसंपन्नांन्यर्बुददशकोटयःतैःगणनीयैरनंतैर्विमानैर्युतां १६ वज्रविद्रुममयैर्वे दिकापदस्थानानिचत्वराण्यंगनानिरथ्याउपमार्गाः

एनद्धेदितुमिच्छामोमहत्कौतूहलंहिनः याच्ञेश्वरस्यपूर्णस्यबंधनंचाप्यनागसः॥२॥

प्रासंगिकंनिरूप्यप्रस्तुतमुपसंहरति एतत्कल्पविकल्पस्यअवांतरकल्पस्य ११ इतिश्रीभावार्थदीपिकायांअष्टमस्कंधेचतुर्दशोध्यायः १४

निरूप्यप्रस्तुतमुपसंहरति ... निग्रहच्छलंतायश्व बलिंपंचदशोविश्वजितायार्यमयाजयत् ततोसौस्वर्गमजयत्इयाहवानिलिल्यिरे अत्रेयंतेनवाआयांवामंवामनचेष्टितं निग्रहच्छलंतायश्व बलिंपंचदशोविश्वजितायार्यमयाजयत् ततोसौस्वर्गमजयत्इयाहवानिलिल्यिरे ... तत्रतावद्बलेस्त्रिलोकीमपहर्तुंयाञ्चाच्छलेस्तनवा बलेर्भूयाननुग्रहः ईश्वरःस्वयंपूर्णएवकस्माद्वेतोरयाचत लब्धार्थोपिभूतापितंकस्माद्बबंध १ तत्रतावद्बलेस्त्रिलोकीमपहर्तुंयाञ्चाच्छलेस्तनवा बलेर्भूयाननुग्रहः ईश्वरःस्वयंपूर्णएवकस्माद्वेतोरयाचत लब्धार्थोभूतापितंकस्माद्बबंध १ तत्रतावद्बलेस्त्रिलोकीमपहर्तुंयाञ्चाच्छलेस्तनवा बलेर्भूयाननुग्रहः ईश्वरःस्वयंपूर्णएवकस्माद्धेतोरयाचत लब्धार्थोभूतापितंकस्माद्बबंध १ तत्रतावद्बलेस्त्रिलोकीमपहर्तुंयाञ्चाच्छलेस्तनवा

बलेर्भूयाननुग्रहः ईश्वरःस्वयंपूर्णएवकस्माद्धेतोरयाचत लब्धार्थोभूतापितंकस्माद्बबंध १ तत्रतावद्बलेस्त्रिलोकीमपहर्तुंयाञ्चाच्छलेस्तनवा बलेर्भूयाननुग्रहः ईश्वरःस्वयंपूर्णएवकस्माद्धेतोरयाचत ... पराजितश्रीरित्यादिनायावदध्यायसमाप्तिफउपराजिताश्रीर्येनइंद्रेणअस्य
नितिवक्तुंब्राह्मणाराधनबलेनबलेःकांडएवस्वर्गविजयक्रममाह पराजितश्रीरित्यादिनायावदध्यायसमाप्तिफउपराजिताश्रीर्येनइंद्रेणअस्य

एतत्कल्पविकल्पस्यप्रमाणंपरिकीर्तितं यत्रमन्वंतराण्याहुश्चतुर्दशपुराविदः ११ इतिश्रीभागवतेअष्टमस्कंधेचतुर्दशो
ध्यायः १४ राजा बलेःपदत्रयंभूमेःकस्माद्धरिरयाचत भूतेश्वरःकृपणवल्लब्धार्थोपिबबंधतं २ शुकः पराजितश्री
रसुभिश्चहापितोहीन्द्रेणराजन्भृगुभिःसंजीवितः सर्वात्मनातानभजद्भृगून्बलिःशिष्योमहात्मार्थनिवेदनेन ३ तंब्राह्म
णाभृगवःप्रीयमाणाअयाजयन्विश्वजितात्रिनाकं जिगीषमानंविधिनाभिषिच्यमहाभिषेकेणमहानुभावाः ४ ततोरथः
कांचनपट्टनद्धोहयाश्चहर्यश्वतुरंगवर्णाः ध्वजश्चसिंहेनविराजमानोहुताशनादासहविर्भिरिष्टात् ५ धनुश्चदिव्यंपुरटो
पनद्धंतूणावरिक्तौकवचंचदिव्यं पितामहस्तस्यददौचमालामम्लानपुष्पांजलजंचशुक्रः ६ एवंसविप्रार्जितयोधनार्थः
तैःकल्पितस्वस्त्ययनोथविप्रान् प्रदक्षिणीकृत्यकृतप्रणामःप्रह्लादमामंत्र्यनमश्चकार ७ अथारुह्यरथंदिव्यंभृगुदत्तं

भिश्चत्याजितःसन्भृगून्भृगोर्वंश्यान्शुक्रादीन्महात्माउदारचित्तः अर्थानांनिवेदनेनार्पणेन ३ त्रिनाकंस्वर्गंजेतुमिच्छंतंविश्वजिता
यागेनायाजयन् महाभिषेकेणैंद्रेणबह्वृचब्राह्मणप्रसिद्धेन ४ हर्यश्वस्यइंद्रस्ययेतुरंगाः तेषामिववर्णोहरितोयेषां ५ पुरटेन
वर्णेनतूणाविषुधीअरिक्तावक्षयशिरोपितामहःप्रह्लादःजलजंशंखं ६ विप्रैरर्जितःसंपादितोयोधनार्थोयस्यसःउपविकरोयस्यतैरेवर
कल्पितंस्वस्त्ययनंमंगलवचनादियस्यआमंत्र्यपृष्ट्वा ७ अथारुह्येतिद्वयोरन्वयःसस्रग्धरःशोभनमालाधरः ८ राम

श्री० भा० स्कं० टी० ५०

भागवतद्वितीयस्कंधे ८

रामः ५०

चतुर्दशोक्तसर्वेषां मन्वादीनां यथायथं स्वकर्माणि विवर्ण्यंते भगवद्वशवर्तिनां पुरुषेणेश्वरेण यज्ञाद्यवतारैः शास्यंते नियम्यंते इति तथा तद्देवा
ह २ यज्ञादय इति यज्ञादीनां कर्माण्याह ३ चतुर्युगांत इति चतुर्भिः यतो येभ्यः श्रुतिगणेभ्यः उदिता उक्ताः ४ युक्ताः संयताः संतो म
हीं धर्मं संचारयंति मध्या धर्मं प्रवर्तयंतीत्यर्थः ५ प्रजापाला मनुपुत्राः तद्धर्मं पालयंति यावन्मन्वंतरं यावन्मन्वंतरावसानं विभागशः उत्रेपो

राजा मन्वंतरेषु भगवन्यथा मन्वादयस्त्विमे यस्मिन्कर्मणि ये येन नियुक्तास्तद्वदस्व मे १ ऋषिः मनवो मनुपुत्राश्च मु
नयश्च महीपते इंद्राः सुरगणाश्चैव सर्वे पुरुषशासनाः २ यज्ञादयो याः कथिताः पौरुष्यस्तनवो नृप मन्वादयो जगद्या
त्रां नयंत्याभिः प्रचोदिताः ३ चतुर्युगांते कालेन ग्रस्तान् श्रुतिगणान्यथा तपसा ऋषयोपश्यन्यतो धर्मः सनातनः ४
ततो धर्मं चतुष्पादं मनवो हरिणोदिताः युक्ताः संचारयंत्यद्धा स्वे स्वे काले महीं नृपाः ५ पालयंति प्रजापाला यावदंतं वि
भागशः यज्ञभागभुजो देवा ये च तत्रानुकीर्तिताः ६ इंद्रो भगवता दत्तां त्रैलोक्यश्रियमूर्जितां भुंजानः पाति लोकांस्त्री
न्कामं लोके प्रवर्षति ७ ज्ञानं चानुयुगं ब्रूते हरिः सिद्धस्वरूपधृक् ऋषिरूपधरः कर्मयोगं योगेशरूपधृक् ८ सर्गं प्रजे
शरूपेण दस्यून्हन्यात्स्वराड्वपुः कालरूपेण सर्वेषामभावाय पृथग्गुणः ९ स्तूयमानो जनैरेभिर्मायया नामरूपया विमो
हितात्मभिर्नानादर्शनैर्न च दृश्यते १० राम

दिक्रमेण ये चान्ये द्यावापृथिव्यादयो यज्ञकर्मणि भोक्तृत्वेनान्विताः तैश्च सह ६ प्रसंगाद्रूपांतरैरपि जगद्यात्राप्रवर्तनमाह ज्ञानमिति द्वाभ्यां सि
द्धाः सनकादयः ऋषयः याज्ञवल्क्यादयः योगेशा दत्तात्रेयादयः तद्रूपः सन् ज्ञानं कर्म च योगं च ब्रूते ८ प्रजेशा मरीच्यादयः तेन रूपेण
सर्गं करोतीति शेषः स्वराड्वपुः राजमूर्तिः सर्वेषामभावाय भवति पृथग्विधा गुणाः शीतोष्णादयो यस्य ९ नामरूपात्मिकया मायया विमो
हितात्मभिरेभिर्जनैर्नानादर्शनैः शास्त्रैः स्तूयमानो निरूप्यमाणोपि नैव दृश्यते इत्यर्थः १० राम

श्री॰ भा॰ स्कं॰ टी॰ ५५

हविष्मत्यमुवस्तुक्तानामेकैकेषांचिन्नामान्याह हविष्मानितिविषूच्यांजातःसन् २४ एकादशमइत्यादिरर्थः २३ तस्यमानोरंतरंसाधयिष्यति

हविष्मान्सुकृतिःसत्योजयोमूर्तिस्तदाद्विजाः सुवासनविरुद्धाद्यादेवाःशंभुःसुरेश्वरः २२ विष्वक्सेनोविषूच्यांतुशं
भोःसख्यंकरिष्यति जातःस्वांशेनभगवान्गृहेविश्वसृजोविभुः २३ मनुर्वैधर्मसावर्णिरेकादशमआत्मवान्
अनागतास्तत्सुताश्चसत्यधर्मादयोदश २४ विहंगमाःकामगमानिर्वाणरुचयःसुराः इंद्रश्चवैधृतस्तेषामृष
यश्चारुणादयः २५ आर्यकस्यसुतस्तत्रधर्मसेतुरितिस्मृतः वैधृतायांहरेरंशःत्रिलोकींधारयिष्यति २६ भविता
रुद्रसावर्णीराजन्द्वादशमोमनुः देववानुपदेवश्चदेवश्रेष्ठादयःसुताः २७ ऋतधामाचतत्रेंद्रोदेवाश्चहरिता
दयः ऋषयश्चतपोमूर्तिस्तपस्व्याग्नीध्रकादयः २८ स्वधामाख्योहरेरंशःसाधयिष्यतितन्मनोः अंतरंसत्यसह
सःसूनृतायाःसुतोविभुः २९ मनुस्त्रयोदशोभाव्योदेवसावर्णिरात्मवान् चित्रसेनविचित्राद्यादेवसावर्णि
देहजाः ३० देवाःसुकर्मसुत्रामसंज्ञाइंद्रोदिवस्पतिः निर्मोकतत्वदर्शाद्याभविष्यंत्यृषयस्तदा ३१ देवहोत्रस्यत
नयउपहर्तादिवस्पतेः योगेश्वरोहरेरंशोबृहत्यांसंभविष्यति ३२ मनुर्वाइंद्रसावर्णिश्चतुर्दशमएष्यति उरुगंभी
रबुद्धाद्याइंद्रसावर्णिवीर्यजाः ३३ पवित्राश्चाक्षुषादेवाःशुचिरिंद्रोभविष्यति अग्निर्बाहुःशुचिःशुद्धोमागधाद्यास्तप
स्विनः ३४ सत्रायणस्यतनयोबृहद्भानुस्तदाहरिः वितानायांमहाराजक्रियातंतून्वितायिता ३५ राजंश्चतुर्दशैतानि
त्रिकालानुगतानिते प्रोक्तान्येभिर्मितःकल्पोयुगसाहस्रपर्ययः ३६ इतिश्रीभागवतेमहापुराणेअष्टमस्कंधेत्रयोदशोध्यायः १३

३० सत्यसहसःसूनृतायाश्चसुतःसन् ३१ दिवस्पतेरिंद्रस्यउपहर्तासंपादकःसंभविष्यति ३४ क्रियातंतून्कर्मसंततीःविता
यिताविस्तारयिष्यति ३५ युगसहस्रंपर्ययःपरिवर्तोयस्ययुगसहस्रप्रमाणइत्यर्थः ३६ इतित्रयोदशोध्यायः ॥ ॐ

राम॰ २९

श्रीशुकउवाच चतुर्दशमनूनांचकर्मयःपठेन्नियेयत् अस्यायात्वाधिराजेंद्रतस्यविसुःप्रसीदति ३८ ॥ १ ॥

एके वडवां तृतीयामाहुः सममतमेतैव वडवेति मते तद्भेदः षष्ठे सैव भूत्वाथ वडवा नासत्यौ सुषुवे भुवि इति यमश्च यमी च यमुना श्राद्धदेवश्चे
ति त्रयः सुताः ९ सावर्णिः पुत्रः १० पदत्रयं याचमानाय इमां सर्वां महीं सप्तमे मन्वंतरे विष्णोः प्रसादात् देवराज्यत्वं लब्ध्वा इंद्रपदं हित्वा तथैः

तृतीयां वडवामेके तासां संज्ञासुतास्त्रयः यमो यमी श्राद्धदेवः छायायाश्च सुतान् शृणु ९ सावर्णिः तपती कन्या भा
र्या संवरणस्य या शनैश्चरः तृतीयोऽभूत् अश्विनौ वडवात्मजौ १० अष्टमेंतर आयाते सावर्णिर्भविता मनुः निर्मोकविरजस्का
द्याः सावर्णितनया नृप ११ तत्र देवाः सुतपसो विरजा अमृतप्रभाः तेषां विरोचनसुतो बलिरिंद्रो भविष्यति १२ दत्त्वेमां
याचमानाय विष्णवे यः पदत्रयं राद्धमिंद्रपदं हित्वा ततः सिद्धिमवाप्स्यति १३ योऽसौ भगवता बद्धः प्रीतेन सुतले पुनः
निवेशितोऽधिके स्वर्गात् अधुनास्ते स्वराडिव १४ गालवो दीप्तिमान् रामो द्रोणपुत्रः कृपस्तथा ऋष्यशृंगः पितास्माकं भ
गवान् बादरायणः १५ इमे सप्तर्षयस्तत्र भविष्यंति स्वयोगतः इदानीमासते राजन् स्वे स्व आश्रममंडले १६ देवगुह्यात् स
रस्वत्यां सार्वभौम इति प्रभुः स्थानं पुरंदरात् हृत्वा बलये दास्यतीश्वरः १७ नवमो दक्षसावर्णिर्मनुर्वरुणसंभवः भूतके
तुर्दीप्तिकेतुरित्याद्यास्तत्सुता नृप १८ पारामरीचिगर्भाद्या देवा इंद्रोऽद्भुतः स्मृतः द्युतिमत्प्रमुखास्तत्र भविष्यंत्यृषयस्तत
ः १९ आयुष्मतोंऽबुधारायामृषभो भगवान् कला भविता येन संराद्धां त्रिलोकीं भोक्ष्यतेऽद्भुतः २० दशमो ब्रह्मसावर्णिरु
पश्लोकसुतो महान् तत्सुता भूरिषेणाद्या हविष्मत्प्रमुखा द्विजाः २१ तत्रापि जन्म भवति हरेर्विश्वसृजो गेहे अभूतिरिति
विख्यातो येनाप्यायितं वै जगत् २२ स्वधपः२ भविता

१३ रामः परशुरामः द्रोणपुत्रो अश्वत्थामा १५ इदानीं स्वयोगतः आसते १६ अद्भुत इंद्रः १९ राम ॥ . राम

श्रीभा॰ अं॰ टी॰ २८

अशेषाध्यायार्थनिगमनं इति ४२ एतत्कीर्तनादेः फलमाह एतदिति ४३ भगवतो भक्तेभक्तपक्षपाते स्मरणं नमस्करोति असतामविषयं भा
वेनभजनेनतेनगम्यं प्रपन्नान् सिंधुमथ्यं सिंधोर्मथनेजातममृतंयः आशयत् अभोजयत् ४४ इति श्रीभागवते दीपिकायां अष्टमस्कंधे द्वादशोध्या

न

अपि व्यपश्यस्त्वमजस्य मायां परस्य पुंसः परदेवतायाः अहं कलानामृषभोपि मुह्ये ययावशोन्ये किमुतास्वतंत्राः ४० यं
मामपृच्छस्त्वमुपेत्य योगात्समासहस्रांत उपारतं वै सएष साक्षात्पुरुषः पुराणो न यत्र कालो विशते न वेदः ४१ शुकः
इतितेभिहितस्तात विक्रमः शार्ङ्गधन्वनः सिंधोर्निर्मथने येन धृतः पृष्ठे महाचलः ४२ एतन्मुहुः कीर्तयतोनुशृण्वतो
न रिष्यते जातु समुद्यमः क्वचित् यदुत्तमश्लोकगुणानुवर्णनं समस्तसंसारपरिश्रमापहं ४३ असदविषयमंघ्रिं भावग
म्यं प्रपन्नानमृतममरवर्यानाशयत्सिंधुमथ्यं कपटयुवतिवेषो मोहयन्यः सुरारीन् तमहमुपसृतानां कामपूरं नतोस्मि
४४ इति श्रीभागवते अष्टमस्कंधे द्वादशोध्यायः ॥१२ श्रीशुकः मनुर्विवस्वतः पुत्रः श्राद्धदेव इति श्रुतः सप्तमोव
र्तमानो यः तदपत्यानि मे शृणु १ इक्ष्वाकुर्नभगश्चैव धृष्टः शर्यातिरेव च नरिष्यंतोथ नाभागः सप्तमो दिष्ट उच्यते २ करू
षश्च पृषध्रश्च दशमो वसुमान्स्मृतः मनोर्वैवस्वतस्यैते दश पुत्राः परंतप ३ आदित्या वसवो रुद्रा विश्वेदेवा मरुद्गणाः अ
श्विनावृभवो राजन्निंद्रः तेषां पुरंदरः ४ कश्यपोत्रिर्वसिष्ठश्च विश्वामित्रोथ गौतमः जमदग्निर्भरद्वाज इति सप्तर्षयः
स्मृताः ५ अत्रापि भगवज्जन्म कश्यपाददितेरभूत् आदित्यानामवरजो विष्णुर्वामनरूपधृक् ६ संक्षेपतो मयोक्तानि
सप्तमन्वंतराणि ते भविष्याण्यथ वक्ष्यामि विष्णोः शक्त्यान्वितानि च ७ विवस्वतश्च द्वे जाये विश्वकर्मसुते उभे संज्ञा
छाया च राजेंद्र ये प्रागभिहिते तव ८ राम ॥

सप्तमादिमन्वंतराण्याह मनुरित्यादि
यः १२ त्रयोदशे तु वर्ण्यंते सप्तमादीननुक्रमात् मन्वंतराणि सर्वाणि षड्विधानि पृथक्पृथक् राम
नायावद्ध्यायसमाप्ति १ आदित्यादयो देवा इति अन्वयः भगवतो जन्मावतारः तमेवाह आदित्यानामिति वक्ष्यमाणेषु षष्ठेषु अवरो नामधेयेष्व
वरे जन्म यस्य सः ६ शक्त्या युक्तावतारैरन्वितानि ७ अष्टममन्वंतरकथामाह विवस्वत इति त्रिभिः ८ राम २८

क

ङ्गोहे राजन् २७ पतीतामनुधावन्नहरः सरित्सरस्सु शैलादिषु च संनिहितो बभूव २६ तद्देवमायया जडीकरणं ३५ स्वां निष्ठां प्रकृतिं
३६ कालेन सृष्ट्यादिनिमित्तेन मायाकालरूपेण भागशो रजआद्यंशेन समेता मदधीना सती ३९ ॥ ॥

तामन्वगच्छद्भगवान्भवः प्रमुषितेंद्रियः कामस्य च वशंनीतः करेणुमिव यूथपः २६ सोनुव्रज्यातिवेगेन गृहीत्वा
निच्छतीं स्त्रियम् केशबंध उपानीय बाहुभ्यां परिषस्वजे २७ सोपगूढा भगवता करिणा करिणी यथा इतस्ततः
प्रसर्पंती विप्रकीर्णशिरोरुहा २८ आत्मानं मोचयित्वांग सुरर्षभभुजांतरात् प्राद्रवत्सा पृथुश्रोणी मायादेव
विनिर्मिता २९ तस्यासौ पदवीं रुद्रो विष्णोरद्भुतकर्मणः प्रत्यपद्यत कामेन वैरिणेव विनिर्जितः ३० तस्यानुधाव
तो रेतः चस्कंदामोघरेतसः शुष्मिणो यूथपस्येव वाशितामनुधावतः ३१ यत्र यत्रापतन्मह्यां रेतस्तस्य महात्म
नः तानि रूप्यस्य हेम्नश्च क्षेत्राण्यासन्महीपते ३२ सरित्सरस्सु शैलेषु वनेषूपवनेषु च यत्र क्व चासन्नृषयः तत्र सन्नि

रूप्यस्य २

कारकस्य ३

हितो हरः ३३ स्कन्ने रेतसि सोपश्यदात्मानं देवमायया जडीकृतं नृपश्रेष्ठ संन्यवर्तत कश्मलात् ३४ अथावग
तमाहात्म्य आत्मनो जगदात्मनः अपरिज्ञेयवीर्यस्य न मेने तदु हाद्भुतं ३५ तमविक्लवमव्रीडमालक्ष्य मधुसूद
नः उवाच परमप्रीतो बिभ्रत्स्वां पौरुषीं तनुं ३६ श्री भ ग वा नु दिष्ट्या त्वं विबुधश्रेष्ठ स्वां निष्ठामात्मना स्थितः
यन्मे स्त्रीरूपया स्वैरं मोहितोप्यंग मायया ३७ को नु मेतितरेन्मायां विषक्तः त्वदृते पुमान् तांस्तान्विसृजतीं भावा
न्दुस्तरामकृतात्मभिः ३८ सेयं गुणमयी माया न त्वामभिभविष्यति मया समेता कालेन कालरूपेण भागशः
३९ शुकः एवं भगवता राजन् श्रीवत्सांकेन सत्कृतः आमंत्र्य तं परिक्रम्य सगणः स्वालयं ययौ ४० आत्मांश
भूतां तां मायां भवानीं भगवान्भवः संमतामृषिमुख्येभ्यः प्रीत्याचष्टाथ भारत ४१ ॥ राम
श्रीरामाय नमः ॥ ओं नमो गुरवे ॥ श्रीसरस्वत्यै नमो नमः

भा॰ स्कं॰ टी॰ २३

एतत्कंदुकलीलावशेन नयेन्नावर्तितेनोद्धृतेन नेनमनोज्ञमनेन ताभ्यां कंपितयोः स्तनयोः प्रकृष्टहारगणं चोरुभारैः प्रतिपदं मध्ये प्रभज्यमानामि
व चलत्पदमेव प्रवालवत्कोमलं नतत्स्तेन नयंती १९ दिक्षु भ्रमतः कंदुकस्य चापलैः चांचल्यैः भृशं प्रोद्विग्नतारे आयते च चले लोचने यस्याः स्व
कर्णाभ्यां विभ्राजिते कुंडले ताभ्यां सुष्ठु संसक्तौ कपोलौ ताभ्यां च नीलालकैश्च मंडितमाननं यस्याः २० सन्नह्यंतीं बध्नंतीं जगद्विमोहयंती २१ तां
वीक्ष्य देवः श्रीरुद्रः आत्मानमंतिके स्थितान्सुमान्स्वगणांश्च न वेद कथंभूतः इति एवंभूतया कंदुकलीलया ईषद्व्रीडातया स्फुटं

आवर्तनोद्धृतनकंपितस्तनप्रकृष्टहारोरुभरैः पदेपदे प्रभज्यमानमिव मध्यतश्चलत्पदप्रवालं नयतीं ततस्ततः १९
दिक्षु भ्रमत्कंदुकचापलैर्भृशं प्रोद्विग्नतारायतलोललोचनां स्वकर्णविभ्राजितकुंडलोल्लसत्कपोलनीलालकमंडिता
ननां २० श्लथद्दुकूलं कबरीं च विच्युतां सन्नह्यतीं वामकरेण वल्गुना विनिघ्नतीमन्यकरेण कंदुकं विमोहयंतीं जग
दात्ममायया २१ तां वीक्ष्य देव इति कंदुकलीलयेषद्व्रीडास्फुटस्मितविसृष्टकटाक्षमुष्टः स्त्रीप्रेक्षणप्रतिसमीक्ष
णविह्वलात्मा नात्मानमंतिक उमां स्वगणांश्च वेद २२ तस्याः कराग्रात्स तु कंदुको यदा गतो विदूरं तमनुव्रज
स्त्रियाः वासः ससूत्रं लघु मारुतो हरद्भवस्य देवस्य किलानुपश्यतः २३ एवं तां रुचिरापांगीं दर्शनीयां मनोर
मां दृष्ट्वा तस्यां मनश्चक्रे विषज्जंत्यां भवः किल २४ तयापहृतविज्ञानस्तत्कृतस्मरविह्वलः भवान्या अपि पश्यं
त्या गतह्रीस्तत्पदं ययौ २५ सा तमायांतमालोक्य विवस्त्रा व्रीडिता भृशं निलीयमाना वृक्षेषु हसंती नान्वतिष्ठ
त २६

स्मितं तेन सह विसृष्टः प्रेरितः कटाक्षः तेन मुष्टो वंचित इत्यर्थः एवं स्वयं च तत् स्त्रियाः प्रेक्षणं तया च प्रतिसमीक्षणं ताभ्यां विह्वलः आ
त्मा मनो यस्य २२ तं कंदुकमनुव्रजंत्याः स्त्रियाः लघु सूक्ष्मं वासः ससूत्रं कांचीसहितं २३ तस्य देवस्य तस्याः समीपे ययौ विषज्ज
त्यां कुंचितकटाक्षैरात्मानं निरीक्षमाणायां २५

राम॰ २३

पराऽयं केवल्यामसञ्चसर्गाः सत्त्वगुणेन सृष्टाश्चपियेनत्वयाविरचितं विश्वमपिखलु तत्त्वतो न जानंतिकिंपुनस्त्वां हे ईश मा… अभंग राज सेतात ममचहृत्स्वउत्पत्तिश्च येषां तेन जानंतीति किमुत वक्तव्य १० किंतु त्वंसर्वं जानासीत्याह सत्वं सर्वं ब्रह्मवहंसे व्याप्नोषि जानासि किंतत्सर्वं समीहितं स्वकृतंयद्वः स्थिति जन्मनाशाश्च पुष्यजगतो जन्मादि भूतानामीहितं जगतो भवबंधं च मोक्षंच याम्रोह छात: चराचराख्य देहजातं खेचयथा वायुराविशति तथा कथमवरुंसे तदात्मकतया तस्य सर्वस्यात्मतयेत्यर्थः आत्मत्वे हेतु रवगमः ज्ञानरूपइति

नाहं परायर्षयो न मरीचिमुख्याजानंतियद्विरचितं खलु सत्त्वसर्गाः यन्मायया मुषितचेतस ईश दैत्यमर्त्यादयः कि मुत शश्वदभद्रवृत्तः १० सत्त्वं समीहितमदः स्थितिजन्मनाशं भूतेहितंच जगतो भवबंधमोक्षौ वायुर्यथाविशति खं चचराचराख्यं सर्वं तदात्मकतयाऽवगमोऽवरुन्त्से ११ अवतारा मयादृष्टा रममाणस्य ते गुणैः सोऽहं तद्द्रष्टुमिच्छामि य त्ते योषिद्वपुर्धृतं १२ येन संमोहिता दैत्याः पायिताश्चामृतंसुराः तद्दिदृक्षव आयाताः परं कौतूहलं हिनः १३ शुकः एवमभ्यर्थितो विष्णुर्भगवान्शूलपाणिना प्रहस्यभावगंभीरं गिरिशंप्रत्यभाषत १४ कौतूहलाय दैत्यानां यो षिद्वेषो मया धृतः पश्यता सुरकार्याणि गते पीयूषभाजने १५ तत्तेऽहं दर्शयिष्यामि दिदृक्षोः सुरसत्तम कामिनां ब हुमतं संकल्पप्रभवोदयं १६ शुकः इति ब्रुवाणो भगवांस्तत्रैवांतरधीयत सर्वतश्चारयंश्चक्षुर्भव आस्ते सहोमया
१७ ततो ददर्शोपवने वरस्त्रियं विचित्रपुष्पारुणपल्लवद्रुमे विक्रीडतीं कंदुकलीलया लसद्दुकूलपर्यस्तनितंब
मेखलाम् १८ राम

११ एवं स्तुत्वा प्रस्तुते विज्ञापयति अवताराइति द्वाभ्यां १२ सुरकार्याणि योषिद्वेषेण भविष्यंतीति पश्यता अयंभावः अवश्यंएता वद्भ्नात्र त्वयात्वंचयित्वा देवेभ्यो मृतं देयं न चैवं वैषम्यं रूपांतरेण कर्तव्यमुचितं अतोवचनमोहनादिसारंकामिनीरूपंमयाधृतमि ति १५ तत्तेऽहं दर्शयिष्यामि संकल्पप्रभवः कामः तस्योदयाय स्मात् १६ विचित्राणि पुष्पाणि अरुणाः पल्लवाश्च येषांतेद्रुमा यस्मि न् लसद्दुकूलेन पर्यस्ते परिहृते नितंबे मेखला यस्यास्ताम् १८ ॥ राम ॥ श्रीरामायनमः ।

श्रीभगवानुव

श्री. भा. स्कं. टी. २६

तवैवंभूतेन त्वं मुमुक्षूणामाचारः प्रमाणमित्याह तवैवेति उभयतः इहामुत्र च संगं त्यक्त्वा ६ ननु ब्रह्मैव चेदहं तर्हि संगोदासीनस्य मम चरणांभोजो
पासनया किं तेषां तत्राह त्वमिति ब्रह्मैवापि त्वं नात्यंतमुदासीनः किंतु विश्वप्रपंचस्योदयादीनां हेतुः तदुपाधीनां प्राणिनां जीवानामीश्वर
श्च ततस्तत्फलदाता तर्हि किं राजादिवत्कार्यापेक्षया सेवकेभ्यः फलं ददासि नहि नहि त्वमनपेक्ष एव तेतर्हि ईश्वरत्वेन तत्राह तैरात्मभिः तत्फल
दानार्थमपेक्षत्वे इति तदपेक्षः तस्य भावः तदपेक्षता तया अनपेक्षस्त्वमवदशेऽपि तत्तदीयं ब्रह्मत्वं विशिनष्टि पूर्णममृतं च मुक्तस्वरूपं विषय
सुखवैलक्षण्यार्थमाह अविकारं नित्यमानंदमात्रं च अतः विशोकं तत्कुतः विगुणं किंच अनन्यत् न विद्यते अन्यद्यस्मात् अन्यत् व्यतिरिक्ता
भावादपि निरपेक्षत्वमित्यर्थः तर्हि सर्वात्मकत्वे तत्तद्विकारप्रसंगो दुर्वारस्तत्राह अन्यत् सर्वेभ्यो व्यतिरिक्तं च कारणत्वात् नहि एवंभूतस्य
सर्वात्मकत्वे ब्रह्मत्वं स्वरूपस्य तत्वान्यापेक्षास्ति अतः केवलं भक्तानुग्रहार्थमेव तवैश्वर्यं न स्वार्थमित्यर्थः ७

तवैव चरणांभोजं श्रेयःकामा निराशिषः विसृज्योभयतः संगं मुनयः समुपासते ६ त्वं ब्रह्म पूर्णममृतं विगुणं वि
शोकं आनंदमात्रमविकारमनन्यदन्यत् विश्वस्य हेतुरुदयस्थितिसंयमानां आत्मेश्वरश्च तदपेक्षतयानपेक्षः
व ७ एकः त्वमेव सदसद्द्वयमद्वयं च स्वर्णं कृताकृतमिवेह न वस्तुभेदः अज्ञानतस्त्वयि जनैर्विहितो विकल्पो
यस्माद्गुणव्यतिकरो निरुपाधिकस्य ८ त्वां ब्रह्म केचिदवयंत्युत धर्ममेके एके परं सदसतोः पुरुषं परेशं अ
न्येवयंति नवशक्तियुतं परं त्वां केचिन्महापुरुषमव्ययमात्मतंत्रं ९ राम

अनन्यत्वमनन्यत्वं च कस्य कुतः इत्याशंक्य दृष्टांतेनोपपादयति सदसत्कार्यकारणरूपं द्वयमद्वयं च परमकारणं त्वमेवैकः
कृतं कुंडलादि रूपं द्वयमकृतं च केवलं सद्वर्णं यथैकमेव तद्वदेवेह त्वमिति वस्तुतो भेदो नास्ति कथं तर्हि भेदप्रतीतिस्तत्राह
अज्ञानत इति कुतः यस्मान्निरुपाधिकस्यैव तव गुणव्यतिकरो भेदो न स्वतः ८ अत एव त्वां बहुधा वर्णयंतीति तत्र तत्र केपि नजा
नंतीत्याह द्वाभ्यां त्वां ब्रह्म वेदांतिनो वयंति मन्यंते त्वामेव धर्मं मीमांसकाः मन्यंते प्रकृतिपुरुषयोः परं पुमांसं सांख्याः विमलोत्कर्षि २९
णी ज्ञाना क्रिया योगा प्रह्वी सत्या ईशाना अनुग्रहा चेत्येवं नवशक्तियुक्तं परं पांचरात्राः महापुरुषं पातंजलाः ९ राम

त्वयि किं चित्र वा स्वस्थेयेवर्यं त्वा स्वर्यमानता: इति वसन्महादेवस्तस्थावदृष्टिमष्टमी: ॥ १२

१ श्रीभावार्थदीपिकायामष्टमस्कंधे एकादशोऽध्यायः ११ द्वादशे मोहिनीरूपविभ्रमालोकनोत्सुकं भवं संमोहयामास हरिः
पुनरसांत्वयत् अस्तस्यन्नस्य रविसोर्मायया नतदद्भुते इति वक्तुं महादेवमोहोयमुपवर्ण्यते हरिः सोममपाययदिति दैनिशम्यस
वशान्तेत्यन्तरूपं द्रष्टुं ययाविति उत्तरेणान्वयः २ सोमयाउमया सह ३ त्वयि महामाया विनिपरमेश्वरेन हि किल किंचदद्भुतमिव वर
यंतपरमैकोत्तूहलेन द्रष्टुमागता इति बद्धा संबोधयन्स्तौति ४ देवदेव जनेदं देवानां देव इत्यतश्चाह हे जगद्व्यापिन्स्तस्मात् हे ज

इति श्रीभागवते ष्टमस्कंधे एकादशोध्यायः ११ बादरायणिः वृषध्वजो निशम्येदं योषिद्रूपेणादानवान् मो
हयित्वा सुरगणान्हरिः सोममपाययत् १ वृषमारुह्य गिरिशः सर्वभूतगणैर्वृतः सह देव्या ययौ द्रष्टुं यत्रास्ते मधुसू
दनः २ स भाजितो भगवता सादरं सोमया भवः सूपविष्ट उवाचेदं प्रतिपूज्य स्मयन्हरिं ३ महादेवः देवदेव जग
द्व्यापिन् जगदीश जगन्मय सर्वेषामपि भावानां त्वमात्मा हेतुरीश्वरः आद्यंतावस्य यन्मध्यमिदमन्यदहं बहिः
यतो व्ययस्य नैतानि तत्सत्यं ब्रह्म चिद्भवान् ५ राम ५

नमयतर्हि किं प्रधानं न हे जगदीशात् च जत: तत्राह सर्वेषामपि तं हेतुः अत ईश्वर आत्मता स्वनजडं प्रधानं तमित्यर्थः ४ नन्व
जगन्मयतो त्यान जगत उत्पत्त्यादिना तत्त्वे न च जाडेन च समाप्यपि किं तत्यातं स्येपेन हि नहीत्याह आद्यंतो मध्यं च अस्य जगतो ब्र
त्मणे भवति अस्य च अव्ययस्य एतानि आद्यंतमध्यानि न संति यच्च अलमिदंकारास्पद दृश्यमहंकारास्पद दृष्टृ बहिर्भोग्य
भोक्तृ च तत्सर्वं च चिद्रूपभवान् अतो न तव विकारादि दोषकेत्यर्थः ५ ५ राम ०

पतत्रैः पत्रैः ३४ सारमयं वीर्यादिकं त्वाष्ट्रं तपः पवं त्वष्टुः स येन वज्रेण मया विपाटितः ३५ ब्रह्मतेजः दधीचेः सामर्थ्यं ३६ आर्द्रशुष्काभ्यां

तस्मादिंद्रो बिभेत्युच्चैर्वज्रः प्रतिहतो यतः किमिदं दैवयोगेन भूतं लोकविमोहनं ३३ येन मे पूर्वमद्रीणां पक्षच्छेदः प्र
जात्यये कृतो निविशतां भारैः पतत्रैः पततां भुवि ३४ तपःसारमयं त्वाष्ट्रं वृत्रो येन विपाटितः अन्ये चापि बलोपेताः
सर्वास्त्रैरक्षतत्वचः ३५ सोयं प्रतिहतो वज्रो मया मुक्तोऽसुरेऽल्पके नाहं तदाददे दंडं ब्रह्मतेजोप्यकारणं ३६ इति शक्रं वि
रथो षीदंतमाह वागशरीरिणी नायं शुष्कैरथो नार्द्रैर्वधमर्हति दानवः ३७ मयास्मै यद्वरो दत्तो मृत्युर्नैवार्द्रशुष्कयोः अतोन्यश्चि
न्तनीयस्ते उपायो मघवन्रिपोः ३८ तां दैवीं गिरमाकर्ण्य मघवान्सुसमाहितः ध्यायन्फेनमथापश्यदुपाय
मुभयात्मकं ३९ न शुष्केण न चार्द्रेण जहार नमुचेः शिरः तं तुष्टुवुर्मुनिगणा माल्यैश्चावाकिरन्विभुं ४० गंधर्वमु
ख्यौ जगतुर्विश्वावसुपरावसू देवदुंदुभयो नेदुर्नर्तक्यो ननृतुर्मुदा ४१ अन्येप्येवं प्रतिद्वंद्वान्वाय्वग्निवरुणादयः सू
दयामासुरस्त्रौघैर्मृगान्केसरिणो यथा ४२ ब्रह्मणा प्रेषितो देवान्देवर्षिर्नारदो नृप वारयामास विबुधान्दृष्ट्वा दान
वसंक्षयं ४३ नारदः भवद्भिरमृतं प्राप्तं नारायणभुजाश्रयैः श्रिया समेधिताः सर्व उपारमत विग्रहात् ४४ श्री
शुकः संयम्य मन्युसंरंभं मानयंतो मुनेर्वचः गीयमानानुचरैर्ययुः सर्वे त्रिविष्टपं ४५ येऽवशिष्टा रणे तस्मिन्नारदानु
मतेन ते बलिं विपन्नमादाय अस्तं गिरिमुपागमन् ४६ तत्राविनष्टावयवान्विद्यमानशिरोधरान् उशना जीवया
मास संजीवन्या स्वविद्यया ४७ बलिश्चोशनसा स्पृष्टः प्रत्यापन्नेंद्रियस्मृतिः पराजितोपि नाखिद्यल्लोकतत्त्ववि
चक्षणः ४८ रम

३७ मृत्युर्नैवेति ३८ उभयात्मत्वमेवाह न शुष्केणेति न चार्द्रेणापि फेनेन तथा च श्रुतिः अपां फेनेन नमुचेः शिर इंद्रोदवर्तयत् इति ४०
अनुचरैरुपगीयमानाः इत्यर्थः उपगीयमाना अनुचरैः सद्भिरिति वा ४५ अविनष्टा अवयवा येषां विद्यमाना शिरोधरा येषां तान् ४७ प्रत्या

पञ्चानि पुनः प्राणानिंद्रियाणि स्मृतिश्च येन सः ४८

नि

हरीनितिविभि:दर्पयशसेंद्रस्यतावद्भिर्दर्पाभिघातैः २१ आहत्यसंख्ये विज्ञा २३ प्रावृट्कालीनसूर्यं २४ वणिक्पथा:वणिजा:भिन्नानौर्ये
षांतेभिन्ननावइत्यर्थः २५ तुराषाडिंद्र:अश्वादिसहितोविनिर्गत:अग्रणी:सारथिः २६ शोकामर्षाभ्यांयुक्तयारुषा

वचोभि:परुषैरिंद्रमर्दयंतोस्यमर्मसु घोरैर्वाक्शरैर्मेघाधाराभिरिवपर्वतं २० हरीन्सहस्रशातानांजेतोदर्पयशस्य
बल:घोरै: तावद्भिर्दर्पयामासफणपलंघुदस्त्वर्वैः २१ पाताभ्यांमातलिंपाकोरथंचावयवशःपृथक् सहस्रं
यानमोहेनातदद्भुतमभूद्रणे २२ नमुचि:पंचदशभि:स्वर्णपुंखैर्महेषुभिः आहत्यव्यनदत्संख्येसतोयइवतोय
दः २३ सर्वतःशरकूटेनशक्रंसरथसारथिं छादयामासुरसुरा:प्रावृट्सूर्यइवाम्बुदा: २४ अलक्षयंतस्तमतीव
वविह्वलाविचुक्रुशुर्देवगणा:सहानुगा: अनायका:शत्रुबलेननिर्जितावणिक्पथाभिन्ननवोयथार्णवे २५ ततः
तुराषाड्इषुबद्धपंजराद्विनिर्गतः साश्वरथध्वजोग्रणीः बभौदिशःखंपृथिवींचरोचयन्स्वतेजसासूर्यइवक्षपात्य
ये २६ निरीक्ष्यपृतनांदेवःपरैरभ्यर्दितांरणे उदयच्छद्रिपुंहंतुंवज्रंवज्रधरोरुषा २७ सतेनैवाष्टधारेणशिरसीबल
पाकयोः ज्ञातीनांपश्यतांराजञ्जहारजनयन्भयं २८ नमुचिस्तद्वधंदृष्ट्वाशोकामर्षरुषान्वितः जिघांसुरिंद्रंनृपते
चकारपरमोद्यमं २९ अश्मसारमयंशूलंघंटावद्धेमभूषणं प्रगृह्याभ्यद्रवत्क्रुद्धोहतोसीतिवितर्जयन् ३० प्राहि तैः
णोद्देवराजायनिनदन्मृगराडिव ३१ तदापतद्गगनतलेमहाजवंविचिच्छिदेहरिरिषुभि:सहस्रधा तमाहनन्नृपकु
लिशेनकंधरेरुषान्वितःत्रिदशपतिःशिरोहरन् ३२ नतस्यहित्वचमपिवज्रऊर्जितोबिभेदयःसुरपतिनौज
सेरितः तदद्भुतंपरमतिवीर्यवृत्रभित्तिरस्कृतोनमुचिशिरोधरत्वचा ३२

क्रोधेनान्वितः २९ घंटावद्घंटाभियुक्तं ३० अतिवीर्यवृत्रभिन्नत्नीतितया ३२ ॥ श्रीरामायनमोनमः ॥ ॥

आरूरूक्षेतिआरोढुमिच्छंतियेचउत्क्षिप्य प्रक्षेप्तुं उल्लंघयितुमिच्छंतिमोत्तमिच्छंती तार्थः अथोविधूय वो मिपातयामि ५ कालर
पाणेनकालयंत्रितश्रुतोनहृष्यति तत्रएवं विवेके रुप्यमपंडिताश्रुनिधुणः ८ तत्रकीर्तिजयादावात्मानंसाधनंमन्यमानानांबोधि

आरूरूक्षंतिमायाभिहत्क्षिप्य प्रक्षेप्तुंतियेदिवं ताहृस्यूल्विधूनोमयज्ञान्पूर्वस्माच्चपदाद्धुवः ५ सोहंदुर्मोचयिन
लेपयवेज्ञुणाशातपर्वणा शिरोहरिष्येमंदात्मश्चुटस्वज्ञातिभिःसह ६ बलिः संग्रामेवर्तमानानांकालचोदितक
र्मणा कीर्तिर्जयोजयोमृत्युःसर्वेषांस्युरनुक्रमात् ७ तमिमंकालरशनंजनाःपश्यतिसूरयः नहृष्यतिनशोचा
तितत्रयूयमपंडिताः ८ नवयमन्यमानानामात्मानंतत्रसाधनं गिरोवःसाधुशोच्यानांगृह्णीमोमर्मताडना
: ९ शुकः इत्याक्षिप्यविभुर्वीरोनाराचैर्वीरमर्दनः आकर्णपूर्णैरहनदाक्षेपैराहतंपुनः १० एवंनिराकृतो
देवोवैरिणातथ्यवादिना नामृष्यत्तदधिक्षेपंतोत्राहतइवद्विपः ११ प्राहरत्कुलिशंतस्मैअमोघंपरमर्दनं मया मो
नोन्यपतद्भूमौभिन्नपक्षइवाचलः १२ सखायंपतितंदृष्ट्वाजंभोबलिसखःसुहृत् अभ्ययात्सौहृदंसख्युर्हतस्या
पिसमाचरन् १३ ससिंहवाहआसाद्यगदामुद्यम्यरंहसा जत्रावताडयच्छक्रंगजंचसुमहाबलः १४ गदा
प्रहारव्यथितोभृशंविह्वलितोगजः जानुभ्यांधरणींस्पृष्ट्वाकश्मलंपरमंययौ १५ ततोरथोमातलिनाहरिभिर्द
शशतैर्वृतः आनीतोद्विपमुत्सृज्यरथमारुरुहेविभुः १६ तस्यतत्पूजयन्कर्मयंतुर्दानवसत्तमः शूलेनज्वल
तातंस्मयमानोहनन्मृधे १७ सेहेरुजंसुदुर्मर्षांसत्वमालंब्यमातलिः इंद्रोजंभस्यसंक्रुद्धोवज्रेणापाहर
च्छिरः जंभश्रुत्वाहतंतस्यज्ञातयोनारदाहृषेः नमुचिश्चबलःपाकःतत्रापेतुस्त्वरान्विताः १८ ॥
रोनरुंतुदैर्मर्मसुताडनेयाभिस्ताः ९ विभुमिंद्रं १० तोत्रमंकुशः ११ मयानःविमानसहितः १२ नमुचिर्बल
:पाकश्चेतित्रयआजग्मुःत्रयाणांपृथग्विक्रमानाह १८ ॥ राम ॥ श्रीराम ॥

श्रीभं प्रं टी० २५

राम
२५

ग्रहेशाग्राय य यक्ताावाद्देवोयस्यश्रीकौस्तुभश्रुश्चनर्घ्यंकिरीटंचकुंडलेचउलसंतिश्रीकौस्तुभादीनियस्मिन् ५४ अस्त्ररागांकु
टकर्मं मंत्रादिप्रयोगाः तस्माज्जाताः महिनामदिप्राद्धरेः स्मृतिरेवसर्वासांविपदांविमोक्षणं हृपाः किमुतद्धरेः प्रवेश एउ
त्यर्थः ५५ उभाविवादः सिंहवादः प्रदिणाक्षिप्तेपलीलयैवतह्रहीत्वाग्रहनदहनं ५८ देहयस्यचक्रेणहृत्तशिर

ततः सुपर्णांसकृतांघ्रिपल्लवः पिशंगवासानवकंजलोचनः प्रदृश्यताष्टायुधबाहुरुल्लसच्छ्रीकौस्तुभानर्घ्य
किरीटकुंडलः ५४ तस्मिन्प्रविष्टेसुरकूटकर्मजामायाविनेशुर्महिनामहीयसः स्वप्नोयथाहिप्रतिबोधआ
गतेहरिस्मृतिः सर्वविपद्विमोक्षणं ५५ दृष्ट्वासुपर्णंगरुडवाहमभिभाविवादश्रीविक्षेपमहरीददेववेग
आविध्यशूलमहिनोदथकालनेमिः तल्लीलयागरुडमूर्ध्निपतद्गृहीत्वातेनाहनन्नृपसवाहमरिंत्र्यधीशः ५८
मालीसुमाल्यतिबलौयुधिपेततुर्यच्चक्रेणकृत्तशिरसावथमाल्यवांस्तु आहत्यतिग्मगदयाहनदंडजेंद्रंता
वच्छिरोच्छिनदरेर्नदतोरिणाद्यः ५७ इतिश्रीभागवतेदशमस्कंधेदशमोध्यायः १० शुकः अथोसु
राः प्रत्युपलब्धचेतसः परस्यपुंसः परयानुकंपया जघ्नुर्भृशंशक्रसमीरणादयः तांस्तान्रणेयैरभिसंहताः
पुरा १ वैरोचनायसंरब्धाभगवान्पाकशासनः उदयच्छद्यदावज्रंप्रजाहाहेतिचुक्रुशुः २ वज्रपाणिस्तमाहे
दंतिरस्कृत्यपुरः स्थितं मनस्विनंसुसंपन्नंविचरंतंमहामृधे ३ नटवन्मूढमायाभिर्मायेशान्नोजिगीषसि जित्वा
बालान्निबद्धाक्षान्नटोहरतितद्धनं ४ राम ॥ राम ॥

सोपेतव्रः तंतथाभूतमपिग्राहत्यसंचयग्रंडजेंद्रंगरुडमहनत्तंतेंद्रंतंगदामुन्निक्षेपेउत्यर्थः आद्यः हरिः ५८ इतिश्रीभावार्थ
दीपिकायांदशमस्कंधेदशमोध्यायः १० एकादशेतद्देवशुद्देत्यघातिशुनारदः देवान्वारयच्छक्रोमृतान्दैत्यानजीवयत् उद
यच्छत्उद्यच्छति २ निबद्धान्यक्षाणियेषांतान्बालान्जित्वानटः कपटद्यूतेर्यथातेषांधनंहरतितथाहेमूढमायेशानस्मान्जेतुमि

पतितानि यानि स्वशिरांसि तत्रैरेव तम्भिलैः पश्यंत इत्यर्थः उद्यतानि आयुधानि यैस्ते दोर्दंडैर्युक्ताः ४० वाहानैरावतपादरक्षा
कान् आरोहं गजयेनाथं मार्क्षयत विव्याध ४१ दुर्मर्षः असहनो बलिः ४३ टंकवज्ज्वीतताग्रैः शिखरैः सहिताः ४६ स्तनयित्नवश्च

न२

कबंधास्तत्र चोत्पेतुः पतितस्वशिरोक्षिभिः उद्यतायुधदोर्दंडैराधावंतो भटान्मृधे ४० बलिर्महेंद्रं दशभिस्त्रिभि
रैरावतं शरैः चतुर्भिश्चतुरो वाहानेकेनारोहमार्च्छयत स ता॒॒॒नापततः शक्रः तावद्भिः शीघ्रविक्रमः चिच्छेद नि
शितैर्भल्लैरसंप्राप्तान्हसन्निव ४२ तस्य कर्मोत्तमं वीक्ष्य दुर्मर्षः शक्तिमाददे तां ज्वलंतीं महोल्काभां हस्तस्थामच्छि
नद्धरिः ४३ ततः शूलं ततः प्रासं ततस्तोमरमृष्टयः यद्यच्छस्त्रं समादद्यात्सर्वं तदच्छिनद्विभुः ४४ ससर्जाथासु
रीं मायामंतर्धानगतोसुरः ततः प्रादुरभूच्छैलः सुरानीकोपरि प्रभो ४५ ततो निपेतुस्तरवो दह्यमाना दवा
ग्निना शिलाः सटंकशिखराः चूर्णयंत्यो द्विषद्बलं ४६ महोरगाः समुत्पेतुः दंदशूकाः सवृश्चिकाः सिंहव्याघ्र
वराहाश्च मर्दयंतो महागजान् ४७ यातुधान्यश्च शतशः शूलहस्ता विवाससः छिंधि भिंधीति वादिन्यस्तथा
रक्षोगणाः प्रभो ४८ ततो महाघना व्योम्नि गंभीरपरुषस्वनाः अंगारान्मुमुचुर्वातैराहताः स्तनयित्नवः ४९
सृष्टो दैत्येन सुमहान्वह्निः श्वसनसारथिः सांवर्तक इवात्युग्रो विबुधध्वजिनीमधाक् ५० ततः समुद्र उद्वेलः स
र्वतः प्रत्यदृश्यत प्रचंडवातैरुद्धूततरंगावर्तभीषणः ५१ एवं दैत्यैर्महामायैरलक्ष्यगतिभीषणैः सृज्यमाना
सु मायासु विषेदुः सुरसैनिकाः ५२ न तत्प्रतिविधिं यत्र विदुरिंद्रादयो नृप ततः प्रादुरभूत्तत्र भगवान्विश्व
राम॰ ५३ राम॰
भावनः ५३

अंगारान्मुमुचुरित्यन्वयः ४९ अधाक् अधाक्षीत् अधाक्षीदित्यर्थः ५० उद्धूतैः तरंगैरावर्तैश्च भीषणः ५१ एवमन्येष्वदैत्यैः
सृज्यमानासु ५२ यत्र यदा तदा तैः प्रादुः सन् ५३ श्रीरामाय नमो नमः ॥ ॥

गुरोहंतीत्यारोढाः तैः सहिताश्चत्र्येचवाहाः पूर्वतकेवलंगजादयउक्ताः कथंभूताः निकृत्तावाहादयोयेषांछिन्नानिध्वजादीनियेषां
तेषांदेवादीनांपदाघातैरथांगैश्चूर्णितादायोधनाद्रणभूमेरुत्थितोरेणुर्दिशः स्वद्युमणिंचसूर्यंछादयंस्तदेवावादेर्व्यवर्ततक
थंभूतःसृक्स्रुतिभिः रक्तस्रवैः परिप्लुतास्मिन्नात यद्वापरिप्लवनाद्धेतोरव्यवर्ततभावक्तः रक्तधाराणांतत्पर्यंतमुत्कलनादि

ता

वृषाकपिस्तंत्रेणैनमहिषेणविभावसुः इल्वलःसहवातापिर्ब्रह्मपुत्रेणदंदम ३२ कामदेवेनदुर्मर्षउत्कालोमात
भिःसह हृद्रस्यातिस्त्रानसानरकेणाघानेश्वरः ३३ मरुतोनिवातकवचैःकालेयैर्वसवोमराः विश्वेदेवास्तपौ
लोमैरुद्राःक्रोधवशैःसह ३४ तएवमोजावस्तरांसैरद्वंद्वेनसंहत्यचाफ्यमानाः अन्योन्यमासाद्यनिजघ्नु
रोजसाजिगीषवःतीक्ष्णशरासितोमरैः ३५ भुसुंडिभिश्चक्रगदाष्टिपाहिशैःशक्त्युल्मुकैःप्रासपरश्वधैरपि
निस्त्रिंशभल्लैःपरिघैःसमुद्गरैःसभिंडिपालैश्चशिरांसिचिच्छिदुः ३६ गजास्तुरंगाःसरथाःपदातयः
सारोहवाहाविविधाविखंडिताः निकृत्तबाहूरुशिरोधरांघ्रयश्छिन्नध्वजेष्वासतनुत्रभूषणाः ३७ तेषां
पदाघातरथांगचूर्णितादायोधनादुल्बणउत्थितस्तदा रेणुर्दिशःखंद्युमणिंचछादयन्न्यवर्ततासृक्स्रु
तिभिःपरिप्लुतः ३८ शिरोभिरुद्धूतकिरीटकुंडलैःसंरंभदृग्भिःपरिदष्टदंतच्छदैः महाभुजैःसाभरणैःसहा
युधैःसाप्रास्तृताभूःकरभोरुभिर्बभौ ३९ ॥ राम ॥ ॥

न्वर्थः प्रथमांतपाठेरेणोर्विशेषणं ३७ टीकास्पष्टं ३८ शिरोभिर्महाभुजैश्चकरभसदृशैरूरुभिश्चसाचरणाभूः प्रकर्षेण
आस्तृतासतीबभौकथंभूतैःशिरोभिःउद्धूतानिउत्पतितानिकिरीटानिकुंडलानिचयेभ्यःसंरंभयुक्ताहगोयेषुतैःपरि
दष्टादंतच्छदाओष्ठायेषुतैः ३९ ॥ राम ॥ राम ॥

श्री भा स्कं ८ २२

उदयेउदयगिरिशृंगीवसस्थः चेडइवविरेजेइतिज्ञयाणामन्वयः १८ सर्वतिश्चसवणानियस्मिन्निमिरय्याससाहूरूपे २५ नानावा
द्दनादियेषांतेदेवाग्रसराश्चमिथोयुयुधुः २६ सर्वंटीका २७ इद्दाने वाद्दफयोथेतिसप्तभिः ग्रस्मत्तग्रस्मात्युयुध्यतेतत्थः

आस्थितस्तद्विमानाग्रंसर्वानीकाधिपैर्वृतः बालव्यजनछत्राग्र्यैरेजेचंद्रइवोदये १८ तस्यासन्सर्वतोया
नैर्यूथानांपतयोसुराः नमुचिःशंबरोबाणोविप्रचित्तिरयोमुखः १९ द्विमूर्धाकालनाभोथप्रहेतिर्हेतिरिल्वि
लः शकुनिर्भूतसंतापोवज्रदंष्ट्रोविरोचनः २० हयग्रीवःशंकुशिराःकपिलोमेघदुंदुभिः तारकश्चक्रदृक
शुंभोनिशुंभोजंभउत्कलः २१ अरिष्टोरिष्टनेमिश्चमयश्चत्रिपुराधिपः अन्येपौलोमकालेयानिवातकवचाद
यः २२ अलब्धभागाःसोमस्यकेवलंक्लेशभाजिनः सर्वएवरणमुखेबहुशोनिर्जितमराः २३ सिंहनादान्वि
मुंचंतःशंखान्दध्मुर्महारवान् दृष्ट्वासपत्नानुत्सिक्तान्बलभित्कुपितोभृशं २४ ऐरावतंदिक्करिणमारूढः
शुशुभेस्वराट् यथास्रवत्प्रस्रवणमुदयाद्रिमहर्पतिः २५ तस्यासन्सर्वतोदेवानानावाहध्वजायुधाः लो
कपालाःसहगणैर्वाय्वग्निवरुणादयः २६ तेन्योन्यमभिसंसृत्यक्षिपंतोमर्मभिर्मिथः आह्वयंतोविशंतो
ग्रेयुयुधुर्द्वंद्वयोधिनः २७ युयुधेबलिरिंद्रेणतारकेणगुहोयुध्यत वरुणोहेतिनायुध्यन्मित्रोराजन्प्रहेतिना
२८ यमस्तुकालनाभेनविश्वकर्मामयेनवै शंबरोयुयुधेत्वष्ट्रासवित्रातुविरोचनः २९ अपराजितेननमुचि
अश्विनौवृषपर्वणा सूर्योबलिसुतैर्देवोबाणज्येष्ठैःशतेनच ३० राहुणाचतथासोमःपुलोम्नायुयुधेनिलः
निशुंभशुंभयोर्देवीभद्रकालीतरस्विनी ३१
सूर्योदेवएकएवशतेनबलिसुतैःबाणज्येष्ठैर्येषांते: ३० निशुंभशुंभाभ्यांदेवीभद्रकाली ३१ ॥ राम

राम २२

रणः संग्राममउरत्वतः समुद्रस्पतीरेवभूव ५ अन्योन्यंसमासाद्यनिजघ्नुः ६ चित्रध्वजपटादिभिश्चवीराणांमालाभिश्चराजे
भिर्देवदानववीराणांध्वजिन्यायादसांमालाभिःसागराविवरेजतुरितिचवर्णामन्वयः याद्याभिरितिवासितेरमलेर्गातप
त्रैश्चवार्दैश्चचामरैश्चव्यजनेश्च १३ वातेनाहूतैरुत्तरैरुत्तरीयैरुष्णीषैश्चसूर्यरश्मिभिःस्फुरद्भिः १४ सर्वेटीका

ततः सुरगणाः सर्वेसुधयापीतयैथिताः प्रतिसंयुयुधुः शस्त्रैर्नारायणपरायणाः ४ तत्रदेवासुरो
नामरणःपरमदारुणः रोदसस्त्वंतोराजेन्तुमुलोलोमहर्षणः ५ तत्रान्योन्यंसपत्नास्तेसंरब्धमनसो
रणे समासाद्यासिभिर्बाणैर्निजघ्नुर्विविधायुधैः ६ शंखतूर्यमृदंगानांभेरीडमरिणांमहान् हस्त्यश्व
रथपत्तीनांनदतांनिःस्वनोभवत् ७ रथिनोरथिभिस्तत्रपत्तिभिःसहपत्तयः हयाहयैरिभाश्चेभैःसमसज्जंत
संयुगे ८ उष्ट्रैःकेचिदिभैःकेचिदपरेयुयुधुःखरैः केचिद्गौरमृगैर्ऋक्षैर्द्वीपिभिर्हरिभिर्भटाः ९ गृध्रैःकंकै
र्बकैरन्येश्येनभासैस्तिमिंगिलैः शरभैर्महिषैःखड्गैर्गोवृषैर्गवयारुणैः १० शिवाभिराखुभिःकेचित्कृकला
सैःशशैर्नरैः बस्तैरेकेकृष्णसारैर्हंसैरन्येचसूकरैः ११ अन्येजलस्थलखगैःसत्त्वैर्विकृतविग्रहैः सेनयोरु २
भयोराजन्विविशुस्तेग्रतोग्रतः १२ चित्रध्वजपटैराजन्नातपत्रैःसितामलैः महाधनैर्वज्रदंडैर्व्यजनैर्बार्हचाम
रैः १३ वातोद्धूतोत्तरोष्णीषैरर्चिर्भिर्वर्मभूषणैः स्फुरद्भिर्विशदैःशस्त्रैःसुतरांसूर्यरश्मिभिः १४ देवदानववी
राणांध्वजिन्यौपाडुनंदन रेजतुर्वीरमालाभिर्यादसामिवसागरौ १५ वैरोचनोबलिःसंख्येसोसुराणांचमूपतिः
यानंवैहायसंनामकामगंमयनिर्मितं १६ सर्वसांग्रामिकोपेतंसर्वाश्चर्यमयंप्रभो अप्रतर्क्यमनिर्देश्यंदृश्यमा

१५ अस्तुराणांयाचमूः तस्याःपतिःसबलिर्यानमास्थितः १६ ॥ श्रीरामायनमः ॥ राम ॥ गों

अष्टमि

श्री॰ भा॰ अ॰ स्कं॰ २९

हरिभक्तानामेवायासाः फलंति नान्येषामित्येवमाख्यानतात्पर्यमाह एवमिति समादेशादयो येषां देवासुराणां ते अर्थः समुद्रे विमंथी त्यादि विविधः कल्पः फलं केषांचिज्जातं केषांचिन्नेति विविक्तं येषां ते फले विषमत्वे तावच्छ्रुतिरित्यर्थः तदेवाह तत्रेति तेषु यत्पाद पंकजरजः श्रयणाद्देवा अमृतफलमापुः स एव सेव्य इत्यर्थः यन्नदानि तत्संबंधात् एतदेवोपपादयति २९ यदिति असुः प्राणाः वसु धनं प्राणादिभिर्देहात्मजादिषु नृभिर्यद्युज्यते प्रयुज्यते देहाद्यर्थं यत्क्रियते इत्यर्थः तदसद्व्यर्थं भवति कुतः पृथक्त्वात् भेदात् तैरेव प्राणादिभिरीश्वरोद्देशेन यत्क्रियते इत्यर्थः तत्तु सन्महाफलं भवति कुतः अपृथक्त्वात् ईश्वराश्रयत्वात् यथा तावन्निषेचनवत्

पीतप्रायेऽमृते देवैर्भगवांल्लोकभावनः पश्यतामसुरेंद्राणां स्वं रूपं जगृहे हरिः २७ एवं सुरासुरगणाः समदेशका
लहेत्वर्थकर्ममतयोऽपि फले विकल्पाः तत्रामृतं सुरगणाः फलमंजसापुर्यत्पादपंकजरजः श्रयणान्न दैत्याः २८
यद्युज्यतेऽसुवसुकर्ममनोवचोभिर्देहात्मजादिषु नृभिस्तदसत्पृथक्त्वात् तैरेव सद्भवति यत्क्रियतेऽपृथक्त्वात्सर्वस्य
तद्भवति मूलनिषेचनं यत् २९ इति श्रीभागवते अष्टमस्कंधे नवमोऽध्यायः ॥९ श्रीशुकः इति दानवदैतेया
नाविंदन्नमृतं नृप युक्ताः कर्मणि यत्ताश्च वासुदेवपराङ्मुखाः १ साधयित्वामृतं राजन्पाययित्वा स्वकान्सुरान्
पश्यतां सर्वभूतानां ययौ गरुडवाहनः २ सपत्नानां परामृद्धिं दृष्ट्वा ते दितिनंदनाः अमृष्यमाणा उत्पेतुर्देवान्प्रत्युद्यता ७४

सा सर्वं चानुगतत्वात् तत्र दृष्टांतः यत्तरोर्मूलनिषेचनं तद्यथा सर्वस्य स्कंधशाखादेरपि भवतीति यद्वा त्वक्शाखापंचमेण पृथक्त्वेन पर्यालो
चाभेदं दृष्ट्वा देहाद्युद्देशेन यत्क्रियते तदसत् अपृथक्त्वेन पर्यालोचितेश्वरदृष्ट्या तैरेव तैः सर्वं च यत्क्रियते तत्सद्भवतीति शेषं समा
नं २९ इति श्रीभावार्थदीपिकायामष्टमस्कंधे नवमोऽध्यायः ९ दशमे मत्सरात् द्वेषाद्युद्धं तत्र दैत्यसुरैः दैत्यमायाविषे
सु प्रदेवेषाविर्बभौ हरिः तदेवममृततावाप्तिर्नीभक्तानामितीरितं भक्तमत्सरतः प्राणहानिः पुनरुदीर्यते ॥ राम
राम॰ २९

एवं ताभ्यो मोहयित्वा यद्धृतवांस्तदाह त्रिभिः असुराणां सुधादानं सर्पाणामिव दुर्नयं अन्याय्यं मत्वा तां सुधां ते भोक्तुम भजन्त तस्य
प्रभावः दैत्यैर्मद्वीर्येण साध्यं असाध्यं वा सर्वं मत्कृतमेव अतो मद्भक्तान्देवानेव पाययिष्यामि किं चैतेषु यद्यन्याय्यं विभजेयं तत्त्वं नैव ते
भ्यो जात्यैव क्रूरेभ्यो दानं न्याय्यं अतस्तेभ्यः सुधां न दास्यामीति १९ पङ्क्तीः पृथग्विविक्ताः कल्पयित्वा विधाय ताः स्वपङ्क्तिषु स्वेषु स्वे
षु तत्तज्जातीयेषु ताः सुरासुराननपि तात् उपाविवेशयामास २० उपसंचेरुर्बहुमानप्रियवाक्यादिना तान्नतिक्रम्य अतिक्रमणाग
तेः हरस्यानपि देवान् २१ तथा कृतः स्नेहो येषु स्त्रियां सह विवादः स्यज्जुगुप्सया २२ कृता ओतत्प्रणयेः स्नेहाय प्रणयापायेन कात

नै
असुराणां सुधादानं सर्पाणामिव दुर्नयं मत्वा जातिनृशंसानां न तां व्यभजदच्युतः १९ कल्पयित्वा पृथक्पङ्क्तीरुभयेषां
जगत्पतिः तांश्चोपवेशयामास स्वेषु स्वेषु च पङ्क्तिषु २० दैत्यान्गृहीतकलशो वञ्चयन्नुपसंचरैः दूरस्थान्पाय
यामासजरामृत्युहरां सुधां २१ ते पालयन्तः समयमसुराः स्वकृतं नृप तूष्णीमासन्कृतस्नेहाः स्त्रीविवादजुगुप्सया
२२ तस्यां कृतातिप्रणयाः प्रणयापायकातराः बहुमानेन चाबद्धा नोचुः किंचन विप्रियं २३ देवलिङ्गप्रतिच्छन्नः स्व
र्भानुर्देवसंसदि प्रविष्टः सोममपिबच्चन्द्रार्काभ्यां च सूचितः २४ चक्रेण क्षुरधारेण जहार पिबतः शिरः हरिः तस्य
कबन्धस्तु सुधयाप्लावितोऽपतत् २५ शिरस्त्वमरतां नीतमजो ग्रहमचीक्लृपत् यस्तु पर्वणि चन्द्रार्कावभिधावति

ताभीताः एते तावत्कृपणाः पूर्वं किंचित्पिवन्तु पूर्यन्तधीराः ततोऽमृतीत्थमित्यादि बहुमानेन च आबद्धा नियन्त्रिताः समयपालनादि
भिः षड्भिरेतैः कारणैः अप्रियं किंचिदपि नोचुः किं तु तूष्णीमासन् २३ देवपङ्क्तौ चन्द्रार्कयोर्मध्ये प्रविष्टः सोमममृतमपिवत् २४
हरिः तस्य शिरो जहार सुधाप्लावितः असंसृष्टः २५ ग्रहत्वे सत्यपि देवत्वग्रहत्वादिकारणं २६ ॥ राम ॥ राम

श्री॰ भा॰ सु॰ २०

ईषत्स्मितेन पेशा भायस्याः तयाम याकृतं साफर्वीग्रसाफर्वीयचभ्युपेतं ग्रीगीऊकततर्दिविभजे १२ ग्रसुरपुंगवाः दैत्यश्रेष्ठाः
प्रमाणमियन्नामजानंतः १३ यथोपजोषयथाप्रीतिग्रदत्तस्मलत्वणग्रदत्तेयत्रनिग्रुकमत्तेवासः स्वयभवाग्रलत्तमागलिकाप्रुताववसा
त्रेनसर्वदाग्रागग्रेषुकृष्णपुसैवविवंग्रः १५ ग्रपेणमोदितायास्रभीकृतायापालायां १६ ग्रथतस्यापालायादेनरेइसाकंग्रपाणिनावि
वेषाकंथम्नृतामगिवधारकानिष्ठंकरस्यकरभोवह्निः करभसहदेशस्रहन्नोऊरुयस्याः सा उपात्कमनोयज्ञस्ललेयस्मिस्तेन श्रोणीतटेन।

२१

टी॰ १

ततो गृहीत्वामृतभाजनं हरिर्विभाषईषत्स्मितपेशभयागिरा यद्यभ्युपेतं क्वचसाधसाधवाकृतं मयाविभजे सुधामिमां
१२ इत्यभिव्याहृतं तस्याग्राकर्ण्यासुरपुंगवाः ग्रप्रमाणविदस्तस्यातत्तथेत्यन्वमंसत १३ ग्रथोपजोषवासांसि परि
धायाहृतानितेऊ पोषुप्रावि शनसर्वे प्रागग्रेषुभिभूषिताः १४ ग्रथोपोष्यकृतस्नानाकृत्वाचहविषानलं दत्वा
गोविप्रभूतेभ्यः कृतस्वस्त्ययनाद्विजेः १५ प्राङ्मुखेषूपविष्टेषु सुरेष्वदितिजेषु च धूपामोदितशालायां जुष्टायां मा
ल्यदीपकैः १६ तस्यां नरेंद्र करभोरु रुशदुकूलश्रोणीतटालसगतिर्मदविह्वलाक्षी साकूजतीकनककूपुरशिंजि
तेनकुंभस्तनीकलशपाणिरथाविवेश १७ तां श्रीसखीं कनककुंडलचारुकर्णनासाकपोलवदनां परदेवताख्यां
संवीक्ष्य संमुमुहुरुत्स्मितवीक्षणेन देवासुराविगलितस्तनपट्टिकांता १८ ॥ राम ॥ राम

विषालया श्रोणप्रालसामंदागतिर्यस्याः सापाठांते रेकरभसहशयोः ऊर्वोर्लसद्दुकूलं यस्याः सा चासौ श्रोणी तटेनालसग
तिश्चमदेन विह्वले ग्रक्षिणी यस्याः १७ तां श्रियः सखीं संवीक्ष्य देवासुराः संमुमुहुः कथंभूतां कनकमये कुंडले यस्याः सा चासौ चार
वः कर्णादेयाः यस्याः सा च विगलितो विस्रस्तः स्तनपट्टिकायाश्रंतो यस्याः तां १८ ॥ राम ॥ राम

राम॰ २०

इतिश्रीभावार्थदीपिकायांश्रीदशमस्कंधेदशमोऽध्यायः ८ नवमेमोहितैर्देवैरर्पिते मूलभाजने तद्वचनेनदेवेभ्यो ...मृतंदत्तं तत्येर्यते श्र
द्धोत्तुंपमोदर्याधामकातिःइतिवदंतःकात्वमित्यादिपचभ्रुः २ मथ्नतीवदोभयंतीव ३ कस्यासीत्यफलमुक्तमस्माभिः यतस्त्वंन
केश्चिदुक्तमुर्वैत्याहुः नेतित्यात्वांश्रमरादिभिरस्पृष्टेपूर्वैर्नजानीमइतिनश्रुपितजानीमएव ४ श्रास्तामिदंत्वहर्शनंत्वीषरेण

इतिश्रीभागवतेदशमस्कंधेदशमोऽध्यायः ८ शुक उवाच तेनोन्यतोसुराःपात्रंहरंतःस्वकमोद्धराः क्षिपंतोदस्युधर्माण
श्रायांतींददृशुःस्त्रियं १ श्रहोरूपमहोधामश्रहोग्रस्याःनवंवयः इतितेतामभिद्रुत्यपप्रच्छुर्जातहृच्छयाः २ का
त्वंकंजपलाशाक्षिकुतोवाकिंचिकीर्षसि कस्यासिवदवामोरुमथ्नतीवमनांसिनः ३ नवयंत्वामरैर्दैत्यैःसिद्धगं
धर्वचारणैः नास्पृष्टपूर्वांजानीमोलोकेशैश्चकुतोनृभिः ४ नूनंत्वंविधिनासुभ्रुप्रेषितासिशरीरिणां सर्वेंद्रिय
मनःप्रीतिंविधातुंसघृणेनकिं ५ सात्वंनःस्पर्धमानानामेकवस्तुनिमानिनि ज्ञातीनांबद्धवैराणांशंविधत्स्व
सुमध्यमे ६ वयंकश्यपदायादाभ्रातरःकृतपौरुषाः विभजस्वयथान्यायंनैवभेदोयथाभवेत् ७ इत्युपामंत्रितो
दैत्यैर्मायायोषिद्वपुर्हरिः प्रहस्यरुचिरापांगैर्निरीक्षन्निदमब्रवीत् ८ श्रीभगवान् कथंकश्यपदायादाःपुंश्च
ल्यांमयिसंगताः विश्वासंपंडितोजातुकामिनीषुनयातिहि ९ सालावृकाणांस्त्रीणांचस्वैरिणीनांसुरद्विषः
सख्यान्याहुरनित्यानिनूत्नंनूत्नंविचिन्वतां १० शुक उवाच इतितेक्ष्वेलितैस्तस्याश्वाश्वस्तमनसोसुराः जहसुर्भावगंभी ८८

सेपादितमित्याहुः नूनमितिसर्वेंद्रियाणांमनसःचप्रीतिंविधातुंसघृणेनकिंप्रेषितासिकिंवायद्वच्छयैवागतासिनेत्यंनूनंप्रेषि
तापवेत्यर्थः ५ भेदोविग्रहोयथानभवेत्तथा ७ संगताश्रनुरक्ताः ९ द्वसुरद्विषः १० भावेनकेनाभिप्रायेणगंभीरंयथा
भवत्येवंजहसुः ॥ ॥ राम ॥ ॥

श्री॰ भा॰ स्कं॰ टी॰ ८

मिथः दैत्यानां परस्परं कलहोत्पादनेन योगमायया ऽर्थं साधयिष्यामि युतो मा विवदेतेत्यादेति शेषः तदेवाह मिथ इति तर्षः कामः ता
दृक्तानि चेतांसि येषां इत्येवं समबलानां कलिरभूत् ३७ दुर्बलानां वाक्क्रोमं प्रकारमाह देवा इति द्वाभ्यां ये देवास्तुल्यायासेन

विष्वक्समनसो देवा हरिं शरणमाययुः इति तेषां समालोक्य भगवान्भूत्यकाममहृत ३६ मा विवदत मिथ्यार्थे वः सा
धयिष्ये स्वमायया मिथः कलिरभूत्तेषां तदर्थे तर्षचेतसा ३७ अहं पूर्वमहं पूर्वं न त्वं न त्वमिति प्रभो ३८ देवाः स्व
भागमर्हन्ति ये तुल्यायासहेतवः सत्रयाग इवैतस्मिन्नेष धर्मः सनातनः ३९ इति स्वान्प्रत्यषेधन्वै दैतेया जातम
त्सराः दुर्बलाः प्रबलान्राजन्गृहीतकलशान्मुहुः ४० एतस्मिन्नन्तरे विष्णुः सर्वोपायविदीश्वरः योषिद्रूपमनि
र्देश्यं दधार परमाद्भुतं ४१ प्रेक्षणीयोत्पलाभासं सर्वावयवसुन्दरं समानकर्णाभरणं सुकपोलोन्नसाननं
४२ नवयौवननिर्वृत्तस्तनभारकृशोदरं मुखामोदानुरक्तालिझङ्कारोद्विग्नलोचनं ४३ बिभ्रत्सुकेशभारेण
मालामुत्फुल्लमल्लिकां सुग्रीवकण्ठाभरणं सुभुजाङ्गदभूषितं ४४ विरजाम्बरसंवीतनितम्बद्वीपशोभया का
ञ्च्या विलसदुल्लासचलच्चरणनूपुरं ४५ सव्रीडस्मितविक्षिप्तभ्रूविलासावलोकनैः दैत्ययूथपचेतस्सु काममुद्दी
पयन्मुहुः ४६ ॥ राम ॥ राम

देवाः साधकाः तुल्यश्रायासो हेतुः मथनादिर्येषामिति वा सत्रयागेषु वैषां समं फलं तद्वत् तथा च श्रुतिः ऋद्धिकामाः सत्रमासी
रन्निति ये यजमानाः ते ऋत्विज इति च तत्र एवं रोषयति पञ्चभिः ३९ टीकापर्व ४० प्रेक्षणीयमुत्पलश्यामं सर्वेष्ववयवेषु सुन्दरं
समानयोः कर्णयोराभरणं यस्मिंस्तत्तेच ४२ शोभना ग्रीवा येन तत्कण्ठाभरणं यस्मिन्निति वा सभुजयोरङ्गदाभ्यां भूषितं ४४
विरजाम्बरेण संवितानितम्ब एव द्वीपा विशालत्वात् तत्र शोभाय स्यास्तया काञ्च्या प्रकर्षेण विलसदुल्लासयथा भवत्येवं चलतो श्चरण
योर्नूपुरे यस्मिन् ४५ सव्रीडेन स्मितेन सह विक्षिप्तौ कंपितौ या भ्रुवौ तस्या विलासेन सहया न्यवलोकितानि तैर्दैत्ययूथपानां चेतस्सु

राम॰ २५

भगवानपि त्रैलोक्याभिवृद्धये स्ववक्षस्तस्याः स्थानं ददावित्याह तस्या इति विशिष्टा भूतयो विभवा यस्याः तस्याः त्रिजगतो ज
नन्याः श्रियः परमं स्थिरमेधयत् अवर्धयत् २७ तल्लिंगैर्विभुप्रतिपादकैरवितथैर्यथार्थैः २८ वाक्याणां वक्त्रणां दैवत्यपद
ज्ञैस्तन्मयी स्तुता २९ दीर्घौ पीवरौ दोर्दंडौ यस्य कंबुग्रीवः शोभना अभिर्वित्रिरेखास्तृष्टा ग्रीवा यस्य स्निग्धः ऊंचितः केशानां म

तस्याः श्रियस्त्रिजगतो जनको जनन्या वक्षो निवासमकरोत्परमं विभूतेः श्रीः स्वाः प्रजाः सकरुणेन निरीक्ष
णेन यत्र स्थितैधयत साधिपतींस्त्रिलोकान् २५ शंखतूर्यमृदंगानां वादित्राणां पृथक्स्वनः देवानुगानां स
स्त्रीणां नृत्यतां गायतामभूत् २६ ब्रह्मरुद्रांगिरोमुख्याः सर्वविश्वसृजो विभुं ईडिरे वितथैर्मंत्रैस्तल्लिंगैः
पुष्पवर्षिणः २७ श्रियावलोकिता देवाः सप्रजापतयः प्रजाः शीलादिगुणसंपन्ना लेभिरे निर्वृतिं पराम्
निःसत्वा लोलुपा राजन्निरुद्योगा गतत्रपाः यदा चोपेक्षिता लक्ष्म्या बभूवुर्दैत्यदानवाः २८ अथासीद्वारुणी दे
वी कन्या कमललोचना असुरा जगृहुस्तां वै हरेरनुमतेन ते २९ अथोदधेर्मथ्यमानात्काश्यपैरमृतार्थि
भिः उदतिष्ठन्महाराज पुरुषः परमाद्भुतः ३० दीर्घपीवरदोर्दंडः कंबुग्रीवोरुणेक्षणः श्यामलस्तरुणः स्र
ग्वी सर्वाभरणभूषितः ३१ पीतवासा महोरस्कः सुमृष्टमणिकुंडलः नीलकुंचितकेशांतः सुभगः सिंह
विक्रमः ३२ अमृतस्य पूर्णकलशं बिभ्रद्वलयभूषितः स वै भगवतः साक्षाद्विष्णोरंशांशसंभवः ३३ धन्व
न्तरिरिति ख्यात आयुर्वेददृगिज्यभाक् तमालोक्यासुराः सर्वे कलशं चामृताभृतं ३४ लिप्सन्तः सर्ववस्तू
निकलशं तरसाहरन् नीयमानेसुरैः तस्मिन्कलशेऽमृतभाजने ३५ राम

त्वापियस्य ३१ सर्वटीका ३२ इज्यभाक् यज्ञभागभोक्ता अमृतेनापूर्णं परिपूर्णं ३४ रामायनमः १७

श्री० भा० पु० टी० १७

ननु कर्मणि क्रियमाणे तस्मिन्नासक्तिः ॥ तत्फलं च स्यात् न तु नैष्कर्म्यरूपा सिद्धिरित्यत आह निःसंगः अनभिनिवेशवान् ॥ ईश्व
रार्पितं न तु फलोद्देशेन ननु फलस्य श्रुतत्वात् कर्मणि कृते फलं भवेदेव न रोचनार्थेति कर्मणि रुच्युत्पादनार्थं अगदपाने
खंडलड्डुकादिवत् ततश्च कर्माभिरुच्या वेदार्थं सम्यक् विचारयति ॥ तदा च यो वा एतदक्षरमविदित्वा गार्ग्यस्माल्लोकात्प्रैति
स कृपण इत्यनात्मज्ञस्य कृपणतां ॥ तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति ब्रह्मचर्येण तपसा श्रद्धया यज्ञेनानाश
केन चेति ॥ यज्ञादीनां ज्ञानसाधनतां चावधार्य निष्कामेषु कर्मसु प्रवर्तते ॥ ततश्च स्वर्गकामो यजेतेत्यादिभिः कामितस्यैव स्व

परस्यैव सत आत्मनो जीवस्य हृदयग्रंथिं अहंकारबंधं निर्हर्तुमिच्छुः

वेदोक्तमेव कुर्वाणो निःसंगोर्पितमीश्वरे ॥ नैष्कर्म्यां लभते सिद्धिं रोचनार्था फलश्रुतिः ॥ ४६ ॥ य आशु हृ
दयग्रंथिं निर्जिहीर्षुः परात्मनः ॥ विधिनोपचरेद्देवं तंत्रोक्तेन च केशवं ॥ ४७ ॥ लब्ध्वानुग्रह आचार्यात्तेन सं
दर्शितागमः ॥ महापुरुषमभ्यर्चेन्मूर्त्याभिमतयात्मनः ॥ ४८ ॥ ॥ रामायनमः ॥ ॥ रामायनमः ॥

र्गादेः फलत्वेनावगमात् कामितोसौ न भवतीति नैष्कर्म्यसिद्धिर्भवतीति भावः ॥ ४६ ॥ वैदिकं कर्मयोगमुक्त्वा तांत्रिक
माह ॥ य आश्विति परात्मनः ॥ परस्यैव सत आत्मनो जीवस्य हृदयग्रंथिं अहंकारबंधं निर्हर्तुमिच्छुः सः तंत्रोक्तेन च विधि
नाश्चकारेण भजेत ॥ तंत्रमागमः ॥ चकाराद्वैदिकेन सह समुच्चयमाह ॥ ४७ ॥ तमेव विधिमाह लब्ध्वानुग्रह इत्यादि
ना तेनाचार्येण संदर्शितश्चागमः ॥ अर्चनप्रकारो यस्य सः ॥ ४८ ॥ रामायनमः ॥ ॥ राम ॥ राम ॥ ॥ ४८ ॥ राम १७

ना१

ईश्वरं वेद नान्यः किं मादृशः ॥ परोक्षवाद इति ॥ यत्रान्यथा स्थितोऽर्थः संगोपयितुमन्यथा कृत्वोच्यते स परोक्षवादः ॥ तथा च श्रुतिः ॥ तं वा ए
तमिंद्रं संतमिंद्र इत्याचक्षते ॥ परोक्षेण परोक्षप्रिया इवेति परोक्षवादत्वमेवाह ॥ कर्ममोक्षायेति ॥ ननु स्वर्गाद्यर्थं कर्माणि
विधत्ते ॥ न कर्मबंधं ॥ एवं तत्राह ॥ बालानामनुशासनं यथा भवति तथा ॥ अत्र दृष्टांतः ॥ अगदं भैषज्यं यथा पिता बालकं अगदं पाय
यन्नपि खंडलड्डुकादिभिः प्रलोभयन्पाययति तद्वदिति चेत्तानि ॥ नैतावता गदपानस्य तल्लाभः प्रयोजनम् अपि त्वारोग्यं तथा वेदोऽप्य

परोक्षवादो वेदोऽयं बालानामनुशासनं ॥
कर्ममोक्षाय कर्माणि विधत्ते ह्यगदं यथा ॥ ४४ ॥
नाचरेद्यस्तु वेदोक्तं स्वयमज्ञोऽजितेंद्रियः ॥
विकर्मणा ह्यधर्मेण मृत्योर्मृत्युमुपैति सः ॥ ४५ ॥

वांतरफलैः प्रलोभयन्कर्ममोक्षायैव कर्माणि विधत्ते ॥ ४४ ॥ ननु कर्ममोक्षश्चेत्पुरुषार्थः तर्हि प्रथममेव कर्मत्यागो युक्तः ॥ अत आ
ह नाचरेदिति ॥ अजितेंद्रियत्वात्स हि अज्ञः स्वयं यदि नाचरेत्तर्हि विकर्मणा कर्मानाचरणलक्षणेनाधर्मेण मृत्योरनंतरं मृत्यु
मेव प्राप्नोति ॥ तथा च श्रुतिः ॥ मृत्वा पुनर्मृत्युमापद्यते अद्यमानः स्वकर्मभिरिति ॥ अस्माद्वेदोक्तमेव कुर्वीणेन न तु निषिद्धं ॥ ४५ ॥

श्री
भा. ए.
टी.
७५

तदेवं तत्र तत्र निर्द्धारणेन तत्तत्संबंधेन च विशेषतो विभूतीर्निरूप्येदानीं सामान्यतः सर्वा अपि निरूपयति पृथिवी
ति सार्द्धद्वयेन पृथिव्यादिशब्दैस्तन्मात्राणि विवक्षितानि अहमहंकारः महान्महत्तत्त्वं एताः सप्त प्रकृतिविकृतयः
विकारः पंचभूतानि एकादशेंद्रियाणि इत्येवं षोडशसंख्याकः पुरुषो जीवः अव्यक्तं प्रकृतिः एवं पंचविंशतितत्त्वा
नि तदुक्तं मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त षोडशकस्तु विकारो न प्रकृतिर्न विकृतिः पुरुष इति
किंच रजः सत्त्वं तमः इति प्रकृतेर्गुणाः अपरं ब्रह्म च तदेतत्सर्वमहमेव किंचैतत्प्रसंख्यानं एतेषां परिगणनं एतेषां लक्ष

पृथिवी वायुराकाश आपो ज्योतिरहं महान् विकारः पुरुषोऽव्यक्तं रजः सत्त्वं तमः परं ३७ अहमेत
त्प्रसंख्यानं ज्ञानं तत्त्वविनिश्चयः ३८ मयेश्वरेण जीवेन गुणेन गुणिना विना सर्वात्मनापि स
र्वेण न भावो विद्यते क्वचित् ३९ संख्यानं परमाणूनां कालेन क्रियते मया न तथा मे विभू
तीनां सृजतोंडानि कोटिशः ४० ॥

णतो ज्ञानं च तत्फलं च तत्त्वविनिश्चयाख्याहमेव ३७ एतदेव संक्षिप्याह मयेति जीवेश्वररूपो द्विधा यो भावः
यश्च गुणगुणिरूपो यश्च क्षेत्रक्षेत्रज्ञरूपः स सर्वोपि मया विना मद्व्यतिरेकेण नास्ति अहमेव सर्वमित्यर्थः
३८ ननु सामान्यतः किमेवं संक्षिप्य कथयसि पूर्ववन्निर्द्धारणसंबंधाभ्यां विशेषतः सर्वाः कथयेति चेत् तत
त्राह संख्यानं पृथिव्यादिपरमाणूनां कालेन महता तदपि मयैव क्रियते न त्वावत्तु शक्यते तथा मे विभूती टी.
नां संख्यानं कर्तुं न शक्यते कुतस्तत्राह सृजतोंडानीति यदा मया सृज्यमानानां ब्रह्मांडानामेव तावत्सं ७५
ख्या नास्ति कुतस्तत्रस्थानां विभूतीनां संख्येत्यर्थः ३९ ॥ ॥ ॥ ॥ ॥ ॥ ॥

रघा

इत्येवं वेदस्य तात्पर्यमाह। परोक्षवाद इति। यत्रान्यथा स्थितोऽर्थः संगोपयितुमन्यथा कृत्वोच्यते स परोक्षवादः। तथा च श्रुतिः। तेवाप
तं सन्तं इन्द्र इत्याचक्षते परोक्षेण परोक्षप्रिया इव हि देवा इति परोक्षवादत्वमेवाह। कर्ममोक्षायेति। ननु स्वर्गाद्यर्थं कर्माणि
तो २ विधत्ते। न कर्ममोक्षाय। तत्राह। बालानामनुशासनं यथा भवति तथा। अत्र दृष्टान्तः। अगदमौषधं यथा पिता बालकं अगदं पाय
यन् खण्डलड्डुकादिभिः प्रलोभयन् पाययति तद्वदेतानि। न तावता अगदपानस्य तल्लाभः प्रयोजनम् अपि त्वारोग्यं तथा वेदोऽप्य

परोक्षवादो वेदोऽयं बालानामनुशासनं ॥
कर्ममोक्षाय कर्माणि विधत्ते ह्यगदं यथा ॥ ४४ ॥
नाचरेद्यस्तु वेदोक्तं स्वयमज्ञोऽजितेन्द्रियः ॥
विकर्मणा ह्यधर्मेण मृत्योर्मृत्युमुपैति सः ॥ ४५ ॥

वान्तरफलैः प्रलोभयन् कर्ममोक्षायैव कर्माणि विधत्ते ॥ ४४ ॥ ननु कर्ममोक्षश्चेत्पुरुषार्थः तर्हि प्रथममेव कर्मत्यागोऽस्तु। अत आ
ह नाचरेदिति। अजितेन्द्रियत्वात् हि अज्ञः स्वयं यदि नाचरेत् तर्हि विकर्मणा कर्मानाचरणलक्षणेनाधर्मेण मृत्योरनन्तरं मृत्यु
मेव प्राप्नोति। तथा च श्रुतिः मृत्वा पुनर्मृत्युमापद्यते अद्यमानः स्वकर्मभिरिति। अस्मादेदोक्तकर्मैव कुर्वीणो न तु निषिद्धं ॥ ४५ ॥

श्री॰ भा॰ ए॰ हू॰ टी॰ ३४

यतः पुरुषत्वं स्तौति एकेति ॥२२॥ अनुमानमाहात्रेति ॥ अत्र पौरुष्यां पुरि युक्ता अप्रमत्ताः अग्राह्यं ग्राह्येभ्यो देहेन्द्रियादिभ्यो व्यतिरिक्तं मां साक्षात् मार्गयन्ति मार्गणे प्रकारद्वयमाह ॥ गृह्यमाणैर्बुद्ध्यादिभिर्गुणैर्हेतुभिः जडानां प्रकाशः स्वप्रकाशमेकं विना न घटत इत्यनुपपत्तिमुखेन लक्षकैः तथा लिङ्गैश्चापि एवं नानुमानत ईश्वरं प्रवर्तकं मृगयन्ते बुद्ध्यादिकारणानि कर्तृप्रयोज्यानि करणत्वाद्वास्यादिवदिति ॥ तदुक्तं भगवान्सर्वभूतेष्वलक्षितः स्वात्मना हरिः दृश्ये

एकद्वित्रिचतुष्पादो बहुपादस्तथापदः ॥ बह्व्यः सन्ति पुरः सृष्टाः तासां मे पौरुषी प्रिया ॥ अत्र मां मार्गयन्त्यद्धा युक्ता हेतुभिरीश्वरम् ॥ गृह्यमाणैर्गुणैर्लिङ्गैरग्राह्यमनुमानतः ॥२३॥ अत्राप्युदाहरन्तीममितिहासं पुरातनम् ॥ अवधूतस्य संवादं यदोरमिततेजसः ॥२४॥ अवधूतं द्विजं कञ्चिच्चरन्तमकुतोभयम् ॥ कविं निरीक्ष्य तरुणं यदुः पप्रच्छ धर्मवित् ॥२५॥ यदुरुवाच ॥ कुतो बुद्धिरियं ब्रह्मन्नकर्तुः सुविशारदा ॥ यामासाद्य भवांल्लोकं विद्वांश्चरति बालवत् ॥२६॥ प्रायो धर्मार्थकामेषु विवित्सायां च मानवाः हेतुनैव समीहन्ते आयुषो यशसः श्रियः ॥२७॥ ॥

बुद्ध्यादिभिर्दृश्यलक्षणैरनुमापकैरिति ॥ न चैतावता ॥ आनुमानिक आत्मेति मन्तव्यं ॥ देहादिव्यतिरिक्तत्वं पदार्थशुद्धिमात्रमेवानुमानेन विवित्सितत्वात् ॥२३॥ भूयोन्वयव्यतिरेकाभ्यां संभावनादिनिवृत्त्या वितिहासमाह अत्रापीति ॥२४॥ सुविशारदा अतिनिपुणा ॥२६॥ सर्वलोकवैलक्षण्यमाह प्रायइति धर्मादिषु विवित्सायां ॥ आत्मविचारे च मानवाः ॥ समीहन्ते प्रवर्तन्ते अत्रापि आयुरादेर्हेतुना कामनयैव ॥२७॥ रामाय नमः ॥ ॥ ॥ राम ॥

राम ३४

केचिद्दुःखीला भवंति केचित्तेविवताः फलकाले विनश्यंति केचिदशक्ताः केचिद्वरणेऽसमर्थाः केचित्स्थानभ्रष्टाः तद्धा
तृस्य मनवद्यमित्यादीनि पंचविशेषणानि ।। न अंतः कालतः पारं देशतश्च यस्य तं कालादिभिरकुंठो विकुंठलोको धि
ष्ण्यं स्थानं यस्य तं उद्धव भगवन् हस्कंटे निर्वेदे हेतुः वृजिनैर्दुःखैरभितप्तः ।। हकारो गौरवाय दुःकारो ह्रस्वत्व पठनीयः नन्व
नवद्यत्वादीनि कुतो ममेत्यत आह ।। नारायणमिति ।। अनुकंपितमाह ।। नरो जीवः तस्य सखायं भवंतं शरणं प्रपद्ये ।।१९।।त
देवमसंभावनाविपरीतभावनाभ्यामुपदिष्टं तत्त्वमनवगाहमानं प्रति तन्निवृत्तये गुरूपदेशं विनापि स्वान्वयव्यतिरे

तस्माद्भवंतमनवद्यमनंतपारं सर्वज्ञमीश्वरमकुंठविकुंठधिष्ण्यं ।। निर्विण्णधीरहमु ह वृजिनाभितप्तो नारा
यणं नरसखं शरणं प्रपद्ये ।।१९।। श्रीभगवानुवाच ।। प्रायेण मनुजा लोके लोकतत्त्वविचक्षणाः समुद्ध
रंति ह्यात्मानमात्मनैवाशुभाशयात् ।।२०।। आत्मनो गुरुरात्मैव पुरुषस्य विशेषतः ।। यत्प्रत्यक्षानुमानाभ्यां
श्रेयोऽसावनुविंदते ।।२१।। पुरुषत्वे च मां धीराः सांख्ययोगविशारदाः ।। आविस्तरां प्रपश्यंति सर्वशक्त्युपबृंहि
तं ।।२२।। ।। राम ।।

काभ्यामेव तत्त्वप्रतिपत्तिर्भवतीति दर्शयितुमाह ।। प्रायेणेति ।। लोकतत्त्वस्य विचक्षणाः परीक्षकाः अशुभाशयात् विषयवा
सनातः ।।२०।। तदुपपादयति आत्मन एवात्मादिशरीरे व्याप्तो वहिताहितज्ञानं गुरुः ।।२०।। तत्र प्रत्यक्षं दर्शयति पुरुष
त्वे चेति ।। तथा च श्रुतिः ।। पुरुषत्वे चाविस्तरामात्मा स हि प्रज्ञानेन संपन्नतमो विज्ञातं वदति विज्ञातं पश्यति वेद श्व
स्तनं वेद लोकालोकौ मर्त्येनामृतमीप्सत्येवं संपन्नोऽथेतरेषां पशूनामशनापिपासे एवाभिविज्ञानमिति ।।२१।। ।।

श्री॰ भा॰ पु॰ टी॰ २२

त्वंतत्सर्वंपरित्यज्येत्याद्युपदेशमात्मनोयोग्यंमन्वानः पृच्छति योगेशेति योगफलदायिन् ॥ योगविन्यासोनामातियोगप्यार
निक्षेपविशेषः यद्वा योगो विन्यस्यते क्रियते यस्मिन् ॥ योगात्मन् योगे आत्मा प्रकटो भवति यस्य योगः स्वरूपे तिवा योगस्य संभवो य
स्मात् ॥ चतुर्भिरेतैः संबोधनैः स्वमहिम्ना केवलत्वयोपदिष्टेन तमदधिकारं पर्यालोच्येति द्योतितं तदाह ॥ निःश्रेयसायेति न
चारोपाद्यर्थं सर्वस्वदानादिवद्यंत्यागः किंतु संन्यासलक्षणः ॥ अप्रत्यापत्तिरूपः ॥ यं प्रति त्यागोपदिष्टः सोहं मूढम

श्रीउद्धव उवाच ॥ ॥ ॥ योगेश योगविन्यास योगात्मन्योगसंभव ॥ निःश्रेयसाय मे प्रोक्तः त्यागः संन्यासलक्ष
णः ॥१४॥ त्यागोयं दुष्करो भूमन्कामानां विषयात्मभिः ॥ सुतरां त्वयि सर्वात्मन्नभक्तैरिति मे मतिः ॥ ॥ ॥१५॥ सो
हं ममाहमिति मूढमतिर्विगाढस्त्वन्मायया विरचितात्मनि सानुबंधे ॥ तत्त्वंजसा निगदितं भवता यथाहं
संसाधयामि भगवन्ननुशाधि भृत्यं ॥१६॥ सत्यस्य ते स्वदृश आत्मन आत्मनोन्यं वक्तारमीश विबुधेष्वपि
नानुचक्षे ॥ सर्वे विमोहितधियः तव माययेमे ब्रह्मादयस्तनुभृतो बहिरर्थभावाः ॥१७॥ ॥ ॥ राम ॥॥

तिः ॥ कुतः ममेति अहमिति च सानुबंधे पुत्रसहिते त्वन्मायया विरचिते आत्मनि देहे विगाढो निमग्नाः अतः तत्त्वं भव
ता निगदितं यथाहमंजसा संसाधयामि तथा भृत्यं मामनुशाधि शानेः शिक्षय ॥१६॥ मया संक्षेपत उक्तं विस्तरतः तु त्वन्ना
न्यस्केतिचेत् ॥ अत आह सत्यस्येति ॥ स्वदृशः स्वप्रकाशस्य सत्यस्यात्मनः ॥ आत्मनो मां प्रति वक्तारं तेन त्वत्तः अन्यं नानु
चक्षे न पश्यामि ॥ स्वदृशः स्वतःसिद्धज्ञानात्त्वत्तोन्यमिति वा ॥ कुत इत्यत आह ॥ सर्वे इति बहिरर्थभावा विषये पर्यव

॥ स्कंध ॥ ८

राम २२

कथमात्मनि परिछिन्ने विततं जगदीक्षणीयम् ॥ आत्मानमिति मय्यधिष्ठाणि तद्रूपेणेक्षस्व ॥९॥ नन्वेवं युक्तचित्तत्वेन कर्माकरणे देवा
दयो विघ्नं करिष्यंतीत्यत आह ज्ञानेति ॥ ज्ञानं वेदतात्पर्यनिश्चयः ॥ विज्ञानं तदर्थानुभवः ताभ्यां सम्यक्युक्तः ॥ ततश्चात्मानुभवेनैव
तुष्टचित्तः अतः शरीरिणां देवादीनामात्मभूतः ॥ अंतरायैर्न प्रतिहन्यसे ॥ अयं भावः यावदनुभवं यथाश्रमं कर्माणि कुर्यादेव ॥ तदनंतरं
सर्वेषामात्मभूतत्वान्न कोपि विघ्नमाचरतीति ॥ तथा च श्रुतिः ॥ तस्य ह न देवाश्चनाभूत्या ईशते आत्मा ह्येषां स भवतीति ॥१०॥ नचोत्प

तस्माद्युक्तेंद्रियग्रामो युक्तचित्त इदं जगत् ॥ आत्मनीक्षस्व विततमात्मानं मय्यधीश्वरे ॥९॥ ज्ञानविज्ञानसंयुक्त आ
त्मभूतः शरीरिणां ॥ आत्मानुभवतुष्टात्मा नांतरायैर्विहन्यसे ॥१०॥ दोषबुद्ध्योभयातीतो निषेधान्न निवर्तते ॥ गुणबुद्ध्या
च विहितं न करोति यथार्भकः ॥११॥ सर्वभूतसुहृच्छांतो ज्ञानविज्ञाननिश्चयः ॥ पश्यन्मदात्मकं विश्वं न विपद्येत वै पुनः
॥१२॥ श्रीशुकः ॥ इत्यादिष्टो भगवता महाभागवतो नृप ॥ उद्धवः प्रणिपत्याह तत्त्वजिज्ञासुरच्युतम् ॥१३॥ ॥ ॥ राम ॥ ॥
॥ रामाय नमः ॥ ॥ ॥

न्नज्ञानस्यापि यथेष्टाचरणप्रसंग इत्याह दोषबुद्ध्येति ॥ गुणदोषबुद्ध्यातीतोपि ज्ञानसंस्कारान्निषेधान्निवर्तत एव ॥ किंतु न दो
षबुद्ध्या विहितं च शायशः करोति न गुणबुद्ध्या यथार्भकः ॥ संकल्पविकल्परहितः किंचित्करोति कुतश्चिन्निवर्तते तद्वत् ॥११॥ एवं
भूतस्य न पुनः संसार इत्याह सर्वभूतेति ॥ न विपद्येत न पुनः संसरेत् ॥१२॥ ॥ ॥ राम ॥ ॥ ॥ रामाय नमः ॥ ॥ राम

श्री· भा·पु· टी· ३२

सप्तमे तूद्धवस्यात्मज्ञानसिद्ध्यै हरिः स्वयम् ॥ अवधूतेतिहासेन गुह्यमप्यववर्णयत् ॥ यदात्थ संहृत्यैतत्कुलमिति ॥ स्वर्वा-
सं वैकुण्ठवासं प्रति ॥ १ ॥ त्वं च सर्वत्यागेनात्मनिष्ठो भवेति वक्तुमाह कुलमिति त्रयेण ॥ ३ ॥ तदेवायं नष्टमंगलो भविष्यति ॥ ४ ॥
न वस्तव्यमेव त्वया ॥ ५ ॥ न तु गुणदोषाभ्यां विषमे लोके कुतः समदृष्टिः स्यात् ॥ अत आह यदिदमिति ॥ मनआदिभिर्गृह्यमाणं मनो-

श्रीभगवानुवाच ॥ यदात्थ मां महाभाग तच्चिकीर्षितमेव मे ॥ ब्रह्मा भवो लोकपालाः स्वर्वासं मेऽभिकांक्षिणः ॥ १ ॥ मया निष्पादितं ह्यत्र देवकार्यमशेषतः ॥ यदर्थमवतीर्णोऽहमंशेन ब्रह्मणार्थितः ॥ २ ॥ कुलं वै शापनिर्दग्धं नंक्ष्यत्यन्योन्यविग्रहात् ॥ समुद्रः सप्तमे ह्येनां पुरीं च प्लावयिष्यति ॥ ३ ॥ यर्ह्येवायं मया त्यक्तो लोकोऽयं नष्टमंगलः ॥ भविष्यत्यचिरात्साधो कलिनापि निराकृतः ॥ ४ ॥ न वस्तव्यं त्वयैवेह मया त्यक्ते महीतले ॥ जनोऽधर्मरुचिर्भद्र भविष्यति कलौ युगे ॥ ५ ॥ त्वं तु सर्वं परित्यज्य स्नेहं स्वजनबंधुषु ॥ मय्यावेश्य मनः सम्यक्समदृग्विचरस्व गां ॥ ६ ॥ यदिदं मनसा वाचा चक्षुर्भ्यां श्रवणादिभिः ॥ नश्वरं गृह्यमाणं च विद्धि मायामनोमयं ॥ ७ ॥ पुंसोऽयुक्तस्य नानार्थो भ्रमः स गुणदोषभाक् ॥ कर्माकर्मविकर्मेति गुणदोषधियो भिदा ॥ ८ ॥ ॥ राम

मयत्वान्मायेति विद्धि तदपि नश्वरं किं तु नश्वरं च विद्धि ॥ ७ ॥ मनोमयत्वे हेतुः पुंस इति अयुक्तस्य विक्षिप्तमनसः नाना-
र्थो भेदविषयो भ्रमः ॥ स भ्रम एव गुणदोषभाक् ननु वेदेनैव विधिनिषेधाभ्यां भेदस्य सत्यताख्यानं भ्रमविजृंभितं गुणदो-
षबुद्धेः पुंसः कर्म विहितं अकर्म तल्लोपः ॥ विकर्म निषिद्धमिति भेदः अविद्यावद्विषय एव वेदस्यार्थः ॥ ८ ॥ ॥ राम

राम ३२

लोकं मर्त्यलोकं ॥ ४२ ॥ न प्रत्यहन्न प्रतिहतवान् ॥ ४३ ॥ शय्यादिषु त्वां भक्ताः नित्यं सेवितवंतो वयं कथं त्यजेम ॥ ४५ ॥ त्वदुक्तमशार
क्यं न प्रार्थयेन मायाभयादित्याह त्वयेति चर्चिता अलंकृताः हि निश्चितं जयेम ॥ ४६ ॥ संन्यासिनो हि ब्रह्मचर्यादिना कथंचित्तरेर

विविक्त उपसंगम्य जगतामीश्वरेश्वरम् ॥ प्रणम्य शिरसा पादौ प्रांजलिस्तमभाषत ॥ ४१ ॥ श्रीउद्धवः ॥ देवदेवेश
योगेश पुण्यश्रवणकीर्तन ॥ संहृत्यैतत्कुलं नूनं लोकं संत्यक्ष्यते भवान् ॥ ४२ ॥ विप्रशापं समर्थोपि प्रत्यहन्न यदी
श्वरः ॥ नाहं तवांघ्रिकमलं क्षणार्धमपि केशव ॥ ४३ ॥ त्यक्तुं समुत्सहे नाथ स्वधाम नय मामपि ॥ ४३ ॥ तव विक्री
डितं कृष्ण नृणां परममंगलम् ॥ कर्णपीयूषमास्वाद्य त्यजत्यन्यस्पृहां जनाः ॥ ४४ ॥ शय्यासनाटनस्थानस्नान
क्रीडाशनादिषु ॥ कथं त्वां प्रियमात्मानं वयं भक्तास्त्यजेमहि ॥ ४५ ॥ त्वयोपभुक्तस्रग्गंधवासोलंकारचर्चिताः
उच्छिष्टभोजिनो दासास्तव मायां जयेमहि ॥ ४६ ॥ वातरशना य ऋषयः श्रमणा ऊर्ध्वमंथिनः ॥ ब्रह्माख्यं धाम
ते यांति शांताः संन्यासिनोमलाः ॥ ४७ ॥ वयं त्विह महायोगिन्भ्रमंतः कर्मवर्त्मसु ॥ त्वद्वार्तया तरिष्याम
स्तावकैर्दुस्तरं तमः ॥ ४८ ॥ स्मरंतः कीर्तयंतस्ते कृतानि गदितानि च ॥ गत्युत्स्मितेक्षणक्ष्वेलि यन्नृलोकवि
डंबनं ॥ ४९ ॥ श्रीशुकः ॥ एवं विज्ञापितो राजन्भगवान्देवकीसुतः ॥ एकांतिनं प्रियं भृत्यमुद्धवं समभाषत ॥ ५० ॥ इति

ति ॥ वयं त्वनायासेनैव तरिष्याम इत्याह ॥ वातरशना इति ऊर्ध्वरेतसः ॥ तावकैर्भक्तैः सह त्वद्वार्तया ॥ ४८ ॥ क्ष्वेली परिहासः हे है
कतं ॥ ४९ ॥ एकांतिनमित्यादि स्वाभिप्रायवचने हेतुः ॥ ५० ॥ इत्येकादशे षष्ठः ॥ ॥ ॥ राम ॥ ॥ ॥ ५० ॥ ॥ ॥

श्री. भा. ए. टी. ९२

उद्वेलेन लंघितमर्य्यादेन नैव कुंठं यास्यच ततव भवनं यास्यामि ॥ प्रभासं यस्य मे श्रुतिवदनो ग्रममभिप्रायः ॥ एतेवां प्राणः स्वा
धिकारानेवार्हति न तस्यो मोदं दद्वा वक्त्यां मृतामुच्येश्न ॥ तस्मादभ्युदयफलं प्रभासे नेष्यामीति दत्तं प्राणाध्वमर

यद्यसेद्दन्त्यहमानो यद्दूनां विपुलं कुले ॥ गतास्पतेन लोको यस्तद्वेलेन विमंदयति ॥ ३० ॥ इदानीं नाथ
स्त्रावद्धः कुलस्पाद्विजप्रपापतः ॥ यास्यामि भवनं ब्रह्मन्नेतदंते तवानघ ॥ ३१ ॥ सूतः ॥ इत्युक्तो लोकनाथेन
स्वयंभूः प्रणिपत्य तं ॥ सहदेवगणैर्देवः स्वधाम समपद्यत ॥ ३२ ॥ अथ तस्यां महोत्पातान्द्वारवत्यां समु
त्थितान् ॥ विलोक्य भगवानाह यदुवृद्धान्समागतान् ॥ ३३ ॥ श्रीभगवानुवाच ॥ एते वै सुमहोत्पाता व्यु
त्तिष्ठंतीह सर्वतः ॥ शापश्च नः कुलस्यासीद्ब्राह्मणेभ्यो दुरत्ययः ॥ ३४ ॥ न वस्तव्यमिहास्माभिर्जिजीवि
षुभिरार्यकाः ॥ प्रभासं सुमहापुण्यं यास्यामोद्यैव मा चिरम् ॥ ३५ ॥ यत्र स्नात्वा दक्षशापाद्गृहीतो यक्ष्म
णोडुराट् ॥ विमुक्तः किल्बिषात्सद्यो भेजे भूयः कलोदयं ॥ ३६ ॥ वयं च तस्मिन्नाप्लुत्य तर्पयित्वा पितॄन्सु
रान् ॥ भोजयित्वोशिजो विप्रान्नानागुणवतांधसा ॥ ३७ ॥ तेषु दानानि पात्रेषु श्रद्धयोप्त्वा महांति वै ॥
वृजिनानि तरिष्यामो दानैर्नौभिरिवार्णवं ॥ ३८ ॥ सूतः ॥ एवं भगवतादिष्टा यादवाः कुरुनंदन ॥ गं
तुं कृतधियस्तीर्थं स्यंदनान्समयूयुजन् ॥ ३९ ॥ तन्निरीक्ष्योद्धवो राजन्श्रुत्वा भगवतोदितं ॥ दृष्ट्वारिष्टा

णा गृहीत उडुराट् चंद्रो यत्र स्नानमात्रं कृत्वा किल्बिषात्तस्माद्रोगदुःखात्सद्यो विमुक्तः सन्कलावृद्धिं भेजे ॥ ३६ ॥ उशिजः का
मनीयानन्नं धसा अन्नेन ॥ ३७ ॥ उप्त्वेति यथा सुक्षेत्रे बीजमुप्तं बहुफलं भवति तथा दानं सत्पात्र इति ॥ ३८ ॥ ३९ ॥ ४० ॥

राम ९२

तस्मात्तव प्रसूतत्नृपाया कथाते देव चर्दंब॥ दर्कं बहंतीतितथा कीर्तिनद्यः॥ तथा पादावनेजसरितो गंगाद्याश्च विलोकाः
श्यामलानि हंतं विष्णु॥ केन प्रकारेण आनन्दं वंश गतो कथं रामस्य भूयत इत्यत्र प्रवावेदाः॥ तत्र भवं कीर्तिरूपे तीर्थे श्रुतिर

स्वाश्रमधर्मस्थिता स्नात्वा तीर्थद्वयमुपस्पृश्यंति सेवंते २

विष्णुस्तव प्रसूत कथोदवहास्त्रिलोक्याः पादावनेजसरितः शमलानि हंतुं॥ आनुश्रवं श्रुतिभिरंघ्रिजमंग
संगैः तीर्थद्वयं शुचिषदस्त उपस्पृशंति॥१९॥ बादरायणिरुवाच॥ इत्यभिष्टूय विबुधैः सेशः शतधृतिर्हरिं
अभ्यभाषत गोविंदं प्रणम्याम्बरमाश्रितः॥२०॥ ब्रह्मोवाच॥ भूमेर्भारावतारायपुरा विज्ञापितः प्रभो॥ त्वमस्मा
भिरशेषात्मंस्तत्तथैवोपपादितम्॥२१॥ धर्मश्च स्थापितः सत्सु सत्यसंधेषु वै त्वया॥ कीर्तिश्च दिक्षु विक्षिप्ता सर्व
लोकमलापहा॥२२॥ अवतीर्य यदोर्वंशे बिभ्रद्रूपमनुत्तमम्॥ कर्माण्युद्दाममत्तानि हिताय जगतो कृथाः॥ या
नि ते चरितानीश मनुष्याः साधवः कलौ॥ शृण्वंतः कीर्तयंतश्च तरिष्यंत्यंजसा तमः॥२३॥ यदुवंशेवतीर्णस्य भ
वतः पुरुषोत्तम॥ शरच्छतं व्यतीयाय पंचविंशाधिकं प्रभो॥२५॥ नाधुना ते खिलाधार देवकार्यावशेषितं॥ कु
लं च विप्रशापेन नष्टप्रायमभूदिदं॥२६॥ ततः स्वधाम परमं विशस्व यदि मन्यसे॥ सलोकान्लोकपालान्नः
पाहि वैकुंठकिंकरान्॥२७॥ श्रीभगवानुवाच॥ अवधारितमेतन्मे यदात्थ विबुधेश्वर॥ कृतं वः कार्यमखिलं भूमे
र्भारोवतारितः॥२८॥ तदिदं यादवकुलं वीर्यशौर्यश्रियोद्धतं॥ लोकं जिघृक्षद्रुद्धं मे वेलयेव महार्णवः॥२९॥ राम

धिः अवरोधिभिः संघ्रिजं चांगसंगैः एवं शुचिषदः स्वाश्रमधर्मस्थितास्तव तीर्थद्वयमुपस्पृशंति सेवंत इति॥३०॥ विबुधैः स
ह विक्षिप्ता विस्तारिता॥ उद्दामानि उन्नतानि विक्रमाये भूतानि कर्माणि वीर्यशौर्ययुक्तया श्रिया॥॥ ॥ रामायनमः॥

त्वमेव प्रकृत्यादिद्वारा जगत्स्रष्टा दिदृक्षेत्यभिप्रेत्य उक्तं तत्केन प्रकारेणेत्यत आह ॥ त्वत्त इति त्वत्तः पुमान् पुरुषो वीर्यं शक्तिं समधि
कृत्य प्राप्य यया मायया सह महान्तं धत्ते किमिव गर्भमिव स्वविश्वस्य गर्भमिव सोऽयं महान् तयैव मायया अनुगतः सन् ॥ आत्मनः स
काशात् अण्डकोशं ससर्ज यद्वा अनुगत इति पाठे पि तया मायया त्वयाधिष्ठितः ॥२६॥ नन्वेवंभूतमीश्वरं त्वं मम सुतोऽवगते
तत्राह तदिति तत्तस्मात् ॥ तस्थुषः स्थावरस्य च जगतो जंगमस्य च भवानधीशः यद्यस्मान्मायया उत्था उत्थं भिता या गु
णाविक्रियाः इंद्रियवृत्तिः तयोपनीतानर्थान् विषयान् जुषन् जुषमाणोऽपि हे हृषीकपते न लिप्तः त्वं ये त्वन्ये जीवा यो

त्वत्तः पुमान् समधिकृत्य ययास्य वीर्यं धत्ते महान्तमिव गर्भममोघवीर्यः ॥ सोऽयं तयानुगत आत्मन अण्डको
शं हैमं ससर्ज बहिरावरणैरुपेतं ॥ २६ ॥ तत्तस्थुषश्च जगतश्च भवानधीशो यन्माययोत्थगुणविक्रिय
योपनीतान् ॥ अर्थान् जुषन्नपि हृषीकपते न लिप्तो येऽन्ये स्वतः परिहृतादपि बिभ्यति स्म ॥२७॥ स्मायाव
लोकलवदर्शितभावहारिभ्रूमंडलप्रहितसौरतमंत्रशौंडैः ॥ पत्न्यस्तु षोडशसहस्रमनंगबाणैर्यस्येंद्रियं विम थितुं करणैर्न विभ्व्यः ॥२८॥

गिनो वा स्वतः परिहृतादपि तु विद्यमानात्स्वकाद्वा विषयजोषणाद्बिभ्यति वासनामात्रेण बध्यंत इत्यर्थः ॥२७॥ अलिप्तत्वमा
ह स्मायेति ॥ स्मायावलोकैर्मंदस्मितविलसितावलोकः ॥ तस्य लवः कटाक्षः तेन दर्शितो यो भावोऽभिप्रायः तेन म
नोहारि यत् भ्रूमंडलं तेन प्रहिता ये सौरतमंत्राः तैः शौंडैः प्रगल्भैरनंगबाणैः संमोहनैः कारणैः कामकलाभिः षोड
शसहस्रं पत्न्यः यस्येंद्रियं मनः विमथितुं क्षोभयितुं न विभ्व्यः न समर्थाः स भवान् न लिप्त इति पूर्वेणान्वयः ॥२८॥ राम ॥

ननयुद्धे देवासुरादयः परस्परं जयंति जीयंते वा किं अहं तत्र इत्यत आहुः ॥ नसीति मिथुः मिथः अर्घ्यमानाः युद्धादिभिः पीर
ड्यमानाः ब्रह्मादयोपि यस्य तव वशे भवंति न तत्र जये पराजये वा स्वतंत्राः ॥ क इव नसि नासिकायां ओताः नासिकायां वि
ध्यबद्धाः गावो बलीवर्दा इव ॥ अतः कालस्य कलयितुः प्रवर्तकस्य तव एव अतः प्रकृतिपुरुषयोरपि परस्य तस्य ते पुरुषोत्त
मस्य पादो नः शं तनोतु ॥ २४ ॥ प्रकृतिपुरुषाभ्यां परत्वम् उपपादयंतः ॥ कालत्वेन पुरुषोत्तमत्वमाहुः अस्येति ॥ अस्य जगतः

नस्योतगाव इव यस्य वशे भवंति ब्रह्मादयस्तनुभृतो मिथुरर्घ्यमानाः ॥ कालस्य ते प्रकृतिपूरुषयोः परस्य शं
नस्तनोतु चरणः पुरुषोत्तमस्य ॥ २४ ॥ अस्यासि हेतुरुदयस्थितिसंयमानामव्यक्तजीवमहतामपि काल
लमाहुः ॥ सोयं त्रिणाभिरखिलापचये प्रवृत्तः कालो गभीररय उत्तमपूरुषस्त्वम् ॥ २५ ॥ ॥ ॥ राम ॥ ॥

उदयादीनां हेतुरसि ॥ अतः अव्यक्तं प्रकृतिः जीवः पुरुषः महान् महत्तत्त्वं तेषां कालं नियंतारं त्वामाहुः ॥ अक्षरात्परतः
परः महतः परमव्यक्तमव्यक्तात्पुरुषः परः ॥ पुरुषान्न परं किंचित्सा काष्ठा सा परा गतिरित्याद्याः श्रुतयः ॥ किंच अयं संव
त्सरात्मको यः कालः त्रिणाभिः त्रीणि चातुर्मास्यानि नाभयो यस्य सोपि त्वमेव अतः त्वमुत्तमपुरुष इति ॥ तथा च गी
तासु यस्मात्क्षरमतीतोहमक्षरादपि चोत्तमः ॥ अतोस्मिं लोके वेदे च प्रथितः पुरुषोत्तमः ॥ इति ॥ २५ ॥ ॥ ॥ राम ॥

त्रिकुलसमुपतनी

श्री॰ भा॰ए॰ टी॰ ४५

तच्चरणस्य भक्तपक्षपातः प्रसिद्ध एवेति त्वं वंतः श्लाघयंते केत्तरीति ॥ बलिबंधने त्रिभिर्विक्रमैर्युतः ॥ तत्र द्वितीयविक्रमे
सत्यलोकं गतः तव पादः केतुः स्वस्त्वद्रिक्तो विजयध्वज इव तत्संपारयंति त्रिपतत्पताकः ॥ त्रिधा पतंती गंगा पताका यस्य
सः तथा स्वस्त्वं देवचरणेः तस्मिन योरुभयोर्भयाभयकरः ॥ साधुषु स्वरे भुस्त्वर्गायवलेषु स्तरेषु इतराय अधोगमनाय

केतुस्त्रिविक्रमयुतस्त्रिपतत्पताको यस्ते
भयाभयकरोऽसुरदेवचम्वोः ॥ स्वर्गाय साधुषु
खलेष्वितराय भूमन् पादः पुनातु भगवन्भज
तामघन्नः ॥ १७ ॥ राम ॥ ॥

यएवं केतुरूपस्ते पादः स भजतां नः ॥ अघं पुनातु शोधयतु अघादिनिति पाठे भजतां नः इति कर्मणि षष्ठी ॥ अघात् भजतो
स्मान् पुनात्विति तथा च श्रुतिः ॥ चरणं पवित्रं विततं पुराणं येन पूतस्तरति दुष्कृतानि तेन पवित्रेण शुद्धेन पूता अतिपाप्मानम
रातिं तरेम लोकस्य द्वारमर्चिमत्पवित्रं ज्योतिष्मद्भ्राजमानं महस्वत् ॥ अमृतस्य धारा बहुधा दोहमानं चरणं नो लोके सुधि

गं॰ स्तवटीका ॥ १८ ॥ राम ॥ ॥

राम ४५

नन्वात्मारामस्यकिंकर्मकरणेनअतआह ॥ शुद्धिरितिहेईड्यहेऋषभदुराशयानांरागिणांविद्याउपासनाविद्यादिभि
स्तथाशुद्धिर्नभवतिसत्वात्मनांसतांतेयशसिप्रवृद्धसंभृतयापरिवृढयाअभिवृद्धयासच्छ्रद्धयायथास्यात्परमपावन
स्ययशसोवितानायतवकर्माचरणमितिभावः ॥९॥ तदेवंत्वद्यशःश्रद्धैवशुद्धिहेतुःअस्माभिस्तुतवांघ्रिर्दृष्टः ॥ अतस्त्वां

शुद्धिर्नृणांनतुतथेड्यदुराशयानांविद्याश्रुताध्ययनदानतपःक्रियाभिः ॥ सत्वात्मनामृषभतेयशसिप्र
वृद्धसच्छ्रद्धयाश्रवणसंभृतयायथास्यात् ॥९॥ स्यान्नस्तवांघ्रिरशुभाशयधूमकेतुःक्षेमाययोमुनि
भिरार्द्रहृदोह्यमानःयःसात्वतैःसमविभूतयआत्मवद्भिर्व्यूहेर्चितःसवनशःस्वरतिक्रमाय ॥१०॥ ॥

सवनशःत्रिक
लंप्रर्चितः

चिंत्यमानः ॥ रामायनमः ॥ ॥ राम ॥ स्वर्गमतिक्रम्यवैकुंठप्राप्तये

घ्रिर्नोस्माकंअशुभाशयानांविविधविषयवासनानांधूमकेतुः ॥ तद्दाहकःस्यात्कथंभूतःयःक्षेमायमोक्षायमु
निभिःमुमुक्षुभिःप्रेमार्द्रहृदाउह्यमानःचिंत्यमानः ॥ यश्चसात्वतैर्भक्तैःसमविभूतयेसमानैश्वर्यायवासुदेवादिव्यू
हैर्चितःतेषुचकैश्चिदात्मवद्भिर्धीरैःस्वरतिक्रमायस्वर्गमतिक्रम्यवैकुंठप्राप्तयेसवनशःत्रिकालमर्चितः ॥१०॥ ॥
॥ श्रीरामचंद्रायनमोनमः ॥ ॥ ॥ राम ॥ ॥ ॥

श्री॰ भा॰ ए॰ टी॰ २८

एतेषां च मुनिसात्वतादीनां च संसदि मे वक्त्रांनां मध्ये परमभागवतेषु लक्ष्म्या अर्पितवती प्रीतिरथिकेति सूचयंति ॥ पर्युष्ट्येति द्वंद्वभावः
कांदस्तः अहं यत्र वसामि तत्रैव वक्षसि पर्युष्टिताप्येवं वसतीति प्रतिपत्तिवत् ॥ सपत्नीवत् श्रीः संस्पर्द्धमाना भवति ॥ तथापि तां
स्पर्द्धमानां अप्रियमनादृत्य यो भवान् पर्युष्टितयापि अमुया वनमालया भक्तैरर्पितेयमिति प्रीत्या सुश्लोकीतं सद्गुणसंपादितं यद्यथाभ
वति तथा हेरणं सज्जामाददत् स्वीकृतवान् ॥ तस्य तवांघ्रिर्नः अघ्रु धूमकेतुर्भूयात् यद्वा ॥ सुप्रणीतमर्हणमाददत् ॥ सेनाशुभा
शाय धूमकेतुर्भूयादित्यन्वयः अथ वैवं संबंधः ॥ एतेभ्यो ध्यानादिभ्यो विनादिनिष्टेभ्योपि त्वद्यशसि प्रस्पर्द्ध संकुडावं तत एव कृतार्थो भगव
तो यशः प्रियत्वादित्याहुः पर्युष्ट्या वशंकातावित्यस्मात् परितः सर्वांगसृष्ट्याकांतया शोभितवनमालया वक्षसि एकदेशे वर्त

पर्युष्ट्या तव विभो वनमालयेयं संस्पर्द्धिनी भगवती प्रतिपत्निवच्छ्रीः ॥ यः सुप्रणीतममुयार्हणमाददन्नो
भूयात्सदांघ्रिरशुभाशयधूमकेतुः ॥ १२ ॥ ॥ ॥ रामाय नमः ॥ ॥ ॥ ॥ ॥ राम ॥ ॥ राम

माना श्रीः संस्पर्द्धमाना भवति ॥ तथाप्याम्नायमन्त्रैर्बहुधा वर्णितया कीर्तिमय्या वैजयंत्या वनमालयैव यो भवान् सुप्रणीतमर्हणमा
ददादित्यादि दृष्टांत ॥ १२ ॥ किंच प्रयतपाणिभिः संयतहस्तैर्हविर्गृहीत्वा अध्वरे अग्न्याहवनीयादौ याज्ञिकैर्यः स्मिंत्यते ॥ ननु यः
सो देवतायै हविर्गृहीतस्यात्ता ध्यायेद्वषट्करिष्यन्निति वचनात् तन्न दैवताः चिंत्यते अत आहुः त्रय्या निरुक्तेन विधिना इंद्रादिरूपे
णैव यज्ञपुरुषः चिंत्यत इत्यर्थः उत किंच ॥ अध्यात्मयोगे आत्माधिकारे योगे योगिभिर्व्याप्तमत्नमायां अणिमादिसिद्धिंजिज्ञा
सुभिः ॥ तत्कामैर्यः स्मिंत्यते ॥ परमभागवतैस्तु सम्यक्कर्मभिः परीष्टः सर्वतः पूजितः स तवांघ्रिर्नो अशुभाशयधूमकेतुः स्यादिति पूर्वे
णान्वयः ॥ इति परस्य टीकाः ॥ ११ ॥ ॥ रामाय नमः ॥ ॥ १९ ॥ ॥ ॥ रामाय नमः ॥ ॥ ॥ राम ॥ ॥ राम २८

बुद्धींद्रियादिभिः दर्शनादिना प्राणेन च बलदेहेन नादंडवत्प्रणिपातेन नताः वयं नमस्कुर्वंतः ॥ स्मेति विस्मये यथाहुः दोर्भ्यां
पद्भ्यां जानुभ्यां उरसा शिरसा दृशा मनसा वचसा चेति प्रणामोऽष्टांग ईरित इति ॥ शाब्दोक्तविस्मयार्थविशेषणान्न ॥ कर्ममया
दुरुपाशान्मुमुक्षुभिर्भावयुक्तैरपि यत्केवलमंतर्हृदि चिंत्यते न तद्दृष्टपते तद्वयं नताः अहोभाग्यमित्यर्थः ॥ ७ ॥ ननु ममापि
दृष्टादृष्टकर्मकरणात् कुतो मत्पदारविंदचिंतनं कर्मपाशान्मुमुक्षुभिः क्रियते तत्राहुः त्वमिति हे अजित ॥ आस्तामिदानीं

श्रीदेवा ऊचुः ॥ नताः स्म ते नाथ पदारविंदं बुद्धींद्रियप्राणमनोवचोभिः ॥ यच्चिंत्यतेंतर्हृदि भावयुक्तैर्मुमु
क्षुभिः कर्ममयोरुपाशात् ॥ ७ ॥ त्वं मायया त्रिगुणयात्मनि दुर्विभाव्यं व्यक्तं सृजस्यवसि लुंपसि तद्गुणस्थः
नैतैर्भवानजित कर्मभिरज्यते वै यत्स्वे सुखेऽव्यवहितेऽभिरतोऽनवद्यः ॥ ८ ॥ ॥ ॥ राम ॥ ॥ ॥ राम ॥

न्यैर

तनसिदमत्वं कर्म त्वं व्यक्तं महदादिप्रपंचं सृजसि पालयसि संहरसि च तदप्यात्मन्येव न पृथक् दुर्विभाव्यं मनसाप्यवि
तर्क्यं तद्गुणस्थः तस्या मायाया गुणेषु नियंतृत्वेन स्थितः ॥ अथ च एतैः कर्मभिः भवान्नाज्यते न लिप्यते कुतः यो भवान् अ
नवद्यः रागादिरहितः यतः स्वे आत्मस्वरूपे सुखे अव्यवहिते अनावृते अभिरतः ॥ अतस्त्वत्कर्मजं वंचनं तया आत्मारामः परमेश्वर
इति मुमुक्षुभिः चिंत्यत इति भावः ॥ ८ ॥ ॥ ॥ रामायनमः ॥ ॥ ॥ राम ॥ ॥ ॥ राम ॥ ॥ ॥

चयेन्ब्रह्मादिभिः स्तुत्वागंतं विज्ञापितं हरिं ॥ उद्धवः प्रार्थयामास स्वधामनयमामिति ॥ अतः परमतिविस्तरेणात्मविद्यां निरू
पयितेतत्प्रस्तावमाह ॥ अथेति आत्मजैः सनकादिभिः ॥ अभ्यगात् आगता आस्मामितिचतुर्थेनान्वयः ॥ ननु तेषामपेंद्रादिरूपं भगवं

श्रीबादरायणिरुवाच ॥ अथ ब्रह्मात्मजैर्देवैः प्रजेशैरावृतोभ्यगात् ॥ भवश्च भूतभव्येशो ययौ भूतगणै
र्वृतः ॥१॥ इंद्रो मरुद्भिर्भगवानादित्या वसवोश्विनौ ॥ ऋभवोंगिरसो रुद्रा विश्वे साध्याश्च देवताः ॥२॥ गं
धर्वाप्सरसो नागाः सिद्धचारणगुह्यकाः ॥ ऋषयः पितरश्चैव सविद्याधरकिन्नराः ॥३॥ द्वारकामुपसं
जग्मुः सर्वे कृष्णदिदृक्षवः ॥ वपुषा येन भगवान्नरलोकमनोरमः ॥४॥ यशो वितेने लोकेषु सर्वलोक
मलापहं ॥ तस्यां विभ्राजमानायां समृद्धायां महर्द्धिभिः ॥५॥ व्यचक्षतावितृप्ताक्षाः कृष्णमद्भुतदर्शनं ॥६॥
स्वर्गोद्यानोपगैर्माल्यैः छादयंतो यदूत्तमम् ॥ गीर्भिश्चित्रपदार्थाभिस्तुष्टुवुर्जगदीश्वरं ॥७॥ राम ॥ ॥

तं नित्यं प्रपश्यतां केयमिति दिदृक्षा अत आह वपुषेति ॥ येन वपुषा नरलोकमनोरमः सन् सर्वलोकेषु यशो वितेने तदिति संबं
धः वपुः दिदृक्षवः व्यचक्षत अपश्यन् ॥५॥ स्वर्गोद्यानस्थैर्माल्यैः ॥ चित्राणि शब्दरूपालंकारबंधप्रायाणि पदानि अर्थाश्च यासु ताभि

एतदेवकैमुत्यन्यायेनस्फुटयति वैरेणेति यं शयनासनाद्यैर्वैरेणापि ध्यायंतस्तत्स्वगतिविलासाद्यैः आदृतधियः तन्नदाकारा
धीर्यैर्धातेतत्साम्यमापुः ॥ किंपुनर्वक्तव्यं मच्चरक्तधियांतत्साम्यंभवतीति ॥ ४८ ॥ नन्वपुत्रस्नेहस्त्वेन्मोहहेतुः तर्हिसर्वेषुभवे
न्न ॥ तत्राह मापत्यबुद्धिमिति अपत्यमितिबुद्धिंमाकृथाः ॥ अदारगमः कृष्णरसः ॥ ४९ ॥ ननुकथमीश्वरोमानुषः स्यात् कथंवार

वैरेणयंनृपतयः शिशुपालपौंड्रशाल्वादयोगतिविलासविलोकनाद्यैः ॥ ध्यायंतआकृतधियः शयनास
नादौतत्साम्यमापुरनुरक्तधियांपुनः किं ॥ ४८ ॥ मापत्यबुद्धिमकृथाः कृष्णेसर्वात्मनीश्वरे ॥ मायामनुष्य
भावेनगूढैश्वर्येपरेव्यये ॥ ४९ ॥ भूभारासुरराजन्यहंतवेगुप्तयेसतां ॥ अवतीर्णस्यनिर्वृत्यैयशोलोके
वितन्यते ॥ ५० ॥ श्रीशुकउवाच ॥ ॥ एतच्छ्रुत्वामहाभागोवसुदेवोतिविस्मितः ॥ देवकीचमहाभागा
जहतुर्मोहमात्मनः ॥ ५१ ॥ इतिहासमिमंपुण्यंधारयेद्यःसमाहितः ॥ सविधूयेहशमलंब्रह्मभूया
यकल्पते ॥ ५२ ॥ इतिश्रीभागवते एकादशस्कंधे ॥ पंचमोध्यायः ॥ ॥ ५ ॥ ॥ ॥ राम ॥

तस्यविष्णुत्वस्याकिंकर्तुः ॥ पूतनाशोषणादिकर्माश्चर्यमिवनिरूप्यते ॥ तत्राह ॥ भूभारव्रूपाअसुराएवयेराजन्या
स्तेषांहंतवेतावहंतुंनिर्वृत्यैमोक्षाय ॥ ५० ॥ इहअस्मिन्नेवदेहेशमलंमोहंविधूयब्रह्मत्वायकल्पते ॥ ५२ ॥ इति
श्रीभावार्थदीपिकायां एकादशेपंचमः ॥ ५ ॥ ॥ रामायनमः ॥ ॥ ॥ राम ॥ ॥ ॥ राम ॥ ॥

श्री· भा·ट· टी· २९

विदितकर्मनिवृत्तिमुक्त्वा निषेधनिमित्तप्रायश्चित्तनिवृत्तिमाह ॥ स्वपादमूलमिति त्यक्तः अन्यस्मिन्देहाद्यौ देवतान्तरे वाभा
वोयेन अतएव तस्य विकर्मणि प्रवृत्तिर्न संभवति ॥ यच्च कथंचित्प्रमादादिना उत्पतितं भवेत् तदपि हरिर्धुनोति ॥ ननु य
मसत्त्वमन्येत ॥ तत्राह परेशः ननु च स्मृतिश्रुती ममैवाज्ञे इति भगवद्वचनात्तदाज्ञाभंगं कथं सहेत ॥ तत्राह प्रियस्य न
नु नायं पापत्यागार्थं भजते तत्राह हृदि संनिविष्टः ॥ न हि वस्तुशक्तिर्बुद्धिमपेक्षत इत्यर्थः ॥ ४१ ॥ जायंतेया नृजयंत्याः पु

स्वपादमूलं भजतः प्रियस्य त्यक्तान्यभावस्य हरिः परेशः ॥ विकर्म यच्चोत्पतितं कथंचिद्धुनोति सर्वं हृदि सं
निविष्टः ॥ ४२ ॥ नारद उवाच ॥ धर्मान्भागवतानित्थं श्रुत्वाथ मिथिलेश्वरः ॥ जायंतेयान्मुनीन्प्रीतः सो
पाध्यायो ह्यपूजयत् ॥ ४३ ॥ ततोंतर्दधिरे सिद्धाः सर्वलोकस्य पश्यतः ॥ राजधर्मानुपातिष्ठन्नवाप परमां
गतिं ॥ ४४ ॥ त्वमप्येतान्महाभाग धर्मान्भागवतान्श्रुतान् ॥ आस्थितः श्रद्धया युक्तो निःसंगो यास्यसे परं ॥ ४५
युवयोः खलु दंपत्योर्यशसा पूरितं जगत् ॥ पुत्रतामगमद्यद्वां भगवानीश्वरो हरिः ॥ ४६ ॥ दर्शनालिंगनाला
पैः शयनासनभोजनैः ॥ आत्मा वां पावितः कृष्णे पुत्रस्नेहं प्रकुर्वतोः ॥ ४७ ॥

त्राश्च ॥ ४३ ॥ उपातिष्ठन्नन्वतिष्ठन् ॥ ४४ ॥ निःसंगो भूत्वा प्राप्तव्य प्रक्रियेयमुक्ता युवां तु प्रसंगत एव कृतार्थौ वित्याह युवयो
रिति वां युवयोः ॥ न च सर्वकर्मार्पणादि भागवतधर्मैर्विना युवयोः ॥ सत्त्वशुद्धिरापादनीया ॥ पुत्रोपलालने नैव भाग
वतधर्मसर्वस्वं निष्पन्नमित्याह ॥ दर्शनेति ॥ कृष्णे पुत्र इति स्नेहं प्रकुर्वतो वां तस्य दर्शनादिभिरात्मा पावितः शोधितः ॥ ४७ ॥ राम

राम २९

युगानुरूपाभ्यां नामरूपाभ्यां ॥ ३५ ॥ एतेषु चतुर्ष्वपि युगेषु कलिरेव श्रेष्ठ इत्याह ॥ कलिमिति ॥ गुणज्ञाः कलेर्गुणं जानंतीति ये ते ।
ननु दोषाणां बहुत्वात्कथं सभाजयंतीति तत्राह सारभागिनः गुणांशग्राहिणः कोसौ गुणः तमाह यत्रेति तदुक्तं ध्यायन्कृ
ते यजन्यज्ञैस्त्रेतायां द्वापरेऽर्चयन् ॥ यदाप्नोति तदाप्नोति कलौ संकीर्त्य केशवमिति ॥ ३६ ॥ तस्मात्कलौ ग्रतः अस्मात्संकीर्त
नात्परमो लाभो नास्ति यतः संकीर्तनात् ॥ ३७ ॥ किंच ॥ कृतादिष्विति अमलाशयाः संतः प्रायः प्रायशो भगवति भक्ता भवंति

एवं युगानुरूपाभ्यां भगवान्युगवर्तिभिः ॥ मनुजैरिज्यते राजन्श्रेयसामीश्वरो हरिः ॥ ३५ ॥ कलिं सभाजयं
त्यार्या गुणज्ञाः सारभागिनः ॥ यत्र संकीर्तनेनैव सर्वः स्वार्थोऽभिलभ्यते ॥ ३६ ॥ न ह्यतः परमो लाभो देहिनां
भ्राम्यतामिह ॥ यतो विंदेत परमां शांतिं नश्यति संसृतिः ॥ ३७ ॥ घोरे कलियुगे प्राप्ते सर्वधर्मविवर्जिते ॥ वासु
देवपरा मर्त्यास्ते कृतार्था न संशयः ॥ ते सभाग्या मनुष्येषु कृतार्था नृप निश्चितम् ॥ ये स्मरंति स्मारयंति ह
रेर्नाम कलौ युगे ॥ कृतादिषु प्रजा राजन्कलाविच्छंति संभवं ॥ कलौ खलु भविष्यंति नारायणपरायणाः
३८ ॥ क्वचित्क्वचिन्महाराज द्रविडेषु च भूरिशः ॥ ताम्रपर्णी नदी यत्र कृतमाला पयस्विनी ॥ ३९ ॥ कावेरी
च महापुण्या प्रतीची च महानदी ॥ ये पिबंति जलं तासां मनुजा मनुजेश्वर ॥ ४० ॥ प्रायो भक्ता भगवति वासुदेवेऽमलाशयाः
देवर्षिभूताप्तनृणां पितॄणां न किंकरो नायमृणी च राजन् ॥ सर्वात्मना यः शरणं शरण्यं गतो मुकुंदं परिहृत्य कर्तं

भक्तस्य विधिनिषेधनिवृत्तेः कृतकृत्यतामाह ॥ देवर्षीति ॥ आप्ताः पोष्याः कुटुंबिनः इतरे देवादयः पंचयज्ञदेवताः एतेषां य
थाऽभक्तः ऋणी अत एव तेषां किंकरः तदर्थं नित्यं पंचयज्ञादिकर्तव्यतया चाह स्मृतिः हीनजातिं परिक्षीणमृणार्थं कर्म कारये
दिति अयं तु न तथा कोसौ यः सर्वभावेन मुकुंदं शरणागतः कर्तं कृत्यं परिहृत्य यद्वा कर्तं भेदं परिहृत्य कृतीक्षेत्र इत्यस्मात् ॥ वासुदेवः सर्व

श्री·
भा·ए·
टी·
२५

स्तुतिमात्रं ध्येयमिति हे प्रणतपाल हे महापुरुष ते चरणारविंदं वंदे कथंभूतं ध्येयं ध्यातुं योग्यं सदेति सर्वत्र संबध्यते ध्ये
यत्वे हेतवः इंद्रियकुटुंबादिभिर्यः परिभवस्तिरस्कारः तं हंतीति तथा ततः ॥ किंच अभीष्टदोहं मनोरथ[illegible] प्रदं किंच तीर्था
स्पदं गंगा[illegible]द्याश्रयत्वेन परमपावनं शिवविरिंचाभ्यां नुतं स्तुतं महत्तमं न नुतो कृतार्थो विवेकिमर्थे ताभ्यां स्तुतं तत्राह शर
णागतं शरण्यं आश्रययोग्यं सुखात्मकमित्यर्थः ॥ तर्हि ब्रह्मादिस्तुत्यं प्राकृतस्य कथं गोचरं स्यात् ॥ न भृत्यार्तिहं यस्य कस्यापि
भृत्यमात्रस्यार्तिहं हंतनं केवलमार्गां तत्कार्तिमात्रं हंतीति किं तु भवाब्धिपोतं संसारार्णवतारकं च ॥ ३३ ॥ इदानीं स्वयमाप्तकाम

ध्येयं सदा परिभवघ्नमभीष्टदोहं तीर्थास्पदं शिवविरिंचिनुतं शरण्यं ॥ भृत्यार्तिहं प्रणतपाल भवाब्धिपोतं
वंदे महापुरुष ते चरणारविंदं ॥ ३३ ॥ त्यक्त्वा सुदुस्त्यजसुरेप्सितराज्यलक्ष्मीं धर्मिष्ठ आर्यवचसा यदगा
दरण्यं मायामृगं दयितयेप्सितमन्वधावद्वंदे महापुरुष ते चरणारविंदम् ॥ ॥ ३४ ॥ ॥ राम ॥

त्यावैश्यपेतं भक्तार्थं चसापेक्षतां दर्शयन् श्रीरामचंद्रं स्तौति त्यक्त्वेति ॥ अन्यैः सुदुस्त्यजा या सुरैरीप्सिता राज्यलक्ष्मीस्तां
मत्त्वा यदिति यत्रेत्यर्थः वः अरण्यमगात् किं राज्यवैकल्यदर्शनेन न धर्मिष्ठः ऽतः आर्यस्य गुरोर्दशरथस्य वचसा किंच
एवं राज्यं त्यक्त्वापि भक्तवात्सल्येन दयितया सीतया ईप्सितं मायामृगं स्वर्णकाये योऽन्वधावत् तस्य भगवतश्चरणारविंदं राम·
वंदे यद्वा हे धर्मिष्ठेति संबोधनं तथा च विवदितत्वादार्यपदेन संधिर्न भवति ॥ तथा यदगादिति चरणारविंदमेवोच्यते २५
यच्च मायामृगमन्वधावत् ॥ तत्ते पदारविंदं वंदे इत्यन्वयः ॥ ॥

पृश्निगर्भः तस्य पुत्रः वृषाकपिः स्मृतः सन् वर्षति कामान् ॥ आकंपयति च लोकानिति तथा जयत्येवं सर्वदा जयंतः ॥ २६ ॥
श्यामः अतसीपुष्पसंकाशः ॥ निजानि चक्रादीन्यायुधानि यस्य सः ॥ श्रीवत्सो नाम वक्षसो दक्षिणभागे रोम्णां प्रदक्षिणा
वर्तः स आदिर्येषां कौस्तुभमण्यादिगदपद्मादीनां तैः ॥ अंकैरंकितैः चिह्नैः लक्षणैर्वक्षोद्यैः कौस्तुभादिभिः ॥ २७ ॥ महाराजोपलक्षा
णैः छत्रचामरादियुक्तं वेदतंत्राभ्यां वैदिकेन तांत्रिकेन च मार्गेण यजंति ॥ पूजयंति परमीश्वरं ज्ञातुमिच्छवः ॥ २८ ॥ नामार

विष्णुर्यज्ञः पृश्निगर्भः सर्वदेव उरुक्रमः वृषाकपिर्जयंतश्च उरुगाय इतीर्यते ॥ २६ ॥ द्वापरे भगवान्श्यामः पी
तवासा निजायुधः ॥ श्रीवत्सादिभिरंकैश्च लक्षणैरुपलक्षितः ॥ २७ ॥ तं तदा पुरुषं मर्त्या महाराजोपलक्षणं
यजंति वेदतंत्राभ्यां परं जिज्ञासवो नृप ॥ २८ ॥ नमस्ते वासुदेवाय नमः संकर्षणाय च ॥ प्रद्युम्नायानिरुद्धा
य तुभ्यं भगवते नमः ॥ २९ ॥ नारायणाय ऋषये पुरुषाय महात्मने ॥ विश्वेश्वराय विश्वाय सर्वभूतात्मने
नमः ॥ ३० ॥ इति द्वापर उर्वीश स्तुवंति जगदीश्वरं ॥ नानातंत्रविधानेन कलावपि तथा शृणु ॥ ३१ ॥ कृष्णवर्णं
त्विषाकृष्णं सांगोपांगास्त्रपार्षदं ॥ यज्ञैः संकीर्तनप्रायैर्यजंति हि सुमेधसः ॥ ३२ ॥ रामायनमः ॥

न्याह ॥ नमस्त इति नानातंत्रविधानेनेति कलौ तंत्रमार्गस्य प्राधान्यं दर्शयति वृत्तेतां व्यावर्तयति ॥ ३१ ॥ त्विषाकांत्याऽ
कृष्णमिंद्रनीलमणिवदुज्ज्वलं यद्वा त्विषा कृष्णं कृष्णावतारे ॥ अनेन कलौ कृष्णावतारस्य प्राधान्यं दर्शयति अंगा
नि हृदयादीनि उपांगानि कौस्तुभादीनि अस्त्राणि सुदर्शनादीनि पार्षदाः सुनंदादयः तत्सहितं ॥ यज्ञैः अर्चनैः संकी
र्तनं नामोच्चारणं स्तुतिश्च तत्प्रधानैः सुमेधसो विवेकिनः ॥ ३२ ॥ राम ॥

रोमहर्षादिकं विना कथं भक्तिर्गम्यते भक्त्या च विना कथमाशयः शुध्येदिति २३ किंच भक्तिः स्वाश्रयं शोधयतीति ।
किं वक्तव्यं येनाऽगद्गद्वागादिलक्षणा मद्भक्तियुक्तो लोकं सर्वं पुनातीत्याह वागिति २४ अपि च भक्त्यैवात्मशुद्धिर्नान्यत
इति सदृष्टान्तमाह यथेति यथाग्निना ध्मातं तापितमेव हेम सुवर्णं अन्तर्मलं जहाति न तु क्षालनादिभिः स्वं निजं रूपं च
भजते कर्मानुशयं कर्मवासनां मां भजते मद्रूपतामापद्यते २५ ननु ब्रह्मविरक्तो भाति परं तमेव विदित्वातिमृत्युमिति ना
दिश्रुतिभ्यो ज्ञानादेवाविद्यानिवृत्त्यात्मप्राप्तिरवगम्यते कुतो भक्तियोगेनेत्युच्यते तत्राह यथा यथेति आत्मा चित्तं परि

कथं विना रोमहर्षं द्रवता चेतसा विना । विनानंदाश्रुकलया शुध्येद्भक्त्या विनाशयः २३ वाग्गद्गदा द्र
वते यस्य चित्तं रुदत्यभीक्ष्णं हसति क्वचिच्च विलज्ज उद्गायति नृत्यते च मद्भक्तियुक्तो भुवनं पुनाति २४ ॥
यथाग्निना हेम मलं जहाति ध्मातं पुनः स्वं भजते च रूपं आत्मा च कर्मानुशयं विधूय मद्भक्तियोगेन भ
जत्यथो मां २५ यथा यथात्मा परिमृज्यतेऽसौ मत्पुण्यगाथाश्रवणाभिधानैः तथा तथा पश्यति वस्तु सू
क्ष्मं चक्षुर्यथैवांजनसंप्रयुक्तं २६ विषयान्ध्यायतश्चित्तं विषयेषु विषज्जते मामनुस्मरतश्चित्तं म
य्येव प्रविलीयते २७ तस्मादसदभिध्यानं यथा स्वप्नमनोरथं हित्वा मयि समाधत्स्व मनो मद्भावभा
वितं २८ स्त्रीणां स्त्रीसंगिनां संगं त्यक्त्वा दूरत आत्मवान् क्षेमे विविक्त आसीनश्चिंतयेन्मामतंद्रितः २९

मृज्यते शोध्यते मत्पुण्यकथानां श्रवणैरभिधानैश्च भक्त्यैवावान्तरव्यापारेण ज्ञानं न पृथगित्यर्थः २६ किंच ज्ञानेनात्मवि
त्तस्य मदाकारपरिणामः स च मां भजतः स्वभावत एव भवति न च यत्नान्तरमपेक्षते इत्थं सदृष्टान्तमाह विषयानिति २७ यस्मा
दन्यत्साधनं तत्फलं च स्वप्नमनोरथवदसदभिध्यानमात्रं तस्मात्तद्धित्वा मय्येव मनः समाहितं कुर्विति प्रकरणार्थमुपसंहर
ति तस्मादिति मद्भावभावितं मद्भावेनैव भजनेनैव शोधितं २८ विशेषतो ध्यानोपायनाय कोकाममार्गाः परित्याज्या इत्याह

स्त्रीणामिति आत्मवान् धीरः सन् क्षेमे निर्भये देशे विविक्ते वि
जने २९ एतदुपपादयति तेष्विति ॥

श्री
भा० ए०
टी०
७५

तदेवं तत्र तत्र निर्द्धारणेन तत्तत्संबंधेन च विशेषेणो विभूतीर्निरूप्येदानीं सामान्यतः सर्वा अपि निरूपयति पृथिवी
ति सार्द्धद्वयेन पृथिव्यादिशब्दैस्तन्मात्राणि विवक्षितानि अहमहंकारः महान्महत्तत्त्वं एताः सप्त प्रकृतिविकृतयः
विकाराः पंच भूतानि एकादशेंद्रियाणि इत्येवं षोडशसंख्याकः पुरुषो जीवः अव्यक्तं प्रकृतिः एवं पंचविंशतितत्त्वा
नि तदुक्तं मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त षोडशकश्च विकारो न प्रकृतिर्न विकृतिः पुरुष इति
किं च रजः सत्त्वं तम इति प्रकृतेर्गुणाः परं ब्रह्म च तदेतत्सर्वमहमेव किं चैतत्प्रसंख्यानं एतेषां परिगणनं एतेषां लक्ष

पृथिवी वायुराकाश आपो ज्योतिरहं महान्। विकारः पुरुषोऽव्यक्तं रजः सत्त्वं तमः परं ३७ अहमेत
त्प्रसंख्यानं ज्ञानं तत्त्वविनिश्चयः ३८ मयेश्वरेण जीवेन गुणेन गुणिना विना सर्वात्मनापि स
र्वेण न भावो विद्यते क्वचित् ३९ संख्यानं परमाणूनां कालेन क्रियते मया न तथा मे विभू
तीनां सृजतोऽण्डानि कोटिशः ४० ॥

णतो ज्ञानं च तत्फलं च तत्त्वविनिश्चयः स्वाहमेव ३७ एतदेव संक्षिप्याह मयेति जीवेश्वररूपेण द्विधा यो भावः
यश्च गुणगुणिरूपायश्च देवतेच ज्ञानरूपः स सर्वोऽपि मया विना मद्व्यतिरेकेण नास्ति अहमेव सर्वमित्यर्थः
३८ ननु सामान्यतः किमेवं संक्षिप्य कथयसि पूर्ववन्निर्द्धारणसंबंधाभ्यां विशेषतः सर्वाः कथयेति चेत्तत
त्राह संख्यानं पृथिव्यादिपरमाणूनां कालेन महता तदपि मयैव क्रियते कृत्वा वक्तुं शक्यते न तथा मे विभूती
नां संख्यानं कर्तुं न शक्यते कुत इत्यत आह सृजतोऽण्डानीति यदा मया सृज्यमानानां ब्रह्माण्डानामेव तावत्सं
ख्या नास्ति कुतस्तत्स्थानां विभूतीनां संख्येत्यर्थः ४० ॥ ॥ ॥ ॥ ॐ ॥ ॥

ठों
७५

वषा

भगवतां उत्पत्तिं प्रलयं चैव भूतानां गतिं चेति विद्यामविद्यां च स वाच्यो भगवानिति एवं लक्षणानां २९ सुपेशसां सु
रूपाणां दर्भजातीनां काशः अहं वीरुधादीनां विष्णुः रूपुरोडाशादिषु हुतेषु वा ३० लक्ष्मीर्धनादिसंपत् ३१ बलव
तां ओजः सहः स्वसन्निनां भागवतानां मत्साकृतकर्माहमित्यर्थः तेषामेव नवव्यूहानां वासुदेवसंकर्षणप्रद्युम्ना

वासुदेवो भगवतां त्वं तु भागवतेष्वहं किंपुरुषाणां हनुमान् विद्याध्राणां सुदर्शनः २९ रत्ना
नां पद्मरागोऽस्मि पद्मकोशः सुपेशसां कुशोऽस्मि दर्भजातीनां गव्यमाज्यं हविःष्वहं ३० व्यवसायि
नां महं लक्ष्मीः कितवानां छलग्रहः तितिक्षास्मि तितिक्षूणां सत्त्वं सत्त्ववतामहं ३१ ओजः स
हो बलवतां कर्माहं विद्धि सात्त्वतां सात्वतां नवमूर्तीनामादिमूर्तिरहं परा ३२ विश्वावसुः पूर्व
चित्तिर्गंधर्वाप्सरसामहं भूधराणामहं स्थैर्यं गंधमात्रमहं भुवः ३३ अपां रसश्च परमः तेजि
ष्ठानां विभावसुः प्रभा सूर्येंदुताराणां शब्दोऽहं नभसः परः ३४ ब्रह्मण्यानां बलिरहं वीरा
णामहमर्जुनः भूतानां स्थितिरुत्पत्तिरहं वै प्रतिसंक्रमः ३५ गत्युक्त्युत्सर्गोपादानमानं
दस्पर्शलक्षणं आस्वादश्रुत्यवघ्राणमहं सर्वेंद्रियेंद्रियम् ३६ ॥ ॥ ॥ ॥

निरुद्ध नारायण हयग्रीव वराह नृसिंह ब्रह्माण इति या नव मूर्तयः तासां मध्ये वासुदेवाख्या ३२ गंध
र्वाणां विश्वावसुः अप्सरसां पूर्वचित्तिः गंधमात्रं भुवि हंत ३३ परमः मधुरः परः पराख्यः प्राकृतः ३४ अ
र्जुनः पार्थः भूतानां प्राणिनां प्रतिसंक्रमः प्रलयः ३५ गत्यादयः पंचकर्मेंद्रियव्यापाराः स्पर्शादयो ज्ञा

श्री॰ भा॰ टी॰ ७४

श्रुचीनांशोधकानामपिमार्जनतत्त्वणधर्षनादीनामध्येवाद्यादिरूपःशोधकोहं २२ योगानांयोगांगानामष्टानांमध्ये
आत्मसंरोधःसमाधिरहंमंत्रोनीतिःकौशलानांविवेकादिनैपुणानांआन्वीक्षिकी आत्मानात्मविवेकविद्याअख्या
आत्मसंरोधःसमाधिरहंमंत्रोनीतिःकौशलानांविवेकादिनैपुणानांआन्वीक्षिकी आत्मानात्मविवेकविद्याअख्या
अन्यथाख्यातिशून्यख्याति असत्ख्यातिअनिर्वचनीयख्यातिवादिनामेव मिदमेवंवेतियोऽइंतोविकल्पःसोहं २४
कुमारःसनत्कुमारः २५ संन्यासःभूतानाभयदानेक्षेमानामभयस्थानानामध्येअवहिमेतिः अतर्विष्टास्तदंतेप्रियवच

यज्ञानांब्रह्मयज्ञोहंव्रतानामविहिंसनं वायुअर्कोवुवागात्माशुचीनामप्यहंशुचिः २२ योगानां
आत्मसंरोधोमंत्रोस्मिविजिगीषतां आन्वीक्षिकीकौशलानांविकल्पःख्यातिवादिनां स्त्रीणां चारिणां
त्वशतरूपाहंपुंसास्वायंभुवोमनुः नारायणोमुनीनांचकुमारोब्रह्मवादिनां २५ धर्माणामस्मि
संन्यासःक्षेमानामवहिर्मतिः गुह्यानांसूनृतंमौनंमिथुनानांअजस्त्वहं २६ संवत्सरोस्म्यनि
मिषाणामृतूनांमधुमाधवौ मासानांमार्गशीर्षोहंनक्षत्राणांतथाभिजित २७ अहंयुगा
नांचकृतंधीराणांदेवलोसितः द्वैपायनोस्मिव्यासानांकवीनांकाव्यआत्मवान् २८ ॥ ॥

नंमौनंचनहिप्रियमाणयोमौनेचपुरुषस्याभिप्रायोज्ञायतेजनःप्रजापतिःयस्यदेहार्धाभ्यांमिथुनमभूत्सएव
मुख्यंमिथुनंअर्धोहंवाएषआत्मनोयत्पत्नीतिश्रुतेः २६ अनिमिषानामश्मत्तानांमधुमाधवौवसंतऋत्व
र्थः अभिजितउत्तराषाढाचतुर्थपादःतथाचश्रुतिः अभिजिन्नामनक्षत्रंउपरिष्टादाषाढानांअधस्तान्छ
श्रवणायाइत्यादि २७ कृतंकृतयुगंदेवलस्याअसितोव्यासानांतथाश्रवणप्रथमपादः वेदविभागकर्तृणांकवी

हविर्ज्ञानीकामधेनुः १४ नक्षत्रौषधीनां प्रभुः सोमः यक्षरक्षसां प्रभुः १५ यादसां प्रभुः तपतां तापवतां दीप्तिम
तां च मध्ये १६ १७ संयमतां दंडयतां इत्यर्थः १८ भृगिणां दंष्ट्रिणां च मध्ये तेषां प्रभुः चत्वर्थः संन्यासः प्र

इंद्रोऽहं सर्वदेवानां ब्रह्मनामस्मि हव्यवाट् आदित्यानामहं विष्णु रुद्राणां नीललोहितः १३
ब्रह्मर्षीणां भृगुरहं राजर्षीणामहं मनुः देवर्षीणां नारदोऽहं हविर्धान्यस्मि धेनुषु १४ सिद्धे
श्वराणां कपिलः सुपर्णोऽहं पतत्रिणां प्रजापतीनां दक्षोऽहं पितॄणामहमर्यमा १५ मां विद्धि
द्वैत्यानां प्रह्लादमसुरेश्वरं सोमं नक्षत्रौषधीनां धनेशं यक्षरक्षसां १६ ऐरावतं गजेंद्राणां
यादसां वरुणं प्रभुं तपतां चमतां सूर्यं मनुष्याणां च भूपतिं १७ उच्चैःश्रवाः तुरंगाणां धातू
नामस्मि कांचनं यमः संयमतां चाहं सर्पाणामस्मि वासुकिः १८ नागेंद्राणामनंतोऽहं मृगे
द्रः श्रृंगिदंष्ट्रिणां आश्रमाणामहं तुर्यो वर्णानां प्रथमो नघ १९ तीर्थानां स्रोतसां गंगास
मुद्रः सरसामहं आयुधानां धनुर्वेदं त्रिपुरघ्नो धनुष्मतां २० धिष्ण्यानामस्म्यहं मेरुर्गहना
नां हिमालयः वनस्पतीनामश्वत्थ ओषधीनामहं यवः २१ पुरोधसां वसिष्ठोऽहं ब्रह्मिष्ठानां
बृहस्पतिः स्कंधोऽहं सर्वसेनानां
अग्रण्यो भगवानजः २२ ॥

थमो ब्राह्मणः १९ स्रोतसां प्रवाहानां च मध्ये सरसां स्थिरोदकाशयानां २० धिष्ण्यानां निवासस्थानानां ग
हनानां दुर्गमाणां २१ ब्रह्मिष्ठानां वेदार्थनिष्ठानां सेनान्यां च भूपतीनां अग्रण्यः सन्मार्गप्रवर्तकानां मनोब्रह्मा २२

श्री भा. ए. टी. ७३

सख्यदा ततो ज्ञातिवधाद्विरक्तः तदा मया प्रतिबोधितः सन् त्वयथा त्वमभिभाषसे एवं संग्राममध्ये मामभ्यभाषत तत्तद्देवत
वापि कथयिष्यामीति भावः ८ ताः विभूतीः कथयति अहमिति अस्मच्छब्दसमानाधिकरणाः प्रथमान्ता द्वितीयान्ता
श्च सर्वा विभूतयस्तास्ता आत्मोपासनार्थं कथ्यन्ते षष्ठी च क्वचिन्निर्धारणे तो संबंधे च क्वचिद्यथायोग्यं द्रष्टव्या ततश्चामीषां
भूतानामात्मेति सुहृदिति ईश्वर इति च सामान्येनाहमुपास्य इत्यर्थः एवं सर्वत्रैतेषां स्थित्युद्भवाप्ययः तद्धेतुरित्य

स तदा पुरुषव्याघ्रो युक्त्या मे प्रतिबोधितः अभ्यभाषत मामेवं यथा त्वं रणमूर्धनि ८ अहमात्मोद्धवामी
षां भूतानां सुहृदीश्वरः अहं सर्वाणि भूतानि तेषां स्थित्युद्भवाप्ययः ९ अहं गतिर्गतिमतां कालः
कलयतामहं गुणानां चाप्यहं साम्यं गुणिन्यौत्पत्तिको गुणः १० गुणिनामप्यहं सूत्रं महतां च महा
नहं सूक्ष्माणामप्यहं जीवो दुर्जयानामहं मनः ११ हिरण्यगर्भो वेदानां मन्त्राणां प्रणवस्त्रिवृत् अ
क्षराणामकारोऽस्मि पदानि छन्दसामहं १२ ॥ ॥ श्रीहंसाय नमः ॥ ॐ ॥

र्थः ९ विशेषतो विभूतीराह कलयतां वशीकर्तॄणां मध्ये गुणानां सत्त्वादीनां साम्यमव्याकृतं गुणिनि धर्मिणि औत्प
त्तिकः स्वाभाविको गुणः सोऽहं १० सूत्रं प्रथमकार्यं महान् महत्तत्त्वं सूक्ष्मोपाधित्वाद् दुर्ज्ञेयत्वाच्च जीवस्य सूक्ष्मत्वं बुद्धे
र्गुणेनात्मगुणेन चैव बालाग्रमात्रो ह्यवरोऽपि दृष्ट इति श्रुतेः ११ वेदानां समवेधीतेषामध्यापकः पदानि त्रिपदा गायत्री

॥ ८ हंसटीकं ७३

अत्र सदा त्वां परमात्मानमाहुर्याथातथ्येन यथार्थत्वेन सर्वभूतकारणं त्वां ब्राह्मणा वेदतात्पर्यविदः १ एवं कारणत्वे
न सर्वात्मकत्वमनूद्य विभूतीः पृच्छति येषु चिंतिषु उपासीनाः सेवमानाः संतः २ दुर्ज्ञेयत्वमेवाह गूढः अस्फुटः भू
तानां मध्ये अत्र हेतुः भूतानामात्मांतर्यामी अत्रापि हेतुः हे भूतभावनेति तेन त्वया ३ त एव साकल्येन पृच्छति ४

उच्चावचेषु भूतेषु दुर्ज्ञेयमकृतात्मभिः उपासते त्वां भगवन्याथातथ्येन ब्राह्मणाः १ येषु येषु
च भावेषु भक्त्या त्वां परमर्षयः उपासीनाः प्रपद्यंते संसिद्धिं तद्वदस्व मे २ गूढश्चासि भूतात्मा
भूतानां भूतभावन त्वां पश्यंति भूतानि पश्यंतमाहितानि ते ३ याः काश्च भूमौ दिवि वै
रसायां विभूतयो दिव्या महाविभूते ताः मह्यमाख्याह्यनुभाविताः तेन मामिति तीर्थपदाच्छि
पद्मं ४ श्रीभगवानुवाच ५ एवमेतदहं पृष्टः प्रश्नं प्रश्नविदां वर युयुत्सुना विनशने सपत्नैर
नेनैव ६ ज्ञात्वा ज्ञातिवधं गर्ह्यमधर्मं राज्यहेतुकं ततो निवृत्तो हंताहं हतोयमिति लौकिकः ७

हे महाविभूते काश्चिद्रूप्या दिव्यते विभूतयः रसायां रसातले अनुभाविताः त्वयैव केनचिह्नक्ति विपोषिण
संयोजिताः तीर्थानां पदं च तदंघ्रिपद्मं च ५ न तावता स्मृतां जैनप्रश्नं संवादित्वात् तवायं प्रश्नः साधीयानिति
तावद्युमादिता एवमिति त्रिभिः प्रश्नः पृष्टः सपत्नैर्योद्धुमिकृतां विनशने कुरुक्षेत्रे ६ युयुत्सो विभूतिप्रश्नकः

प्रसंगः तत्राह ज्ञात्वेति लौकिकः प्राकृतमतिः ॥ ७ ॥

श्री
भाग
टी
७२

विशेषेणोपवर्णिताः ९ अंतःचित्तेनयद्ध्यानमशक्यमकृतात्मनां
षोडशेतुहरेरर्या विभांवयुक्ताविभूतयः ज्ञानवीर्यप्रभावादिविशेषेणोपवर्णिताः अस्त्वसंभवेतावत्सप्तमादिचतुष्ट
अतस्तस्योपायतापस्मैविभूत्यादिनिरूपणं २ एवंतावन्नवाध्यायामहाप्रश्नानिरूपिताः हंसेतिहासेनायोगनिषा
ये ३ वंधमुक्तेस्यास्तुनिर्धारेसजनेस्याश्चततःपरं ४ हादशेनंतरंकर्मकृतिस्यागमुवस्थितो हंसेतिहासेनायोगनिषार
याचत्रयोदशे ५ अथःसाधननिर्हारैध्यानेचैवचतुर्दशे धावणासिद्धिभेदेचपसंगेननिरूपते ६ उद्धवप्रश्नेतादत्तमुत्त
रंहरिणोचितं षोडशेभूतिविस्तारैर्हेयोर्वर्णाश्रमवृते ७ ज्ञानादिनिर्णयेचात्तोयमादीनांचनिर्णये योगत्रयाधिका
रेतविंशेचतदनंतरं तत्त्वसंख्याविवादेचप्रकृत्याविवेचने जन्ममृत्युप्रकारेचद्वाविंशेदत्तमुत्तरं पराप्रवादसहने

सर्वेषामपिभावानांत्राणस्थित्यप्ययोद्भवः १ ॥

श्रीउद्धव उवाच त्वंब्रह्मपरमंसाक्षादनाद्यंतमपावृतं

संसारासं
चतुर्भिः तदनंतरैः सप्तविंशेक्रियायोगप्रश्नेनतदुपवर्णनं अष्टाविंशेततःप्रोक्तज्ञानयोगोपसंहृतिः संसारासं
भवप्रश्नेतन्मध्येदत्तमुत्तरं ११ तदशक्तस्यपुनःप्रश्नेभक्तियोगोपसंहृतिः एवंप्रश्नोत्तराण्यत्रक्रमेणोक्तानिविंश १
तिः १२ अहमात्मान्तरोबाह्योनावृतःसर्वदेहिनां यथाभूतानिभूतेषुबहिरंतःस्वयंतथेत्युक्तं तत्रभूतानियथा १ श्री
क्वचित्केनचिद्गुणविशेषेणोद्रिक्तानिवर्ततेकचित्समानानपेत्येवतथात्वमपिक्वकथंवर्ततेसेइतिविभूतीः १ ७२
प्रष्टुंप्रथमंतावदुक्तमेवसर्वात्मकत्वमुपपादयन्नअनुवदतित्वंब्रह्मेतिअपावृतंनिरावरणंस्वतंत्रंवाअतएवसर्वे
षामपित्राणंरक्षणंस्थितिर्जीवनंत्राणस्थितिसहितोअप्ययोद्भवोयस्मात्सत्वमुपादानकारणमित्यर्थः १ ॥

तस्मादहैतुकीयमेव धारणा कार्या नान्याः काम्या इत्याह जन्मेति जन्मनैव काश्चित्सिद्धयो भवंति यथा देवानां
यथा च यादसामुदकस्तंभः पक्ष्यादीनां खेचरत्वादि तदुक्तं पातंजले जन्मौषधितपोमंत्रयोगजाः सिद्धयः इति
योगेन मद्धारणासिद्धेन योगगतिं मत्सालोक्यादिरूपां ३४ कुत इत्यत आह सर्वासामिति मद्धेतुत्वप्रभुत्वोपपाद
नेहेतुः कारणं पतिः पालयिता चेति किंच न केवलं सिद्धीनामेव प्रभुः अपितु मोक्षादीनामपीत्याह अहमिति यो

जन्मौषधितपोमंत्रैर्यावतीरिह सिद्धयः योगेनाप्नोति ताः सर्वा नान्यैर्योगगतिं व्रजेत् ३४ सर्वासामपि
सिद्धीनां हेतुः पतिरहं प्रभुः अहं योगस्य सांख्यस्य धर्मस्य ब्रह्मवादिनां ३५ अहमात्मांतरो बाह्योऽना
वृतः सर्वदेहिनां यथा भूतानि भूतेषु बहिरंतः स्वयं तथा ३६ इति श्रीभागवते एकादशस्कंधे पंच
दशोध्यायः १५ ॥

गो मोक्षः सांख्यं तत्साधनं ज्ञानं धर्मस्तदुपदेष्टॄणां ब्रह्मवादिनां च ३५ कुत इत्यत आह अहमिति सर्वदेहिनां जी
वानामात्मा यतः अंतरः अंतर्यामी एषोंतरात्मांतर्याम्यमृत इति श्रुतेः तर्हि किमंतर्वर्तित्वात् परिच्छिन्नः
न बाह्यश्च व्यापक इत्यर्थः तत्र हेतुः अनावृतः एतत्सदृष्टांतमाह भूतेषु चतुर्विधेषु महाभूतानि यथा ब
हिरंतश्च भवंति स्वयमहमपि तथेत्यर्थः ३६ इति श्रीभावार्थदीपिकायामेकादशस्कंधे पंचदशोध्यायः

श्री॰ भा॰ ए॰ टी॰ ७१

अतःपरंद्वंद्वाधारणाविद इति त्रिकालज्ञत्वसुधारणामाह चिंतामैकालिकीत्रिकालवस्तुविषयास्वजन्मसत्त्वमानुपश्चेहि
तात्सुहिताअनयैवपरचित्ताद्यभिज्ञतापिव्याख्याता २८ सर्वभूतहृदिसंस्थमात्मानं सर्वसाक्षिणंध्यायेदात्मनया
चित्तपरिपश्यति अग्न्यादिभिर्वोपघातस्यन्याभगवानितिवंभूतयोगमयतैर्नाभिभूयेत अत्र हेतुः मद्योगेतियादसामुदकं

मत्कृपाशुद्धसत्वस्ययोगिनोधारणाविदः तस्यत्रैकालिकीबुद्धिर्जन्ममृत्यूपबृंहिता २८ उदासीनेम
यिपरेप्रकृतेगुणात्रिषु चिन्मयेधारयेच्चेतोद्वंद्वैर्नैवाभिभूयते २९ अग्न्यादिभिर्नहन्येतमुनेर्योगम
यंवपुः मद्योगश्रांतचित्तस्ययादसामुदकंयथा ३० मद्विभूतीरभिध्यायन्श्रीवत्सास्त्रविभूषिताः
ध्वजातपत्रव्यजनैःसभवेदपराजितः ३१ उपासकस्यमामेवयोगधारणयामुनेः सिद्धयःपूर्वकथि
ताउपतिष्ठंत्यशेषतः ३१ जितेंद्रियस्यदांतस्यजितश्वासात्मनोमुनेः मद्धारणांधारयतःकासासि
द्धिःसुदुर्लभा ३२ अंतरायान्वदंत्येतायुंजतोयोगमुत्तम मयासंपद्यमानस्यकालक्षपणहेतवः ३३

यथाभिघातकंनभवतितथातस्यवपुषोग्न्यादयइत्यर्थः अनयैवाद्वंद्वतापिव्याख्याता २९ मद्विभूतीर्ममावताराण
ध्वजादिभिःसह ३० उपसंहरतिउपासकस्येति एवंपृथग्धारणाभिःयद्वाकिंनानाधारणाप्रयासेनएकयैवस
र्वाःसिद्धयोभवंतीत्याह जितेंद्रियस्येतिमद्धारणांनारायणलक्षणांयात्विद्दत्यत्राःकायासुदुर्लभास्यात्तस्यानकाचि
दित्यर्थः ३१ यद्यप्येवंतथापिनप्रार्थ्याइत्याह अंतरायानिति ३२ ॥ ॥ ॥ ॥

ग्रं ७१

यत्रप्रविविक्षति तत्रात्मानं चिंतयेत् ततः पिंडं स्वदेहं हित्वा प्राणः प्राणप्रधानलिंगशरीरोपाधिर्वायुर्भूतः बाह्य
वायोर्भूतः प्रविष्टः तेन मार्गेणेत्यर्थः षडंघ्रिवत् भृंगो यथा पुष्पात्पुष्पांतरमनोपासेन प्रविशति तद्वत् २३ पिं
डं हित्वसृजेत्तनुमुक्तं तत्प्रकारं कथयन्स्वछंदमृत्युमाह पार्ष्ण्येति पार्ष्णिना गुदं निरुध्य प्राणं प्राणोपाधिमात्मानं ब्रह्म
रंध्रेण मूर्धद्वारेण ब्रह्मोपलब्धिस्थानं ब्रह्मवास्त्रस्यहृदाग्रपेदितिनस्थाने मनसी सर्वकारणभूतेन नियम्य पवनं पर

परकायं विशन्सिद्ध आत्मानं तत्र भावयेत् पिंडं हित्वा विशेत्प्राणो वायुर्भूतः षडंघ्रिवत् २३
पार्ष्ण्यापीड्य गुदं प्राणं हृदुरःकंठमूर्धसु आरोप्य ब्रह्मरंध्रेण ब्रह्म नीत्वोत्सृजेत्तनुं २४ विह
रिष्यन्सुरक्रीडे मत्स्थं सत्त्वं विभावयेत् विमानेनोपतिष्ठंति सत्त्ववृत्तीः सुरस्त्रियः २५ य
थासंकल्पयेद्बुद्ध्या यदा वा मत्परः पुमान् मयि सत्ये मनो युंजंस्तथा तत्समुपाश्नुते २६ यो
वै मद्भावमापन्न ईशितुर्वशितुः पुमान् कुतश्चिन्न विहन्येत तस्य चाज्ञा यथा मम २७ ॥

ब्रह्मणि मूर्धंते समारोप्य नीत्वा तनुमुत्सृजेत् पिंडमित्यर्थः मत्स्थं मन्मूर्तिरूपं शुद्धं सत्त्वं चिंतयेत् तदा सत्त्व
वृत्तयः सत्त्वांशभूताः २५ यदा वा कालेपि यथा वेति पाठे यथा वा येन केनापि प्रकारेण बुद्ध्या संकल्प
येत् तत्तथावत्प्राप्नोतीत्यर्थः यद्वा यथा संकल्पयेत् यथा वा मत्परो मयि विश्वासवान् भवति तथा तदनुरू
पं सर्वं प्राप्नोतीत्यर्थः सत्ये सत्यसंकल्पे मयि मनो युंजन् २६ मदिति ऐश्वर्यरूपं ममेत्यर्थः ईशितुः वशितुः सर्व

निधंतस्वब्वतंचसमसमभावंस्वभावंयाम्रः एता
गुणहेतवः २८ ॥

श्री
भा॰ ए॰
टी॰
७०

आकाशात्मयःप्राणःसमष्टिरूपःतद्रूपेमयिमनसाघोषंनादंचिंतयन्असौहंसोजीवस्तत्रआकाशेउपल
ब्धानांभूतानांवाचःशृणोति यद्वातत्राकाशेउपलब्धाअभिव्यक्तायाशब्दानांवाचःनादरूपतः
श्रुतीतिदूरश्रवणमुक्त्वादूरदर्शनमाह १९ त्वष्टाआदित्यःतस्मिन्परिच्छिन्नेचक्षुःसंयोज्यतंचचक्षुषि
संयोज्यतत्रोभयसंयोगेमांध्यायन्विश्वंदूरतःपश्यति २० मनोदेहंचतदनुवर्तिनावायुनासहमयिसु

मय्याकाशात्मनिप्राणेमनसाघोषमुद्वहन् तत्रोपलब्धाभूतानांहंसोवाचःशृणोत्यसौ
१९ चक्षुःत्वष्टरिसंयोज्यत्वष्टारंमयिचक्षुषि मांतत्रमनसाध्यायन्विश्वंपश्यतिसूक्ष्मदृ
क् २० मनोमयिसुसंयोज्यदेहंतदनुवायुना मद्धारणानुभावेनतत्रात्मायत्रवैमनः २१
यदामनउपादाययद्यद्रूपंबुभूषति तत्तद्भवेन्मनोरूपंमद्योगबलमाश्रयः २२ ॥ ये

संयोज्ययाधारणाक्रियतेतस्याःप्रभावेनयत्रमनोयातितत्रात्मादेहोयातीत्यर्थः यद्वामनःकं
तेआत्मानंवायुनासहदेहंचमयिसुसंयोज्ययत्रयानिलदनुतत्रदेहोयातीति २१ मनउपाधायउपादान
कारणंकृत्वायद्देवादिरूपंभवितुमिच्छतितत्तन्मनोरूपंमनसाभीष्टरूपंयोगीभवेत्तत्कुतः यतोमद्योगबले
याहमचिंत्यशक्तिर्नानाकारःतस्मिन्मयिमनसोयोगोधारणातस्यबलप्रभावःसएवाश्रयःकारणं २२ ॥

रां॰
७०

क्रियाशक्तिप्रधानंमहत्तत्त्वमेवसूत्रंतदुपाधौमयिसमेपारमेष्ठ्यंसर्वोत्कर्षंप्राकाम्यंविंदतेकथंभूतस्याव्यक्ताज्जन्मयस्यतस्यसूत्रस्यतदुपाधेर्ममेत्यर्थः १४ त्र्यधीश्वरेत्रिगुणमायानियंतरिअतएवकालविग्रहेस्वाकलयितृरूपेअंतर्यामिणिईशित्वंविशिनष्टिक्षेत्रज्ञानांजीवानांक्षेत्राणांतदुपाधीनांचचोदनाप्रेरणंनस्त्र

महत्यात्मनियःसूत्रेधारयेन्मयिमानसं प्राकाम्यंपारमेष्ठ्यंमेविंदतेव्यक्तजन्मनः १४ वि
ष्णौत्र्यधीश्वरेचित्तंधारयेत्कालविग्रहे सईशित्वमवाप्नोतिक्षेत्रक्षेत्रज्ञचोदना १५ नारायणे
तुरीयाख्येभगवच्छब्दशब्दिते मनोमय्यादधद्योगीमद्धर्मावशितामियात् १६ निर्गुणे
ब्रह्मणिमयिधारयन्विशदंमनः परमानंदमाप्नोतियत्रकामोवसीयते १७ श्वेतद्वीपप
तौचित्तंशुद्धेधर्ममयेमयि धारयञ्छ्वेततांयातिषडूर्मिरहितोनरः १८ ॥ राम ॥

विश्वस्रष्ट्रादिकर्तृत्वालक्षणामित्यर्थः १५ तुरीयाख्येविराट्हिरण्यगर्भश्चकारणंचेत्युपाधयःईशस्ययत्त्रिभिःहीनंतुरीयंतत्पदंविदुरित्येवंलक्षणेभगवच्छब्दशब्दितेऐश्वर्यस्यसमग्रस्यधर्मस्ययशसःश्रियःज्ञानवैराग्ययोश्चैवषण्णांभगइतीरणाइतिस्मृतःतद्वनिभगवच्छब्दशब्दितेमद्धर्मः १६ यत्रपरमानंदरूपेसर्वोपिकामःतद्वाञ्छतोवसीयतेसमाप्यतेतेन १७ अतःपरंगुण हेतुकाःक्षुद्धेत्यात्मवेश्वेततांशुद्ध

॥ ५४

श्री
भा० ए०
टी०
९९

द्वन्द्वसिद्धीरूपं चाह त्रिकालज्ञत्वमिति अद्वंद्वं शीतोष्णाद्यनभिभवः अग्न्यादीनां संस्तंभनं ८ तत्तद्धारणाभिः सह विशेषतो निरूपयति यथेति यावत्समाप्ति ९ भूतसूक्ष्मोपाधौ मयि मनो धारयंस्तन्मात्रं भूतसूक्ष्माकारं सतन्मात्रोपासकः सममणीयमणिमानं १० ज्ञानशक्तिप्रधाने महत्तत्त्वोपाधौ मयि यथासंस्थं महत्तत्त्वाकारं भूतानां चेति आकाशादिभूतोपाधौ च मयि मनो धारयंस्तत्तद्भूतमहिमानं प्राप्नोतीत्यर्थः ११ वाय्वादिभूतानां ये परमाणव

त्रिकालज्ञत्वमद्वंद्वं परचित्ताद्यभिज्ञता अग्न्यर्काम्बुविषादीनां प्रतिष्टंभोऽपराजयः ८ एताश्चोद्देशतः प्रो
क्ता योगधारणसिद्धयः यया धारणया या स्याद्यथा वा स्यान्निबोध मे ९ भूतसूक्ष्मात्मनि मयि
तन्मात्रे धारयन्मनः अणिमानमवाप्नोति तन्मात्रोपासको मम १० महत्यात्मनि मयि परे
यथासंस्थं मनो दधत् महिमानमवाप्नोति भूतानां च पृथक्पृथक् ११ परमाणुमये चित्तं भू
तानां मयि रंजयन् कालसूक्ष्मार्थतां योगी लघिमानमवाप्नुयात् १२ धारयन्मय्यहंतत्वे मनो
वैकारिकेऽखिले सर्वेन्द्रियाणामात्मत्वं प्राप्तिं प्राप्नोति मन्मनाः १३ ॥

स्तन्मये तदुपाधौ चित्तं मयि रंजयन् योगी कालसूक्ष्मार्थतां कालपरमाणूपाधिरूपतामिति लघुत्वविवरणं तदुक्तं स कालः परमाणुर्वै यो भुंक्ते परमाणुतामिति १२ वैकारिकादहंकारोपाधौ मयि अखिले एकाग्र आत्मत्वमधिष्ठातृत्वं अत्र हेतुः मन्मनाः मयि मनो धारणाप्रभावादेव भवति नान्यः तीव्र हेतुरनुसंधेय इति भावः ॥ ॐ ९९
एवं मद्धारणानुभावेन मयि योगबलमाश्रयस्त्वादिषु द्रष्टव्यं १३ ॥ राम ॥ राम ॥ राम ॥

ताः स्वरूपेणोपदिशति अणिमेति सार्द्धैः पंचभिः अणिमा महिमा लघिमा च मूर्तेर्देहस्येति त्रयः सिद्धयः प्राप्तिर्नाम
सिद्धिः सर्वप्राणिनामिंद्रियैः सह तत्तदधिष्ठातृदेवतारूपेण संबंध इत्यर्थः श्रुतेषु पारलौकिकेषु दृष्टेषु दर्शनेयोग्या
ग्येष्वपि सर्वेषु भूविवरादिपिहितेष्वपि प्राकाम्यं भोगदर्शनसामर्थ्यं सिद्धिः शक्तीनां मायायास्तदंशभूतानां प्रेरणं
तत्रेश्वरो मायायाः अन्येषु तदंशानां प्रेरणं ईशिता नाम सिद्धिः ४ विषयभोगेष्वसंगो वशिता सिद्धिः यत्का

अणिमा महिमा मूर्तेर्लघिमा प्राप्तिरिंद्रियैः प्राकाम्यं श्रुतदृष्टेषु शक्तिप्रेरणमीशिता ४ गुणे
ष्वसंगो वशिता यत्कामस्तदवस्यति एता मे सिद्धयः सौम्य अष्टावौत्पत्तिकीर्मताः ५ अनूर्मिमत्वं
देहेस्मिन् दूरश्रवणदर्शनं मनोजवः कामरूपं परकायप्रवेशनं ६ स्वच्छंदमृत्युर्देवानां सह
क्रीडानुदर्शनं यथासंकल्पसंसिद्धिराज्ञाप्रतिहता गतिः ७ ॥ ॥ ॥

मः यद्यत्सुखं कामयते तत्तदवस्यति तस्य तस्य सीमानं प्राप्नोतीति सिद्धिः औत्पत्तिकाः स्वाभाविक्यो नियति
यायाश्चेत्यर्थः ५ गुणहेतवः सिद्धीराह अनूर्मिमत्वं क्षुत्पिपासादिराहित्यं दूरश्रवणदर्शनं चेति द्वे सिद्धी
मनोवेगेन तनदेहस्य गतिः कामितरूपप्राप्तिः परकायप्रवेशः ६ स्वेच्छामृत्युः अप्सरोभिः सह देवानां
याः क्रीडास्तासामनुदर्शनं प्राप्तिः संकल्पानुरूपप्राप्तिः अप्रतिहता आसमंताद्गतिर्यस्याः साज्ञा
ज्ञाप्रेत्येता दश ७ ॥ राम ॥ राम राम ॥ राम ॥ ॐ ॐ ॥ ॥

श्री० भा० टी० ६८

मामेवात्मनि विचष्टे आत्मानं च सर्वात्मनि मयि संयुतं विचष्टे ज्योति ज्योतिषि संयुक्तमिवेत्यन्वयः ४५ एवं स्थूलसमा
धिपर्यंतं ध्यानस्य फलमाह ध्यानेनेति मनो युंजतः समाद्यतः द्रव्यज्ञानक्रियाभ्रमः अधिभूताधिदेवाध्यात्मरूपः द्रव्य
द्रष्टृदर्शनरूपो वा भ्रमः निर्वाणं शांतिं सम्यग्यास्यतीति ४७ इति श्रीभावार्थदीपिकायां एकादशे चतुर्दशोऽध्यायः १४
ततः पंचदशे प्रोक्ताः सिद्धयो धारणानुगाः श्रीविष्णुपदसंप्राप्त्या वर्तमानाः एवमनोयुंजतो योगिनो नाना वि

तच्च त्यक्त्वा मदारोहो न किंचिदपि चिंतयेत् एवं समाहितमतिर्मामेवात्मानमात्मनि ४५ विचष्टे म
यि सर्वात्मन् ज्योति ज्योतिषि संयुतं ध्यानेनेत्थं सुतीव्रेण युंजतो योगिनो मनः ४६ संयास्यत्याशु नि
र्वाणं द्रव्यज्ञानक्रियाभ्रमः ४७ इति श्रीभागवते एकादशस्कंधे चतुर्दशोऽध्यायः १४ श्रीभगवा
नुवाच जितेंद्रियस्य युक्तस्य जितश्वासस्य योगिनः मयि धारयतश्चित्तमुपतिष्ठंति सिद्धयः १
उद्धवः कया धारणया कास्वित् कथं वा सिद्धिरच्युत कति वा सिद्धयो ब्रूहि योगिनां सिद्धिदो भवान् २
श्रीभगवान् सिद्धयोऽष्टादश प्रोक्ता धारणा योगपारगैः तासामष्टौ मत्प्रधाना दशैव गुणहेतवः ३

भवंत्यः सिद्धयोऽप्यंतरायप्राया एवेत्यतः ताः परिहृत्य परमेश्वरपरत्वमेवेति निवक्तुं सिद्धीराह जितेंद्रियस्येति युक्त
स्य स्थिरचित्तस्य १ स्विदिति वितर्के कास्वित् किंनामा कथं स्वित् किंरूपा वा धारणा आश्रयतीति प्रश्नार्थः वा शब्दः
त्वमेवैतज्जानासि नान्य इत्याशयेनाह योगिनामिति २ धारणाश्चाष्टादश योगपारगैः त्रिकाल
ज्ञत्वादिद्वंद्वसिद्धीरन्योपि जानातीति भावः अष्टमेव प्राधान्येन मुख्याः स्वभावतः आश्रया यासां ताः मत्प्राप्त्युप

एवं ध्यानांगमुक्त्वा यादृशमित्यस्योत्तरं वक्तुं ध्येयरूपमाह हृत्पुंडरीकमिति सार्द्धेन अंतःस्थं देहांतर्वर्ति ऊर्ध्वनालमधो
मुखं मुकुलितं च कदलीदलसंकाशं यदस्ति तद्विपरीतं ध्यात्वा इत्यर्थः ३६ तस्मिन् चिंतयेत्सविशेषणं ध्यानमाह व
ह्निमध्ये स्मरेदित्यर्द्धैः ध्यानमंगलं ध्यानस्य शुभविषयं ३७ समं समानरूपावयवं दीर्घाः शाखाः चत्वारो भुजा यस्मिन्
तत् सुचारुकृतिसंम्य ३८ समानयोः कर्णयोः विन्यस्ते स्फुरंती मकराकारे कुंडले यस्मिन् तत् श्रीवत्सश्रियो निकेतनं
वक्षसि दक्षिणवामतस्ताभ्यां युक्तमित्यर्थः द्वाभ्यां किरीटादिभिः सामस्त्येनायुतं युक्तं लोके ये तत्प्रसादेन शोभनं मुखे

हृत्पुंडरीकमंतःस्थमूर्ध्वनालमधोमुखं ध्यात्वोर्ध्वमुखमुन्निद्रमष्टपत्रं सकर्णिकं ३६ कर्णिकायां
न्यसेत्सूर्यसोमाग्नीनुत्तरोत्तरं वह्निमध्ये स्मरेद्रूपं ममैतद्ध्यानमंगलं ३७ समं प्रशांतं सुमुखं
दीर्घचारुचतुर्भुजं सुचारुसुंदरग्रीवं सुकपोलं शुचिस्मितं ३८ समानकर्णविन्यस्तस्फुरन्मक
रकुंडलं हेमांबरं घनश्यामं श्रीवत्सश्रीनिकेतनं ३९ शंखचक्रगदापद्मवनमालाविभूषितं नूपु
रैर्विलसत्पादं कौस्तुभप्रभया युतं ४० द्युमत्किरीटकटककटिसूत्रांगदायुतं सर्वांगसुंदरं हृद्यं प्र
सादसुमुखेक्षणं ४१ सुकुमारमभिध्यायेत्सर्वांगेषु मनो दधत् एवं मद्ध्यानसंयुक्तो योगी भवति
मानवः इंद्रियाणींद्रियार्थेभ्यो मनसाकृष्य तन्मनः ४२ बुद्ध्या सारथिना धीरः प्रणयेन्मयि सर्व
तः तत्सर्वव्यापकं चित्तमाकृष्यैकत्र धारयेत् ४३ नान्यानि चिंतयेद्भूयः सुस्मितं भावयेन्मुखं तत्र

मीक्षणे च यस्मिन् तत् ४१ सुकुमारं अतिकोमलं सविशेषणं ध्यानमुपसंहरति इंद्रियाणीति आकर्षणेनैव तत्स
र्वतः सर्वांगयुक्ते ४२ यादृशमित्यस्योत्तरत्वेन सविशेषणमुक्त्वा यदात्मकमित्यस्योत्तरं तया ध्यानैर्विशेषणत्वा
तेन ध्यानमेव समाधिपर्यंतमाह तदिति त्रिभिः एकत्रावयवे अन्यान्यंगानि न चिंतयेत् एकत्र नियतं कृत्वा तदेवा
ंगं दर्शयति सुस्मितमिति ४३ व्योम्नि सर्वकारणरूपे तच्च कारणत्वमपि त्यक्त्वा मदारोहः मयि शुद्धे ब्रह्मण्यारूढः

श्री
भा० ए०
टी०
६७

प्रसङ्गः यथा तत्सङ्गिसङ्गतः क्लेशो भवेत् यथा च बन्धो योषित्सङ्गतः तथान्यप्रसङ्गतो न भवेदिति ३० मां चिन्तयेदित्युक्तं तत्प्रकारं पृच्छति यथेति ध्यानाङ्गप्रश्नः यादृशमिति ध्येयविशेषणप्रश्नः यदात्मकमिति यस्यैतानि विशेषणानि तत्स्वरूपप्रश्नः एतन्मे ध्यानं मे वक्तुमर्हसीति यावत् अयमर्थः मुमुक्षुः त्वां यथा ध्यायेत् तन्मे वक्तुमर्हसि जिज्ञासोः कथनीयमेव ननु ध्यानेन किं त्वामिति तत्र योग भक्त स्वरूपं यथादि एवं वक्तुमर्हसीति पाठः ३१ तत्र ध्यानाङ्गत्वेनासनप्राणायामप्रकारमाह सम इति चतुर्भिः समे नात्युच्छ्रिते नातिनीचे आसने कम्बलादौ समकायः सन् यथासुखमासीनः स्वस्तिकादिनियमः हस्तौ नासाग्रनिरीक्षणं च चित्तस्थैर्यायोक्तम्

न तथास्य भवेत्क्लेशो बन्धश्चान्यप्रसङ्गतः योषित्सङ्गाद्यथा पुंसो यथा तत्सङ्गिसङ्गतः ३० श्रीउद्धव उवाच॥
यथा त्वामरविन्दाक्ष यादृशं वा यदात्मकं ध्यायेन्मुमुक्षुरेतन्मे ध्यानं मे वक्तुमर्हसि ३१ श्रीभगवानुवाच॥
सम आसन आसीनः समकायो यथासुखं हस्तावुत्सङ्ग आधाय स्वनासाग्रकृतेक्षणः ३२ प्राणस्य
शोधयेन्मार्गं पूरकुम्भकरेचकैः विपर्ययेणापि शनैरभ्यसेन्निर्जितेन्द्रियः ३३ हृद्यविच्छिन्नमोंकारं घ
ण्टानादं बिसोर्णवत् प्राणेनोदीर्य तत्राथ पुनः संवेशयेत्स्वरं ३४ एवं प्रणवसंयुक्तं प्राणमेव समभ्यसेत्

सो वहिर्दृष्टिः स्थिरचित्तः सुसंयतः इति योगशास्त्रोक्तेः ३२ विपर्ययेण रेचकपूरककुम्भकक्रमेणापि यद्वा वामनाड्या पूरितं दक्षिणया त्यजेत् तथा वामया पूरितं वामयैव विपर्ययेण वा यथाशक्ति योगशास्त्रे ईडया पूरयेद्वायुं मुञ्चेत्पिङ्गलया ततः इति निर्जितेन्द्रियः इति प्रत्याहार उक्तः ३३ प्राणायामो द्विविधः सगर्भोऽगर्भश्चेति तत्र श्रेष्ठत्वात्सगर्भप्राणायाममाह हृदीति हृदि अभ्यासमूलाधारादारभ्य अविच्छिन्नं सन्ततं घण्टानादवत् प्लुतमोंकारं हृदि स्थितं प्राणेनोदीर्य ऊर्ध्वं द्वादशान्तपर्यन्तं नीत्वा कथं बिसोर्णवत् कमलनालतन्तुवत् तत्र मात्रा इति स्वरपञ्चदशकं बिन्दुः संवेशयेत् अथ पुनः तिस्रः मात्राः बिन्दुः शिरस्कं च तद्यथा दिस्थं बिसोर्णवत् कमलनालतन्तुवत् मूलाधारात् पर्यन्तं बिसतन्तुवत् सूक्ष्मं अविच्छिन्नं सन्तं हृदि मनसि प्राणेनोदीर्य ऊर्ध्वं पुनस्तत्र ऊर्ध्वं यद्वा मूलाधारादारभ्य अविच्छिन्नं घण्टानादवत् प्लुतस्वरं प्राणेन नादं स्थिरीकुर्यादिति ३४ मासादर्वाक् जितानिलो भवति ३५
तेमोंकारे घण्टानादवत्

ग्रं
६७

ॐ ग

तत्रोंकारे

रोमहर्षादिकं विना कथं भक्तिर्गम्यते भक्त्या च विना कथमाशयः शुद्ध्येदिति २३ किंच भक्तिः स्वाश्रयं शोधयतीति । किं वक्तव्यं यतो गद्गदवागादिलक्षणमद्भक्तियुक्तो लोकं सर्वं पुनातीत्याह वागिति २४ अपि च भक्त्यैवात्मशुद्धिर्नान्यत इति सदृष्टान्तमाह यथेति यथाग्निना ध्मातं तापितमेव हेम स्वर्णं अन्तर्मलं जहाति न तु क्षालनादिभिः स्वं निजं रूपं च भजते कर्मानुशयं कर्मवासनां मां भजते मद्रूपतामापद्यते २५ ननु ब्रह्मविदाप्नोति परं तमेव विदित्वातिमृत्युमेति इत्यादिश्रुतिभ्यो ज्ञानादेवाविद्यानिवृत्त्यात्मप्राप्तिरवगम्यते कुतो भक्तियोगेनेत्युच्यते तत्राह यथा यथेति आत्मा चित्तं परि

कथं विना रोमहर्षं द्रवता चेतसा विना विनानंदाश्रुकलया शुद्ध्येद्भक्त्या विनाशयः २३ वाग्गद्गदा द्र
वते यस्य चित्तं रुदत्यभीक्ष्णं हसति क्वचिच्च विलज्ज उद्गायति नृत्यते च मद्भक्तियुक्तो भुवनं पुनाति २४ ॥
यथाग्निना हेम मलं जहाति ध्मातं पुनः स्वं भजते च रूपं आत्मा च कर्मानुशयं विधूय मद्भक्तियोगेन भ
जत्यथो मां २५ यथा यथात्मा परिमृज्यतेऽसौ मत्पुण्यगाथाश्रवणाभिधानैः तथा तथा पश्यति वस्तु
सूक्ष्मं चक्षुर्यथैवांजनसंप्रयुक्तं २६ विषयान्ध्यायतश्चित्तं विषयेषु विषज्जते मामनुस्मरतश्चित्तं म
य्येव प्रविलीयते २७ तस्मादसदभिध्यानं यथा स्वप्नमनोरथं हित्वा मयि समाधत्स्व मनो मद्भावभा
वितं २८ स्त्रीणां स्त्रीसंगिनां संगं त्यक्त्वा दूरत आत्मवान् क्षेमे विविक्त आसीनः चिंतयेन्मामतंद्रितः २९

मृज्यते शोध्यते मत्पुण्यकथानां श्रवणैरभिधानैश्च भक्तेरेवावान्तरव्यापारो ज्ञानं न पृथगित्यर्थः २६ किंच ज्ञानेन नाम चित्तस्य मदाकारपरिणामः स च मद्भजनतः स्वभावत एव भवति न च यत्नान्तरमपेक्षत इति सदृष्टान्तमाह विषयानिति २७ यस्मादेवं तस्मात्साधनं तत्फलं च स्वप्नमनोरथवदसदभिध्यानमात्रं तस्मात्तद्धित्वा मय्येव मनः समाहितं कुर्विति पूर्वकृतग्रन्थोपसंहारः मद्भावभावितं तस्मादिति मद्भावभावितं मद्भजनेनैव शोधितं २८ विशेषतो वात्मध्यानाय स्त्रीकामसंगौ परित्याज्यावित्याह

स्त्रीणामिति आत्मवान् धीरः सन् क्षेमे निर्भये देशे विविक्ते विजने २९ एतदुपपादयितुं पृच्छति ॥

त्वं तु न कस्यचित् कर्मणः कर्ता भवसि न च किंचिदीहसे इच्छसि ॥ न तु शान्ततया वा अज्ञानेन वा अनैपुण्येन वा विद्रूपत्वेन
वाऽत्रवाग्मितया वा औदासीन्यं ब्रूहि तत एव ने आह कल्प इत्यादिना ॥२६॥ महदानन्दस्य तव ज्ञातइति पृच्छति जनेष्विति स्पर्श
विहीनस्य विषयभोगरहितस्य अत्र हेतुः केवलात्मनः ॥ कलत्रादिशून्यस्य ॥ बुद्ध्यैवोपाश्रिताः स्वीकृताः न तूपदेशेन अटामि
मित

त्वं तु कल्पः कविर्दक्षः सुभगो ऽमृतभाषणः ॥ न कर्ता नेहसे किंचिज्जडोन्मत्तपिशाचवत् ॥२६॥ जनेषु दह ॥ ॥
ह्यमानेषु कामलोभदवाग्निना ॥ न तप्यसे ऽग्निना मुक्तो गंगांभस्स्थ इव द्विपः ॥२७॥ त्वं हि नः पृच्छतां ब्रह्मन्ना
त्मन्यानंदकारणम् ॥ ब्रूहि स्पर्शविहीनस्य भवतः केवलात्मनः ॥२८॥ श्रीभगवानुवाच ॥ यदुनैवं महाभा
गो ब्रह्मण्येन सुमेधसा ॥ पृष्टः सभाजितः प्राह प्रश्रयावनतं द्विजः ॥२९॥ ब्रा॰ उवाच ॥ संति मे गुर
वो राजन्बहवो बुद्ध्युपाश्रिताः ॥ यतो बुद्धिमुपादाय मुक्तो ऽटामीह तान्शृणु ॥३०॥ पृथिवी वायुराका
शमापो ऽग्निश्चंद्रमा रविः ॥ कपोतो ऽजगरः सिंधुः पतंगो मधुकृद्गजः ॥३१॥ मधुहा हरिणो मीनः पिंग
ला कुररो ऽर्भकः ॥ कुमारी शरकृत्सर्प ऊर्णनाभिः सुपेशकृत् ॥३२॥ एते मे गुरवो राजन्चतुर्विंशतिराश्रि
ताः ॥ शिक्षा वृत्तिभिरेतेषामन्वशिक्षमिहात्मनः ॥३३॥ ॥ ॥ रामाय नमः ॥ ॥ ॥ राम ॥ ॥

पर्यटामि ॥३०॥ ऊर्णनाभं रूपं कूटस्थकारोतीति सुपेशकृत् ॥३२॥ ये मया आश्रितास्तानाह ॥ एतेषां वृत्तिभिः आत्मनः
शिक्षिताः शिक्षितवानीयानर्थान् हेयोपादेयादीन् ॥ अन्वशिक्षं ॥ अनुशिक्षितवानस्मि ॥ ॥ ॥ राम ॥ राम ॥ ॥

श्री॰ भा॰ पु॰ टी॰ ११

नाहुषो ययातिः ॥३६॥ क्षितेः क्षमां शिक्षितवानित्याह ॥ भूतैरिति ॥ आक्रम्यमाणः पीड्यमानः तद्विद्वान् ॥ भूतानां दैववशव
र्तित्वं विद्वान् ॥ व्रतं नियमं एवं तद्रूपा वृत्तिद्वयं च यथा पृथिवी तस्याः शिक्षितमाह ॥ शश्वदिति सर्वदा परार्थाः परोपकारार्थाः स
र्वा ईहा यस्य सः ॥ परार्थे एव एकांततः संभवो यस्य सः भूभृतः पर्वतात ॥ तस्य हि वृक्षतृणनिर्झरप्रसवक्रियाः परार्था एव
यथा तद्वत् ॥ तथा नगशिष्यः वृक्षशिष्यः सन् परात्मतां पराधीनतात्मतां ॥ वृक्षो यथा परैः खंड्यमानोपि त्वाद्यवानयनम न्यन्न
मन्यते तद्वत् ॥ ३८ ॥ वायुरपि द्विविधः प्राणो बाह्यश्च तत्र प्राणस्य गुरुत्वमाह ॥ प्राणवृत्त्येति ॥ प्राणो ह्याहारादिमात्रेण प्रव

यतो यदनुशिक्षामि यथा वा नाहुषात्मज ॥ तत्तथा पुरुषव्याघ्र निबोध कथयामि ते ॥३६॥ भूतैराक्रम्यमा
णोपि धीरो दैववशानुगैः ॥ तद्विद्वान्न चलेन्मार्गादन्वशिक्षं क्षितेर्व्रतं ॥३७॥ शश्वत्परार्थसर्वेहः परार्थै
कांतसंभवः ॥ साधुः शिक्षेत भूभृत्तो नगशिष्यः परात्मतां ॥३८॥ प्राणवृत्त्यैव संतुष्येन्मुनिर्नैवेंद्रिय
प्रियैः ॥ ज्ञानं यथा न नश्येत नावकीर्येत वाङ्मनः ॥३९॥ विषयेष्वाविशन्योगी नानाधर्मेषु सर्वतः ॥ गुण
दोषव्यपेतात्मा न विषज्जेत वायुवत् ॥४०॥ पार्थिवेष्विह देहेषु प्रविष्टस्तद्गुणाश्रयः ॥ गुणैर्न युज्यते योगी
गंधैर्वायुरिवात्मदृक् ॥४१॥

विषयां

र्तते परमादीनींद्रियप्रियैस्तोष्टुनापेक्षते ॥ तथापि मुनिरपि भवेदित्यर्थः प्राणवृत्तेरेककरणे मनोवैकल्येन ज्ञाननाशः स्या
त् अतो देहनिर्वाहः कर्तव्यः गुणालिप्सायां तु वाङ्मनसश्च विक्षिप्येत ॥ अतो नाधिकं लिप्सेदित्याह ॥ ज्ञानमिति नावकीर
येत न विक्षिप्येत ॥ ३९ ॥ विषयान्सेवमानोपि तेषु नासक्तिं बाह्याद्वायोः शिक्षेदित्याह विषयेष्विति नानाधर्मेषु शीतोष्णा
दिधर्मकेषु ॥ नहि वायुर्वनेषु दहनेवासज्जते तद्वत् ॥ यथा वायुर्गंधादिधर्मयोगेन प्रतीयमानोपि वस्तुतो न तद्योगी ॥४०॥
एवं देहादिधर्मयोगेन अहंप्रत्यये प्रतीयमानोप्यात्मानं तद्धर्मवानिति संभावितमिति ॥ वायोरेव शिक्षितमित्याह पार

राम
११

व्याकाशाच्छिक्षितं संभावनीयमाह॥ अंतर्हितश्चेति द्वयेन॥ अंतर्हितश्च देहांतर्गतोपि मुनिरात्मनो देहाद्यसंगं यतप वाव्यवच्छेदं च भावयेत कुतः स्थिरजंगमेषु समन्वयेन या व्याप्तिः॥ तया किंमत गणिभ्यस्तद्रूपस्येव व्याप्तिः न विततस्य सर्वगतस्य तत्कुतः ब्रह्मात्मभावेन ब्रह्मस्वरूपभावनया तत्त्वमसीति श्रुतेः॥ नन्वेतत्सर्वं कथं संभवति तत्राह नभस्त्वं नभस्तुल्यं त्वं संभावयेत॥ यथा नभसः सर्वगतस्य घनादिभिः संगः परिच्छेदो वा एवमात्मनोपि संभवतीति॥४१॥ किंच वह्न्यादृश्यस्यात्मनो नागमापार्थिवदेहादिसंबंधस्तमाह॥ तेजोबन्नमयैः तेजश्च आपश्च अन्नं च पृथिवी च तन्मयैः कालसृष्टैर्गुणैर्देहादि

अंतर्हितश्च स्थिरजंगमेषु ब्रह्मात्मभावेन समन्वयेन॥ व्याप्त्याव्यवच्छेदमसंगमात्मनो मुनिर्नभस्त्वं विततस्य भावयेत॥४१॥ तेजोबन्नमयैर्भावैर्मेघाद्यैर्वायुनेरितैः॥ न स्पृश्यते नभस्तद्वत्कालसृष्टैर्गुणैः पुमान॥४२॥ स्वच्छः प्रकृतितः स्निग्धो माधुर्यस्तीर्थभूर्नृणां॥ मुनिः पुनात्यपां मित्रमीक्षोपस्पर्शकीर्तनैः॥४३॥ तेजस्वी तपसा दीप्तो दुर्धर्षोदरभाजनः॥ सर्वभक्षोपि युक्तात्मा नादत्ते मलमग्निवत॥४४॥ ॥

रामायनमः॥

भिः पुमान्न संस्पृश्यत इति नभोवत्संभवतीति॥४२॥ स्वच्छत्वादिभिर्गुणैः उदकं जगत्पुनातीति तद्गुणमयाशिक्षिता इत्याह स्वच्छः निर्मलः प्रकृतितः स्वभावतः स्निग्धः जनेषु नरागवत माधुर्यः मधुरालापी तीर्थभूः तीर्थस्थाने अपां मित्रमुदकवत्तुल्यः॥ अपां दिति पाठे सर्वावयवापात्पुनाति॥ स्वच्छत्वादिगुणैर्योदकसादृश्यं ज्ञातव्यं॥४३॥ अग्नेः शिक्षितमाह॥ तेजस्वीति तेजस्वी ज्ञानातिशयात विशेषतः तपसा दीप्तः दुर्धर्षः॥ अहोसावुदरभाजनश्च परिग्रहः युक्तात्मा मुनिः पवित्रस्वरूपः॥४४॥ राम॥ ॥ ॥ रामायनमः॥ ॥

श्री॰ भा॰ ए॰ टी॰ ६६

अग्नेरेवशिक्षांतरमाह क्वचिदिति॥ यथाग्निः परेक्षयैव हविर्भुक्त्वातितयाम्गनिरित्याह॥ दातृणामिति॥ प्रागुत्तराशुभंभू-
तंभविष्यञ्चपापं॥४५॥ आत्मनो देहोपाधिकमेवोच्चनीचत्वादि न स्वाभाविकमित्यग्निदृष्टांतेन संभावितमित्याह।
स्वमायायेति स्वमायया सृष्टमिदं सदसल्लक्षणं देवतिर्यगादिरूपं विप्रशूद्रादिरूपं वा॥४६॥ आत्मनो जन्मादिषड्-
विकाराभावः चंद्रदृष्टांतेन संभावित इत्याह विसर्गाद्या इति॥ विसर्गो जन्म श्मशानं नाशः तत्रेयं ज्योतिःशास्त्रप्रक्रिया॥ अप्मय-
मंडलंचंद्रः तेजोमयंमंडलमादित्यः॥ तयोरेकनक्षत्रावस्थाने चंद्रो न दृश्यते चन्द्र इव आदित्यमंडलेन समदेशस्थितेन व्याव-

क्वचिच्छन्नः क्वचित्स्पष्ट उपास्यः श्रेय इच्छतां॥ भुंक्ते सर्वत्र दातृणां दहन्प्रागुत्तराशुभम्॥४५॥ स्वमाययासृष्ट-
मिदं सदसल्लक्षणं विभुः प्रविष्ट ईयते तत्तत्स्वरूपोग्निरिवैधसि॥४६॥ विसर्गाद्याः श्मशानांता भावा देहस्य नात्मनः
कलानामिव चंद्रस्य कालेनाव्यक्तवर्त्मना॥४७॥ रामाय नमः ॥ ॥ ४८ ॥ ॥

धानात्॥ सा अमावास्या तैः अग्रपक्षप्रतिपदादिकाभिः चंद्रो नक्षत्रांतरं गच्छति॥ आदित्यस्त्वत्र योदशभिरहोरात्रैः॥ अतः प्रतिपदमा-
रभ्य विषमस्थितस्यादित्यमंडलस्य पंचदशः पंचदशोभागः अप्मये मंडले प्रतिबिंबितो दृश्यते साकलेत्युच्यते॥ एवं पंचद-
दशोह्नि त्रयोदशभिर्नक्षत्रैरंतरमिति व्यापित्वक्रमस्य सप्तविंशतिनक्षत्रात्मकस्य मध्ये संमुखौ चंद्रादित्यौ तिष्ठतः॥ तदा संपू-
र्णप्रतिबिंबं भूच्छायालोकितं दृश्यते सा पौर्णमासी तस्याममावास्याप्रतिबिंबेन सह षोडशकलः चंद्रः उपचर्यते ततः पुनः प्र-
तिपदमारभ्य मंडलयोर्विषमीभावात्कलाह्रासः तत्र यथा कलानामेवोत्पत्तिनाशौ नाप्यमंडलस्य तथात्मनोपीत्याह राम

सिंहावलोकनेनाग्निदृष्टांतेनैव देहानां क्षणभंगुरत्वयावैरात्म्यं शिक्षितमित्याह ॥ कालेनेति ओघवद्वेगो यस्य
तेन आत्मनः संबंधिनां भूतानां देहानामित्यर्थः ॥४८॥ आदित्यात् शिक्षितमाह द्वयेन गुणैरिति गुणैरिंद्रियैर्गुणान्वि
षयानुणादत्ते यथाकालं अर्थिष्वागतेषु सत्सु विमुंचति च न तेषु युज्यते लब्धमिति दत्तमिति वाभिनिवेशं न करोति गोभिः
रश्मिभिः गाः जलानि गोपतिः सूर्यो यथा स्वतो भेदः स्थूलत्वं यथात्मनो भेदप्रतीतिरुपाधिवशादित्यादित्यदृष्टांतेनैवस्प

कालेन ह्योघवेगेन भूतानां प्रभवाप्ययौ ॥ नित्यावपि न दृश्येते आत्मनोऽग्नेर्यथार्चिषां ॥४८॥ गुणैर्गुणानु
पादत्ते यथाकालं विमुंचति ॥ न तेषु युज्यते योगी गोभिर्गा इव गोपतिः ॥४९॥ बुध्यते स्वे न भेदेन व्यक्तिस्थ
इव तद्गतः ॥ लक्ष्यते स्थूलमतिभिरात्मा चावस्थितोऽर्कवत् ॥५०॥ नातिस्नेहः प्रसंगो वा कर्तव्यः क्वापि केन
चित् ॥ कुर्वन्विंदेत संतापं कपोत इव दीनधीः ॥५१॥ कपोतः कश्चनारण्ये कृतनीडो वनस्पतौ ॥ कपोत्या
भार्यया सार्धं उवास कतिचित्समाः ॥५२॥

भावितमित्याह ॥ बुध्यत इति स्वे स्वरूपे एवस्थित आत्मा भेदेन न बुध्यते ॥ प्रभिद्यन्त इति व्यक्तिरूपोपाधिः व्यक्ति
स्थः उपाधौ प्रतिबिंबितस्तु तद्गत इव उपाधिप्रविष्ट इव भेदेन स्थूलमतिभिर्लक्ष्यते अर्कवदित्यन्वयः ॥५०॥ कपोतात्
शिक्षितमाह नातिस्नेह इति स्नेहः प्रीतिः प्रसंग उपलालनाद्यासक्तिः ॥ दृष्टांतं प्रपंचयति कपोतः कश्चनेति ॥५२॥ राम

तयोर्मिथः स्नेहप्रसंगो दर्शयति ॥ कपोतौ इति त्रयेण स्नेहेन गुणितं निबद्धं हृदयं ययोस्तौ ॥ ५३ ॥ विस्रब्धौ निःशंकौ ॥ ५४
सा कपोती तर्पयंती सदा सर्वोदितात्मा पादिभिः प्रीणयंती अतएव ते नानुकंपिता सती यं यं वांछति तं तं कामं समनयत ॥ १

कपोतौ स्नेहगुणितहृदयौ गृहधर्मिणौ ॥ दृष्टिं दृष्ट्यांगमंगेन बुद्धिं बुद्ध्या बबंधतुः ॥ ५३ ॥ शय्यासनाटन
स्थानवार्ताक्रीडाशनादिकं ॥ मिथुनीभूय विस्रब्धौ चेरतुर्वनराजिषु ॥ ५४ ॥ यं यं वांछति सा राजन्तर्पये
त्यनुकंपिता ॥ तं तं समनयत्कामं कृच्छ्रेणाप्यजितेंद्रियः ॥ ५५ ॥ कपोती प्रथमं गर्भं गृह्णती काल आगते
अंडानि सुषुवे नीडे स्वपत्युः सन्निधौ सती ॥ ५६ ॥ तेषु काले व्यजायंत रचितावयवा हरेः ॥ शक्तिभि
र्दुर्विभाव्याभिः कोमलांगतनूरुहाः ॥ ५७ ॥ प्रजाः पुपुषतुः प्रीतौ दंपती पुत्रवत्सलौ ॥ शृण्वंतौ कूजितं
तासां निर्वृतौ कलभाषितैः ॥ ५८ ॥ तासां पतत्रैः सुस्पर्शैः कूजितैर्मुग्धचेष्टितैः ॥ प्रत्युद्गमैरदीनानां पि
तरौ मुदमापतुः ॥ ५९ ॥ स्नेहानुबद्धहृदयावन्योन्यं विष्णुमायया ॥ विमोहितौ दीनधियौ शिशून्पुपुषतुः
प्रजाः ॥ ६० ॥ एकदा जग्मतुस्तासामन्नार्थं तौ कुटुंबिनौ ॥ परितः कानने तस्मिन्नर्थिनौ चेरतुश्चिरं ॥ ६१
दृष्ट्वा तान्लुब्धकः कश्चिद्यदृच्छातो वनेचरः ॥ जगृहे जालमातत्य चरतः स्वालयांतिके ॥ ६२ ॥ ॥

संपादयामास राजन्निति तं तं यथेतिसह वितं ॥ ५५ ॥ तेषु जलभरितेषु अंडेषु हरेः स्वभावकर्मादिशक्तिभिः ॥ रचितावयवाः
पक्षिणः कोमलान्यंगानि तनूरुहाश्च येषां ते ॥ ५७ ॥ पतत्रैः पक्षैः मूर्तीनामानंदप्रणतो ॥ ५८ शिशून्बालान् प्रजाः पुत्रा
न् ॥ ६० ॥ स्वालयांतिके चरतः क्रीडतः तान्कपोतप्रजाश्च प्रातत्य प्रासार्थे ॥ ६२ ॥ राम ॥ ॥

उत्सुकत्वादेवचतत्पोषणार्थंगतौपोषणंभक्ष्यं ॥ ६३ ॥ शिचाजालेन ॥ ६५ ॥ आत्मानंरूपांभार्यांविललापअनुशोच ६६ विलापर
मादर्शयेन अहोइति ॥ अतृप्तस्यगृहस्थस्यैवअकृतार्थस्यअगृहस्थमसंपादयतः ॥ ६७ ॥ तानावृतान्पश्यन्नपिशिक्षुजालेषुदा

कपोतश्चकपोतीचप्रजापोषेसदोत्सुकौ ॥ गतौपोषणमादायस्वनीडमुपजग्मतुः ॥ ६३ ॥ कपोतीस्वात्म
जान्वीक्ष्यबालकान्जालसंवृतान् ॥ तानभ्यधावत्क्रोशंतीक्रोशतोभृशदुःखिता ॥ ६४ ॥ ससकृत्स्नेहगुणि
तादीनचित्ताजमायया ॥ स्वयंचाबध्यतशिचाबद्धान्पश्यंत्यपस्मृतिः ॥ ६५ ॥ कपोतश्चात्मजान्बद्धानात्मनो
प्यधिकान्प्रियान् ॥ भार्यांचात्मसमांदीनोविललापातिदुःखितः ॥ ६६ ॥ अहोमेपश्यतापायमल्पपुण्यस्य
दुर्मतेः ॥ अतृप्तस्याकृतार्थस्यगृहस्त्रैवर्गिकोहतः ॥ ६७ ॥ अनुरूपानुकूलाचयस्यमेपतिदेवता ॥ शून्ये
गृहेमांसंत्यज्यपुत्रैःस्वर्यातिसाधुभिः ॥ ६८ ॥ सोहंशून्येगृहेदीनोमृतदारोमृतप्रजः ॥ जिजीविषेकिमर्थं
पु चविधुरोदुःखजीवितः ॥ ६९ ॥ तांस्तथैवावृतान्शिग्भिर्मृत्युग्रस्तान्विचेष्टतः ॥ स्वयंचकृपणःशिक्षुपश्य
न्नप्यबुधोपतत् ॥ ७० ॥ तंलब्ध्वालुब्धकःक्रूरःकपोतंगृहमेधिनं ॥ कपोतकान्कपोतींचसिद्धार्थःप्रययौगृ
हम् ॥ ७१ ॥ एवंकुटुंब्यशांतात्माद्वंद्वारामःपतत्रिवत् ॥ पुष्णन्कुटुंबंकृपणःसानुबंधोवसीदति ॥ ७२ ॥ यःप्रा
प्यमानुषंलोकंमुक्तिद्वारमपावृतम् ॥ गृहेषुखगवत्सक्तःतमारूढच्युतंविदुः ॥ ७३ ॥ इतिश्रीभागवतेएका
दशेसप्तमोध्यायः ॥ ७ ॥ ॥ राम ॥

शंतिकेयोजयति ॥ एवमिति एवंगृहासक्तिःतिरश्चामप्यनर्थहेतुः ॥ ७१ ॥ मानुषस्यत्वतिनिंदितेत्याह यःप्राप्येति ॥ इत्येका
दशेसप्तमः ॥ ७ ॥

श्री॰
भा॰ ए॰
टी॰
३८

अष्टमेऽजगरादिभ्यो नवभ्यः शिक्षितं हरिः॥ अवधूतगिरा प्राह विवेकायोद्धवं प्रति॥१॥ प्रारब्धकर्मभोगस्यावश्यंभावित्वात्तद
र्थोद्यमोनर्थसुखार्थोयो वृथा कर्तव्य इति अजगरात् शिक्षितमित्याह सुखमित्यादिना॥ यथैन्द्रियकं सुखं स्वर्गे नरके च भवत्येव य
था दुःखं तस्मात् बुधः तन्नेच्छेत् शरीरनिर्वाहमात्रं तु यथालब्धेन कर्तव्यमित्याह॥ ग्रासमिति॥ अजगरः अजगरवृत्तिः॥
अक्रियः अप्रयासीनः॥२॥ यदा नापतति तदा किं कर्तव्यं तत्राह शयीतेति अनुपक्रमः निरुद्यमः दिष्टभुक् दैवमेव प्राप्तमिति धैर्य
वान्॥ ननु समर्थोपि शयीतैव किं इत्याह॥३॥ ओज इति॥ ओजः इन्द्रियबलं सहो मनोबलं बलं शारीरमेव तद्युक्तमपि देहमकर्म

श्रीब्राह्मण उवाच॥ सुखमैन्द्रियकं राजन् स्वर्गे नरक एव च॥ देहिनां च यथा दुःखं तस्मान्नेच्छेत तद्बुधः॥१॥
ग्रासं सुमृष्टं विरसं महान्तं स्तोकमेव वा॥ यदृच्छयैवापतितं ग्रसेदाजगरोऽक्रियः॥२॥ शयीताहानि भूरीणि
निराहारोऽनुपक्रमः॥ यदि नोपनयेद्ग्रासो महाहिरिव दिष्टभुक्॥३॥ ओजःसहोबलयुतं बिभ्रद्देहमकर्म
कम्॥ शयानो वीतनिद्रश्च नेहेतेन्द्रियवानपि॥४॥ मुनिः प्रसन्नगम्भीरो दुर्विगाह्यो दुरत्ययः॥ अनन्तपारो ह्य
क्षोभ्यः स्तिमितोद इवार्णवः॥५॥

कमेव बिभृत् शयान एव भवेत्॥ वीतनिद्रः स्वार्थे दत्तदृष्टिश्च भवेत् न पुनः ईहेत इन्द्रियवानपीति दर्शनादिव्यापारम
पि निवर्तयेदिति समुद्रात् शिक्षितमाह मुनिरिति द्वाभ्यां प्रसन्नः स्वच्छः गंभीरः दुर्विगाह्यः एवंभूत इति परिकलयितु
म शक्यः अलक्ष्याभिप्रायत्वात् दुरत्ययः अनतिक्रमणीयः तेजस्वित्वात् अनन्तपारः कालतो देशतश्च अपरिच्छेद्यः स्वरू
पाविर्भावात्॥ अक्षोभ्यः अविकार्यः रागाद्यभावात् स्तिमितोदः निश्चलोदकोऽर्णवो यथा॥ तद्वदेव गुणैर्भवेदित्यर्थः॥५॥

राम
३८

किंच वर्षासु सरिद्भिः समुद्रोपि सागरो यथा नोत्सर्पेत ग्रीष्मे तद्विरहे नोपि न शुष्येत तथा समृद्धकामस्तद्विहीनो वा न हृष्येत
न च शोचेदित्यर्थः॥ अत्र हेतुः नारायणपरः न तु विषयपर इति॥६॥ रूपगंधशब्दस्पर्शरसैः॥ पंचभिर्विषयैर्मोहिताः पतंग।
मधुकरगजहरिणमीना हताः अतस्ते स्वनाशकाः पंचैते गुरवः॥ तदुक्तं पतंगमातंगकुरंगभृंगमीना हताः पंचभिरेव पंच
एकः प्रमादी स कथं न हन्यते यः सेवते पंचभिरेव पंचेति॥ तत्र रूपविलाससमोहितो नश्यतीति॥ पतंगात् शिक्षितमाह दृष्ट्वेति।
तस्या भावैः प्रलोभितः॥७॥ स्त्रिय उपलक्षणमेतत् कृत्येतत् प्रपंचयति योषिदिति॥८॥ मधुकरात् शिक्षितमाह॥ स्तोकमिति गृहान्न।

समृद्धकामो हीनो वा नारायणपरो मुनिः॥ नोत्सर्पेत न शुष्येत सरिद्भिरिव सागरः॥६॥ दृष्ट्वा स्त्रियं देवमायां
तद्भावैरजितेंद्रियः॥ प्रलोभितः पतत्यंधे तमस्यग्नौ पतंगवत्॥७॥ योषिद्धिरण्याभरणांबरादिद्रव्येषु मायारचि ॥ ६ ॥
तेषु मूढः॥ प्रलोभितात्मा ह्युपभोगबुद्ध्या पतंगवन्नश्यति नष्टदृष्टिः॥८॥ स्तोकं स्तोकं ग्रसेद्ग्रासं देहो वर्तेत यावता
गृहस्थान वता॥ गृहानहिंसन्नातिष्ठेद्वृत्तिं माधुकरीं मुनिः॥९॥ अणुभ्यश्च महद्भ्यश्च शास्त्रेभ्यः कुशलो नरः॥ सर्वतः सार।
माददीत पुष्पेभ्य इव षट्पदः॥१०॥ सायंतनं श्वस्तनं वा न संगृह्णीत भिक्षितम्॥ पाणिपात्रोदरामत्रो मक्षिकेव न

गृहस्थान्॥ अहिंसन् अपीडयन्नित्यर्थः॥ यथा मधुकरो विशिष्टगंधलोभेनैकस्मिन्नेव पद्मे संचरन् तन्मध्ये मुकुलिते तत
स्मिन्न बध्यते एवं मुनिरपि गृहलोभेनैकमेव गृहमाश्रितस्तन्मोहेन बध्यत इति॥९॥ किंच अणुभ्यश्चेति द्विविधो मधुकृत
मधुकृन्न तु पुष्पाद्रसं गृह्णातीति मधुकृत् भ्रमरः मधु करोति ग्राहकत्वेन स्वरूपेणैवेति मधुकृत् मक्षिका च॥१०॥ तत्र प्र।
थमाच्छिक्षितमुक्तं द्वितीयात् शिक्षितमाह सायमिदं भोक्ष्यामि श्व इदं भोक्ष्यामीति भिक्षितमन्नादि न संगृह्णीत किंतु पाणि
पात्रः अन्यामत्रग्राही यद्वा उदरमेवामत्रं पात्रं यस्य सः॥ एकभिक्षया यावदुदरमात्रग्राही भवेत्॥ संग्राही तु मक्षिकेव न भवेत् न जो

श्री॰
भा॰ ए॰
टी॰
११

पतद्भिरणोति पुनः सायंतनमिति ॥१२॥ स्पर्शासक्तिर्नाशहेतुरिति गजात् शिक्षितमित्याह ॥ पदापीति पादेनापि दारवीं दारु-
मयीमपि गजो हि करिणीं स्पृष्ट्वा निखातगर्ते निपात्य बध्यते ॥१३॥ किंच नाधिगच्छेदिति नोपगच्छेत ॥१४॥ त्यागभोगविही-
नो धनसंचयः ॥ एवंनामी भवतीत्यत्र मधुहात् शिक्षितमित्याह नदेयमिति ॥ तदन्यो बलवान् भुंक्ते तदप्यन्यस्तच्चान्यः मधुहा म-
क्षिकाभिः ॥ संचितं मधु यथा भुंक्ते तद्वत् ननु स्वगृहं धनं कथमन्यो ज्ञास्यति हरिष्यति चेति ॥ तत्राह ॥ अर्थविदिति ॥ लिंगैर्वर्णै॰

सायंतनं श्वस्तनं वा चेत्संगृह्णीत भिक्षितम् ॥ मक्षिकाइव संगृह्णन्सह तेन विनश्यति ॥१२॥ पदापि युवतीं
भिक्षुर्न स्पृशेद्दारवीमपि ॥ स्पृशन्करीव बध्येत करिण्या अंगसंगतः ॥१३॥ नाधिगच्छेत्स्त्रियं प्राज्ञः कर्हिचि-
न्मृत्युमात्मनः ॥ बलाधिकैः स हन्येत गजैरन्यैर्गजो यथा ॥१४॥ नदेयं नोपभोग्यं च लुब्धैर्यद्दुःखसंचितं ॥ भुंक्ते
तदपि तच्चान्यो मधुहेवार्थविन्मधु ॥१५॥ सुदुःखोपार्जितैर्वित्तैराशासानां गृहाशिषः ॥ मधुहेवाग्रतो भुंक्ते
यतिर्वै गृहमेधिनां

॥ ता ॥ १६ म ॥ ॥

॥ ॥ ॥ ॥

॥ ॥

तद्गुणायं चैव तत्रीत्यर्थवित् ॥ यथा मधुहा तत्कोटरादिगतं मधु वेत्ति हरति च ॥१५॥ स्वोपयोगं विनापि भोगाः संभवंतीत्यत्रापि
स एव गुरुरित्याह ॥ सुदुःखेति ॥ आशासानानामिति वक्तव्ये वर्णलोप आर्षः ॥ यतिर्ब्रह्मचारी च पक्वान्नस्वामिनावुभौ
तयोरन्नमदत्वा तु भुक्त्वा चांद्रायणं चरेदिति गृहिणामावश्यकत्वेन दानविधानात् ॥१६॥ रामायनमः ॥ ॥ १६ ॥ राम
नृ९

हरिणात्तच्छिक्षितमाह ॥ ग्राम्येति भगवद्गीतं तु शृणुयादेव ॥ मृगयोर्लुब्धकस्य ॥१७॥ हरिणशावो देवहरिणीसुत ऋष्यशृंगोपि
गुरुर्ज्ञातव्य इत्याह नृत्येति वश्यो बद्ध इति शेषः रसासक्तिर्नाशहेतुरिति ॥ मीनात्तच्छिक्षितमाह जिह्वयेति अतिप्रमाथिन्या
अतिक्षोभिकया ऋच्छति प्राप्नोति बडिशैर्यामिषलिप्तैर्लोहकंटकैः ॥१९॥ दुर्जयत्वमुपपादयति इंद्रियाणीति निराहारा
अभोग्येभ्यः यद्याहारस्त्यज्यते तदान्येंद्रियजयः केवलं भवति रसनेंद्रियं तु वर्द्धते ॥ यदि तु भुज्यते तर्हि पुनरपि रसासक्त्या सर्वे

ग्राम्यगीतं न शृणुयाद्यतिर्वनचरः क्वचित् ॥ शिक्षेत हरिणाद्बद्धान्मृगयोर्गीतमोहितात् ॥१७॥ नृत्यवादित्र
गीतानि जुषन्ग्राम्याणि योषिताम् ॥ आसां क्रीडनको वश्य ऋष्यशृंगो मृगीसुतः ॥१८॥ जिह्वयातिप्रमाथिन्या
जनो रसविमोहितः ॥ मृत्युमृच्छत्यसद्बुद्धिर्मीनस्तु बडिशैर्यथा ॥१९॥ इंद्रियाणि जयंत्याशु निराहारा म-
नीषिणः ॥ वर्जयित्वा तु रसनं तन्निरन्नस्य वर्द्धते ॥२०॥ तावज्जितेंद्रियो न स्याद्विजितान्येंद्रियः पुमान् ॥ न ज-
येद्रसनं यावज्जितं सर्वं जिते रसे ॥२१॥ पिंगला नाम वेश्यासीद्विदेहनगरे पुरा तस्या मे शिक्षितं किंचिन्निबोध
नृपनंदन ॥२२॥ सा स्वैरिण्येकदा कांतं संकेत उपनेष्यती अभूत्काले बहिर्द्वारि बिभ्रती रूपमुत्तमम् ॥२३॥
मार्ग आगच्छतो वीक्ष्य पुरुषान्पुरुषर्षभ ॥ तान्शुल्कदान्वित्तवतः कांतान्मेनेर्थकामुका ॥२४॥ ॥राम

इंद्रियलोभः स्यात् ॥ अतो रसासक्तिं परित्यज्यैव यथा वर्द्धं जीवेदिति ॥ प्राणवृत्त्यैव संतुष्येदित्युक्तमपि रसनस्यातिदुर्जयत्व
ज्ञापनायोक्तमिति विशेषः ॥२१॥ पिंगलाया नैराश्यं शिक्षितमिति वक्तुं तदाख्यानमाह ॥ पिंगलेत्यादिना मे मया यच्छि-
क्षितं ॥२२॥ स्वैरिणी कामचारिणी संकेते रतिस्थाने ॥२३॥ तान्वित्तवतः साधयतां ॥ अतएव शुल्कदान् मूल्यदान् कांता

॥ भा॰ टी॰ ॥ ५८ ॥ स्कं॰ ११ ॥

श्री·
भा·पु·
टी·
५·

अपि सं भावनायां ॥ अन्योपि मां प्रेप्स्यतीत्येवं दुराशया ध्वस्तनिद्रा नम्रमुखः ॥२५॥ द्वार्यवलंबमाना पुनः प्रविशति पुनर्निर्ग
च्छति एवं कुर्वती निशीथं अर्धरात्रं प्राप ॥२६॥ निर्वेदः अलंबुद्धिः वित्तचिंतया हेतुर्यस्याः सा ॥२७॥ यथा यथावत्सम मत्तः शृ
णु तत्र किं निर्विण्णाया गीतं अत्र कारणं तत्राह द्वियस्मात् पुरुषस्य आशापाशानां निर्वेदो सिर्यथा तथा छेत्ता तत्र हेतुः नरो
हीति अंग हे राजन् ॥२८॥ अविजितात्मत्वे हेतुः याहं बालिशा विवेकशून्या तस्याः कुतः ॥ येन कारणेन असतः तस्मात्

आगतेष्वपयातेषु सा संकेतोपजीवना ॥ अप्यन्यो वित्तवान्कोपि मामुपैष्यति भूरिदः ॥२५॥ एवं दुराशया ध्व
स्तनिद्रा द्वार्यवलंबना ॥ निर्गच्छंती प्रविशंती निशीथं समपद्यत ॥२६॥ तस्या वित्ताशया शुष्यद्वक्त्राया दी
नचेतसः ॥ निर्वेदः परमो जज्ञे चिंताहेतुः सुखावहः ॥२७॥ तस्या निर्विण्णचित्ताया गीतं शृणु यथा मम ॥ नि
र्वेद आशापाशानां पुरुषस्य यथा ह्यसिः ॥२८॥ न ह्यंगाजातनिर्वेदो देहबंधं जिहासति ॥ यथा विज्ञानर
हितो मनुजो ममतां नृप ॥ पिंगलोवाच अहो मे मोहविततिं पश्यताविजितात्मनः ॥ या कांताद‍सतः कामं का
मये येन बालिशा ॥२९॥ संतं समीपे रमणं रतिप्रदं वित्तप्रदं नित्यममुं विहाय ॥ अकामदं दुःखभयाधिशोकमोहप्रदं
तुच्छमहं भजेज्ञा ॥३०॥ अहो मयात्मा परितापितो वृथा सांकेत्यवृत्त्यातिविगर्ह्यवार्तया ॥ स्त्रैणान्नराद्यार्थतृषोनुशोच्या

त्तकामं कामये ॥२९॥ बालिशत्वं प्रपंचयति संतमिति त्रिभिः समीपे ॥ तयाअमित्वात् इममपरोक्षमीश्वरम् ॥३०॥ विगर्ह्या वृत्ति
र्या वार्ता यया जीविका तया कुतः सांकेत्येन या वृत्तिः तया बहुव्रीहिणो स्त्रविशेषणं वा परितापं प्रपंचयति स्त्रैणादिति स्त्रीलंपटात्
अर्थतृष्णायां तृषः लुब्धात् अत एवानुशोच्यान्नरात् याहं वित्तं रतिं चेच्छती तया वृथात्मा परितापितः केन वित्तमिच्छती तेन नरेण

राम
५

अहो धिङ्मामस्याह अतिवीभत्सितं भजामीत्याह यदिति वंशो नाम स्थूणास्तु निहितः तिर्यक् वेणुः वंश्यास्त
स्मिन्नुभयतो निहिता वेणवः अस्थिभिरेव निर्मिता वंशादयो यस्मिन् तत्र पृष्ठे दीर्घं मस्थि यत् स वंशः पार्श्वास्थीनि
वंश्यानि स्थूणा हस्तपादास्थीनि तथा रोमभिर्नखैश्च पिनद्धं छादितं तथापि क्षरंति नव द्वाराणि यस्मिन् तत्
एवंभूतमागारं पुनर्गृहं शरीरमेतत् मत् मत्तोऽन्या का वा कान्त बुद्ध्या उपैति सेवेत ३२ सत्स्वंगतौ संमोहमाह

यदस्थिभिर्निर्मितवंशवंश्यस्थूणं त्वचा रोमनखैः पिनद्धं क्षरन्नवद्वारमगारमेतद्विण्मूत्रपूर्णं मदु
पैति कान्या ३२ विदेहानां पुरे ह्यस्मिन्नहमेकैव मूढधीः यान्यमिच्छत्यसत्यस्मादात्मदात्काममच्
च्युतात् ३३ सुहृत्प्रेष्ठतमो नाथ आत्मा चायं शरीरिणां तं विक्रीयात्मनैवाहं रमेऽनेन यथा रमा ।
३४ कियत्प्रियं ते व्यभजन्कामा ये कामदा नराः आद्यंतवंतो भार्याया देवा वा कालविद्रुताः ३५
नूनं मे भगवान्प्रीतो विष्णुः केनापि कर्मणा निर्वेदोऽयं दुराशाया यन्मे जातः सुखावहः ३६

इत्याह विदेहानामिति यान्यं रमसत्तोऽच्युतादन्यं कामं भोगमिच्छतीसा ३३ एवं निर्विण्णा सती अतः
परमेवं करिष्यामीत्याह सुहृदिति अयमीश्वर आत्मनैव आत्मानमेव निवेद्य तं विक्रीय विशेषेण
क्रीत्वा अनेनैव सह हे रमे रमा लक्ष्मीर्यथा ३४ अन्यस्मात् सेव्यत्वदर्शाय तिकिं यदिति आद्यंतव
न्तो ये कामाः विषयाः कामदा नरा या देवा वा कालकलिताः भार्यायाः कियत्प्रियं कृतवंतः किंचिन्न अतो नेहा
मुत्र च तेभ्योऽतिरिक्तः कोऽपि सेव्योऽस्तीत्यर्थः ३५ एवं निश्चित्य स्वभाग्यमभिनंदति नूनमिति दुराशाया अशाय स्या

श्री॰ भा॰ए॰ टी॰ ५१

ननु धनाप्राप्त्या क्लिष्टास्मि कथं विरक्ता प्रीता तत्राह मैवमिति मंदभाग्यायै वेद्दृढं स्यात्तदैवं निर्वेदहेतवः क्लेशा न स्युः इत्यर्थः येन निर्वेदेनानुबंधरूपान् हार्दिकान् निर्हृत्य प्रविलाप्य ३७ अतः तेनास्मि विस्मृतेनोपकृतं तेनाह तदुपकारं निर्वेदलक्षणं ग्राम्येषु नरेषु विषयेषु वा संगताः ३८ कथं व्रजसि तदाह संतुष्टेति ३९ ननु ब्रह्मादीन् हित्वा अमुनैवेति कोयं नियमः तत्राह संसारेति मुषितेक्षणं अपहृतविवेकं ४० तर्हि किमात्मत्राणोपाधिना भजिष्यसि न तत्

मैवं स्युर्मंदभाग्यायाः क्लेशा निर्वेदहेतवः येनानुबंधं निर्हृत्य पुरुषः शममृच्छति ३७ तेनोपकृ
तमादाय शिरसा ग्राम्यसंगताः त्यक्त्वा दुराशाः शरणं व्रजामि तमधीश्वरं ३८ संतुष्टा श्रद्दधत्येत॰
द्यथालाभेन जीवती विहराम्यमुनैवाहमात्मना रमणेन वै ३९ संसारकूपे पतितं विषयैर्मुषि
तेक्षणं ग्रस्तं कालाहिनात्मानं कोन्यस्त्रातुमधीश्वरः ४० आत्मैव ह्यात्मनो गोप्ता निर्विद्येत यदा
खिलात् अप्रमत्त इदं पश्येद्ग्रस्तं कालाहिना जगत् ४१ ब्रा ण उवाच एवं व्यवसितमतिर्दुराशां॰
कांततर्षजां छित्त्वोपशममास्थाय शय्यामुपविवेश सा ४२ आशा हि परमं दुःखं नैराश्यं परमं॰
सुखं यथा संछिद्य कांताशां सुखं सुष्वाप पिंगला ४३ इति श्रीभागवते एकादशे अष्टमोध्यायः ॥८॥

त्र सर्वतो निर्विद्य भगवद्भजने प्रवृत्तस्यात्मन एव समर्थत्वादित्याह आत्मैवेति यदा एवं जगत्पश्येत्तदा प्रम
त्तः सन् निखिलाद्देहादेः भोगान्निर्विद्येत तदा हि आत्मैवात्मनो गोप्ता नान्यः अतः केवलं प्रेम्णैव भजामीति
भावः ४१ कांतस्य तर्षोऽभिलाषः ततो जाता ४२ फलितमाह आशाहीति ४३ इति श्रीभावार्थे एकादशे अष्टमः ॥८॥

टी॰ ५१

नवमेकुररादिभ्योदेहतत्त्वोपशिक्षितं श्रुत्वायदुःकृतार्थोभूदितिकृत्स्नेनवर्णितः कुररात्शिक्षितमाह प
रिग्रहोहीति यद्यत्प्रियतमंतस्यतस्यपरिग्रहः तद्विद्वानपरिग्रहोदुःखमितिविद्वान्सन्यस्त्वकिंचनःत्यक्तप
रिग्रहः नतद्दरिद्रः तदाह सामिषमिति १ अर्भकशिक्षितामाह नेतिगेहपुत्रिणांतेहतायाभवतिसाचिंताचमे
नास्ति आत्मनैवक्रीडायस्यआत्मनिरतिःप्रीतिर्यस्यसः नन्वहंसर्वदुःखयोः किंसाहश्यपनेष्वितत्परमसुखमित्या

ब्राह्मण उवाच ॥ परिग्रहोहिदुःखाययद्यत्प्रियतमंनृणां अनंतंसुखमाप्नोतितद्विद्वान्यस्त्व
किंचनः १ सामिषंकुररंजघ्नुर्बलिनोन्येनिरामिषाः तदामिषंपरित्यज्यससुखंसमविंदत २
नमेमानापमानौस्तोनचिंतागेहपुत्रिणां आत्मक्रीडआत्मरतोविचरामीहबालवत् ३
द्वावेवचिंतयामुक्तौपरमानंदआप्लुतौ योविमुग्धोजडोबालोयोगुणेभ्यःपरंगतः ४
क्वचित्कुमारीत्वात्मानंवृणानान्गृहमागतान् स्वयंतानर्हयामासक्वापियातेषुबंधुषु ५
तेषामभ्यवहारार्थंशालीन्रहसिपार्थिव अवघ्नंत्याःप्रकोष्ठस्थाश्चक्रुःशंखाःस्वनंमहत् ६

हद्वाविति ३ विमुग्धः अज्ञः जडः अनुद्यमः एवंभूतोयोबालः यश्चगुणेभ्यःपरमीश्वरंप्राप्तः तौद्वौ४ कुमार्याः
शिक्षितंवक्तुंआख्यायिकामाह क्वचिदित्यादिना वृणानान्स्ववरणायागतान् बंधुषुपित्रादिषु ५ शालीः
धान्यवलयास्मह्यथाभवतितथास्वनंचक्रुः ६ सामहतीबुद्धिमतीतत्स्वयंशालावहननंजुगुप्सितंवदंतीड
ताद्यानतकं एकैकशः क्रमेणैकमेकंवभंजकराद्वयसारितवती ७ ॥

श्री भा. टी. ४२

निरभिमितत्पृथक्कृतवतीनतुकुमार्यास्तवचकथंसंगतिः तत्राह ८ लोकानिति ९ वासइति प्रथमांतत्पाठेकलहहेतुः वार्तासंभाषोऽपिहेतुर्भवेदित्यर्थः चित्तैकाग्रताहेतोस्फूर्तिलक्षणसमाधिहेतुरिति १० शरकारात्किंशिक्षितमित्याह मनइति त त्रोपायमाहजितेति आसनजयेश्वासजयः तस्यचजयेश्वासाधीनंमनोनिश्चलंभवति ननुक्षणंनिश्चलंसदपिमनोविषयवासनयापायदिविक्षिप्येतस्वभ्रमाविवसर्वथालीयेतवातदा किंतत्राह वैराग्येति वैराग्येणविक्षिप्यमानंअभ्यासयोगे

मातत्रशुष्मिंतमन्वामहतीक्रीडिताततः वभंजैकैकशःशंखान्द्वौद्वौपाण्योरशेषयत् ७ उभयोरप्यभूद्घोषोह्यवघ्नंत्याःस्मशंखयोः तत्राप्येकंनिरभिदेकस्मान्नाभवद्ध्वनिः ८ अन्वशिक्षमिमंतस्याउपदेशमरिंदम लोकाननुचरन्नेतांल्लोकतत्त्वविवित्सया ९ वासेबहूनांकलहोभवेद्वार्त्ताद्वयोरपि एकएव वरेत्तस्मात्कुमार्याइवकंकणः १० मनएकत्रसंयुंज्याज्जितश्वासोजितासनः वैराग्याभ्यासयोगेनध्रियमाणमतंद्रितः ११ यस्मिन्मनोलब्धपदंयदेतच्छनैःशनैर्मुंचतिकर्मरेणून् सत्वेनवृद्धेनरजस्तमश्च

नलक्षेध्रियमाणंस्थिरीक्रियमाणं ११ एकत्रेतिकुत्रतदाहयस्मिन्निति यस्मिन्पराविक्षेपात्मकेमनः एतद्यस्मिन्परमानंदेभगवतिलब्धास्पदंसत्कर्मवासनामुंचतितस्मिन्नतत्कर्मवासनात्यागेसत्त्वेनप्रवृद्धेनयोऽनुर्वारः नसत्त्वेनेतिवृद्धेनोपशमात्मकेनरजस्तमसोरभावेविक्षेपलययाभावान्निर्वाणमवृत्तिकंध्येयाकारेणावस्थानमुपैति कुतः अनिंधनंइंधनंगुणाः तत्कार्यंचतद्रहितं तदुक्तंयोगशास्त्रेमनसोवृत्तिशून्यस्यब्रह्माकारतयास्थितिः यासंप्रज्ञातनामासौसमाधिरभिधीयतइति १२ ॥

श्री राम. ४२

ततः चनहैतस्यनिः इत्याह तदेवमिति बहिर्देशोनादिना अंतं संस्मृत्य इषौ गतात्मा तस्य राज्ञः करणोदत्तचित्तः भेरी
घोषैर्वंतिकं व्रजंतं नृपतिमपि न वेदेत्यर्थः १३ सर्पात् शिक्षितमाह एकचारीति योगिसंमतं देस्मास्तितागेहे सर्प
गुरुः जनसंगत्यागे सर्पः सयथा जनाच्छंकमान एकाकी विचरति नियतनिकेतरहितस्य सदाऽप्रमत्तस्य ए
कांतवासी च आचारैर्गतिभिः सविषो निर्विषो वेति न लक्ष्यते च असहायस्य मितभाषी च तद्वत् एतन्निवर्तते

तदेवमात्मन्यवरुद्धचित्तो न वेद किंचिद्बहिरंतरं वा यथेषुकारो नृपतिं व्रजंतमिषौ गतात्मा
न ददर्श पार्श्वे १३ एकचार्यनिकेतः स्यादप्रमत्तो गुहाशयः अलक्ष्यमाण आचारैर्मुनिरेको
ल्पभाषणः १४ गृहारंभोऽतिदुःखाय विफलश्चाध्रुवात्मनः सर्पः परकृतं वेश्म प्रविश्य सु
खमेधते १५ एको नारायणो देवः पूर्वसृष्टं स्वमायया संहृत्य कालकलया कल्पांत इदमी

र्थः १४ किंच गृहारंभ इति अध्रुवात्मनः नश्वरदेहस्य सुखं यथा भवति तथा वर्द्धते १५ कारकसा
मग्रीनिरपेक्षात्केवलादीश्वरात् विश्वसृष्टिसंहारौ पूर्णेनाभिहितौ तेन मया संभावितावितिवक्तुं प्रथ
मं संहारप्रकारमाह एक इति सार्द्धद्वयेन एकः कारकनिरपेक्षः पूर्वसृष्टमिदं जगत् कालकल
या कालशक्त्या संहृत्य १६ ॥ राम ॥ राम ॥ राम ॥ राम ॥

श्री
भा. ए.
टी.
५२

एकएवाद्वितीयः सजातीयविजातीयभेदशून्योऽभूत् कारणभूतासु सत्वादिषु शक्तिष्वपि साम्यं नीतासु सतीषु १७ गुण
साम्यप्राधानं तदुपाधिः पुरुषः तयोरीश्वरः परावराणां परेब्रह्मादयः अवरेअन्येच मुक्ताजीवाः तेषां परमः प्राप्यआस्ते कु
तः कैवल्यसंज्ञितः मोक्षशब्दाभिधेयः तत्रहेतुः केवलेति निर्विषयः स्वप्रकाशः आनंदानां संदोहः सपरमानंदउत्कृष्टः
कुतः निरुपाधिकः ततः केवलादेवसृष्टिं दर्शयति केवलेनात्मानुभावेनकालेन सत्त्वक्रियाशक्तिप्रधानं महत्तत्त्वं

एकएवाद्वितीयोऽभूदात्माधारोऽखिलाश्रयः कालेनात्मानुभावेन साम्यं नीतासु शक्तिषु १७ सत्वादिष्वा
दिपूरुषः प्रधानपुरुषेश्वरः परावराणां परमआस्ते कैवल्यसंज्ञितः १८ केवलानुभवानंदसंदोहो निरु
पाधिकः केवलात्मानुभावेन स्वमायां त्रिगुणात्मिकां १९ संक्षोभयन्सृजत्यादौ तया सूत्रमरिंदम ता
माहुः त्रिगुणव्यक्तिं सृजंतीं विश्वतोमुखं २० यस्मिन्प्रोतमिदं विश्वं येन संसरते पुमान् २१ ॥ ॥

गरा

सृजति जीवसंसारहेतुभूते सूत्रे सृष्टेऽपि तं माभैरिति संबोधयति १९ अरिंदम अरीन् संगादीन् दमयितुं समर्थ सूत्रस्यै
वव्यक्तिशब्देनोच्यमानस्य तामिति स्त्रीलिंगेन परामर्शः त्रिगुणव्यक्तिं गुणत्रयस्य कार्यं अतएव विश्वतोमुखं नानावि
धं त्रिगुणात्मकं विश्वं महदहंकारद्वारेण सृजंती त्रिगुणकार्यस्य सूत्रसंज्ञाया कारणमाह यस्मिन्निति कारणभूते समष्टि
रूपे यस्मिन्निदं विश्वं प्रोतं ग्रथितं वायुर्वै गौतम तत्सूत्रं वायुना वै गौतम सूत्रेणायं च लोकः परश्च लोकः सर्वाणि भूता

ॐ
रामं
५२

तदेवं शिक्षितमर्थमुक्त्वा दृष्टान्तमाह यथेति हृदयादूर्णां तां वक्त्रतः वक्त्रेण संतत्य प्रसार्य विहृत्य क्रीडित्वा भगवद्ध्यानपरायणात् तत्सारूप्यं न चित्रमिति पेशस्कृता भ्रमरविशेषाघातत्रासात्तमित्याह यत्र यत्रेति २२ सकलमेकाग्रं कुड्यां वेशितः निरुद्धः भयेन ध्यायन् सात्मतां तत्सारूप्यं साम्यतामितीति पाठे त्वार्षता पूर्वरूपमसंत्यजन्निति यस्याभिप्रायः यदा तेनैव देहेनान्यसारूप्यं दृश्यते तदा किं वक्तव्यं देहान्तरेण सारूप्यमि

यथोर्णनाभिर्हृदयादूर्णां संतत्य वक्त्रतः तया विहृत्य भूयस्तां ग्रसत्येवं महेश्वरः २१ यत्र यत्र म
नो देही धारयेत्सकलं धिया स्नेहाद्द्वेषाद्भयाद्वापि याति तत्तत्स्वरूपतां २२ कीटः पेशस्कृतं
ध्यायन्कुड्यां तेन प्रवेशितः याति तत्सात्मतां राजन्पूर्वरूपमसंत्यजन् २३ एवं गुरुभ्य एतेभ्य
एषा मे शिक्षिता मतिः स्वात्मोपशिक्षितां बुद्धिं शृणु मे वदतः प्रभो २४ देहो गुरुर्मम विरक्ति
विवेकहेतुर्बिभ्रत्स्म सत्त्वनिधनं सततार्त्युदर्कं तत्त्वान्यनेन विमृशामि यथा तथापि पारक्य
मित्यवसितो विचराम्यसंगः २५ ॥

ति २३ स्वदेहादेव शिक्षितमाह स्वात्मेति २४ आत्मनो देहात् शिक्षितं गुरुत्वे हेतुः विरक्तिविवेकयोर्हेतुः विरक्तिहेतुत्वमाह सत्त्वनिधनमुत्पत्तिविनाशौ तौ बिभ्रत्स्म किंच सततमार्त्युदर्कं दुःखमेवोत्तरोत्तरफलं बिभ्रत् यद्वा सततार्तिरेवोदर्कः उत्तरफलं यस्य तत् सत्त्वनिधनं बिभ्रत् विवेकहेतुत्वमाह तत्त्वानीति यथा यथावत् एवमप्युपकारित्वेपि देहे नैवास्था कर्तव्येत्याह तथापीति पारक्यं श्वसृगालादिभक्ष्यमिति निश्चितवा

श्री भा॰ ए॰ टी॰ ५५

सततार्स्त्विदर्कं तावत्प्रपंचयति जायेति द्वाभ्यां यस्य देहस्य प्रियचिकीर्षया भोगसंपादनेच्छया जायादिवर्गान्वितन्वन् पु
ष्णाति पुरुषः कथंभूतः कृच्छ्रं यथा भवति तथावरुद्धानि संचितानि धनानि येन सः येन सः देहविशेषणं वा स देहः स्वां
ते स्वस्य पुंसो नाशे अवसीदति नश्यति किंच देहनाशेपि न दुःखसमाप्तिरित्याह अस्य देहांतरबीजं कर्म सृष्ट्वेति वृक्षस्येव

पुरुषस्य

जायात्मजार्थपशुभृत्यगृहाप्तवर्गान्पुष्णाति यत्प्रियचिकीर्षया वितन्वन् स्वांते सकृच्छ्रमवरुद्धध
नः स देहः सृष्ट्वास्य बीजमवसीदति वृक्षधर्मा २६ जिह्वैकतोऽमुमपकर्षति कर्हि तर्षा शिश्नोऽन्यतः
त्वगुदरं श्रवणं कुतश्चित् घ्राणोऽन्यतश्चपलदृक्क्व च कर्मशक्तिर्बह्व्यः सपत्न्य इव गेहपतिं लुनंति २७

धर्मो यस्य सः २६ किंच जिह्वेति अमुं देहं तदभिमानिनं पुरुषं वा एकतः रसं प्रति जिह्वा अपकर्षति आच्छिनत्ति कर्हि
कदाचित् तर्षा पिपासा जलं प्रति शिश्नो व्यवायं प्रति त्वक् स्पर्शं प्रति उदरं अन्नमात्रं प्रति श्रवणं शब्दं प्रति घ्राणो गंधं
प्रति चपलदृक् रूपं प्रति क्वचित् स्वस्वविषयं प्रति कर्मशक्तिः अन्यदपि कर्मेंद्रियं लुनंति चोदयंति २७ ॥ ॥

श्रीः राम ५५

ईश्वरो ह्यकरणाधिष्ठातीरग्न्यादिदेवताः वागादिभिः सह सृष्टवान् तास्त्वन्नं प्रति भोगार्थं शरीरमयाचन्त सर्वतो भ्योगोशरीरमश्वशरीरं यथाक्रममानीतवान् ततस्ता देवताः सोऽब्रवीद्यथायतनं चक्षुरादिस्थानं प्रविशतेति तदाह तास्मै पुरुषमानयत् ता अब्रुवन् सुकृतं बतेति तास्य वावस्था अग्निर्वाग्भूत्वा मुखं प्राविशदित्यादि ॥३॥

ततेवं देहो गुरुरित्यादित्रिभिर्विरक्तिविवेकहेतुत्वमुपपाद्येदानीमस्य देहस्यातिदुर्लभत्वं दर्शयन्नीश्वरनिष्ठां विधत्ते सृष्ट्वेति द्वाभ्यां पुराणि शरीराणि पुरुषं पुरुषदेहं ब्रह्मणोऽवलोकाय अपरोक्षाय धिषणा बुद्धिर्यस्मिन् ततदुक्तं तासां मे पौरुषी प्रियेति श्रुतिश्च पुरुषत्वे चाविस्तरामात्मेत्यादि तथा ताभ्यो गामानयत्ता अब्रुवन्न वै नोऽयमलमिति ताभ्योऽश्वमानयत्ता अब्रुवन्न वै नोऽयमलमिति ताभ्यः पुरुषमानयत्ता अब्रुवन् सुकृतं

सृष्ट्वा पुराणि विविधान्यजयात्मशक्त्या वृक्षान्सरीसृपपशून्खगदंशमत्स्यान् तैस्तैरतुष्टहृदयः
पुरुषं विधाय ब्रह्मावलोकधिषणं मुदमाप देवः २८ लब्ध्वा सुदुर्लभमिदं बहुसंभवान्ते मानु
ष्यमर्थदमनित्यमपीह धीरः तूर्णं यतेत न पतेदनुमृत्यु यावन्निःश्रेयसाय विषयः खलु
सर्वतः स्यात् २९ एवं संजातवैराग्यो विज्ञानालोक आत्मनि विचरामि महीमेतां मुक्तसंगोऽन

बतेति च २८ तस्मात् बहूनां संभवानां जन्मनामंते मानुष्यमनित्यमप्यर्थदं पुरुषार्थप्रापकं देवाल्लब्ध्वा अनुमृत्यु निरंतरं मृत्युर्यावत् यावन्न पतेत्तावदेव तूर्णं शीघ्रं निःश्रेयसाय यतेत विषयः पुनः सर्वतः पश्वादिदेहेष्वपि स्यादेव २९ तदेवं हेयोपादेयविवेकं बहुधा निरूप्येदानीं यदुक्तं त्वतः कल्यः कविर्दक्षः इत्यादि तदेवंविधे तस्मिन्नेवालोकः प्रदीपो यस्य सः सत्त्वमात्मविशेषणमाह एवमिति एवं बहुभ्यो गुरुभ्यः शिक्षितेन विशिष्टं ज्ञानमेवालोकः प्रदीपो यस्य सः सन्नहं तत्त्वात्मविशेषणमाह एवमिति एवं बहुभ्यो गुरुभ्यः शिक्षितेन विशिष्टं

श्री॰ भा॰ ए॰ टी॰ ५५

ननुकिंबहुभिर्गुरुभिः नहिश्वेतकेतुप्रभृतिष्वेवबहवोगुरवःश्रूयंते तत्राह नह्येकस्मादिति बहुधाप्रपंच
निष्प्रपंचभेदादिभिः अयंभावः नैतेपरमार्थोपदेष्टारोगुरवः किंत्वन्वयव्यतिरेकाभ्यामात्मन्यसंभावनादिमात्रनिवर्तकाः
एषांचबहुत्वंयुक्तमेवेति ज्ञानप्रदंतुगुरुमेकमेववक्ष्यतिमदभिज्ञंगुरुंशांतमुपासीतेति उक्तंच तस्माद्गुरुंप्रपद्ये
तजिज्ञासुःश्रेयउत्तमंइति ३१ विप्रोदत्तात्रेयः योगर्द्धिमापुरुभयोयदुर्हैहयाद्याइत्युक्तत्वात् यथागतंतथैवययौ॥

नह्येकस्माद्गुरोर्ज्ञानंसुस्थिरंस्यात्सुपुष्कलं ब्रह्मैतदद्वितीयंवैगीयतेबहुधर्षिभिः ३१ श्रीभगवानु
वाच इत्युक्त्वासयदुंविप्रःतमामंत्र्यगभीरधीः वंदितोभ्यर्थितोराज्ञाययौप्रीतोयथागतं ३२
अवधूतवचःश्रुत्वापूर्वेषांनःसपूर्वजः सर्वसंगविनिर्मुक्तःसमचित्तोबभूवह ३३ इतिश्री
भागवतेमहापुराणेएकादशस्कंधेनवमोध्यायः॥९॥ ॥ ॥ ॥

कृपाययादित्यर्थः ३३ भगवान्स्वीयंब्रह्मवित्कुलमितिश्लाघयते नःपूर्वेषांपूर्वजइति अत्रसंग्रहश्लोकाः
कपोतमीनहरिणकुमारीगजपन्नगाः पतंगःउरगश्चाष्टौहेयार्थेगुरवोमताः मधुकृन्मधुहृत्तोयपिंग
लाचद्वयोस्त्रयः उपादेयार्थविज्ञानेशेषाःएवमादेयामताः तद्वानवभेदश्चतत्रतत्रस्फुटीकृतः अध्याय
वितयेचाष्टनवाख्योवीरिताःक्रमात् ३३ इतिश्रीभावार्थदीपिकायामेकादशस्कंधेनवमोध्यायः॥९॥

टी॰ दाम॰ ५५

चतुर्विंशतिगुर्वोप्यालब्धसंभावनाशुकः उद्धवसांप्रतमात्मसाधनोक्तिरतःपरं दशमेदेहसंबंधात्संसृतिर्नात्म
नःस्वतः इत्येतद्दर्शयामासमतांतरनिरासतः तदेवमन्वयव्यतिरेकाभ्यामुक्त्वाविवेकज्ञानस्यतत्त्वज्ञानायादित
आरभ्यसाधनान्युपदिशतिभगवान्मयेतिमयापंचरात्रादिषूक्तैर्वैष्णवधर्मेष्ववहितःअप्रमत्तःसन्तदविरोधेन
वर्णाद्याचारमनुतिष्ठेत् १ कथमकामात्मनासंभवतितत्राह अन्वीक्षेतेतिस्वधर्मेविशुद्धचित्तःसन्देहिनांविषये
षुसत्यत्वाभिनिवेशेनयेसर्वेआरंभाःतेषांफलवैपरीत्यंपश्येत् एवंफलवैपरीत्यादकामःस्यात् २ किंच काम्य

श्रीभगवानुवाच ॥ मयोदितेष्ववहितःस्वधर्मेषुमदाश्रयः वर्णाश्रमकुलाचारमकामात्मासमाचरेत्
१ अन्वीक्षेतविशुद्धात्मादेहिनांविषयात्मनां गुणेषुतत्त्वध्यानेनसर्वारंभविपर्ययं २ सुप्तस्यविषया
लोकोध्यायतोवामनोरथः नानात्मकत्वाद्विफलःतथाभेदात्मधीर्गुणैः ३ निवृत्तंकर्मकुर्वी
तप्रवृत्तंमत्परस्त्यजेत् जिज्ञासायांसंप्रवृत्तोनाद्रियेत्कर्मचोदनां ४ ॥ राम राम ॥

विषयाणांमिथ्यात्वादपीत्याह सुप्तस्येतिविफलःअर्थशून्यःअत्रैवप्रयोगाः इंद्रियैर्योबहिर्नानाबुद्धिःसावि
फलानानात्मकत्वादैंद्रियकत्वाच्चमनोजन्यस्वप्नमनोरथवदिति ३ मोक्षार्थीनप्रवर्त्तेततत्रकाम्यनिषिद्धयोः
नित्यनैमित्तिकेकुर्यात्प्रत्यवायजिहासया इतिस्मृतिः अतःप्रवृत्तंकाम्यकर्मत्यजेन्निवृत्तंनित्यनैमित्तिकमेवकुर्या
त् आत्मविचारेतुसम्यक्प्रवृत्तोनित्यकर्मचोदनामपिनाद्रियेत नित्यनैमित्तिकसंकोचमादरेणजिज्ञासाकर्तव्या ४ ।

८६ भा. पु.

श्री॰ भा॰ टी॰ ५६ किंतु यमान् अहिंसादीन् अभीक्ष्णमादरेण सेवेत शौचादींस्तु नियमान् क्वचित् यथाशक्तिः तदात्मज्ञानाविरोधेन यमा
द्वादश नियमाश्चैकोनविंशेऽध्याये वक्ष्यति किंच यमेष्वादरं परित्यज्य गुरुमुपासीतेत्याह मदभिज्ञमिति मदात्मकं
मद्रूपं ५ गुरुसेवकस्य धर्मानाह अमानीति दक्षः अनलसः निर्ममः जायादिषु ममताशून्यः गुरौ तु दृढसौहृदः अस
त्वरः अव्यग्रः अमोघवाक् व्यर्थालापरहितः एतान्येव शिष्यस्य लक्षणानि ज्ञेयानि ६ ननु स्वजायादिषु कथं निर्ममः

यमानभीक्ष्णं सेवेत नियमान्मत्परः क्वचित् मदभिज्ञं गुरुं शान्तमुपासीत मदात्मकं ५ अमान्यः
मत्सरो दक्षो निर्ममो दृढसौहृदः असत्वरोऽर्थजिज्ञासुरनसूयुरमोघवाक् ६ जायापत्यगृ
हक्षेत्रस्वजनद्रविणादिषु उदासीनः समं पश्यन्सर्वेष्वर्थमिवात्मनः ७ विलक्षणः स्थू
लसूक्ष्माद्देहादात्मेक्षिता स्वदृक् यथाग्निर्दारुणो दाह्याद्दाहकोऽन्यः प्रकाशकः ८ ॥

स्यात् तत्राह जायेति औदासीन्ये हेतुं विवेकं दर्शयति आत्मनोऽर्थं प्रयोजनं सर्वत्र सममिव पश्यन्निति अयं भावः सर्व
देहेष्वात्मन एकत्वाज्जायादिदेहेष्वस्मिंश्च स्वदेहे आत्मनोऽर्थः सुखादिः सम एव केन विशेषेण तेष्वेव ममत्वा
भिनिवेश इत्येवमुदासीनः सन् गुरुं प्रपद्येतेति ७ अहो कोऽसौ देहव्यतिरिक्त आत्मा यस्यैक्यादर्थः सर्वेषु समः
स्यात् तमाह विलक्षण इति स्थूलसूक्ष्मदेहद्वयादात्माऽन्यः यतो विलक्षणः द्वैलक्षण्यं दर्शयति ईक्षिता
स्वदृगिति द्रष्टा हि दृश्याद्विलक्षणः स्वप्रकाशश्च जडात् विलक्षणः तथा चात्र दृष्टान्तः यथाग्निर्दाहकः प्रका
शकश्च दाह्यात् काष्ठाद्दाहकः काष्ठादन्यः स्यादिति ८ ॥ श्रीं राम ५६

अनेनैव दृष्टान्तेन नित्यत्वानादित्वविभुत्वैकत्वादयोऽपि सिद्धा इत्याह निरोधेति यथा दारुष्वन्तः प्रविष्टोऽग्निस्तत्कृता
न्नाशादीन् प्राप्नोति न तु स्वतो नाशादिमान् एवं देहगुणाननित्यत्वादीन् देहात्परो नित्यादिस्वरूपोऽप्यात्मानुभवति
ततश्च नित्यत्वादिभिरपि वैलक्षण्यादन्यत्वमिति भावः ९ नन्वग्नेर्दारुसंयोगात्तद्धर्मभाक्त्वं घटते आत्मनस्त्वसंगत्वा
त्कथं देहेन तद्धर्मैर्वा संबंधः संबंधे वा कुतः तन्निरासः तत्राह योऽसाविति पुरुषस्येश्वरस्याधीनैर्मायागुणैर्योऽसौ सूक्ष्मः
अयं च स्थूलो देहो विरचितः पुंसो जीवस्यायं संसारः तन्निबंधनः तदध्यासकृतः हि यस्मादेवं तस्मादात्मविद्या तन्नि

निरोधोत्पत्त्यणुबृहन्नानात्वं तत्कृतान्गुणान् अन्तःप्रविष्ट आधत्त एवं देहगुणान्परः ९ योऽसौ गुणै
र्विरचितो देहोऽयं पुरुषस्य हि संसारस्तन्निबंधोऽयं पुंसो विद्याच्छिदात्मनः १० तस्माज्जिज्ञासयाऽऽ
त्मानमात्मस्थं केवलं परं संगम्य निरसेदेतद्वस्तुबुद्धिं यथाक्रमं ११ आचार्योऽरणिराद्यः स्याद
न्तेवास्युत्तरारणिः तत्संधानं प्रवचनं विद्यासंधिः सुखावहः १२ ॥ ॥ ॥

वर्तिकेत्याह आत्मनो विद्या विज्ञानं तु स्वच्छित् केन्न आच्छिदिति वा पदच्छेदः १० यस्मादेवं तस्मात् जिज्ञासया वि
चारेणात्मस्थं आत्मनि कार्यकारणसंघात एव स्थितं सम्यक् ज्ञात्वा एतत् एतस्मिन् देहादौ वस्तुबुद्धिं स्थूलसूक्ष्म
क्रमेण निरसेत् त्यजेत् ११ गुरोर्लब्धा विद्या विद्या तत्कार्यं निरसनक्रमेण नतिस्फुटीकर्तुं विद्योत्पत्तिमग्न्युत्पत्तिरूप
केण निरूपयति आचार्य इति आद्यः उत्तरः अधरः तत्संधानं तयोर्मध्यमं मन्थनकाष्ठं प्रवचनं उपदेशः विद्यानुसंधिः
संधो भवन्नग्निरिव तथा च श्रुतिः आचार्यः पूर्वरूपं अन्तेवास्युत्तररूपं विद्या संधिः प्रवचनं संधानमिति १२ ॥ ॥

अग्निसादृश्यमेवाह वैशारदीति विशारदोतिनिपुणः तेन शिष्येण प्राप्तानेन गुरुणोपदिष्टा वा अतिविशुद्धा
बुद्धिः गुणकार्यरूपां मायां निवर्तयति तदात्मकमेतद्धि संजीवस्य संसृतिनिमित्तं तान् गुणांश्च दग्ध्वा असमिदग्निवन्नि
रिन्धनः तस्मात्कार्यकारणोन विद्यया च व्यवधानाभावात्साक्षात्परमानन्दरूपो भवतीति १३ एवं तावत्स्वप्रकाश
ज्ञानस्वरूपो नित्य एक एवात्मा कर्तृत्वादयस्तु धर्मास्तस्य देहोपाधिकाः तद्युतिविज्ञं च सर्वं मतिस्ममायामयं च अतः
सर्वतो विरक्तः सन्नात्मज्ञानेन मुच्यत इत्युक्तं विलक्षणः स्थूलसूक्ष्मादित्यादिना तदेवं श्रुतिसमन्वयेन निर्णीते

वैशारदी सातिविशुद्धबुद्धिर्धुनोति मायां गुणसंप्रसूतां गुणांश्च संदह्य यदात्ममेतत्स्वयं च
शाम्यत्यसमिद्यथाग्निः १३ अथैषां कर्मकर्तॄणां भोक्तॄणां सुखदुःखयोः नानात्वमथ
नित्यत्वं लोककालागमात्मनां १४ ॥

एवं मतान्तरविरोधेन संदेहो माभूदिति तन्मतं निराकर्तुमुद्भावयति अथैषामिति अथ मन्यसे एषां जीवात्मनां
कर्मकर्तॄणां सुखदुःखयोर्भोक्तॄणां च नानात्वमिति एवं हि जैमिनीया मन्यन्ते अहंप्रत्ययाज्ञेय एवात्मा स च प्र
तिशरीरं भिन्नः कर्तृभोक्तृरूपश्च न तु तत्त्वरूपभूतो निर्विकार एव परमात्मास्तीति यथाहुः अहंप्रत्ययविज्ञेयो
ज्ञातव्यः सर्वदैव हीति तथा वैराग्यं च न संभवति तथाहि भोगस्थानानामनित्यत्वाद्धि वैराग्यं भवेत् भोगका
लस्य वा तदुपायकर्मबोधकागमस्य वा भोक्तुरात्मनो वा नत्वेतदस्तीत्याह अथ नित्यत्वं लोककालागमात्मनां

सर्वभावानांसत्कृचंदनादीनांसंस्थास्थितिः औत्प
त्तिकीस्वाभाविकीयथाः चंदनादीनांहि नित्यत्वेन भोग्यानांविकारात्मायामयत्वाद्वैराग्यंस्यादित्याह सर्वभावानांसत्कृचंदनादीनांसंस्थास्थितिः औत्प
त्तिकीयवाहरूपेणनित्या तथाचवदंतिनकदाचिदनीदृशंजगदिति अतस्तत्कर्ताकश्चिदीश्वरोपिनास्तीतिभा
वः किंचयथायथावत् ननुमायामयीत्यर्थः नचात्मस्वरूपभूतंनित्यमेकंज्ञानमस्तीत्याह तत्तदिति घटप
टाद्याकारभेदेनधीर्जायते अतोनित्याभिद्यतेच अयंगूढोभिप्रायः नहिनित्यज्ञानरूपआत्माअपितुज्ञानपरि
णामेवान्नचविकारित्वेनानित्यत्वप्रसंगः यथाहुः विक्रियाज्ञानरूपास्यननित्यत्वविरोध्यतइति अतोदुःखो

एवमप्रमेयेसर्वभावानांसंस्थाह्यौत्पत्तिकीयथा तत्तदाकृतिभेदेनजायतेभिद्यतेचधीः १५ अत्रापिकर्मणांलोक
सर्वेषांदेहिनांदेहयोगतः कालावयवतःसंतिभावाज्जन्मादयोसकृत् १६ नदेहिनांसुखंकिंचि
त्वरस्वातंत्र्यंचलक्ष्यते भोक्ताग्रहःदुःखसुखयोःकोवशेविवशोभजेत् १७
द्विद्यतेविदुषामपि तथादुःखंविमूढानांवृथाहंकरणंपरम् १८ ॥ इंद्रियादिरहितस्यपरिणामासंभवा

त्तत्कृतंदुःखमपिनास्तीत्याह नदेहिनामिति द्वाभ्यां भोक्तृत्वंतुभोग्यसंबंधादेवतदभावेतुनास्तीत्याह कर्मणां
जडत्वेनतस्मात्प्रेरकपुरुषापेक्षत्वात्प्रवृत्तिरेवश्रेयसीननिवृत्तिरिति १९ तत्रतावत्तदुक्तमसमीकृत्यवैराग्योपपादनायप्र
वृत्तिमार्गस्यानर्थहेतुत्वंप्रपंचयति एवमपीत्यादिनालोकानांलोकपालानामित्यतःप्राक्तनेनग्रंथेन अग्रहेतुदुः
ख २० अत्रापीतिस्वानत्रापदेदुःखंमूलोडुःखभोगस्यवासंभवादित्यर्थः १७ ननु
वकालावयवतःसंवत्सरादिरूपात् १६ अत्रापीतिस्वानत्रापदेहुःखमिलोदुःखभोगस्यवासंभवादित्यर्थः १७ नतु
येसमस्तकर्मकर्तुंजानंतितेसुखिनएवयेतुनजानंतितेनएवदुःखिनइतिचेत्तत्राह नेतिविदुषामपिक्वचित्सुखंन
विद्यतेतथामूढानामपिदुःखंनविद्यतेअतोवयकर्मकृत्पालत्वात्सुखिनइति

श्री॰ भा॰ ए॰ टी॰ ५८

अंगीकृत्याप्याह यदीति तेयोगं उपायं न विदुर्यथा साक्षान्मृत्युर्न प्रभवेत् १९ तथापि यावज्जीवं सुखं भविष्यतीति
चेत्तत्राह कोन्विति यतः अंतिके वर्तमानो मृत्युर्न तुष्टिदः दृष्टांतः आघातं वधस्थानं प्रति २० एवमस्मिन्लोके सुखं
नास्तीत्युक्त्वा लोकांतरेपि तथैवेत्याह श्रुतमिति श्रुतं स्वर्गादि तदपि दुष्टं स्पर्द्धा परस्परं स्वोत्कर्षेच्छा असूया परगुणेषु दो
षाविष्करणं अत्ययो नाशः व्ययोपक्षयः तैर्दुष्टं यद्वा व्ययो नाशः अत्ययोऽस्यातिशयः तैर्दृष्टांतः दृष्टं साक्षाद्दुःखमित्यर्थः

यदि प्राप्तिं विघातं च जानंति सुखदुःखयोः ते प्यद्धा न विदुर्योगं मृत्युर्न प्रभवेद्यथा १९ कोन्वर्थः सुखय
त्येनं कामो वा मृत्युरंतिके आघातं नीयमानस्य वध्यस्येव न तुष्टिदः २० श्रुतं च दृष्टवद्दुष्टं स्प
र्धासूयात्ययव्ययैः बह्वंतरायकामत्वात्कृषिवच्चापि निष्फलं २१ अंतरायैरविहितो यदि धर्मः स्व
नुष्ठितः तेनापि निर्जितं स्थानं यथा गच्छति तच्छृणु २२ इष्ट्वेह देवता यज्ञैः स्वर्लोकं याति याज्ञि
कः भुंजीत देववत्तत्र भोगान्दिव्यान्निजार्जितान् २३ स्वपुण्योपचिते शुभ्रे विमान उपगीयते
गंधर्वैर्विहरन्मध्ये देवीनां हृद्यवेषधृक् २४ स्त्रीभिः कामगयानेन किंकिणीजालमालिना ॥

किंच बह्वंतरायावैगुण्यादिरूपा विघ्ना यस्मिन्कामे स एव तत्स्वभावः तत्त्वं तस्मात् कृषिर्यथा बहुविघ्ना तद्वत् ब॰
हुदुःखत्वेन श्रुतमपि निष्फलं २१ विघ्नवैगुण्याद्यभावमंगीकृत्यापि नाशदुःखं परिहरन्नाह अंतरायैरि
ति पंचभिः निर्जितं साधितं २२ यज्ञैर्देवता इंद्रादिरूपा इष्ट्वा २३ स्वपुण्यैरुपचिते सर्वभोगसंपन्ने देवीनां मध्ये
विहरन् गंधर्वैरुपगीयते २४ कामेनेच्छया गच्छता विमानेन किंकिणीजालमालिना क्षुद्रघंटिकासमूहशा
लिना सह स्त्रीभिः सुराक्रीडेषु नंदनादिषु क्रीडन् आत्मपातं न वेद २५ ॥

टी॰ ५८

कालेनचालितःपातितः २६ प्रवृत्तिर्द्विविधाविध्यनुसारेणकाम्यकर्मणिवातल्लंघनेनाधर्मेवा तत्रकाम्यप्रवृत्तेर्ग
तिरुक्ता अधर्मप्रवृत्तेर्गतिमाह यदीति यदिवेत्यन्वयः अजितेंद्रियत्वात्कामात्मा अतःकृपणः अतोलुब्धोभो
गतृष्णाकुलः अतःस्त्रैणःस्त्रीलंपटः ततश्चविहिंसकः २७ किंचदुष्टजनप्रलोभितोयथनार्थंपशून विधिना
भूत

तावत्समोदतेस्वर्गेयावत्पुण्यंसमाप्यते क्षीणपुण्यःपतत्यर्वागनिच्छन्कालचालितः २६ यद्य
धर्मरतःसंगादसतांवाजितेंद्रियः कामात्माकृपणोलुब्धःस्त्रैणोभूतविहिंसकः २७ पशू
नविधिनालभ्यप्रेतभूतगणान्यजन् नरकानवशोजंतुर्गत्वायात्युल्बणंतमः २८ कर्माणिदुः
खोदर्काणिकुर्वन्देहेनतैःपुनः देहमाभजतेतत्रकिंसुखंमर्त्यधर्मिणः २९ लोकानांलोक
पालानांमद्भयंकल्पजीविनां ब्रह्मणोपिभयंमत्तोद्विपरार्द्धपरायुषः ३० ॥ ॥ ॥

हत्वातमःस्थावरतांयाति २८ एवंकर्मप्रवृत्तस्यनसुखंनचनिष्कृतिरित्युपसंहरति कर्माणीति २९ ॥
तथापिलोकानांनित्यत्वात्मत्सधर्मत्वाच्चलोकपालानांसुखमस्तीतिचेत्तत्राह लोकानामिति द्विपरार्द्धं
परमायुर्यस्यतस्यब्रह्मणोपि तथाचश्रुतिः भीषास्माद्वातःपवते भीषोदेतिसूर्यः भीषास्मादग्निश्चेंद्रश्च
मृत्युर्धावतिपंचमइति अतःप्रवृत्तिमार्गस्यैवमनर्थहेतुत्वाद्धित्वातंनिवृत्तिरेवमुमुक्षोरितिनात्वयार्थः ३०

श्री॰ भा॰ पं॰ टी॰ ४९

एतेनैवस्वयमीश्वरत्वात्ःविकारेणस्वराभावांगीकारःपरित्यक्तःअन्यदपिप्रोद्यापूर्वमंगीकृतंनिराकरोतिचतु
र्भिः तत्रयदुक्तंकर्तृभोक्तृरूपएवात्मेतितन्निराकरोतिगुणाइतिगुणाइंद्रियाणिकर्माणिसृजंतिनत्वात्मा आत्मैवें
द्रियाणिप्रवर्तयन्कर्माणिकरोतीतिइतिचेन्नेत्याहगुणाइतिगुणाःसत्वादिःगुणानींद्रियाणिअनुसृजंतेप्रवर्तयंति
नत्वात्माअतःकर्तृत्वंतावन्नास्तिभोक्तृत्वमप्यौपाधिकमित्याहजीवस्त्वितिगुणसंयुक्तःइंद्रियादिसंयुक्तःऊ

गुणाःसृजंतिकर्माणिगुणोनुसृजतेगुणान् जीवस्तुगुणसंयुक्तोभुंक्तेकर्मफलान्यसौ
३१ यावत्स्याद्गुणवैषम्यंतावन्नानात्वमात्मनः नानात्वमात्मनोयावत्पारतंत्र्यंतदैवहि ३२ ॥
यावदस्यास्वतंत्रत्वंतावदीश्वरतोभयं यएतत्समुपासीरंस्तेमुह्यंतिशुचार्पिताः ३३ ॥

इत्यतआह असौतेषुअहंकारवानित्यर्थः ३१ यच्चोक्तमात्मनोनानात्वंतदप्यौपाधिकमित्याह याव
त्स्यादितिगुणानांवैषम्यंअहंकार्यरूपंनत्वात्मनःएकत्वंकथंपारतंत्र्यमुक्तंकथंवालोकपालादी
नामपिभयदर्शनमित्युक्तंतत्राह नानात्वमिति ३२ यच्चगूढमभिप्रेतं[illegible]रत्तिरेवश्रेयसीतितत्राह यए
तत्इतिएतत्गुणवैषम्यंतत्कृतंकर्मभोगंचेत्यर्थः उपासीरन्सेवेरन्स्वर्लोकादीनामनित्यत्वा
त्शुचार्पिताःप्रेताःसंतोमुह्यंति ३३ ॥

गो॰ राम॰ ४९

नकेवलमनित्यत्वमात्रं किंतु मायामयत्वमपीत्याह कालइति स्वभावो देवत्वादिपरिणामे हेतुः धर्मस्तद्योग्य
कारणगुणव्यतिकरे मायाक्षोभे सति मामेव प्राहुः न तु मद्व्यतिरिक्ताः संतीति ततो निवृत्तिरेव मुक्तिहेतुत्वात् श्रेय
सीति सिद्धं ३४ एवं तावदेक एवात्मा तस्य च गुणकार्यदेहसंबंधकृतः संसारः आत्मज्ञानाच्च मुक्तिरिति मुक्तं
विलक्षणः स्थूलसूक्ष्मादित्यादिना तदेव च मतांतरनिरासेन दृढीकृतं अथैवमित्यादिना तत्र पृच्छति गुणेष्वि
ति अयमर्थः गुणेष्वसत्सु मुक्तिः सत्स्वेव वा आद्ये ज्ञानसाधनाभावान्न मुक्तिः द्वितीये च गुणेषु वर्तमानो

कालस्त्वात्मागमो लोकः स्वभावो धर्म एव च इति मां बहुधा प्राहुर्गुणव्यतिकरे सति ३४ ॥
उद्धव उवाच गुणेषु वर्तमानोपि देहजेष्वनपावृतः गुणैर्न बध्यते देही बध्यते वा कथं विभो ३५
कथं वर्तेत विहरेत्कैर्वा ज्ञायेत लक्षणैः किं भुंजीतोत विसृजेच्छयीतासीत याति वा ३६ एत
दच्युत मे ब्रूहि प्रश्नं प्रश्नविदां वर नित्यमुक्तो नित्यबद्ध एक एवेति मे भ्रमः ३७ इति श्री एका

पि तत्कार्यदेहजेषु कर्मसु सुखादिषु च कथं न बध्यते तथापि तैराकाशवदनावृतत्वान्न बध्यत इति चेन्न
हि बंधो न संभवतीत्याह अनपावृतः कथं बध्यत इति यदि तु संत्येव तदा देहकारणबंधनेन तन्निवृत्त्या वा मुच्य
ते इति मतं तत्र हि तत्कथं ज्ञातव्यं इति पृच्छति बद्धो मुक्तो वा कथं वर्तेतेत्यादि किं भुंजीत कथं भुंजीतेत्यर्थः ३६
एतच्च द्वितीयप्रश्ने किं च एक एवात्मा अनादिगुणसंबंधान्नित्यबद्धः मुक्तेर्जन्यत्वे नित्यत्वप्रसंगान्नित्यमुक्तः
इत्यपि स्वीकार्यं स्यात् तत्र मे भ्रमो भवतीत्याह नित्यबद्ध इति ३७ इति श्रीभावार्थ० कादशा दशमाध्यायः ॥१०॥

एकादशे तु बद्धानां मुक्तानां वा पृथग्लक्षणं साधूनां च तथा भक्तेर्लक्षणं हरिरेणैविरं नित्यबद्धो नित्यमुक्त एक
एवेति मे भ्रम इति यदुक्तं तत्किंवस्तुतेऽर्थविरोधात् प्रतीतितो वा नाद्यः बंधमोक्षयोर्वास्तवत्वाभावादित्याह
बद्धो मुक्त इति द्वाभ्यां आत्मा बद्धो मुक्तो च मे गुणतः मदधीनसत्त्वादिगुणोपाधितः न तु वस्तुतः नन्वौ
पाधिकत्वेऽपि तंडुलपाकादिवद्वास्तवत्वं किं न स्यात् तत्राह गुणस्य मायामूलत्वाद्बंधनं नास्ति अन १

श्रीभगवानुवाच बद्धो मुक्त इति व्याख्या गुणतो मे न वस्तुतः गुणस्य मायामूलत्वान्न मे मो
क्षो न बंधनं १ शोकमोहौ सुखं दुःखं देहापत्तिश्च मायया स्वप्नो यथात्मनः ख्यातिः
संसृतिर्न तु वास्तवी २ ॥

एव मोक्षश्च नास्तीति ननु कथं सर्वशास्त्रविरुद्धमुच्यते तत्राह इति मे व्याख्येति एवं मत्तो निर्णयः अलम
तिकुतर्कैरित्यर्थः अथवैवमन्वयः आत्मा बद्धो मुक्त इति या व्याख्या उक्तिः सा मे गुणतः मद्गुणपारतंत्र्या
त् अत्र हेतुत्वेन गुणनियंतरि स्वस्मिन्स्तत्त्वतिरेकमाह अत एव न मे बंधनं मोक्षो वेति अन्यत्समानं १ ए
वं कारणभूतगुणानां मायामयत्वात्तत्कार्यं संसृतिर्मायेति प्रपंचयति शोकमोहाविति यथा स्वप्नः आत्मनः

अतेभवतु विरोधस्तावन्नास्ति प्रतीतिस्त्वौपाधिकीत्यतदित्याह विद्याविद्ये इति । नन्वेते मोक्षबंधावात्मन इति
तनू शक्ती ऊतः मे माया विनिर्मिते मायावृत्तिरूपत्वात् बंधमोक्षकरीत्येकवचनं द्विवचनार्थे ननु तत्का-
र्यत्वे बंधमोक्षयोरनादित्वनित्यत्वेन स्यातां नत्याद्ये अनादी अतो यावदविद्या प्रवर्तयामि तावद्बंधः यदा वि-
द्यां तदा मितदा मोक्षः स्फुरतीत्यर्थः तथा च स्कंधपुराणे बंधको भवपाशेन भवपाशाच्च मोचकः कैवल्यदः परं ब्र-
ह्म विष्णुरेव सनातन इति तत्र शरीरिणामिति बहुवचननिर्देशाद्धि पृथग्भेदेनाविरोध उक्त इति ३ अतिं निवर्तयन्

विद्याविद्ये मम तनू विद्ध्युद्धव शरीरिणां मोक्षबंधकरी आद्ये मायया मे विनिर्मिते ३ एकस्यै-
व ममांशस्य जीवस्यैव महामते बंधोस्याविद्ययानादिर्विद्यया च तथेतरः ४ ॥ ॥

बंधमोक्षव्यवस्थामुपपादयति एकस्यैवेति तर्हि किमात्माभेदान्ममापि बंधः नहीत्याह अस्य जीवस्यैवेति
नत्वात्माभेदे जीवानामेकोप्यात्मा पृथक् कथं च बंधमोक्षस्त्वद्भुःखादिव्यवस्था तत्राह ममांशस्य अंशभा-
वः यथैकस्यापि चंद्रादेर्जलाद्युपाधिना बिंबप्रतिबिंबरूपो भेदः यथा च तत्र जलकृताः कंपादयः प्रतिबिंबस्यै-
व यथा च तत्र प्रतिबिंबितस्य मदंशस्य जीवस्यैव तत्कृतो बंधः तस्य चोपाधिना भेदान्नाव्यवस्थेति तथा चाहुः ।
यथैकस्मिन् घटाकाशे रजोधूमादिभिर्युते न सर्वे संप्रयुज्यंते तथा जीवाः सुखादिभिर्विति एतच्चातिरहस्यत्वाद्बु-
द्ध्या निश्चेतव्यमिति संबोधयति हे महामते इतरो मोक्षः ४ ॥ जीवानामप्युपाधिभेदेन भेदादेकस्मिन्नुदके भेदे
नैतत्कृत प्रतिबिंबस्यैव विविक्तनानात्मगतस्यैव तथा विद्यायाः प्रतिपत्ति ४ ॥

श्री
भा० ए०
टी०
५१

एतैः त्रिभिः श्लोकैः कथं वर्त्ततेत्यस्य प्रश्नस्यस्तु बद्धः एवम्भूतो निरभिमानश्च देहे वर्त्तते स तु न रमुक्तो भवतीति वैलक्षण्यमे
तदेवदव किंभुंजीतेत्यादिप्रश्नोत्तरमाह एवमिति त्रिभिः अन्यगतमेव कर्म माबभातीत्येवं विरक्तो विद्वान् ११
तथाः विद्वान् निवशयनासनादिषु न बध्यते कुतः तत्रतत्र विषयेषु गुणानींद्रियाणि आदयन् भोजयन्नतत्सा
क्षित्वेन वर्त्तमानः न तु स्वयमदन् एतदेव कुतः तत्राह प्रकृतिस्थोपीति सार्द्धेन यथा खं सर्वत्र स्थितमपि न सज्ज

एवं विरक्तः शयनआसनाटनमज्जने दर्शनस्पर्शनघ्राणभोजनश्रवणादिषु ११ न तथा बध्य
ते विद्वांस्तत्रतत्राःदयन् गुणान् प्रकृतिस्थोप्यसंसक्तो यथा खं सवितानिलः १२ वैशारद्येक्षया
संगाशितया छिन्नसंशयः प्रतिबुद्ध इव स्वप्नान्नानात्वाद्धि निवर्त्तते १३ यस्य स्युर्वीतसंकल्पाः प्रा
णेंद्रियमनोधियां वृत्तयः स विनिर्मुक्तो देहस्थोपि हि तद्गुणैः १४ ॥ ॥ ॥

ते यथा सविता जले प्रतिबिंबितोऽपि यथाऽनिलः सर्वत्र संचरन्नपि तद्वत् १२ असंगेन वैराग्येण शितया तीक्ष्णया
छिन्नाः संशयाः असंभावनादयो यस्य सः नानात्वात् देहादिप्रपंचात् १३ कथं विहरेदित्यस्योत्तरत्वेन वैलक्ष
ण्योत्तरमाह यस्य स्युरिति तद्गुणैर्देहगुणैः संकल्पशून्याभिः प्राणादिवृत्तिभिर्विहरन्मुक्त इत्यर्थः १४ ॥ ॐ

श्री
राम
५१

तदेवं बद्धस्यानुपपाद्य कथं वैतनेत्यादिवैलक्षण्यप्रश्नस्योत्तरमाह अथेति तच्चैव लक्षणं द्विविधं जीवेश्व
रयोरेकं जीवानां चैकं तत्र जीवेश्वरयोर्वैलक्षण्यमाह विरुद्धधर्मिणोरिति सार्द्धद्वयेन श्लोकानंदद्ध
मवतोः एकस्मिन्धर्मिणि शरीरे नियम्यनियंतृत्वेन स्थितयोः तदेव कथयति सुपर्णेत्यादि
णाविवद्धहात्स्वस्यभूतौ सदृशौ चिद्रूपत्वात् सखायौत्र वियोगादेकमत्याच्च यदृच्छया निरुक्तया मायया॰
वृक्षात् इति वृक्षो देहः ऊर्ध्वमूलमवाक्शाखं वृक्षं यो वेद संप्रतीति श्रुतेः ऊर्ध्वमूलमधःशाखमश्वत्थं प्राहुर

अथ बद्धमुक्तस्य वैलक्षण्यं वदामीति विरुद्धधर्मिणोस्तातस्थितयोरेकधर्मिणि ५ सुपर्णा
वेतौ सदृशौ सखायौ यदृच्छयैतौ कृतनीडौ च वृक्षे एकस्तयोः खादति पिप्पलान्नमन्यो निर
न्नोपि बलेन भूयान् ६ आत्मानमन्यं च स वेद विद्वानपिप्पलादो न तु पिप्पलादः योऽवि
द्यया युक्तः स तु नित्यबद्धो विद्यामयो यः स तु नित्यमुक्तः ७ ॥ राम ॥ राम ॥ ॥ १

त्थयमिति तस्य ते श्वतस्मिन्कृतं नीडं निकेतनं हृदयरूपं यथा भवतो तयोर्मध्ये एको जीवः पिप्पलान्नं पिप्पलो॰
ऽश्वत्थः देहः तस्मिन्नदनीयं कर्मफलमित्यर्थः खादति भक्षयति अन्य ईश्वरः निरन्नः अभोक्तापि निजानंदतृप्तो
बलेन ज्ञानादिशक्त्या भूयान् अधिकः श्रुतिश्च द्वौ तौ सुपर्णौ सयुजौ सखायौ समानं वृक्षं परिषस्वजाते तयो
रन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्यो अभिचाकशीतीति बलाधिक्यमेवाह आत्मानमिति अतः योऽविद्यया युक्
युक्तः स तु नित्यबद्धः अनादिविद्यायस्तु विद्याप्रधानः स तु नित्यमुक्तः मायाया अनावरकत्वात् आश्रयत्वान्मोह

श्री
भा॰
टी॰
५२

इदानींबद्धमुक्तजीवानामेववैलक्षण्यमाह देहस्थोपीतिदशभिः विद्वान्मुक्तः संस्कारवशेनदेहस्थोपि
देहस्थोनभवति यथास्वप्नाद्गुत्थितः स्मर्यमाणेस्वप्नदेहेस्थितोपितत्रस्थोनभवतितद्वत्तस्वद्वंद्वःलोद्यभावात
तद्वततथाबद्धस्ततः अदेहस्थोपिज्ञानितः अविद्वान्देहस्थःतन्निमित्तसुखद्वंद्वभाक् यथास्वप्नदेहागतदृष्टि
अत्रहेतुत्वेनवैलक्षण्यंतस्माहद्वाभ्यां इंद्रियैरिंद्रियार्थेषुगृह्यमाणेष्वपियस्तुविद्वान्सःनाहंकर्यात अ

देहस्थोपिनदेहस्थोविद्वान्स्वप्नाद्यथोत्थितः अदेहस्थोपिदेहस्थःकुमतिःस्वप्नदृग्य
था ९ इंद्रियैरिंद्रियार्थेषुगुणैरपिगुणेषुच गृह्यमाणेष्वहंकुर्यान्नविद्वान्यस्त्वविक्रियः
१ दैवाधीनेशरीरेस्मिन्गुणभाव्येनकर्मणा वर्तमानोबुधस्तत्रकर्तास्मीतिनिबध्यते १०

हंगृह्णामीतिमतिंनकुर्यादित्यर्थः कुतः गुणैर्गुणेषुगृह्यमाणेष्वतएवअविक्रियः रागादिशून्यःत
दुक्तंगीतासु तत्त्ववित्तुमहाबाहोगुणकर्मविभागयोः गुणागुणेषुवर्तंतइतिमत्वानसज्जतइति ५४
अबुधस्तुपूर्वकर्माधीनेस्मिन्शरीरेवर्तमानःगुणैरिंद्रियैर्भाव्येनकर्मणातत्रदेहादौनिबध्यते।
कुतःकर्तास्मीत्याह अहंकारेणतदुक्तंतत्रैवप्रकृतेःक्रियमाणानिगुणैःकर्माणिसर्वशः अहंकारविमू

रामः
५२

एवंतावद्धंसमुक्तयोः स्वसंवेद्यमेववैलक्षण्यमुक्तं इदानींकैर्ज्ञायेतलक्षणैरित्यस्योत्तरंतयापरैरपिसुज्ञेयं वैल
क्षण्यमाह यस्मात्त्वेतित्रिभिः हिंस्रैर्दुर्जनैर्व्याघ्रैर्वाप्राणिभिः यस्मात्त्वादेहः पीड्यतेयदृच्छयायेनकेनापिक्वचि
त् किंचित् अर्च्यतेवासः बुधश्चतेनज्ञानव्यतिक्रियतेनातिविक्रियतइत्यर्थः तदुक्तंयाज्ञवल्क्येन यः कंटकैर्वितु
दतिचंदनैर्यश्चलिंपति अक्रुद्धोपरितुष्टश्चसमस्तस्यचतस्यचेति १५ किंच साधुअसाधुवाकुर्वतोवदतोवा

यस्मात्त्वाहिंस्यतेहिंस्रैर्येनकिंचिद्यदृच्छया अर्च्यतेवाक्वचित्तत्रनव्यतिक्रियतेबुधः १५ नस्तुवीत
ननिंदेतकुर्वतःसाध्वसाधुवा वदतोगुणदोषाभ्यांवर्जितःसमदृङ्मुनिः १६ नकुर्यान्नवदेत्किंचि
न्नध्यायेत्साध्वसाधुवा आत्मारामोनयावृत्त्याविचरेज्जडवन्मुनिः १७ शब्दब्रह्मणिनिष्णातोननि
ष्णायात्परेयदि श्रमस्तस्यश्रमफलोह्यधेनुमिवरक्षतः १८ ॥ ॥ ॥

नुवतःनस्तुवीतनचनिंदेतयोलौकिकव्यवहारेविमुखः समुक्तइत्यर्थः १६ अपिवानकुर्यादितियोदैहिके
पिकर्मण्युदासीनः समुक्तइतरोबद्धइत्यर्थः १७ एतान्येवसर्वाणिमुमुक्षोः साधनानिज्ञानव्याप्तानि यस्तु
केवलेशब्दब्रह्मण्येवभिज्ञः पांडित्यमात्रस्थायीनतुरन्यैः साधनैः तदर्थंनिष्ठोभवेत्तंनिंदतिशब्दब्रह्मणि
निष्णातः पारंगतोपिपरेब्रह्मणिननिष्णायात् ध्यानाद्यभियोगंनकुर्यात्तस्यफलात्तुश्रमः श्रमैकफलः नतुपुरुषा

र्थतः

कैवल्यदीपिकायामेकादशे ॥ १८

श्री भा० ए० टी० ५३

पूतदेवान्यार्थनिरूपणैः प्रपंचयति गामिति दुह्यत इति दोहः पयः दुग्धो दोहो नोत्तरत्र दोह्यो नास्ति यस्याः तां अर्थशून्यां अस
तीं भार्यां कामशून्यां देहं पराधीनं प्रतिक्षणं दुःखहेतुं असत्प्रजां दृष्टादृष्टसाधनशून्यं पुत्रं अतीर्थीकृतं आगते पात्रे
दत्तं वित्तं दुष्कीर्तिदुरितानां पादकं अंग हे उद्धव दुःखानंतरं दुःखमेव यस्य सः रक्षति १९ मया हीनां वाचमित्युक्तं वि
वृणोति यदुक्तमेव जगतः पोषकं चरित्रं न स्यात् किं तत् अस्य विश्वस्य स्थित्यादिरूपं तद्धेतुरित्यर्थः लीलावतारेषु ई

गां दुग्धदोहामसतीं च भार्यां देहं पराधीनमसत्प्रजां च वित्तं त्वतीर्थीकृतमंग वाचं हीनां मया रक्षति ॥
दुःखदुःखी १९ यस्यां न मे पावनमंग कर्म स्थित्युद्भवप्राणनिरोधमस्य लीलावतारेप्सितजन्म वा
स्याद्वंध्यां गिरं तां बिभृयान्न धीरः २० एवं जिज्ञासयापोह्य नानात्वभ्रममात्मनि उपारमेत विरजं म
नो मय्यर्प्य सर्वगे २१ यद्यनीशो धारयितुं मनो ब्रह्मणि निश्चलं मयि सर्वाणि कर्माणि निरपेक्षः स
माचर २२ श्रद्धालुर्मे कथाः शृण्वन्सुभद्रा लोकपावनीः गायन्ननुस्मरन्कर्म जन्म चाभिनयन्मु

प्सितं जगतः प्रेमास्पदं श्रीरामकृष्णादिजन्म वा न स्यात् तां निष्फलां गिरं धीरो धीमान्न धारयेत् २० उक्तं ज्ञानमार्ग
मुपसंहरति एवं निश्चित्य विचारेणात्मनि नानात्वभ्रमं देहाद्यध्यासं निरस्य निर्मलं मनो मयि सर्वगे परिपूर्णे
समर्प्य संधार्य उपारमेत् न किंचित्कुर्यात् न शास्त्रपांडित्यमात्रेणेत्यर्थः २१ यद्यनीशः अशक्तः तर्हि आत्मानमिदमक
र्तैव कर्तास्थाभविष्यामीत्याह मयीति २२ मदर्पणेन कर्मभिर्विशुद्धसत्त्वस्य तव गां भक्तिमाह श्रद्धालुरिति अभिन

ऐ० राम ५३

आचरन्सेवमानः २४ ततस्त्वानेनप्रकारेणमयिसत्संगेनलब्धयाभक्त्यासभक्तः मांउपासिताध्याताभवति स
वृध्यानशीलःसद्भिर्दर्शितेवैनिश्चितेसत्वेनैवमेपदंस्वरूपंप्राप्नोति २५ सत्संगलब्धयाभक्त्येत्युक्तं तत्रसतां
भक्तेश्चविशेषंपृच्छति साधुरितिसाधवःस्वस्वमतिपरिकल्पिताःसंतिबहवःतवतत्कीदृशाःसंमताःभक्ति
रपिबहुविधालोकेकीदृशीपुनस्त्वय्युपयुज्येत सद्भिश्चनारदादिभिरादृताएतच्चकथ्यतां २६ इदंचातिगुह्यंत्व

मदर्थेधर्मकामार्थानाचरन्मदपाश्रयः लभतेनिश्चलांभक्तिंमय्युद्धवसनातने २४ सत्संगलब्ध
याभक्त्यामयिमांसउपासिता सवैमेदर्शितंसद्भिरंजसाविंदतेपदं २५ उद्धवः साधुस्तवउत्तमश्लोक
मतःकीदृग्विधःप्रभो भक्तिस्त्वय्युपयुज्येतकीदृशीसद्भिरादृता २६ एतन्मेपुरुषाध्यक्षलोका
ध्यक्षजगत्प्रभो प्रणतायानुरक्तायप्रपन्नायचकथ्यतां २७ त्वंब्रह्मपरमंव्योमपुरुषःप्रकृ
तेःपरः अवतीर्णोसिभगवन्स्वेच्छोपात्तपृथग्वपुः श्रीभगवानुवाच कृपालुरकृतद्रोहःति
तिक्षुःसर्वदेहिनां सत्यसारोनवद्यात्मासमःसर्वोपकारकः २९ ॥ ॥ ॥

येववक्तव्यमितिसूचयन्माविष्करोति हेपुरुषाध्यक्षेत्यादिनाब्रह्मादिनियंतः २७ अत्रहेतुःत्वमितिव्योमवदसं
गयतःप्रकृतेःपरः स्वेच्छयाउपात्तंपृथकपरिमितंवपुर्येनसः २८ तत्रत्रिंशल्लक्षणैःसाधुंनिरूपयति
कृपालुरितित्रिभिःकृपालुःपरदुःखासहिष्णुःसर्वदेहिनांकेषांचिदपिअकृतद्रोहःतितिक्षुःक्षमावा
न्सत्यसारःसत्यमेवसारंस्थिरंबलंवावीर्यंयस्यसः अनवद्यात्माअसूयादिरहितःसुखदुःखयोःसमःयथा

शान्तिःसर्वेषामुपकारकः २९ ॥

कामैरहतमिति चित्तः दांतः संयतबाह्येंद्रियः मृदुः अकठिनचित्तः शुचिः सदाचारः अकिंचनः अपरिग्रहः अनीहः दृष्ट-
क्रियाशून्यः मितभुक् लघ्वाहारः शांतः नियतांतःकरणः स्थिरः स्वधर्मे मच्छरणः मदेकाश्रयः मुनिः मननशीलः
२० अप्रमत्तः सावधानः गभीरात्मा निर्विकारः धृतिमान् विपद्यप्यकृपणः जितषड्गुणः क्षुत्पिपासे शोकमोहौ
जरामृत्यू षडूर्मयः एते जिता येन सः अमानी न मानाकांक्षी अन्येभ्यो मानदः कल्यः परबोधने दक्षः मैत्रः अवंचकः
कारुणिकः करुणयैव प्रवर्तमानः न तु दृष्टलोभेन कविः सम्यक्ज्ञानी ३१ तदेवाज्ञायेत्यादिना कथयति मया वेद
कामैरहतधीर्दांतो मृदुः शुचिरकिंचनः अनीहो मितभुक् शांतः स्थिरो मच्छरणो मुनिः ३०
अप्रमत्तो गभीरात्मा धृतिमान् जितषड्गुणः अमानी मानदः कल्यो मैत्रः कारुणिकः कविः ३१
आज्ञायैवं गुणान्दोषान्मयादिष्टानपि स्वकान् धर्मान्संत्यज्य यः सर्वान्मां भजेत स सत्तमः ३२
ज्ञात्वाऽज्ञात्वाथ ये वै मां यावान्यश्चास्मि यादृशः भजंत्यनन्यभावेन ते मे भक्ततमा मताः ३३ ॥
रूपेणादिष्टानपि स्वधर्मान् संत्यज्य यो मां भजेत सोपि एवंभूतवत् सत्तमः किमज्ञानान्नास्तिक्याद्वा अधर्माच
रणे वा धर्मत्यागः न धर्माचरणे सत्त्वशुद्ध्यादीन् गुणान् विपक्षे दोषांश्च आज्ञाय ज्ञात्वापि मद्ध्यानविक्षेप
तया मद्भक्त्यैव सर्वं भविष्यतीति दृढनिश्चयेनैव धर्मान् संत्यज्य यद्वा भक्तिदार्ढ्येन निवृत्ताधिकारतया संत्यज्य
अथवा विद्धैकादशी सैकादश्युपवासान्निवेद्य श्राद्धादेर्योयं भक्तिविरुद्धा धर्मास्तान्संत्यज्य ३२ किंच
मावान् देशकालापरिच्छिन्नः यश्च सर्वात्मा यादृशः सच्चिदानंदादिरूपः तं मां ज्ञात्वाऽज्ञात्वापि यद्वा विशेषतः अन

साधुलक्षणमुक्त्वा भक्तेर्लक्षणमाह मल्लिंगेत्यष्टभिः लिंगानि प्रतिमादीनि २४ सर्वलाभोपहरणं सर्वस्य लब्धस्य समर्पणं २५ पर्वाणि जन्माष्टम्यादीनि तदनुमोदनं तत्र संतोषः २६ बलिविधानं पुष्पोपहारादिसमर्पणं सर्ववार्षिकपर्वसु चातुर्मास्यैकादश्यादिषु विशेषतः २७ उद्यानादिकरणे सामर्थ्ये सति

मल्लिंगमद्भक्तजनदर्शनस्पर्शनार्चनं परिचर्यास्तुतिः प्रह्वगुणकर्मानुकीर्तनं २४ ॥
मत्कथाश्रवणे श्रद्धा मदनुध्यानमुद्धव सर्वलाभोपहरणं दास्येनात्मनिवेदनं २५ मज्जन्मकर्मकथनं मम पर्वानुमोदनं गीततांडववादित्रगोष्ठीभिर्मद्गृहोत्सवः २६ यात्राबलिविधानं च सर्ववार्षिकपर्वसु वैदिकी तांत्रिकी दीक्षा मदीयव्रतधारणं २७ ममार्चास्थापने श्रद्धा स्वतः संहत्य चोद्यमः उद्यानोपवनाक्रीडपुरमंदिरकर्मणि २८ संमार्जनोपलेपाभ्यां सेकमंडलवर्तनैः गृहशुश्रूषणं मह्यं दासवद्यदमायया २९ ॥ रामाय नमः ॥

स्वतः असमर्थश्चान्यैः संभूय मिलित्वा उद्यमः उद्यानं पुष्पप्रधानं उपवनं फलप्रधानं वनं आक्रीडं क्रीडास्थानं २८ संमार्जनं रजसोऽपाकरणं उपलेपः गोमयोदकादिभिरालेपनं सेकः तैरेव प्रोक्षणं मंडलवर्तनं सर्वतोभद्रादिकरणं मह्यं मम २९ ॥ श्रीः श्रीः श्रीरामरामो जयति ॥ राम ॥ ॐ ॥

श्री॰ भा॰ ए॰ टी॰ ५५

स्वयमन्येन वा निवेदितं न स्वीकुर्यात् एतच्च साधारणस्थावरविषयं रागगोचरप्राप्तविषयं च भक्तग्राह्यमे
व तदेवाह उक्तं च षड्भिर्मासोपवासैस्तु यत्फलं परिकीर्तितं विष्णोर्नैवेद्यसिक्थेन तत्फलं भुञ्जतां कलौ हृदि रू
पं मुखे नाम नैवेद्यमुदरे हरेः पादोदकं च निर्माल्यं मस्तके यस्य सोऽच्युतः इत्यादिवचनेभ्यः यद्वा अन्यस्मै निवेदितं मे
नोपयुञ्ज्यात् मह्यं न निवेदयेदित्यर्थः ४० विष्णोर्निवेदितान्नेन यष्टव्यं देवतान्तरं पितृभ्यश्चैव तद्देयं तदानन्त्याय

अमानित्वमदंभित्वं कृतस्यापरिकीर्तनं अपि दीपावलोकं मे नोपयुञ्ज्यान्निवेदितं ४० यद्य
दिष्टतमं लोके यच्चातिप्रियमात्मनः तत्तन्निवेदयेन्मह्यं तदानंत्याय कल्पते ४१ सूर्योऽग्नि
र्ब्राह्मणा गावो वैष्णवः खं मरुज्जलं भूरात्मा सर्वभूतानि भद्र पूजापदानि मे ४२ सूर्ये तु विद्यया
त्रय्या हविषाग्नौ यजेत मां आतिथ्येन तु विप्राग्र्ये गोष्वंग यवसादिना ४३ वैष्णवे बंधुसत्कृत्या
हृदि खे ध्याननिष्ठया वायौ मुख्यधिया तोये द्रव्यैस्तोयपुरस्कृतैः ४४ स्थंडिले मंत्रहृदयैर्भो
गैरात्मानमात्मनि क्षेत्रज्ञं सर्वभूतेषु समत्वेन यजेत मां ४५ ॥

कल्पते पितृशेषं तु यो दद्याद्धरये परमात्मने रेतोधाः पितरस्तस्य भवंति क्लेशभागिन इत्यादिवचनेभ्यः ४१ ४२
इदानीमेकादश पूजाधिष्ठानान्याह सूर्य इति हे भद्र ४२ अधिष्ठानभेदेन पूजासाधनान्याह सूर्ये इति त्रिभिः ॥
त्रय्या विद्यया सूक्तैरुपस्थानादिना हे अंग यवसादिना तृणादिना ४३ बंधुसत्कृत्या बंधुवत्संमानेन हृ
दि खे हृदयाकाशे मुख्यधिया प्राणदृष्ट्या तोये तोयादिभिर्द्रव्यैस्तर्पणादिना ४४ स्थंडिले भुवि पाषाणा॰

ॐ राम ५५

ता२

सर्वाधिष्ठाने ध्येयमाह धिष्ण्येष्वित्यनेन प्रकारेण एषु धिष्ण्येषु ४६ उक्ताया भक्तेः फलमाह इष्टापूर्ते
नेति सद्भक्तिं दृढां भक्तिं अस्या भक्तेरंतरंगसाधनमाह मत्स्मृतिः साधुसेवया भवति यद्वा स्मृतिर्ज्ञानं
ततश्च दृढभक्तिमतः पुंसः साधुसेवया मत्तत्त्वज्ञानं भवतीत्यर्थः ४७ ज्ञानभक्तिमार्गावुक्तौ तत्र ज्ञानमार्गाद्विभ
क्तिमार्गः श्रेष्ठ इत्याह प्रायेणेति सत्संगेन यो भक्तियोगः तेन विना उपायः संसारतरणे न विद्यते सत्सु गतेन त्वय

धिष्ण्येष्वित्येषु मद्रूपं शंखचक्रगदांबुजैः युक्तं चतुर्भुजं शांतं ध्यायन्नर्चेत्समाहितः ४६ इष्टापू
र्तेन मामेवं यो यजेत समाहितः लभते मयि सद्भक्तिं मत्स्मृतिः साधुसेवया ४७ प्रायेण भक्ति ॥
योगेन सत्संगेन विनोद्धव नोपायो विद्यते सध्र्यङ् प्रायणं हि सतामहं ४८ अथैतत्परमं गुह्यं शृ ॥
ण्वतो यदुनंदन सुगोप्यमपि वक्ष्यामि त्वं मे भृत्यः सुहृत्सखा ४९ इतिश्रीदकादशमकाद छ

हेतुमाह हि यस्मात्सतामहं प्रायणं प्रकृष्टमयनमाश्रयः अतः सत्संगो मय्यंतरंगहेतुरित्यर्थः ४८ इदा
नीं सांख्ययोगादीनि साधनांतराणि सत्संगापेक्षाणि सव्यभिचाराणि च सत्संगस्तु स्वतंत्र एव समर्थः फलाव्यभिचा
री च निर्वर्णयितुमाह अथेति एतद्गुह्यमाणं परमं गुह्यं अतः शृण्वित्यर्थः ४९ इतिश्रीभागवते एकादशस्कं

श्री
भा० ११
५६

हारेषु साधुसंगस्य महिमा वर्णितः पुरा कर्मानुष्ठानं तत्त्यागमवस्था च ततः परं न रोधयति न वशीकरोति या
गः आसनप्राणायामादिः सांख्यं तत्त्वानां विवेकः धर्मः सामान्यतो हिंसादिः स्वाध्यायो वेदजपः तपः कृच्छ्रादि
त्यागः संन्यासः इष्टापूर्ते इष्टं च पूर्तं च तत्र इष्टमग्निहोत्रादि पूर्तं कूपारामादि न निर्माणं दक्षिणा श्रद्धेन सामान्य
तो दानं लक्ष्यते १ व्रतानि एकादश्युपवासादीनि यज्ञः देवपूजा छंदांसि रहस्यमंत्राः अवरुन्धे वशीकरोति २

श्री भगवानुवाच न रोधयति मां योगो न सांख्यं धर्म एव च न स्वाध्यायस्तपस्त्यागो नेष्टापूर्तं न द
क्षिणा। १ व्रतानि यज्ञश्छंदांसि तीर्थानि नियमा यमाः यथावरुन्धे सत्संगः सर्वसंगापहो हि
मां २ सत्संगेन हि दैतेया यातुधाना मृगाः खगाः गन्धर्वाप्सरसो नागाः सिद्धाश्चारणगुह्यकाः
३ विद्याधरा मनुष्येषु वैश्याः शूद्राः स्त्रियोऽन्त्यजाः रजस्तमःप्रकृतयस्तस्मिंस्तस्मिन्युगे युगे।
४ बहवो मत्पदं प्राप्तास्त्वाष्ट्रकायाधवादयः वृषपर्वा बलिर्बाणो मयश्चाथ विभीषणः सुग्री
वो हनुमानृक्षो गजो गृध्रो वणिक्पथः व्याधः कुब्जा व्रजे गोप्यो यज्ञपत्न्यस्तथापरे ते नाधी
तश्रुतिगणा नोपासितमहत्तमाः अव्रतातप्ततपसो मत्संगान्मामुपागताः ७ ॥

यातुधाना राक्षसाः ३ ४ त्वाष्ट्रो वृत्रः कायाधवः प्रह्लादः ५ ऋक्षो जांबवान् गृध्रो जटायुः वणिक्पथः तुला
धारः व्याधः धर्मव्याधः यज्ञपत्न्यः दीक्षितभार्याः ६ तेषां सत्संगमाह तिस्रः साधनांतराभावमाह न इति न अधी
ताः श्रुतिगणा यैः तदर्थं च न उपासिता महत्तमा यैः ते तथा किंच अव्रता न तप्तं तपः व्रतानि येषां न तप्तानि
तपांसि यैः ते चैवं तथा मत्संगात् नूतनि सत्संगिः संगो नाम मयैव स्पृष्टः तत्र भिप्रेतो नेत्यदा सर्वसंगस्यापि सत्संग।
तेवा त्वविवक्षितेस्तस्यापि सेवनात्यद्वा मदीयसंगादित्यर्थः ७ ॥ श्री
राम
५६

संग मां मत्संगादिति

तत्र वृत्रादीनां भवत्वेवम् कथंचित्साधनांतरे गोपीप्रभृतीनां तु नात्यद्भुतमित्याह केवलेनेति सत्संगलब्धेन के
वलेनैव भावेन प्रीत्या नगाः यमलार्जुनादयः नागाः कालियादयः यद्वा तदानींतन सर्वे तरुगुल्मादीना
मपि भगवति भावोऽस्तीति गम्यते तदुक्तं भगवतैव अहो अमी देववरामरार्चितं पादांबुजं ते सुमनःफलार्ह
णं नमंत्युपादाय शिखाभिरात्मन स्तमोपहत्यै तरुजन्म यत्कृतमित्यादि सिद्धाः कृतार्थाः संतः ईयुः प्रापुः
८ स्वप्राप्तेर्दुर्लभतामाह यमिति योगादिभिः कृतप्रयत्नोऽपि यन्न प्राप्नुयात् तं मामीयुरिति पूर्वेणान्वयः अ

केवलेन हि भावेन गोप्यो गावो नगा मृगाः ये ऽन्ये मूढधियो नागाः सिद्धा मामीयुरंजसा ८ यं न यो
गेन सांख्येन दानव्रततपोऽध्वरैः व्याख्यास्वाध्यायसंन्यासैः प्राप्नुयाद्यत्नवानपि ९ रामेण सार्द्धं
मथुरां प्रणीते श्वाफल्किना मय्यनुरक्तचित्ताः विगाढभावेन न मे वियोगतीव्राधयोऽन्यं ददृ
शुः सुखाय ता स्ताः क्षपाः प्रेष्ठतमेन नीता मयैव वृंदावनगोचरेण क्षणार्द्धवत्ताः पुनरंग तासां
ताः हीना मया कल्पसमा बभूवुः ११ ॥

त्रैव प्रथमं यागे गोप्यः पश्चाद्यादवाः श्रीहलेन सह संगताः ते सन्तः तत्संगोऽन्येषां सत्संगः तेन च तेषां भक्तिरि
ति ज्ञातव्यं ९ गोपीनां भावं प्रपंचयति रामेणेति चतुर्भिः श्वाफल्किनाक्रूरेण मयि प्रणीते सति मम नान्य
सुखायनददृशुः कुतः वियोगेन तीव्रा दुःसह आधियासां ताः अत्र हेतुः मयि विगाढेन भावेन प्रेम्णा अनुर
क्तानि संसक्तानि चित्तानि यासां ताः १० तीव्राधित्वं व्यनक्ति तास्ता इति मया सह या एव क्षपा रात्रयः क्षणा
र्द्धवन्नीताः ता एव पुनः मया हीनाः ताः कल्पसमा बभूवुः कथंभूताः ताः वाचामगोचराः इत्यर्थः ११ ॥

श्री॰ भा॰ ए॰ टी॰ ८२

किंचएवंतीव्राध्यात्तामोहमिषेणसमाधिंप्राप्तास्ताहतादूतिमयिअनुषंगेणआसक्त्याबद्धाधियोया
भिस्ताःस्वमात्मानंस्वदेहंअदःदूरस्थंइदंसन्निहितंचनाविदन् यद्वास्वंपतिपुत्रादिंआत्मानमहंकारा
स्पदंअदःपरलोकंइदंइमंलोकंचनाविदन्निति यथामुनयःसमाधौनामरूपेनविदुस्तद्वत् किंतुअ
ब्धितोयेनद्यइवमयिप्रविष्टाइत्यन्वयः १२ एवंताअबलाःकेवलमत्कामाःअस्वरूपविदःस्वरूपंत

तानाविदन्मय्यनुषंगबद्धधियःस्वमात्मानमदःतथेदंसमाधौमुनयोब्धितोयेनद्याःप्र
विष्टाइवनामरूपे १२ मत्कामारमणंजारमस्वरूपविदोबलाः ब्रह्ममांपरमंप्रापुःसंगा
च्छतसहस्रशः १३ तस्मात्त्वमुद्धवोत्सृज्यचोदनांप्रतिचोदनां प्रवृत्तिंचनिवृत्तिंचश्रोतव्यंश्रु
तमेवच १४ मामेकमेवशरणंआत्मानंसर्वदेहिनां याहिसर्वात्मभावेनमयास्याह्यकुतो
भयः १५ श्री उद्धवः संशयःशृण्वतोवाचंतवयोगेश्वरेश्वर ननिवर्ततआत्मस्थोयेनभ्राम्य

नजानंतितथापिमत्संगात्परंब्रह्मजारबुद्धिविषयमपिब्रह्मस्वरूपमेवमांपरंप्रापुरित्यर्थः १३ यस्मादे
वंभूतोमत्संगप्रभावः तस्मात्त्वंचोदनांश्रुतिंप्रतिचोदनांस्मृतिंचयद्वाविधिंचनिषेधंचउत्सृज्यपरित्यज्य
मांशरणंयाहिमयैवअकुतोभयःस्यात् अत्रचपूर्वंतावन्मयादिनेष्ववहितःस्वधर्मस्थित्यादिनाकर्मक
र्तव्यमित्युक्तं इदानींतुसर्वंत्यक्त्वामांशरणंयाहीत्युच्यते तत्रकिंमात्मनःकर्तव्यमस्तिनास्तिवेत्यात्म
स्थःअस्मिन्विषयेसंशयोननिवर्ततेयद्वाकर्माकार्यंत्याज्यंवेत्यात्मस्थोहृदिस्थःसंशयोननिवर्ततइत्यनि
वृत्तिसंशयायइतियेनसंशयेन १६ ॥

श्री॰ एका॰ ८२

हृदि अनाहतच
क्रे भ्रुवोरंतरे आज्ञा
चक्रे ॥

उत्तरं स एष इत्यादिभिः अयं भावः ईश्वरस्तावत्स्वमायया विश्वात्मप्रपंचात्मना भाति तत्र प्रपंचाध्यासात्तु जीवानामनाद्य
विद्याकर्तृत्वादि ततो विधिप्रतिषेधाधिकारः तदानीं सत्त्वशुद्ध्यर्थं कर्माणि कुर्वीत सत्त्वे च शुद्धे पुनः कर्मजाड्य
परिहाराय भक्तिविक्षेपकं कर्मादरं परित्यज्य दृढविश्वासेन भजेत् ततो ज्ञानोदयात् विद्योदयान्न किंचित्कर्तव्यमस्ती
ति तत्र तावदीश्वराद्विराडादिद्वारा जीवसंसृतिकारणभूतप्रपंचोद्गममाह सार्द्धैस्त्रिभिः स एषः अपरोक्षः ॥
जीवयतीति जीवः परमेश्वरः अपरोक्षत्वे हेतुः विवरेषु आधारादिचक्रेषु प्रसूतिरभिव्यक्तिर्यस्य

श्रीभगवानुवाच ॥ स एष जीवो विवरप्रसूतिः प्राणेन घोषेण गुहां प्रविष्टः ॥
मनोमयं सूक्ष्ममुपेत्य रूपं मात्रा स्वरो वर्ण इति स्थविष्ठः १७ ॥ राम ॥

नाभौ २ उरसि कंठयोर्देशे २ गुदे

सः तामेवाभिव्यक्तिमाह घोषेणेति घोषेण परावस्थेन नादरूपेण प्राणेन सह गुहां आधारचक्रं प्रविष्टः सन् मनो
मयं सूक्ष्मं रूपं पश्यन्त्याख्यं मध्यमाख्यं च मणिपूरचक्रे विशुद्धिचक्रे च उपेत्य प्राप्य वक्त्रे मात्रा ह्रस्वादिः स्वर उदा
त्तादिः वर्णः अकारादिरिति एवं वैखर्याख्यः स्थविष्ठः अतिस्थूलो नानाविधो वेदात्मको भवति तथा च श्रु
ति चत्वारि वाक्परिमिता पदानि तानि विदुर्ब्राह्मणा ये मनीषिणः गुहा त्रीणि निहिता नेंगयंति तुरीयं वा
चो मनुष्या वदंति अभिप्रेतो श्लोकस्य या सा मित्रावरुणसदनादुच्चरंति त्रिषष्टिवर्णान् ततः प्रकटवैखरीतः प्रा
णसंगात्मस्वने तां पश्यंतीं प्रथमं मुदितां मध्यमां बुद्धिसंस्थां वाचं वक्त्रे करणविशदां वैखरीं च प्रपद्ये इति १२

श्री भा० टी० ५८

अव्यक्तस्य मतः सूक्ष्ममध्यमक्रमेणाभिव्यक्तौ दृष्टांतः यथेति यथाग्निः खेऊष्मा अव्यक्तोष्मरूपः दारुण्यधि
कमथ्यमानः अनिलसहायः सन् अणुः सूक्ष्मविस्फुलिंगादिरूपो भवति पुनः प्रजातो जातो हविषा संवर्द्धते ।
तथैवैषा वाणी ममाभिव्यक्तिः १८ उक्तां वाग्वृत्तिमुपसंहरन्नितरेंद्रियवृत्तिष्वतिदिशति एवं गदिः गदनं भा
षणं मे व्यक्तिरित्युपसंहारः कर्म हस्तयोर्वृत्तिः गतिः पादयोः विसर्गः पायूपस्थयोः इति कर्मेन्द्रियाणां घ्राण
श्रवघ्राणं रसो रसनं दृक् दर्शनं स्पर्शः स्पर्शनं श्रुतिः श्रवणं इति ज्ञानेन्द्रियाणां संकल्पो मनसः विज्ञानं बुद्धि
चित्तयोः अभिमानो अहंकारस्य सूत्रं प्रधानस्य सत्त्वरजस्तमसां विकारो अधिदैवादिः त्रिविधः प्रपंचः मे व्यक्ति

यथानलः खेऽनिलबंधुरूष्मा बलेन दारुण्यधिमथ्यमानः अणुः प्रजातो हविषा समिध्यते त
थैव मे व्यक्तिरियं हि वाणी १८ एवं गदिः कर्म गतिर्विसर्गो घ्राणो रसो दृक् स्पर्शः श्रुतिश्च संकल्पवि
ज्ञानमथाभिमानः सूत्रं रजः सत्त्वतमोविकारः १९ अयं हि जीवस्त्रिवृदब्जयोनिरव्यक्त एको वयसा
स आद्यः विश्लिष्टशक्तिर्बहुधेव भाति बीजानि योनिं प्रतिपद्य यद्वत् २० ॥ ॥ ॥

रिति पूर्वेणान्वयः १९ तस्मादीश्वराभिव्यक्तिरूपः प्रपंचो नेश्वरात्प्रपंचो भिन्नोस्तीत्याह अयमिति त्रयं जीवः ईश्वरः
आद्यो व्यक्त एक एव वयसा कालेन विश्लिष्टा विभक्ताः वागादीन्द्रियरूपाः शक्तयो यस्य यदा विशेषेण श्लिष्टाः
आलिंगिता मायाशक्तिर्येन सः बहुप्रकार इवाभाति यतः स एवायं त्रिवृत् त्रिगुणाश्रयः अब्जयोनिः लोकपद्मस्य
कारणभूतः एकस्य बहुधा भाने दृष्टांतः योनिं क्षेत्रं प्रतिपद्य प्राप्य बीजानि यद्वदिति २० तस्मात्तन्मायया विल
सितत्वात्तदाश्रयमिदं जगन्नततः पृथगिति सदृष्टांतमाह यस्मिन्निदमिति २० ॥ ॥ ॐ ॥ ॥

श्री राम ५८

तंतुवितानेसंस्थास्थितिर्यस्यसः पटोयथातथायस्मिन्इदंविश्वमोतंदीर्घतंतुषुपटइवप्रोतंतिर्यक्तंतुष्विव
एवंभूतंसमष्टिव्यष्ट्यात्मकविश्वमविद्यात्मन्यव्यक्तंवृक्षरूपंजीवस्यकर्तृत्वादिसंसारहेतुः अतस्त

यस्मिन्निदंप्रोतमशेषमोतंपटोयथातंतुवितानसंस्थः ॥
यएषसंसारतरुःपुराणःकर्मात्मकःपुष्पफलेप्रसूतेः २१

द्विवेकज्ञानेनकर्मादिसर्वंत्याज्यमित्युक्तंइत्याशयेनाह यएषइतिसार्द्धैस्त्रिभिःपुराणःअनादिःकर्मात्म
कःप्रवृत्तिस्वभावःपुष्पफलेभोगापवर्गौकर्मतत्फलेवाप्रसूतेजनयति २१ ॥ राम राम ॥

श्री भा० ए० टी० ५५

वृक्षरूपकंप्रपंचयति द्वेइतिपुण्यपापेअस्यबीजेसच शतमूलः शतमपरिमितावासनामूलानियस्य त्रयोगु
णाः नालानिप्रकांडाः यस्यपंचभूतानिस्कंधाः यस्यपंचरसाः शब्दादयः विषयाः तेषांप्रसूतिर्यस्मात् दकादश
इंद्रियाणिशाखायस्य द्वयोः सुपर्णयोर्जीवपरमात्मनोर्नीडंयस्मिन् त्रीणिवल्कलानित्वचोवातपित्त
श्लेष्माणोयस्य द्वेफलेसुखदुःखेयस्यसः अर्कंप्रविष्टः सूर्यमंडलपर्यंतंव्याप्तः तंनिर्भिद्यगतस्यसंसार

दशाव एकाव शाखाः

द्वेअस्यबीजेचतमूलस्त्रिनालः पंचस्कंधः पंचरसप्रसूतिः दशैकशाखोद्विसुपर्णनीडस्त्रिव
ल्कलोद्विफलोर्कंप्रविष्टः २२ अदंतिचैकंफलमस्यगृध्राग्रामेचरा एकमरण्यवासाः ॥
हंसायएकंबहुरूपमिज्यैर्मायामयंवेदसवेदवेदम २३ ॥ राम राम राम ॥

ख

भावात् २२ तत्फलभोक्तॄनाह गृध्रंतीतिगृध्राः कामिनः ग्रामेचरागृहस्थाः अस्यवृक्षस्यएकंफलंदुः
खमरेतिपरिशिष्टमतः स्वर्गादेरपिदुःखरूपत्वात् हंसाविवेकिनः अरण्यवासिनः संन्यासिनएकंफलं
सुखमदंति एकंपरमात्मानंमायामयंएवंबहुरूपमिज्यैः एज्यैर्गुरुभिःकृत्वा योवेदसवेदंतत्वार्थंवेद २३

श्री राम ५५

त्वं चैवं कृत्वा कृतकृत्यः सन् सर्वं साधनं त्यजेत्याह एकांतभक्त्या शितेन कुठारेण तीक्ष्णेन स्वतेजसा तावद्गाह योऽज्ञो
वोपाधिस्त्रिगुणात्मकं लिंगशरीरं विवृश्च्य छित्त्वा परमात्मानं च संपाद्य प्राप्य अथाधि स्वं साधनं त्यजेति स
मन्वयः २४ इति श्रीभावार्थदीपिकायामेकादशे द्वादशः १२ त्रयोदशेऽथ सत्त्वस्य वृद्ध्या विद्योदयक्रमः हंसेतिहा
सतश्चित्रगुणविच्छेदवर्णनेन विद्याकुठारेण जीवाशयं संवृश्च्य ततः साधनं त्यजेत्युक्तं तत्र तमआदिगु
णत्रयप्रतिबंधे सति कथं विद्योत्पत्तिरित्याशंक्य तन्निरासेन विद्योत्पत्तिप्रकारमाह सत्त्वमिति सप्तभिः

एवं गुरूपासनयैकभक्त्या विद्याकुठारेण शितेन धीरः विवृश्च्य जीवाशयमप्रमत्तः संपाद्य चा
त्मानमथ त्यजास्त्रं २४ इति श्रीभागवते एकादशस्कंधे द्वादशोऽध्यायः १२ श्रीभगवानुवाच ॥
सत्त्वं रजस्तम इति गुणा बुद्धेर्न चात्मनः सत्त्वेनान्यतमौ हन्यात्सत्त्वं सत्त्वेन चैव हि १ सत्त्वाद्ध
र्मो भवेद्वृद्धात्पुंसो मद्भक्तिलक्षणः सात्त्विकोपासया सत्त्वं ततो धर्मः प्रवर्तते २ ॥ ॥

तत्र यद्यात्मनो वा एवं तमादि धर्मा गुणाः स्युः तर्हि तत्स्वरूपत्वात्तेषां गुणानां निवृत्तिर्न स्यात् नैवेतदस्तीत्याह ॥
तत्र यद्यात्मनो वा एवं तदात्मधर्मा गुणाः स्युः तर्हि तत्स्वरूपत्वात्तेषां गुणानां निवृत्तिः न स्यात् रजस्तमोवृद्धौ जयेदित्यर्थः
बुद्धेः प्रकृतेरेव गुणाः न त्वात्मन इति अतः सत्त्वेन सत्त्ववृद्ध्या अन्यतमौ हन्यात् रजस्तमोवृद्धौ जयेदित्यर्थः
सत्त्वं च सत्त्वेन हन्यात् ननु गुणत्रयस्यैकीभावात्परस्परोपमर्दे
सत्त्वं च सत्त्वेन हन्यात् दिष्टं नित्यं रूपमुपशमात्मकत्वेन सत्त्वेनैव हन्यात् १ ननु गुणत्रयस्य तीव्रतापरस्परोपमर्द
रूपत्वात् कथं च सत्त्ववृद्धिरेव तत्र हेतुरित्याह सत्त्वादिति लक्षणयनियोधर्मः स्वभाक्तिरूप
रूपत्वात् कथं च सत्त्ववृद्धिरेव तत्र हेतुर्योऽनियमेन हतत्वात्तत्राह सत्त्वादिति लक्षणयति यो धर्मः भक्तिरूपस्तु
वयासत्त्वमेव कथं वर्धतेत्याह सात्त्विकानां पदार्थानामुपासया सेवया सत्त्वं वृद्धं भवतीत्यर्थः २ ॥ ॥

श्री॰ भा॰ ए॰ टी॰ ८०

सत्त्वधर्मो रजस्तमश्च हन्यात् कुतः न विद्यते उत्तमो यस्मात् स सर्वोत्तमः यतः सत्त्ववृद्धिः सत्त्वस्य वृद्धिर्यस्मात्
तत्कारणं वा यस्य सः अत एव तत्कार्योऽधर्मप्रतिबन्धो नास्तीत्याह तस्मिन्नुभयस्मिन् हते तन्मूलो रजस्तमसी
रागद्वेषादिना प्रमादालस्यादिना च मूलं यस्य सः ६ सात्त्विकोपासनया सत्त्वं वर्धत इत्युक्तं तान्येव सत्त्ववृद्धिहेत-
न्दर्शयितुं सामान्यतो गुणत्रयवृद्धिहेतूनाह आगम इति आगमं शास्त्रमप आपः कश्चिदागमोऽर्थ इति ॥

धर्मो रजस्तमो हन्यात् सत्त्ववृद्धिरनुत्तमः आशु नश्यति तन्मूलो ह्यधर्म उभये हते ३ आगमोऽपः
प्रजा देशः कालः कर्म च जन्म च ध्यानं मन्त्रोऽथ संस्कारो दशैते गुणहेतवः ४ तस्मात्सात्त्वि-
कमेवैषां यद्यद्वृद्धाः प्रचक्षते निन्दन्ति तामसं [illegible] तत्तद्राजसं तदुपेक्षितं ५ राम राम ॥
श्रीकृष्णाय पूर्णबोधात्मायनमो नमः श्रीगुरुचरणकमलेभ्यो नमो नमः ॥ ॐ ॐ ॥

पाठः आगमोऽधीतो वेदः अर्थोऽन्यायोपार्जितं वित्तं प्रजा सत्पुत्राः देशाः कुलस्थानसंचारिः प्रवृत्तिः का-
लो वसंतादिः कर्म आश्रमादिविहितं जन्मामयज्ञलविशुद्धं ध्यानं देवतविषयं मन्त्रोऽमायश्चादि संस्का-
रो गर्भाधानादि गुणहेतवः सत्त्वोत्पत्तिहेतवः ४ एतेषामपि त्रैविध्यं वृद्धानुष्ठानपरंपराज्ज्ञातव्यमा-
ह तस्मादिति एषु सात्त्विकादिनिर्णयमाह एषामेव मध्ये प्रचक्षते प्रशंसन्ति यद्यन्निन्दन्ति तत्तत् यत्त-
द्वैरुपेक्षितं न स्तुतं न च निन्दितं तद्राजसं ५ ॥ ॥ ॥ ॥

श्री॰ राम॰ ८०

त्र प्रणवादिकं न काम्यं तद्द्वारा संस्कारमात्मनः शोधकं न तु केवलं देहगृहादीनां॥४॥ टीकायां तु टिः।

सात्त्विकान्येवेति निवृत्तिशास्त्राण्येव सेवेत न प्रवृत्तिपाखंडशास्त्राणि तीर्थाद्येव न गंधोदकसुराद्याः प्रजा
जना निवृत्ता न तु जना नृशंसान् निर्द्विराचारान् विविक्तदेशं न रथ्याद्युतदेशान् कालं ब्राह्ममुहूर्तादिकं ध्यानादौ न १
प्रदोषनिशीथादीन् कर्म च नित्यं न काम्याभिचारादीनि जन्म च वैष्णवशैवदीक्षालक्षणं न शाक्तादिदीक्षा
रूपं ध्यानं श्रीविष्णोर्गुरोर्वा न कामिनीनां विद्विषां वा मं॰ ननु ज्ञानं महावाक्यश्रवणादेवोत्पद्यते किं तत्र सत्त्ववृद्ध्यार्थ ६
मेणवा अत आह यावत्स्मृतिः आत्मापरोक्ष्यं यावच्च देहद्वयकारणभूतगुणापोहः तावत्पर्यंतं ज्ञानं भवतीत्यर्थः

सात्त्विकान्येव सेवेत पुमान्सत्त्वविवृद्धये ततो धर्मस्ततो ज्ञानं यावत्स्मृतिरपोहनं ६ ॥
वेणुसंघर्षजो वह्निर्दग्ध्वा शाम्यति तद्वनं एवं गुणव्यत्ययजो देहः शाम्यति तत्क्रियः ७ ॥

ननु गुणव्यतिकराज्जातो देहः कथं स्वाश्रयभूतान् गुणान् स्वत एवोत्पन्नया विद्ययाऽपोह्य स्वयमप्युपरमेत त
त्राह वेणूनां संघर्षणाज्जातोऽग्निर्वह्निर्यतः स्वत एवोत्पन्नाभिः ज्वालाभिः तद्वनं स्वयमेव दग्ध्वा स्वयमेव शाम्यति
एवं देहोऽपि अतत्क्रियः गुणक्रियारहितः तत्क्रियत्वे निपातः तस्मादग्नेरिव क्रियाव्यापारः यत उत्पन्नस्तदेव पूर्वं निर्दह
त्येवंभूतो व्यापारो यस्य सः ७ ननु नियतेंद्रियतया सात्त्विकसेवायां हेतुः इंद्रियजयात् तस्यां या भियाता स्तु रूपा
र्थः यतः सात्त्विकस्य अल्पमेव विषयमनः संतोषो जायते तथा च राजसतामसादीन्विषयानभ्यपरड्ढः स्वज्ञानं तोपितान् ॥
कथं सेवंत इति पुनर्भगवंतमीश्वरं विदंति मर्त्या इति प्रश्नं पृच्छति ...... वाक्यदीपकः ७
श्रीकृष्णाय गोविंदाय गोपीजनवल्लभाय नमो नमः ॥ राम ॥
श्रीरामाय नमः ॥

विंदशिइति

श्री
भा
टी
११
उद्धवस्याच

मिथ्याभिनिवेशान्भुंजते इति सहेतुकमाह अहमिति त्रिभिः प्रमत्तस्य विवेकशून्यस्य देहादावहमिति मिथ्या बु
द्धिर्यथा वर्द्धते उत्सर्पति ततो हेतुभूतेऽस्य वैकारिकं सत्वप्रधानमपि मनः प्रति घोरं दुःखात्मकं रज उत्सर्पति मनो व्याप्नोती
त्यर्थः ९ यथा भ्रमस्य मानोऽपि त्वरो यथा पश्यातायमानोऽपि त्वरीमनुधावति अज्ञो यथा निलेज्ञो हं तमानी यतो
पितद्धतं इदमेवमेवं भोग्यमिति स विकल्पः संकल्पः स्यात् ततस्तस्माद्धा हारूप महाभाव इति गुणध्यानाद्दुर्धरः कामः
स्यात् १० ततो विषयान्भोक्तुं कर्माणि करोति ११ एवं चेत्तर्हि कस्यापि दुःखनिवृत्तिः स्यादित्याशंक्याह यदपीत्यद्व

विदंति मर्त्याः प्रायेण विषयान्पदमापदां तथापि भुंजते कृष्ण तत्कथं श्वखराजवत् ८ श्री भ उ
अहमित्यन्यथाबुद्धिः प्रमत्तस्य यथा हृदि उत्सर्पति रजो घोरं ततो वैकारिकं मनः ९ रजोयुक्त
स्य मनसः संकल्पः सविकल्पकः ततः कामो गुणध्यानाद्दुःसहः स्याद्धि दुर्मतेः १० करोति कामवश
गः कर्माण्यविजितेंद्रियः दुःखोदर्काणि संपश्यन्रजोवेगेन मोहितः ११ रजस्तमोभ्यां यदपि विद्वा
न्विक्षिप्तधीः पुनः अतंद्रितो मनो युंजन्दोषदृष्टिर्न सज्जते १२ अप्रमत्तोऽनुयुंजीत मनो मय्यर्पयन्
शनैः अनिर्विण्णो यथाकालं जितश्वासो जितासनः १३ एतावान्योग आदिष्टो मच्छिष्यैः सनका
दिभिः सर्वतो मन आकृष्य मय्यद्धावेश्यते यथा १४ ॥ ॥ ॥ ॥

पि रजस्तमोभ्यां विक्षिप्तधीर्मूढधीश्च तथापि विद्वान् विवेकी पुनर्मनो निरुंधन्न सज्जते १२ विषयदोषदृष्ट्यापि म
नोनिरोधासक्तौ सर्वं दुःखं तन्निरोधोपायमाह अनिर्विण्णः अनलसः यथाकाले त्रिषवणमपि परमानंदरूपे मय्यर्प
यन्समादध्यात् १३ विषयेभ्यः ग्रथितस्य मनसः तद्वियोगे नेश्वरनिष्ठत्वं असंभावितं मन्यमानं प्रति तन्निरूपणाये
तिहासमुपक्षिपति एतावानिति यथावन्मय्यावेश्यते एतावानित्यर्थः मच्छिष्यैः सनकादिभिः तेषामतिज्यायसामपि न

श्री
११

तत्कालं तदेतद्रूपं च वेदितुमिच्छामि तत्कथयेति १५ मानसाः पुत्राः सूक्ष्मां दुर्ज्ञेयां एकान्तिकीं गतिं परां काष्ठां १६ ता
वदेवाह गुणेष्विति विषयेषु स्वभावतो रागादिवशाच्चेतः प्रविशति ते चानुभूता विषया वासनारूपेण चेतसि प्रवि
शन्ति अतितितीर्षोर्विषयानतिक्रमितुमिच्छोः १७ एवमिति महादेवः स्वयंभूरपि भूतानां स्रष्टापि ध्यायमानः विचा
रयन्नपि प्रश्नस्य बीजं यत्नानारूपप्रश्नः तन्नाविदत यतः कर्मविक्षिप्तधीः १८ प्रश्नपारमुत्तरमभिप्रायो वा तस्य तितीर्ष
या जिज्ञासया हंसरूपेणेति यथा हंसो नीरक्षीरपृथक्कर्ता तथाहं एवमहं गुणाश्चेति योगतयेति हंसरूपेणागतोस्मि

उ॰ वः यदा त्वं सनकादिभ्यो येन रूपेण केशव योगमादिष्टवानेतद्रूपमिच्छामि वेदितुं १५ श्री भ॰ उ॰
पुत्रा हिरण्यगर्भस्य मानसाः सनकादयः पप्रच्छुः पितरं सूक्ष्मां योगस्यैकान्तिकीं गतिं १६ सनकादयः
गुणेष्वाविशते चेतो गुणाश्चेतसि च प्रभो कथमन्योन्यसंत्यागो मुमुक्षोरतितितीर्षतः १७ श्रीभ
ग॰ उ॰ एवं पृष्टो महादेवः स्वयंभूर्भूतभावनः ध्यायमानः प्रश्नबीजं नाभ्यपद्यत कर्मधीः १८ स माम
चिन्तयद्देवः प्रश्नपारतितीर्षया तस्याहं हंसरूपेण सकाशमगमं तदा १९ दृष्ट्वा मां त उपव्रज्य कृत्वा
पादाभिवंदनं ब्रह्माणमग्रतः कृत्वा पप्रच्छुः को भवानिति २० इत्यहं मुनिभिः पृष्टस्तत्त्वजिज्ञासुभिस्तदा
यदवोचमहं तेभ्यस्तदुद्धव निबोध मे २१ वस्तुनो यद्यनानात्व आत्मनः प्रश्न ईदृशः कथं घटेत वो विप्रा व

इत्यहं मुनिभिः पृष्टः तत्त्वजिज्ञासुभिरिति पृथग्वाक्यं यदवोचमिति पृथक् अनेनास्य कुलाहृत्तिरदोषः तेभ्यो यदवो
चं तदुद्धवेनं निबोध मे २१ देहादिविविक्तात्मज्ञाने सति तन्निष्ठस्य रागाद्यसंभवात् स्वयमेव विषयचेतसोर्विश्लेषो
भवतीति वक्तुं प्रश्नमेव दूषयन्नियोगेन तावदात्मानात्मविवेकमाह वस्तुन इति त्रिभिः किमात्मनोयं प्रश्नः तदुपाधेर्वा
तत्र न तावदात्मनः न हि तस्य वस्तुनः परमार्थरूपस्य अनानात्वे सति हे विप्रा वो युष्माभिः कृतः ईदृशः प्रश्नः वक्तु
र्वा निर्धारणरूपः कथं घटेत वक्तुस्तत्तदा तद्वा मे मम क आश्रयः अविशेषे आत्मनि के जातिगुणादिविशेषमाश्रित्य

भूतसंघविषयत्वेपिअयंवःप्रश्नोवाचारंभःवाङ्मात्रेणारब्धःयतोऽनर्थकःकुतःभूतेषुदेवमनुष्यादिदेहेषुपंचभूतात्म
केषुअतःसमानेषुअभिन्नेषुचवस्तुतःपरमकारणात्मनाअभिन्नेषुवाचारंभणंविकारोनामधेयंमृत्तिकेत्ये
वसत्यमितिश्रुतेः २३ ततःपंचात्मकत्वप्रत्यक्षादिसिद्धमेवेतिपरमकारणाभेदमेवोपपादयतिमनसेतिमन॰
आदिभिर्यद्गृह्यतेतत्तदहमेवेत्यर्थः अंजसातत्त्वविचारेणएतेनैवसर्वात्मकोहमित्येवंसंपश्यन्नरमुक्तोभवति २४
एवंप्रश्नखंडनेनमिथ्यैवात्मस्वरूपंसामान्यतोनिरूप्यब्रह्मणोपिदुष्परिहरंयत्स्यैतत्तेनोत्तरमाह गुणेष्वित्यादिना

पंचात्मकेषुभूतेषुसमानेषुचवस्तुतः कोभवानितिवःप्रश्नोवाचारंभोह्यनर्थकः २३ मनसाव
चसादृष्ट्यागृह्यतेन्यैरपीन्द्रियैः अहमेवनमत्तोन्यदितिबुध्यध्वमंजसा २४ गुणाह्याविशतेचेतोगु
णाश्चेतसिचप्रजाः जीवस्यदेहउभयंगुणाश्चेतोमदात्मनः २५ गुणेषुचाविशच्चित्तमभीक्ष्णं
गुणसेवया गुणाश्चचित्तप्रभवामद्रूपउभयंत्यजेत् २६ ॥ ॥ ॥ ॥

यावदध्यायसमाप्ति अयमभिप्रायः यदिकर्तृत्वभोक्तृत्वादिरूपतयाविषयैःसंग्रथितंचित्तंबुद्ध्यादिशब्दवाच्यमेव
जीवस्यस्वरूपंभवेत् ततःतद्वियोगोनघटेत ततस्यतुस्वरूपमहंब्रह्मैवचित्ताध्यासेनतुतत्स्वभावतयाविषयैःसंग्र
थितं अतःस्वस्यब्रह्मत्वभावनयाविषयाणांचमिथ्यात्वानुसंधानेनसर्वतोनिर्विद्यभगवंतंभजनेनाभवन्नेवपरि॰
पूर्णस्वरूपावस्थानमितिहेप्रजाःपुत्रकाःसत्यंगुणेषुचेतआविशति गुणाश्चेतसि एवंगुणाःचेतःचोभयंग्रथितं
मदात्मनोब्रह्मस्वरूपस्यजीवस्यदेहःअध्यस्तःउपाधिर्नतुस्वरूपं २५ तस्मादभीक्ष्णंपुनःपुनःगुणसेवयात
त्संस्कारेणगुणेष्वाविशच्चित्तंतेचपुनर्वासनारूपेणचित्तप्रकर्षेणभवंतीतितथातेगुणाश्चेतश्चएवंयदुभयंतन्म

ननुजाग्रदाद्यवस्थावतः कुतः कूटस्थत्वद्रूपता तत्राह जाग्रत् जागरः स्वप्नः सुषुप्तं चेति बुद्धेरेता वृत्तयः ननु जी
वस्यताश्चनस्वाभाविकाः किंतु सत्वाज्जागरणं विद्याद्रजसास्वप्नमादिशेत् प्रस्वापं तमसा जंतोस्तुरीयं त्रिषु संत
तमिति वक्ष्यमाणक्रमेण गुणत एव जीवस्तु विलक्षणस्तदवस्थारहित एव विनिश्चितः कुतः तासां साक्षित्वेन २७
ननु तर्हि कथं अहं जागर्मीत्यादि प्रतीतिः तत्राह यर्हि यस्मात् सम्यक् सृतिः सरणमनयेति संसृतिर्बुद्धिस्तया बंधो
यमात्मनो गुणवृत्तीर्ददाति तस्मान्मयि तुर्ये स्थितः सन्निमं संसृतिबंधं जह्यात्तदा गुणचेतसां गुणानां चेतसश्चात्या

जाग्रत्स्वप्नं सुषुप्तं च गुणतो बुद्धिवृत्तयः तासां विलक्षणो जीवः साक्षित्वेन विनिश्चितः २७ यर्हिसंसृ
तिबंधोयमात्मनो गुणवृत्तिदः मयि तुर्ये स्थितो जह्यात्त्यागस्तद्गुणचेतसां २८ अहंकारकृतं बंध
मात्मनोर्थविपर्ययं विद्वान्निर्विद्य संसारचिंतां तुर्ये स्थितः त्यजेत् २९ यावन्नानार्थधीः पुंसो न
निवर्तेत युक्तिभिः जागर्त्यपि स्वपन्नज्ञः स्वप्ने जागरणं यथा ३० असत्वादात्मनोन्येषां भावानां तत्कृ
ता भिदा गतयो हेतवश्चास्य मृषा स्वप्नदृशो यथा ३१ ॥

संत्यागो भवति २८ कथं संसृत्या बंधः कथं तं च जह्यात्तत्तदाह अहंकारेण कृतं बंधं आत्मनः अर्थविपर्ययं अनर्थदा
यावरणेन अनर्थहेतुं विद्वान् जानन् सन् निर्विद्य तुःखेमतदिति त्यक्त्वा तुर्ये स्थितो भूत्वा संसारचिंतां संसारो बुद्धिः त
स्मिन् चिंतामभिमानं तत्कृतां च भोगचिंतां च त्यजेदिति २९ यावदेवं न त्यजेत्तावत्तस्य कर्मज्ञानादि सर्वं व्यर्थमित्याह ॥
यावदिति यद्यपि जागर्ति कर्मादिषु तथापि स्वपन् स्वप्नमनुभवन्निव भवति यतोऽज्ञः असम्यग्दर्शी अज्ञजागरव
त्स्वप्नत्वे दृष्टांतः स्वप्न इति ३० ननु कथं वेदप्रतिपादितवर्णाश्रमकर्मादिना नानार्थधीर्निवर्तेत तत्राह असत्वादिति भा
वानां देहादीनां तत्कृता भिदा वर्णाश्रमादिरूपा गतयः स्वर्गादिफलानि हेतवः कर्माणि वास्यात्मनो मृषा अविद्याव

श्री भा॰ए॰ टी॰ ६२ युक्तिभिरित्युक्तं तामेव युक्तीमाह य इति अर्थान् स्थूलान्देहादीन्समस्तकरणैः चक्षुरादिभिर्भुंक्ते कथंभूतान्
अनुक्षणधर्मिणः क्षणिकबाल्यतारुण्यादिधर्मवतः स्वप्ने हृदि जागरवत्सदृशान्वासनामयान्भुंक्ते
सुषुप्ते तान्सर्वानुपसंहरति स एकः कुतः त्रिगुणवृत्तिदृक् अवस्थात्रयद्रष्टा ननु जाग्रदवस्थासु सर्वेन्द्रियाणि
पश्यति स्वप्नं मनः सुषुप्तिं तत्संस्कारशेषा बुद्धिः कथमयमात्मेति द्रष्टा तत्राह इन्द्रियेशः ननु इन्द्रियेशमपि विवि

योजागरे बहिरनुक्षणधर्मिणोऽर्थान्भुंक्ते समस्तकरणैर्हृदि तत्सदृक्षान् स्वप्ने सुषुप्त उपसंहरते स
एकः स्मृत्यन्वयात्त्रिगुणवृत्तिदृगिन्द्रियेशः ३२ एवं विमृश्य गुणतो मनसस्त्र्यवस्था मन्मायया
मयि कृता इति निश्चितार्थाः संछिद्य हार्दमनुमानसदुक्तितीक्ष्णज्ञानासिना भजत माखि
लसंशयाधिं ३३ ॥

क्तेन स प्राज्ञात्मा भिन्नानेतत्कुतः स्मृत्या प्रतिसंधानेन सर्वावस्थास्वन्वयात् यः स्वप्नमद्राक्षं यश्च तदनंतरं न किंचि
दवेदिषं स एव एतर्हि जागर्मीति उपाधिभेदेन विश्वादिव्यवहार इति भावः एतेन बालयुवाद्यवस्थास्वपि प्रतिसं
धानेनात्मैक्यं द्रष्टव्यं ३२ ततः किमत आह एवमिति गुणतो या एता मनसस्त्र्यवस्थास्ता मदविद्यया मयि
कृता न तत्त्वतः सन्तीति निश्चित आत्मरूपोऽर्थो यैस्ते यूयं अखिलसंशयानामाधिं आधीयते स्मिन्निति आ गों
धिरहंकारः तं संछिद्य हार्दं हृदि स्थितं मा भजत केन छित्त्वा तदाह अनुमानैः सदुक्तिभिः सतां गुरूपदेशैः च ६२
श्रुतिभिश्च तीक्ष्णेन ज्ञानासिना खड्गेन ३३ ॥ श्रीकृष्णाय नमः ॥ श्रीरामाय नमः ॥ ॐ ॥

अनुभवान्निदर्शयति ईहेतेति इदं जगद्विभ्रममीहोत्थं तत्र हेतवः मनोविलसितत्वात् दृष्टत्वात् विनाशित्वाच्च
स्वप्नवदतिचंचलत्वाच्च अलातचक्रवत् ननु भ्रमोऽपि निर्विषयः कथं स्यात् तत्राह विज्ञानमिति निर्गमनं तस्मा
त्रिधा योऽयं गुणविसर्गकृतो विकल्पो भेदः स मायाउतिउरुधा बहुभिः प्रकारैः ३४ तस्मात्तेतादृश्याद्दृष्टिं प्र
तिनिवर्त्य निजसुखानुभवो भवेत् तन्निष्ठत्वाच्च निवृत्ततृष्णः तूष्णीं निरीहश्च भवेत् मनोवाक्कायव्यापारर

ईहोत्थविभ्रममिदं मनसो विलासं दृष्टं विनष्टमतिलोलमलातचक्रं विज्ञानमेकमुरुधेव वि
भाति माया स्वप्नस्त्रिधा गुणविसर्गकृतो विकल्पः ३४ दृष्टिं ततः प्रतिनिवर्त्य निवृत्ततृ
ष्णः तूष्णीं भवेन्निजसुखानुभवो निरीहः संदृश्यते क्व च यदीदमवस्तुबुद्ध्या त्यक्तं भ्र
माय न भवेत्स्मृतिरानिपातात् ३५ देहं च नश्वरमवस्थितमुत्थितं वा सिद्धो न पश्यति
यतोऽध्यगमत्स्वरूपं दैवादपेतमुत दैववशादुपेतं वासो यथा परिकृतं मदिरामदांधः ३६ ॥

त

हित इत्यर्थः ननु देहवतः सर्वथा हि तद्दृष्टिं प्रतिनिवर्तनायोगात् पुनः संसारः स्यादेव तत्राह संदृश्यत इति क्वचि
दावश्यकाहारादिषु यद्यपीदं संदृश्यते तथापि पूर्वमेव वस्तुबुद्ध्या यत्त्यक्तं तत्पुनर्मोहाय न भवेदेव किंतु देहपातप
र्यंतं स्मृतिः इवस्मृतिः संस्कारमात्रेणावभासो भवेदित्यर्थः ३५ एतदेवाप्रपञ्चयति देहमिति आसनादुत्थितं उत्थाय
तत्रैवस्थितं ततः क्वचिद्गंतुं निर्गतं पुनस्तत्रैवोपेतं वा देहमपि नानुसंधत्ते कुतो यतः येन देहेन स्वरूपमध्यगमत् ज्ञा
तवान् तं देहं यतः कारणादिति वा परिकृतं परिहितं वासो गतं स्थितं वा न वेत्ति तद्वत् ३६ ॥

श्री भा० टी० ६४

नन्वयं परिपाल्यमानो विमुक्तं न पश्यति तर्हि कस्तेन देव नेत्याह देहोपीति दैववशेन गच्छेत् स्वारं
भकं मेयावदेवास्ति तावत्तं यत्तं प्रतिसमीक्षेत स प्राणेंद्रियसहितः नन्वन्तर्हि तस्मिन्कदाचिदासक्तो तापि ने
त्याह नस्वाप्नवत्प्रतनुल्यमधिरूढः प्राप्तसमाधिपर्यंतो योगो येन अतएव प्रतिबुद्धस्तात परमार्थवस्तु येन सः तथा
वस्कृतिः तस्यतावदेव चिरं यावन्न विमोक्षो अथ सपत्स्यते इति ३७ उक्तार्थं तेषां विस्तरास्यं स्वरूपमाह म
यैतिसांख्यमात्मानात्मविवेकः योगोष्टांगः तयोर्गुह्यं रहस्यं यद्वो विस्तरात् पुष्पकं दुर्मे विवक्षया इत्यनेनैध
देहोपि दैववशगः खलु कर्मयावत्स्वारंभकं प्रतिसमीक्षत एव सासुः तं सप्रपंचमधिरूढसमा
धियोगः स्वाप्नं पुनर्न भजते प्रतिबुद्धवस्तुः ३७ मयैतदुक्तं वो विप्रा गुह्यं यत्सांख्ययोगयोः ॥
जानीत मागतं यज्ञं युष्मद्धर्मविवक्षया ३८ अहं योगस्य सांख्यस्य सत्यस्यर्तस्य तेजसः परायणं
द्विजश्रेष्ठाः श्रियः कीर्तेर्दमस्य च ३९ मां भजंति गुणाः सर्वे निर्गुणं निरपेक्षकं सुहृदं प्रियं
मात्मानं साम्यासंगादयोगुणाः इति मे छिन्नसंदेहा मुनयः सनकादयः सभाजयित्वा प
रया भक्त्यागृणत संस्तवैः ४१ तैरहं पूजितः सम्यक् संस्तुतः परमर्षिभिः प्रत्येयाय स्वकं धाम
पश्यतः परमेष्ठिनः ४२ इति श्री भागवते महापुराणे एकादशस्कंधे त्रयोदशोऽध्यायः ॥१३

मांत्र श्रुपदिष्टाइतिरेवं ३८ अतएव यतेनेहंस रूपेण ब्रह्मणो भास्य माधवेत्यनुवादोऽस्य विष्णतिश्रांतं प्रती
यमानो धर्मः सत्यमनुष्ठीयमानो धर्मः तेजः प्रभावः एतेषां परमयनमुत्पत्तिस्थानमित्यर्थः ३९ किंच मामि
तिकथंभूताः अगुणाः गुणपरिणामरूपा न भवंति किंतु नित्या इत्यर्थः ४० मेमयाच्छिन्नसंदेहाः ४१
प्रत्येयाय प्रत्यागतोस्मि ४२ इति श्रीभावार्थदीपिकायां एकादशे त्रयोदशोध्यायः ॥१३॥ ॥ राम ॥

श्रीं ६४

वक्तुंदेशपरंश्रेयोभक्तिरेवनचेतरत् इत्येतदुत्तरंपतेध्यानंयोगश्चसहसाधनैः १ एवंतावद्भगवताभक्त्यामोक्षइत्युक्तं
अन्येत्वन्यानिसाधनानिवदंतितत्रविशेषनिर्धारणायपृच्छतिश्रेयांसिश्रेयःसाधनानिकिंविकल्पेनप्राधान्यमुत
ताहोकिंवाएकस्यैवमुख्यता १ पक्षांतराणिकारणंभवतेतिनअपेक्षितंअपेक्षायस्मिन्सः अहेतुकं अयम
र्थः भगवतायोभक्तियोगउक्तः अन्येचयानिश्रेयःसाधनानिवदंतितेषांकिंसाक्षात्फलसाधनत्वेनप्राधान्यमेव १

श्री उ वाच वदंतिकृष्णश्रेयांसिबहूनिब्रह्मवादिनः तेषांविकल्पप्राधान्यमुताहोएकमुख्यता
१ भवतोदाहृतःस्वामिन्भक्तियोगोनपेक्षितः निरस्यसर्वतःसंगंयेनत्वय्याविशेन्मनः २ श्री
भ उ च कालेननष्टाप्रलयेवाणीयंवेदसंज्ञिता मयादौब्रह्मणेप्रोक्ताधर्मोयस्यांमदात्मकः ३
तेनप्रोक्ताचपुत्रायमनवेपूर्वजायसा ततोभृग्वादयोगृह्णन्सप्तब्रह्ममहर्षयः ४ तेभ्यःपितृभ्यः
तत्पुत्रादेवदानवगुह्यकाः मानुषाःसिद्धगंधर्वाःसविद्याधरचारणाः ५ ॥ राम ॥ ५ ॥

सर्वेषांउक्तानांमार्गाणांप्राधान्येकिंविकल्पेनसर्वेषांतुल्यफलत्वंपक्षेकिंचिदस्तिविशेषइति २ तत्रभक्तिरेवमहाफ
लत्वेनमुख्या अन्यानितुस्वस्वप्रकृत्यनुसारेणपुष्पस्थानीयस्वर्गादिफलबुद्धिभिःप्राप्तिभिःप्राधान्येनचविक
ल्पितानितुच्छफलानीतिविवेक्तुंप्रकृत्यनुसारेणबहुधावेदार्थप्रतिपत्तिमाहकालेनेतिसप्तभिः मदात्म
कः मय्येवात्माचित्तंयेनसः ३ भृग्वादयः भृगुश्चमरीचिरत्रिरंगिरसौपुलस्त्यःपुलहःक्रतुरितिसप्तब्रह्मणः ४

॥ ११ अ १४ ॥ भागवतटीका

किंदेवाः ईषत्स्वेदस्वेदोर्गंधादिरहितत्वेन किंदेवा मनुष्या वेति संदेहास्पदं द्वीपांतरमनुष्याः एवं किन्नराः किंचिन्नराः एवमुत्तरेत्र
शरीरेण नरा वा किंपुरुषाः किंचित्पुरुषा इव वानरादयः प्रकृतयः वासना बह्व्यः उक्ताः रजः सत्वतमोभ्यो भुवः जन्म यासां ताः नानाविधा
यासांताः ६ भूतानि देवासुरमनुष्यादीनि चित्रा वाचः वेदार्थव्याख्यानविषयाः ७ एवमित्युक्तोपसंहारः केषांचिदध्य
यनादिशून्यानां सद्गुरूपदेशाभावात्पारंपर्येणात्पुरपरे पाषांडमतयो वेदविरुद्धार्थमतयः ८ तत्प्रकृतीनां मायागुणमूलत्वात् मा
यामोहितधियः अनेकांतं नानाविधं ९ तदेवाह धर्ममिति सार्द्धेन धर्मं कर्ममीमांसकाः मोक्षार्थीन प्रवर्तते तत्र काम्यनिषि

किंदेवाः किन्नरा नागाः रक्षः किंपुरुषादयः बह्व्यस्तेषां प्रकृतयो रजः सत्वतमोभुवः ६ याभिर्भूतानि भिद्यंते
भूतानां पतयस्तथा यथाप्रकृति सर्वेषां चित्रा वाचः स्रवंति हि ७ एवं प्रकृतिवैचित्र्याद्भिद्यंते मतयो नृणां
पारंपर्येण केषांचित्पाषांडमतयोऽपरे ८ मन्मायामोहितधियः पुरुषाः पुरुषर्षभ श्रेयो वदंत्यनेकांतं
यथाकर्म यथारुचि ९ धर्ममेके यशः चान्ये कामं सत्यं दमं शमं अन्ये वदंति स्वार्थं वा ऐश्वर्यं त्यागभोजनं १०
केचिद्यज्ञं तपो दानं व्रतानि नियमान्यमान् ११ ॥ ॐ ॥ राम राम ॥ ॐ ॥

द्धयोः नित्यनैमित्तिके कुर्यात्प्रत्यवायजिहासयेत्यादि यशः काव्यालंकारकृतः यथा यावत्कीर्तिर्मनुष्यस्य पु
ण्या लोकेषु गीयते तावद्वर्षसहस्राणि स्वर्गलोके महीयते इति कामं वात्स्यायनादयः सत्यशमं दमं च योगशास्त्र
कृतः अन्ये दृष्टार्थवादिनो दंडनीतिकृतः स्वैरमिदं ऐश्वर्यमेव स्वार्थं वदंति अतः सामाद्युपाय एवैश्वर्यः साधनमि
ति तेषां मतं [illegible] त्यागभोजनं च लोकायतिका बौद्धाः यज्ञं तपो दानं यज्ञो देवतापूजनं च तपश्च दानं च १०।११

तेषां तुच्छफलत्वमाह आद्यंतवंत इति एषां लोकाः एतैः साध्यानि फलानि तमोनिष्ठा मोहावसानाः भोगकाले
प्यसूयादिभिः शुचार्पिताव्याप्ताः ११ भक्तेस्तु सुखत्वमाह मयीति यावत्समाप्ति हे सभ्य मया परमानंदरूपेण आत्मना
स्वरूपत्वेन स्फुरता १२ किंचामेषां तत्तल्लोकादि परिच्छिन्नं तुच्छं सुखं भक्तस्य परिपूर्णमित्याह अकिंचनस्येति १३

आद्यंतवंत एवैषां लोकाः कर्मविनिर्मिताः दुःखोदर्कास्तमोनिष्ठाः क्षुद्रानंदाः शुचार्पिताः ११ मय्य
र्पितात्मनः सभ्य निरपेक्षस्य सर्वतः मयात्मना सुखं यत्तत्कुतः स्याद्विषयात्मनां १२ अकिंचनस्य दां
तस्य शांतस्य समचेतसः मया संतुष्टमनसः सर्वाः सुखमया दिशः १३ न पारमेष्ठ्यं न महेंद्रधिष्ण्यं
न सार्वभौमं न रसाधिपत्यं न योगसिद्धीरपुनर्भवं वा मय्यर्पितात्मेच्छति मद्विनान्यत् १४ न तथा मे
प्रियतम आत्मयोनिर्न शंकरः न च संकर्षणो न श्रीर्नैवात्मा च यथा भवान् १५ निरपेक्षं मुनिं शांतं नि
र्वैरं समदर्शनं अनुव्रजाम्यहं नित्यं पूयेयेत्यंघ्रिरेणुभिः १६ ॥

परिपूर्णतामेवाह न पारमेष्ठ्यमिति रसाधिपत्यं पातालादिस्वाम्यं अपुनर्भवं मोक्षमपि मद्विना मां हित्वा अन्यन्नेच्छति
अहमेव तस्य प्रेष्ठ इत्यर्थः १४ ममापि स एव प्रेष्ठ इत्याह न तथेति द्वाभ्यां आत्मयोनिर्ब्रह्मा पुत्रोपि शंकरो मत्स्वरूपभूतो
पि संकर्षणः भ्रातापि श्रीर्भार्यापि आत्मा आत्ममूर्तिरपि यथा भक्त इति वक्तव्ये तिहर्षेणाह भवानिति १५ पूयेयपदं तद्वर्ति
ब्रह्मांडानि पवित्रीकरोमीति भावेनेत्यर्थः १६

श्री
भा॰ पु॰
टी॰
६६

किंच मद्भक्तानां सुखमेतावदेवंभूतमिति को वा वक्तुं समर्थः यतः तत्स्वसंवेद्यं निरूपमं इत्याह निष्किंचना इति महान्तः
निरहंमानाः अनालब्धधियः अस्पृष्टचित्ताः निष्किंचनत्वादीनां यथैष्टहेतुमद्भावः एवंभूता मम मदीयाः यत्सुखं जुषंति से
वंते तत्सुखं त एव विदुः नान्ये कुतः नैरपेक्ष्यं नास्ति अपेक्षणीयं येषां ते निरपेक्षास्तैरेव च लभ्यं न तु मोक्षापेक्षैरपीत्यर्थः यद्वा
एवंभूताः संतो ये मम मामित्यर्थः जुषंते प्रीत्या निरंतरं एवं यन्नैरपेक्ष्यं सुखं तन्न विदुः नान्य इत्यन्वयः १७ अपि च अजितात्मा

निष्किंचना मय्यनुरक्तचेतसः शांता महांतोखिलजीववत्सलाः कामैरनालब्धधियो जुषंति यन्नैर-
पेक्ष्यं न विदुः सुखं मम १७ बाधमानोपि मद्भक्तो विषयैरजितेंद्रियः प्रायः प्रगल्भया भक्त्या विषयैर्ना-
भिभूयते १८ यथाग्निः सुसमृद्धार्चिः करोत्येधांसि भस्मसात् तथा मद्विषया भक्तिरुद्धवैनांसि कृत्स्न-
शः १९ न साधयति मां योगो न सांख्यं धर्म उद्धव न स्वाध्यायस्तपस्त्यागो यथा भक्तिर्ममोर्जिता २०
भक्त्याहमेकया ग्राह्यः श्रद्धयात्मा प्रियः सतां भक्तिः पुनाति मन्निष्ठा श्वपाकानपि संभवात् २१ धर्मः
सत्यदयोपेतो विद्या वा तपसान्विता मद्भक्त्यापेतमात्मानं न सम्यक् प्रपुनाति हि २२ ॥ ॥ ॥

वस्तुतः मद्भक्तकथायतः प्राकृतोपि भक्तः कृतार्थ एवेत्याह बाधमान इति द्वाभ्यां विषयैराकृष्यमाणोपि प्रग-
ल्भया समर्थया १८ पावकाद्यर्थं प्रज्वालितोग्निर्यथा काष्ठानि भस्म करोति तथा रागादिनापि कथंचिन्महि-
षया सती भक्तिः समस्तपापानीति भगवानपि स्वभक्तिमहिमाश्चर्येण संबोधयति अहो उद्धव विस्मयेश्चर्ये
ति १९ अत एवंभूतश्रेयो नान्यदस्तीत्याह न साधयतीति द्वाभ्यां २० श्रद्धया या भक्तिः तया संभवात् जातिदोषाद-
पीत्यर्थः २१ मद्भक्त्यभावे अन्यत्साधनं व्यर्थमित्याह द्वाभ्यां धर्म इति २२ ॥

श्री ॥

ब्राह्मणात् क्षत्रियायांजातो मूर्द्धावसिक्तः ब्राह्मण्यां वैश्येनोत्पादितः पारिषदः शूद्रां वैश्यः ब्राह्मण्यां क्षत्रियात्सूतः वैश्यायां वैदेहि
कः सूतः शूद्राज्जातश्चंडालः सर्वधर्मबहिष्कृतः ॥५१॥

किंच देहादीनां संसारधर्मैर्जन्माप्ययादिभिः यो हरेः स्मृत्याविमुह्यमानः स भागवतप्रधानः तत्र देहस्य जन्माप्ययौ प्राणस्य क्षुत्पिपासे
मनसो भयं बुद्धेस्तर्षः तस्मादिन्द्रियाणां कृच्छ्रं श्रमः ॥४९॥ न कामाश्च कर्माणि च बीजानि च वासनाः तेषां वासुदेव एको निलय आश्रयो यस्य
सः एतेन गृहीत्वापीत्यादि श्लोकत्रयेण देहधर्मैर्माद ॥ कामादिरहितत्वं च रतीति ॥ यथाचरतीत्यस्यान्तरमुक्तं ॥५०॥ यैर्लिंगैः भगवत्प्रियस्य
स्यात्तत्रमाह ॥ न यस्येति जन्मकुलं कर्म तपआदि जातयः अनुलोमप्रतिलोमजाः मूर्धावसिक्तादयः अस्मिन् देहे अहंकाररहितैः स
त्कुलकर्मादिलिंगैः हरेः प्रियो भवतीत्यर्थः ॥५१॥ वित्तेषु स्वीयपरकीयमिति ॥ आत्मनि स्वः पर इति ॥५२॥ किंच ॥ त्रिभुवनविभवहेत

स्त

देहेन्द्रियप्राणमनोधियां यो जन्माप्ययक्षुद्भयतर्षकृच्छ्रैः ॥ संसारधर्मैरविमुह्यमानः स्मृत्या हरेर्भागवतप्रधानः ॥४९॥
न कामकर्मबीजानां यस्य चेतसि संभवः ॥ वासुदेवैकनिलयः स वै भागवतोत्तमः ॥५०॥ न यस्य जन्मकर्मभ्यां न वर्णा
श्रमजातिभिः ॥ सज्जतेस्मिन्नहंभावो देहे वै स हरेः प्रियः ॥५१॥ न यस्य स्वः पर इति वित्तेष्वात्मनि वा भिदा ॥ सर्वभूतस
मः शांतः स वै भागवतोत्तमः ॥५२॥ त्रिभुवनविभवहेतवेप्यकुंठस्मृतिरजितात्मसुरादिभिर्विमृग्यात् ॥ न चलति भ
गवत्पदारविंदाल्लवनिमिषार्द्धमपि स वैष्णवाग्र्यः ॥५३॥ ॥ ॥ ॥

त्रैलोक्यराज्यार्थमपि

वेपि त्रैलोक्यराज्यार्थमपि लवार्द्धमपि निमिषार्द्धमपि भगवत्पदारविंदं भजनाद्यो न चलति स वैष्णवाग्र्यः ननु लवार्द्धमात्रम
जनेनापरमेवेन्द्रत्वं लाभो भवेत् तत्कुतो न चलेत् ॥ तत्राह ॥ अकुंठस्मृतिः ॥ भगवत्पदतोन्यत्सारं नास्तीत्येवंरूपा कुंठा अनपगता स्मृ
तिर्यस्य सः ॥ भगवत्पदारविंदादन्यत्सारं नास्तीति कुतः अत आह ॥ अजिते हरावेवात्मा येषां तथाभूतैः सुरादिभिरपि दुर्लभात् किं
तु केवलं विमृग्यात् न दृष्टेत एवं सर्वस्यतत्तुच्छत्वं स्मरन् न चलतीत्यर्थः ॥ ५२ ॥ ५३ ॥ राम ॥

यो

श्री॰
भा॰ ए॰
टी॰
१०

अपिचविषयाभिसंबंधिनावलनेनकामेनातिसंतापेसतिभवेत्सचकामोभगवत्सेवयानिवृत्तोभवतीत्याह भगवतउ
ति । उरुक्रमौचतावंघ्रीचतयोःशाखाअंगुलयः । तासांनखानितान्येवमणयः । तेषांचंद्रिकाशीतलादीप्तिः । तयानिरस्तःका
मादितापोयस्मिन्तस्मिन्नुपसीदतांभजतांहृदिकथंपुनःसतापःप्रभवतिचंद्रेउदितेसतिअर्कस्यतापइव नयस्यस्वःपर
इत्यादिनाश्लोकत्रयेणयाहृशइत्यस्योत्तरमुक्तंवेदितव्यं ॥ यद्दूतेइत्यस्यचहरिनामानीतिज्ञातव्यं ॥५४॥ उक्तसमस्तभा

उपसीदतांभजतां

भगवतउरुविक्रमांघ्रिशाखानखमणिचंद्रिकयानिरस्ततापे ॥ हृदिकथमुपसीदतांपुनःसप्रभवतिचंद्र
इवोदितेर्कतापः ॥५४॥ विसृजतिहृदयंनयस्यसाक्षाद्धरिरवशाभिहितोप्यघौघनाशः ॥ प्रणयरशना
याधृतांघ्रिपद्मःसभवतिभागवतप्रधानउक्तः ॥५५॥ इतिश्रीभागवतेप काद शस्कंधेद्वितीयोध्या
यः ॥ ॥२॥ ॥ श्रीराजोवाच ॥ ॥ परस्यविष्णोरीशस्यमायिनामपिमोहिनीं ॥ मायांवेदितुमिच्छामोभ

गवतल्लक्षणसारमाह ॥ विसृजतीति ॥ हरिरेवस्वयंसाक्षात्यस्यहृदयंनविसृजतिनमुंचतिकथंभूतः अवशेनाप्य
भिहितमात्रोपिअघौघंनाशयतियःसतत्किंनविसृजति ॥ यतःप्रणयरशनयाधृतंहृदयेनबद्धमंघ्रिपद्मंयस्यसः
भागवतप्रधानउक्तोभवति ॥५५॥ इतिश्रीभावार्थदीपिकायामेकादशेद्वितीयः ॥ ॥२॥ ॥ मायातत्तरणब्रह्मकर्मप्रश्ना
वनस्थले ॥ तृतीयेतूत्तरंतत्रआर्षभैर्मुनिभिःपृथक् ॥ विष्णोर्मायामिदंप्रपञ्चितंतत्रअतोमायामेवपृच्छतिपरस्येतिद्वे

नद्र्कलत्तणा भागवतो भूत्वा कृतार्थः स्याः किंच रूपैः प्रतश्नाद ॥ नातृप्यइति ॥ संसारतापैर्नितरां तप्तो हं तस्य तापस्य
भेषजं हरिकथामृतं तद्रूपं युष्मदुचोद्गतं समाणाणं नात्रतृप्यामि ॥ मायायाः स्वरूपतो निरूपणसंभवात् ॥ २ ॥ सृष्टादिकार्यद्वारेण
निरूपयितुमाह ॥ एभिरिति ॥ अन्वयः भूतगणैः यथा सर्वभूतानामात्मा कारणभूतः एभिः स्वसृष्टैर्महाभूतैर्नानाविधानि भूता
नि ससर्ज ॥ एषा माया भगवत इति ॥ चरमश्लोकपादस्य प्रतिश्लोकमनुषंगः किमर्थं ससर्ज ॥ स्वमायात्मप्रसिद्धये स्वं मिमीते प्रमि

स्वांशभूतानां जीवानां मध्यात्मप्रसिद्धये विषयभोगाय २

नातृप्येज्ञषन्युष्मदुद्धरिकथामृतं ॥ संसारतापनिष्टप्तो मर्त्यस्तत्तापभेषजं ॥ २ ॥ मैत्रेय उवाच ॥ एभिर्भू
तानि भूतात्मा महाभूतैर्महाभुज ॥ ससर्जोच्चावचान्याद्यः स्वमात्रात्मप्रसिद्धये ॥ ३ ॥ एवं सृष्टानि भूतानि प्रवि
ष्टः पंचधातुभिः ॥ एकधा दशधात्मानं विभजन्जुषते गुणान् ॥ ४ ॥ ॥ राम ॥ ॥ ॥ ॥ ॥

ज्ञात्मप्रसिद्धये भो
गायचेत्यर्थः २

मीते यः स उपाधिः स्वमात्रात्मनस्यात्मनो जीवस्य प्रकृष्टायै सिद्धये यद्वा स्वांशभूतानां जीवानां मात्राप्रसिद्धये विषयभोगाय स्वा
त्मप्रसिद्धये मात्रायेचेत्यर्थः ॥ तदुक्तं वेदस्तुतौ ॥ बुद्धीन्द्रियमनःप्राणान्जनानामसृजत्प्रभुः ॥ मात्रार्थं च भवार्थं च आत्मनेकल्प
नायचेति ॥ ३ ॥ एवं जीवोपकरणार्थं पंचधातुभिर्महाभूतैः सृष्टानि भूतान्यंतर्यामिरूपेण प्रविष्टः एकधा मनसा दशधा बाह्येंद्रि
यरूपेण आत्मानं विभजन्तः गुणान्नून तान्विषयान्जुषते जो बयतीत्यर्थः यद्वा तमात्मानं प्रतिगुणानं विभजन्तं जुषते प्रीयते इत्यर्थः ॥ ४

नत्नन्दर्वकर्मफलं च ... हृन्नयं देहमन्द्र भ्रमती ... ॥२

श्री० भा० टी० २२

स च जीव आत्मनं तत्त्योनिमिणा प्रद्योतितैर्गुणैरिंद्रियैर्गुणानं विषयान् भुंजान इदं सृष्टं शरीरमात्मानं मन्यमान इह शरीरा-
दौ सज्जते ॥५॥ कर्मभिः कर्मेंद्रियैस्तन्निमित्तानि सवासनानि कर्माणि कुर्वन्सुखेतरं सुखं दुःखं वात्मकं कर्मफलं ॥६॥ ब-
हून्यभद्राणि वहतीति तथा तः ॥ सर्गप्रलयौ उत्पत्तिमरणे ॥७॥ धातूनां महाभूतानामुपप्लवे नाशहेतौ आसन्ने व्यक्तं का-
वा
भू२

गुणैर्गुणान्स भुंजान आत्मप्रद्योतितैः प्रभुः ॥ मन्यमान इदं सृष्टमात्मानमिह सज्जते ॥५॥ कर्मणा कर्म-
भिः कुर्वन्सनिमित्तानि देहभृत ॥ तत्तत्कर्मफलं गृह्णन् भ्रमतीह सुखेतरं ॥६॥ इत्थं कर्मगतीर्गच्छन्बहु-
भद्रवहाः पुमान् ॥ आभूतसंप्लवात्सर्गप्रलयावश्नुते विभुः ॥७॥ धातूपप्लव आसन्ने व्यक्तं द्रव्यगुणात्मकं
अनादिनिधनः कालो ह्यव्यक्तायापकर्षति ॥८॥ शतवर्षाह्यनावृष्टिर्भविष्यत्युल्बणा भुवि ॥ तत्कालो-
पचितोष्णार्को लोकांस्त्रीन्प्रतपिष्यति ॥९॥ पातालतलमारभ्य संकर्षणमुखानलः ॥ दहन्नूर्ध्वशिखो
विष्वग्वर्द्धते वायुनेरितः ॥१०॥ संवर्तको मेघगणो वर्षति स्म शतं समाः ॥ धाराभिर्हस्तिहस्ताभिर्लीयते

र्यं द्रव्यं स्थूलं गुणाः सूक्ष्मं तदात्मकं अव्यक्तायाव्यक्तं प्रति नेतुमाकर्षति ॥८॥ नाशहेतुनाह शतवर्षेति तस्मि-
न्काले उपचित उष्णो ऽस्यास्तीत्युष्णः सार्कः सूर्यः ॥ यद्वा तेन कालेन उपचितमुष्णत्वं यस्य सः ॥९॥ ऊर्ध्वशिखः ऊर्ध्वज्वालः विष्व-
क्परितः ॥१०॥ संवर्तकः प्रलयकर्ता धाराभिर्जलबिंदुभिः हस्तिहस्ताभिः तत्प्रमाणाभि ॥ २२ ॥ ॥ ॥ राम ॥॥॥

राम
२२

ततउपाधिलयाद्वैराजः पुरुषोऽव्यक्तंकारणंप्रविशति नतुब्रह्मणा सहते सर्वे संप्राप्ते प्रतिसंचरे परस्यांते कृतात्मानः प्रविशंति
परंपदमिति ॥ स्मृतेर्यावदधिकारमवस्थितिराधिकारिणामिति न्यायाच्च वैराजस्याभिधेयस्य च ब्रह्मणः परमभागवतत्वात्
मोक्ष एव संगच्छते ॥ नान्येषामिव कारणमात्रप्रवेशः सत्यं ॥ अश्वमेधादिना सत्यलोकं गतानामप्यभक्तानां माहात्म्यश्रवणाद — व्यजनो ४
भक्तत्वेन ब्रह्मणापि प्रकृतौ लयः पुनरुत्पत्तिश्चेति मा तद्दौर्लभ्यसूचनायैव मुक्तमित्यविरोधः ॥ यद्वा केनापि प्रमाणेन नाव्यक्तं
ब्रह्मेव नत्प्रवेशेन च मोक्ष एवोक्त इति द्रष्टव्यं ॥ १० ॥ एवं विराजो लयमुक्त्वा तत्कारणानां महदादिपृथिव्यंतानां प्रातिलोम्येन लय

ततो विराजमुत्सृज्य वैराजः पुरुषो नृप ॥ अव्यक्तं विशते सूक्ष्मं निरिंधन इवानलः ॥ १४ ॥ वायुना हृतगंधा
भूः सलिलत्वाय कल्पते ॥ सलिलं तद्धृतरसं ज्योतिष्ट्वायोपकल्पते ॥ १५ ॥ हृतरूपं तु तमसा वायौ ज्योतिः
प्रलीयते ॥ हृतस्पर्शोऽवकाशेन वायुर्नभसि लीयते ॥ १७ ॥ कालात्मना हृतगुणं नभ आत्मनि लीयते ॥ इंद्रि
याणि मनो बुद्धिः सह वैकारिकैर्नृप ॥ प्रविशंति ह्यहंकारं स्वगुणैरहमात्मनि ॥ १८ ॥ राम ॥ ॥

यमाह ॥ वायुनेति ॥ वायोर्हि गंधवहत्वं प्रसिद्धं ॥ संवर्तकेन वायुना हृतगंधा ॥ अत एव गंधस्याव्यावर्तकस्य गतत्वा
त्सलिलत्वाय कल्पते ॥ सलिले लीयत इत्यर्थः ॥ तद्धृतरसं तेन वायुनैव हृतो रसो यस्य तत् ॥ १३ ॥ तमसश्च रूपतिरस्कारित्वं प्र
सिद्धं ॥ संवर्तकेन तमसा अवकाशेन आकाशेन स्वकारणेन ॥ १४ ॥ कालात्मना शब्दस्पर्शादिकाल एव नाशः प्रसिद्धः तद्रूपेण
त्मनाऽहंस्वरूपेण आत्मनि तामसाहंकारे इंद्रियाणि बुद्धिश्च राजसाहंकारे मनो वैकारिकैर्देवैः सह सात्त्विकाहंकारे एवं त्रिविधैः
स्वगुणैः स्वकार्यैः सहितः स एषोऽहंकारः आत्मनि महति स च प्रकृताविति द्रष्टव्यं ॥ १८ ॥ १५ ॥ राम ॥

श्री॰ भा॰ प॰ टी॰ ११

त्रिवर्णा त्रिगुणा माया अवृणभीतं राजानं तन्निरासोपायप्रश्नोत्कंठयति किं भूय इति ॥१६॥ एवमनुकंपितः त्रिवर्गोपायमेव पृच्छति ॥ यथैतामिति ॥ यद्यपि तन्मायया तातु थ आभजेत्तमिति ॥ भक्तिस्तारकत्वेनोक्तैव तथापि किं भक्तिरेव अन्योपि वा तत्तरणोपायोस्तीति जिज्ञासुः पुनः पृच्छः अकृतात्मभिः अवशीकृतांतःकरणैः स्थूलधियः स्थूले शरीरे अहं धीर्येषां ते भक्तिव्यतिरेकेण नास्त्यन्य उपाय इति ॥ अभिप्रेत्य भक्तिमेव ससाधनां निरूपयति ॥ तत्र प्रथमं वैराग्यद्वारा गुरूपसत्तिमाह चतुर्भिः कर्माणीति ॥ दुःखहत्यै दुःखप्रतीकाराय पाकविपर्यासं फलवैपरीत्यं मिथुनीचारिणां मिथुनीभू

एषा माया भगवतः सर्गस्थित्यंतकारिणी ॥ त्रिवर्णा वर्णितास्माभिः किं भूयः श्रोतुमिच्छसि ॥१६॥ राजोवाच ॥ यथैतामैश्वरीं मायां दुस्तरामकृतात्मभिः ॥ तरंत्यंजः स्थूलधियो महर्ष इदमुच्यतां ॥१७॥ प्रबुद्ध उवाच ॥ कर्माण्यारभमाणानां दुःखहत्यै सुखाय च ॥ पश्येत्पाकविपर्यासं मिथुनीचारिणां नृणां ॥१८॥ नित्यार्तिदेन वित्तेन दुर्लभेनात्ममृत्युना ॥ गृहापत्याप्तपशुभिः का प्रीतिः साधितैः चलैः ॥१९॥ एवं लोकं परं विद्यान्नश्वरं कर्मनिर्मितं ॥ सतुल्यातिशयध्वंसं य

यथा वर्तमानानां ॥१८॥ कर्मभिः साधिता अपि वित्तादयो न सुखहेतव इति च पश्येदित्याह ॥ नित्यार्तिदेनेति आत्मनः स्वस्य मृत्युरूपेण चलैः अनित्यैः अपार्थैः मिथ्या ॥१९॥ एवं लोकं परमिति कर्मनिर्मितं नश्वरम् ॥ तथा च श्रुतिः ॥ तद्यथेह कर्मचितो लोकः क्षीयते एवमेवामुत्र पुण्यचितो लोकः क्षीयत इति ॥ किंच वर्तमानसमयेऽपि दुःखं दुष्करं पश्येदित्याह ॥ सतुल्यातिशयध्वंसं समेन तुल्येन अतिशयेन ध्वंसेन च वर्तमानं ॥ अतस्तुल्यैः स्पर्धा अतिशये असूया ध्वंसात् भयादिकं चापरिहार्यमित्यर्थः ॥ यथा खंडमंडलपतीनां मिथः स्पर्धादि तद्वत् ॥२०॥ ॥ ॥ राम ॥ ॥ ॥ राम ॥

राम ११

उत्तमं श्रेयो ज्ञातुमिच्छुः शाब्दे ब्रह्मणि वेदाख्ये न्यायतो निष्णातं तत्त्वज्ञं ॥ अन्यथा संशयनिरासकत्वायोगात् परे च ब्रह्मणि अप
रोक्षानुभवेन निष्णातं ॥ अन्यथा संबोधसंचारायोगात् ॥ परब्रह्मनिष्णातत्वद्योतकमाह ॥ उपशमाश्रयमिति ॥ २१ ॥ गुरुरेवात्मा
दैवतं यस्य सः ॥ अनुवृत्त्या सेवया यैः धर्मैः वस्तुतः आत्मप्रदः स्वोपासकानां यथा बलिप्रभृतीनां ॥ २२ ॥ यथोचितमिति ॥ समेषु
मैत्री उत्तमेषु प्रश्रयं शिक्षेतेत्यर्थः ॥ २३ ॥ शौचं बाह्यं मृज्जलादिभिः ॥ आभ्यंतरं दंभमानादिभिः शिक्षेत तपः स्वधर्माचरणं ॥ ति

तस्माद्गुरुं प्रपद्येत जिज्ञासुः श्रेय उत्तमं ॥ शाब्दे परे च निष्णातं ब्रह्मण्युपशमाश्रयं ॥ २१ ॥ तत्र भागवतान्धर्मान् शिक्षेद्
गुर्वात्मदैवतः ॥ अमाययानुवृत्त्या यैस्तुष्येदात्मात्मदो हरिः ॥ २२ ॥ सर्वतो मनसोऽसंगमादौ संगं च साधुषु ॥ दयां मै
त्रीं प्रश्रयं च भूतेष्वद्धा यथोचितं ॥ २३ ॥ शौचं तपस्तितिक्षां च मौनं स्वाध्यायमार्जवं ॥ ब्रह्मचर्यमहिंसां च समत्वं द्वं
द्वसंज्ञयोः ॥ २४ ॥ सर्वत्रात्मेश्वरान्वीक्षां कैवल्यमनिकेततां ॥ विविक्तचीरवसनं संतोषं येन केनचित् ॥ २५ ॥ ताम

तितिक्षां क्षमां मौनं वृथावागुपरमं ॥ स्वाध्यायमधिकारानुरूपं वेदपाठादिकं ॥ आर्जवं सरलतां ब्रह्मचर्यं यस्य पाठे कृतवि
तेर्वर्जनं स्वदारनियमादि अहिंसां भूतेष्वद्रोहं ॥ द्वंद्वसंज्ञयोः शीतोष्णसुखदुःखादिरूपयोः समत्वं हर्षविषादराहित्यं ॥ २४ ॥ आत्मे
श्वरान्वीक्षां सच्चिद्रूपेणात्मेक्षां नियंतृरूपेणेश्वरान्वीक्षां च ॥ कैवल्यमेकान्तशीलत्वं ॥ अनिकेततां गृहाद्यभिमानराहित्यं विविक्त
चीरवसनं विजने पतितानां वस्त्रखण्डानां कुशानां वा वल्कलानां परिधानं ॥ २५ ॥ २५ ॥ २५ ॥ ॥ ॥

श्री॰
भा॰ ए॰
टी॰
२२

भागवते भगवत्प्र[illegible]तिपादके ॥ अन्यत्र पुराणादौ या अनिंदा तां मनसः प्राणायामैः वाचो मौनेन कर्मणो नीहया दंडं ॥ सत्यं
यथार्थभाषणम् ॥ शमदमौ अंतःकरणबाह्येंद्रियनिग्रहौ ॥२६॥ हरेर्जन्मकर्मगुणानां श्रवणादि ॥ तदर्थे हर्युद्देशेन सर्वकु
र्मविशेषतश्च यजनादि यत्तत्तत्तदर्थेपि शिक्षेत ॥२७॥ इष्टं दत्तमित्यादयो भावेनिष्ठाः वृत्तं सदाचारः आत्मनः प्रियं गंधपुष्पादि
दारादीन्प्राणान्तं यत्परस्मै परमेश्वराय निवेदनं सेवकतया समर्पणाय तत्तच्छिक्षेत ॥२८॥ कृष्ण एवात्मा नाथश्च येषां तेषु सख्या

श्रद्धां भागवते शास्त्रेऽनिंदामन्यत्र चापि हि ॥ मनोवाक्कर्मदंडं च सत्यं शमदमावपि ॥२६॥ श्रवणं कीर्तनं ध्यानं
हरेरद्भुतकर्मणः ॥ जन्मकर्मगुणानां च तदर्थेऽखिलचेष्टितम् ॥२७॥ इष्टं दत्तं तपो जप्तं वृत्तं यच्चात्मनः प्रि
यं ॥ दारान्सुतान्गृहान्प्राणान्यत्परस्मै निवेदनम् ॥२८॥ एवं कृष्णात्मनाथेषु मनुष्येषु च सौहृदं ॥ परि
चर्यां चोभयत्र महत्सु नृषु साधुषु ॥२९॥ परस्परानुकथनं पावनं भगवद्यशः ॥ मिथो रतिर्मिथस्तुष्टिर्नि
वृत्तिर्मिथ आत्मनः ॥ स्मरंतः स्मारयंतश्च मिथोऽघौघहरं हरिम् ॥ भक्त्या संजातया भक्त्या बिभ्रत्युत्पुलकां त
नुम् ॥ ३१ ॥ राम

त्मनो जीवस्य नाथो येषामिति वा तेषु ॥ उभयत्र स्थावरे जंगमे च या परिचर्या तां विशेषतो नृषु तत्रापि साधुषु स्वधर्मशीले
षु ततोपि महत्सु श्रीभागवतेषु तैः सह संगम्य यत्पावनं भगवद्यशः तस्य परस्परानुकथनं शिक्षेत ॥ यद्वायणः प्रतितत्र सं
स्पर्द्धादिपरित्यागेन मिथो या रतिः रमणं या च तुष्टिः यत्र च सुखं या च निवृत्तिः समस्तदुःखनिवृत्तिः तां च शिक्षेत ॥३०॥
एवं वर्तमानानां परमानंदप्राप्तिमाह ॥ स्मरंत इति हि येन भक्त्या साधनभूतया संजातया प्रेमलक्षणया भक्त्या फलरूपया उ
त्पुलकं तनुं रोदनमिति वेदितव्यं ॥ ३१ ॥ राम

राम॰

प्रजेहरिं प्रन प्रोलयंति तल्लीलामभिनयंति ॥ एवं परमेत्य प्राप्य निर्वृताः संतः स्वसंगीभवंति ॥ ३२ ॥ उपसंहरति इतीति भागवतधर्मान्सम्यक्तया
भक्त्या नारायणपरो मायांतरतीम्क्लेशकृति ॥ ३३ ॥ नारायणाभिधानस्येति निष्ठां स्वरूपं ॥ अत्र श्लोकाः ब्रह्मैवतावन्नारायणइतिभग
वानितिपरमात्मेति चोच्यते तदुक्तं वदंति तत्तत्त्वविदस्तत्त्वं यज्ज्ञानमद्वयं ॥ ब्रह्मेति परमात्मेति भगवानिति शब्द्यते तथा नारायणो भग
वतिनदिदं विश्वमाह्नितम् ॥ गृहीतमायोरुगुणः सर्गादावगुणः स्वतइत्यादिषु ॥ ३४ ॥ तत्र च किमेभिः शब्दैर्निर्विशेषं तदेव वा

क्वचिद्रुदंत्यच्युतचिंतया क्वचिद्धसंति नंदंति वदंत्यलौकिकाः ॥ नृत्यंति गायंत्यनुशीलयंत्यजं भवंति तूष्णीं परमे
त्य निर्वृताः ॥ ३२ ॥ इति भागवतान्धर्मान्शिक्षन्भक्त्या तदुत्थया ॥ नारायणपरो मायामंजस्तरति दुस्तराम् ॥ ३३ ॥
राजोवाच ॥ नारायणाभिधानस्य ब्रह्मणः परमात्मनः ॥ निष्ठामर्हथ नो वक्तुं यूयं हि ब्रह्मवित्तमाः ॥ ३४ ॥ पिप्प
लायन उवाच ॥ स्थित्युद्भवप्रलयहेतुरहेतुरस्य यत्स्वप्नजागरसुषुप्तिषु सद्बहिश्च ॥ देहेंद्रियासुहृदयानि
चरंति येन संजीवितानि तदवेहि परं नरेंद्र ॥ ३५ ॥ ॥

रुच्यते ॥ अस्ति वा कोपि विशेषो वा इति अत्रोत्तरं स्थित्युद्भवेति ॥ अयमर्थः अस्य विश्वस्य स्थित्युद्भवप्रलयानां हेतुः स्वयं च अहे
तुः हेतुरहितः ॥ स नारायण इति परमेव तत्त्वमवेहि ॥ स्वप्नजागरसुषुप्तिषु सत् ॥ अनुवर्तमानं यत्तत्वस्तु ति चतुर्थं त्रिषु संतत
मितिवहिश्च समाध्यादौ यत्केवलं वर्तमानं तदपि ब्रह्मेति बृंहणाद्ब्रह्मगत्नमित्यर्थः ॥ तस्मात्परमेव तत्त्वमवेहि देहेंद्रियप्राणा
मनांसि येन संजीवितानि संति चरंति प्रवर्तंते तत्परमात्मेति परमेव तत्त्वमवेहि ॥ एवं लक्षणभेदेन नारायणादिनामभिः ॥ उच्यमा

श्री॰ भा॰ प॰ टी॰ २४

अवेद्धीत्यनेन विषयत्वं प्राप्तं निषेधति नैतदिति ॥ यतस्यपरं तत्त्वं मनो न विशति न विषयीकरोति वागुतवाणापि च तद्ब्रह्म आत्मा बु-
द्धिः प्राणश्च क्रियाशक्त्या न प्राप्नोति ॥ अन्यानि चेंद्रियाणि यथानलं स्वाः स्वांशभूता अर्चिषो विस्फुलिंगादयः न प्रकाशयंति न-
दहंति च तथा जडात्मकमनआदिवृत्तिषु अभिव्यज्यमानस्यात्मप्रकाशस्य ॥ तद्वृत्ति प्रकाशकस्य न तत्प्रकाशविषयत्वं यथा दीपस्य १८:३
प्राणस्य प्राणं उत चक्षुषश्चक्षुरुत श्रोत्रस्य श्रोत्रमन्नस्या न्नं मनसो ये मनो विदुरिति ॥ तथा यतो वाचो निवर्तंते अप्राप्य मनसा-
सह ॥ नन्वतं त्वौपनिषदं पुरुषं पृच्छामीति श्रुतेः शास्त्रगोचरत्वं प्रतीयते तत्राह ॥ शास्त्रेपीति ॥ शास्त्रेपि आत्ममूलं आत्मनि प्रमाणस्-

नैतन्मनो विशति वागुत चक्षुरात्मा प्राणेंद्रियाणि च यथान-
लमर्चिषः स्वाः ॥ शास्त्रेपि बोधकनिषेधतयात्ममूलमर्थोक्त-
माह यदहतेन निषेधसिद्धिः ॥ २६ ॥ ॥ राम ॥

त ॥ अर्थोक्तं अर्थाडुक्तं यथा भवति तथाह न साक्षात् ॥ अतः बोधकनिषेधतया स्वस्यैव बोधकस्य निषेधरूपत्वात् ॥ यतो वा-
चो निवर्तंते अप्राप्य मनसा सह ॥ यद्वाचानभ्युदितं येन वागभ्युद्यते तदेव ब्रह्म त्वं विद्धि ॥ यन्मनो न मनुते न चक्षुषा पश्य-
तिकश्च नेनमित्यादिश्रुतितः ॥ ननु तर्हि नैवाह ॥ श्रुतिः तत्किमिदं समुच्यते ॥ अर्थोक्तमाहेति तत्राह यदहत इति ॥ अथात आदेशो
नेति नेति अस्थूलमनण्वु यतो वाचो निवर्तंते ॥ यद्वाचानभ्युदितमित्यादि निषेधस्य यदवधिभूतं ब्रह्म तज्ज्ञानेन विना सिद्धिर्नास्ति राम २४

ननु तर्हि [illegible] प्रमाणाविषयत्वान्नास्ति ब्रह्मेति प्रसज्यते ॥ अत आह सत्त्वमिति ॥ सत् स्थूलं कार्यं असत् । सूक्ष्मं कारणं तत्सर्वं
ब्रह्मैव भाति ऊतः यद्यस्मात् ॥ तयोः सदसतोः परं कारणं ननु कथमेकं बहुविधस्य कारणं तत्राह उरुशक्तिः अनेकशक्तिमत् ॥ उ
रुमेहती मायालक्षणा शक्तिर्यस्य तदिति वा बहुधा भानमेव दर्शयति ॥ आदौ यदेकं ब्रह्म तदेव सत्त्वं रजस्तम इति त्रिवृत्तथानं

सत्त्वं रजस्तम इति त्रिवृदेकमादौ सूत्रं महानहमिति प्रवदंति जीवं ॥ ज्ञानक्रियार्थफ
लरूपतयोरुशक्तिर्ब्रह्मैव भाति सदसच्च तयोः परं यत् ॥ ३० ॥ रामायनमः ॥ ॥
॥ राम ॥

प्रवदंति हि ततः क्रियाशक्त्या सूत्रं ज्ञानशक्त्या महानिति तदेव प्रवदंति तत आह मिति जीवं जीवोपाधिमहंकारं च तदेव
प्रवदंति ॥ तत श्च ज्ञानक्रियार्थफलरूपतया ॥ ज्ञानशब्देन देवताः क्रिया इंद्रियाणि अर्था विषयाः फलं तत्प्रकाशः सुखादि
रिवानरूपतया ब्रह्मैव भाति ॥ नहि सर्वरूपेण स्वतो भासमानस्य ब्रह्मणः स्वसिद्धौ प्रमाणापेक्षेति भावः ॥ ३० ॥ ॥ ॥ राम ॥ ॥

श्री॰
भा॰ए॰
टी॰
२५

ननु सर्वात्मकं चेद्ब्रह्म तर्हि सर्वस्य कार्यस्य जन्मादिविकारवत्त्वाद्ब्रह्मणोपि तत्प्रसंगः स्यादत आह आत्मेति आत्मा ब्रह्म न जजान न जातः जन्माभावादेव तदनंतरास्तितालक्षणोपि विकारो नास्ति नैधते न वर्धते॥ वृद्ध्यभावादेव विपरिणामोपि निरस्तः अतः क्षियस्मात् व्यभिचारिणाम् आगमापायिनां बालयुवादिदेहानां सवनवित् ॥ तत्तत्काल इष्टा तत्तदवस्थावतां द्रष्टा तदवस्थो भवतीत्यर्थः॥ निरवस्थः कोसावात्मात आह उपलब्धिमात्रमिति न चायातं

नात्मा जजान न मरिष्यति नैधतेसौ न क्षीयते सवनविद्व्यभिचारिणां हि॥ सर्वत्र शश्वदनपाय्युपलब्धिमात्रं प्राणो यथेंद्रियबलेन विकल्पितं सत् ॥३८॥

तर्हि क्षणिकत्वं नेत्याह॥ सर्वत्रेति सर्वत्र देशे प्रशश्वत् सर्वदा अनपायि अनुवर्तमानं॥ ननु नीलज्ञानं जातं पीतज्ञानं नष्टमिति प्रतीतेर्ज्ञानस्यानपायित्वं॥ अत आह॥ इंद्रियबलेनेति॥ सर्वदैव ज्ञानं इंद्रियबलेन विविधं कल्पितं नीलाद्याकाराद्युत्पत्त्यैव जायते नश्यतीति च न ज्ञानमिति भावः॥ व्यभिचारिष्वव्यभिचारे दृष्टांतः प्राणो यथेति॥३॥ राम
२५

॥राम॥

एवंव्यवसितइत्यादिनाकथयति ॥ व्यवसितः कृतनिश्चयः संजह्रेउपसंहृतवान्तदेवंअवतारप्रयोजनंसर्वेषांपापघ्नत्वंलोके१
जगामेत्यादिश्लोकद्वयेनस्वमूर्त्येतिलोकानांलावण्यनिर्मुक्तिः त्यागोयथार्थमुपेत्यलोकेषुलावण्यंनास्तीत्यर्थः ॥ यद्वालो
केभ्योलावण्यस्यविनिर्मुक्तिर्दानंयतः ॥ यत्तंपर्केणलोकालावण्यवंतोभवंतीत्यर्थः ॥ तयास्वमूर्त्याचरणलोचनमाक्षिप्य१
स्याकृष्यततोन्यस्यावलोकनेलोचनस्याप्रवृत्तेः ॥ तथास्वगीर्भिःतागिरःस्मरतांचित्तंचाक्षिप्यतथापदैः तत्रतत्रांकितैःता१

एवंव्यवसितोराजन्नसत्यसंकल्पईश्वरः ॥ शापव्याजेनविप्राणांसंजह्रेस्वकुलंविभुः ॥५॥ स्वमूर्त्यालोकलाव
ण्यनिर्मुक्त्यालोचनंनृणां ॥ गीर्भिःताः स्मरतांचित्तंपदैस्तानीक्षतांक्रियाः ॥६॥ आक्षिप्यकीर्तिंसुश्लोकांवि
तत्यह्यंजसानुकौ ॥ तमोनयातरिष्यंतीत्यगात्स्वंपदमीश्वरः ॥७॥ ॥ राम ॥ ॥ ॥ रामायनमः
॥॥ ॥ श्रीरामायनमः ॥ ॥ ॥
॥राम॥ कोः वी

निपदानीक्षतांईक्षमाणानांअन्यतोगमनादिकाःक्रियाआक्षिप्यतदानीतनानांसर्वेषांवक्तृत्वादिप्रवृत्तौत्वैकनिष्ठाः
कृत्वेत्यर्थः ॥ किंचइतउपरिजनिष्यमाणानांसंसारतरणायकोमलांशोभनाःश्लोकायस्यांतांस्वकीर्तिंवितत्यविस्ता
र्यअनयाकीर्त्याअंजसासुखेनैवतमोनिश्चितंतरिष्यंतीत्यभिप्रेत्येश्वरःस्वंपदंस्थानमगादिति ॥७॥ राम ॥ ॥ ॥ राम

श्री॰
भा॰ ए॰
टी॰
२

अब्रह्मण्येभ्य अवदातृभ्यो वा असेवकेभ्यो वा विप्राः कुप्यंति वृष्णयस्तु न तथेत्याह ॥ किं च कोपे जातेपि कृष्णचेतसां कथमभू-
त्कथं शापो ऽभूदित्यर्थः ॥ अतः शापस्य निमित्तस्याभावात् ॥ निमित्तांतरं पृच्छति ॥ यन्निमित्त इति एकात्मनां एकचित्तानां कथं
भेदः कलहः ईश्वरेच्छैवात्र निमित्तमिति परिहरति ॥ बिभ्रदिति ॥ सकलानां सुंदरवस्तूनां संनिवेशो विन्यासविशेषो यस्मिं-
स्तत् वपुर्बिभ्रत् ॥ तर्हि किमिति सौंदर्योद्विषयपरः ॥ न सुमंगलं कर्माचरन् ॥ तत्किं कयाति कामनया न आप्तकामः

श्रीराजोवाच ॥ ब्रह्मण्यानां वदान्यानां नित्यं वृद्धोपसेविनाम् ॥ विप्रशापः कथमभूद्वृष्णीनां कृष्णचे-
तसाम् ॥ ८ ॥ यन्निमित्तः स वै शापो यादृशो द्विजसत्तम ॥ कथमेकात्मनां भेद एतत्सर्वं वदस्व मे ॥ ९ ॥
श्रीशुक उवाच ॥ बिभ्रद्वपुः सकलसुंदरसन्निवेशं कर्माचरन्भुवि सुमंगलमाप्तकामः ॥ आस्थाय धाम रम-
॥ माण उदारकीर्तिः संहर्तुमैच्छत कुलं स्थितकृत्यशेषः ॥ १० ॥

२

तर्हि किमिति कर्माचरति धामस्वस्थानं आस्थाय रममाणः गृहेषु रममाणानां गृहस्थानां कर्म ग्राहयितुमित्यर्थः
ननु किमाप्तस्य गृहे रत्या कर्मभिर्वा तत्राह उदारकीर्तिः ॥ बहुफलप्रदा कीर्तिर्यस्य सः कीर्तिवितानार्थमित्यर्थः ॥ एवं परमेश्व-
रेणावर्तमानेन एव कुलं संहर्तुमैच्छत ॥ तत्कस्य हेतोः स्थितः कृत्यस्य भारहरणस्य शेषो यस्य सः ॥ २० ॥ ॥ ॥ ~ ॥ ॥॥२० राम
२

ईश्वरेच्छयोत्थितं ब्रह्मशापं निमित्तं कृत्वा वक्तुमाह ॥ कर्माणीति कर्मार्थमाहूतः कर्माणि कृत्वानि सृष्टा मुनयः तपोधनाः पिंडा
रकं समगमन्नित्यन्वयः निसृष्टाः प्रस्थापिताः ॥ एवं सुदारकीर्तिं तां विवृण्वन् कर्माणि विशिनष्टि पुण्यनिवहानीत्यादि
भिः त्रिभिः पदैः कृतिविदश्वमेधादिकर्माणि पुण्यमेव जनयंति ॥ एते तु पलालनादीनि तत्कालस्थमेव कुर्वंति प्रायश्चि
त्तादीनि तु पापमेव हरंति ॥ एतानि तु सर्वसुखानीत्याह ॥ पुण्यनिवहानि कीर्तनादिना पुण्यानि निवहंति प्रापयंतीति तथा

कर्माणि पुण्यनिवहानि सुमंगलानि गायज्जगत्कलिमलापहराणि कृत्वा ॥ कालात्मना निवसता यदुदे
वगेहे पिंडारकं समगमन्मुनयो निसृष्टाः ॥११॥ विश्वामित्रोऽसितः कण्वो दुर्वासा भृगुरंगिराः ॥ कश्यपो वाम
देवोऽत्रिर्वसिष्ठो नारदादयः ॥१२॥ क्रीडंतस्तानुपव्रज्य कुमारा यदुनंदनाः ॥ उपसंगृह्य पप्रच्छुरविनीता विनी
तवत ॥१३॥ ते वेषयित्वा स्त्रीवेषैः सांबं जांबवतीसुतम् ॥ कृत्वोदरे च सम्मदह्वस्त्राद्यैर्यदुनंदनाः ॥१४॥ एषा पृच्छ
ति वो विप्रा अंतर्वत्न्यसितेक्षणा ॥ प्रष्टुं विलज्जती साक्षात्प्रब्रूतामोघदर्शनाः ॥ प्रसोष्यंती पुत्रकामा किंस्वित्
संजनयिष्यति ॥१५॥

सुमंगलानि श्रुतिसुखात्मकानि गायतो जगतः कलिमलापहराणि कृत्वा मुनिशस्थापने हेतुः कालात्मना संहारकर
रूपेण वसुदेवगृहे निवसता स्वकुलं संजिहीर्षता तेन सृष्टाः ॥ पिंडारके तु तेनातिहृष्टेति तीर्थविशेषः ॥११॥ उपसंगृह्य पादग्रहं कृत्वा
१३ ॥ प्रश्नप्रकारमाह द्वयेन ॥ ते वेषयित्वेति ॥१४॥ हे अमोघदर्शना विप्राः एषा अंतर्वत्नी गर्भिणी वः युष्मान्साक्षात्प्रष्टुं विलज्ज
माना अस्मन्मुखेन पृच्छति ॥ प्रसोष्यंती आसन्नप्रसवा किंस्वित्संजनयिष्यति कन्यां वा पुत्रं वा तत्स्वरूपत ॥१५॥ राम ॥ ॥

प्रलब्धाःवंचिताः॥२५॥ तस्मिन्नुदरेअयस्मयंलोहमयं॥२६॥ मंदभाग्यैरस्माभिःकिमेतत्कृतं॥ नःअस्मान्किंवदिष्यंती
ति विह्वलिताः संतोमुसलमादायगेहान्ययुः॥२७॥ राज्ञेउग्रसेनायनतुश्रीकृष्णाय॥२८॥२९॥ आहुकःउग्रसेनः सोपि
वसुदेवसहितः॥ श्रीकृष्णमपृष्ट्वैवप्रास्यत प्रक्षिप्तवान्॥३०॥ अस्यमुसलस्यचूर्णीक्रियमाणस्यावशेषितंलोहंचप्रास्यततरलैः

एवंप्रलब्धामुनयस्तानूचुःकुपितान्नृप। जनयिष्यतिवोमंदामुसलंकुलनाशनं॥२५॥ तच्छ्रुत्वातेतिसं-
त्रस्ताविमुच्यसहसोदरम्॥ सांबस्यददृशुःतस्मिन्मुसलंखल्वयस्मयं॥२६॥ किंकृतंमंदभाग्यैर्नः॥ किंवदिष्यं-
तिनोजनाः॥ इतिविह्वलितागेहानादायमुसलंययुः॥२७॥ तच्चोपनीयसदसिपरिम्लानमुखश्रियः॥ राज्ञआवे-
दयांचक्रुःसर्वयादवसन्निधौ॥२८॥ श्रुत्वामोघंविप्रशापंदृष्ट्वाचमुसलंनृप॥ विस्मिताभयसंत्रस्ताबभूवुर्द्वा-
रिकौकसः॥२९॥ तच्चूर्णयित्वामुसलंयदुराजःसआहुकः॥ समुद्रसलिलेप्रास्यल्लोहंचास्यावशेषितम्॥३०
किंचिन्मत्स्योग्रसील्लोहंचूर्णानितरलैस्ततः॥ उह्यमानानिवेलायांलग्नान्यासन्किलैरकाः॥३१॥ मत्स्योगृ-
हीतोमत्स्यघ्नैर्जालेनान्यैःसहार्णवे॥ तस्योदरगतंलोहंसशल्येलुब्धकोकरोत॥३२॥ भगवान्ज्ञातसर्वा-
र्थईश्वरोपितदन्यथा॥ कर्तुंनैच्छद्विप्रशापंकालरूप्यन्वमोदत॥३३॥ इतिश्रीभगवतेपकादशेस्कंधेप्रथ
मः॥१॥ हरिः हरि

तरंगैः॥३१॥ एरकाः प्रसिद्धतृणविशेषाः॥ अन्यैर्मत्स्यैःसह॥ शल्ये शराग्रे॥३२॥ ज्ञाताःसर्वेर्थायेनसः ईश्वरोपिसमर्थो
पितत्वन्यथाकर्तुंनैच्छत्॥ किंचान्वमोदत यतःकालरूपी॥३३॥ इतिश्रीभावार्थदीपिकायांएकादशेप्रथमः॥१॥॥ राम

द्वितीयेनिमिजायंतसंवादेनाह नारदः धर्मान्भागवतान्भक्त्यावसुदेवायपृष्टकृते ॥ अभीष्टांअवस्थापितोपि पुनः पुनर्वासीदित्यर्थः
ननुनारदस्यदत्तादिशापोनैकत्रवासः संभवतिइत्याशंक्याह गोविंदभुजगुप्तायामिति ॥ नतस्यशापादेः प्रभावइत्यर्थः ॥ कृष्णोपा
सनेल्लालसाउत्कंठां [illegible] यस्यसः ॥ यज्ञजनेभक्तानामपीदृशोमोत्कंठंतत्कोन्वनामनभजेदित्याहकोन्विति इंद्रियवानितिर
इंद्रियवत्त्वमात्रमेवयत्राधिकारीविशेषणमित्यर्थः ॥ सर्वतः सर्वेष्वपिलोकेषुमृत्युर्यस्यसः ॥ २ ॥ यद्यपिच्छेदोयोगोत्राआगमनंअपत्या

श्रीशुकउवाच ॥ ॥ गोविंदभुजगुप्तायांद्वारवत्यांकुरूद्वह ॥ अवात्सीन्नारदोभीक्ष्णंकृष्णोपासनलालसः
१ ॥ कोनुराजन्निंद्रियवान्मुकुंदचरणांबुजम् ॥ नभजेत्सर्वतोमृत्युरुपास्यममरोत्तमैः ॥ २ ॥ तमेकदातुदेवर्षिंवसुदे
वोगृहमागतं ॥ अर्चितंसुखमासीनमभिवाद्येदमब्रवीत् ॥ ३ ॥ श्रीवसुदेवउवाच ॥ भगवन्भवतोयात्रास्वस्तयेसर्व
देहिनां ॥ कृपणानांयथापित्रोरुत्तमश्लोकवर्त्मनां ॥ ४ ॥ भूतानांदेवचरितंदुःखायचसुखायच ॥ सुखायैवहिसाधू
नांत्वादृशामच्युतात्मनां ॥ ५ ॥ भजंतियेयथादेवान्देवाअपितथैवतान् ॥ छायेवकर्मसचिवाः साधवोदीनवत्सलाः
॥ ६ ॥ राम ॥

नांस्वस्त्ययेमंगलाय ॥ तथाचोत्तमश्लोकस्यवर्त्मभूतानांमहतांयात्राकृपणानांस्वस्तयेतथाभगवद्रूपस्यभवतोयात्रासर्व
देहिनांस्वस्त्ययइति ॥ ४ ॥ देवैरपिमहतामुपमानमनुचितमित्याह ॥ देवानांचरितंअतिवृष्ट्यादिनाभूतानांदुःखायापिभवति त्वादृ
शांत्वयामहदशानांअच्युतआत्मायेषांतेषांकिंच सुखंकुर्वंतोपिदेवाभजनानुसारेणकुर्वंतिनतथासाधवइत्याहभजंतीतिछाया
येव ॥ यथापुरुषोयावत्करोतितावदेवतस्यछायापितथाकर्मसचिवाः कर्मसहायाः ॥ ६ ॥ ॥ ॥ रामायनमः ॥ ॥ ॥ ॥ ॥

श्री॰
भा॰ए॰
टी॰
५

तदेवंयद्यपिभवतआगमनमात्रेणैववयंकृतार्थाः तथापिपृछामः॥तवेति तवयेधर्मैः प्रसन्नोभगवान्तानित्यर्थः॥७॥ ननुत्व
त्तोपिकिमन्योभगवत्प्रसादपात्रमस्ति तत्राह॥अहंकिलेतिभुविप्रजार्थोपूजयंपुत्रलाभप्रयोजनाः सन्नपूजितवान्नकिले
निस्तत्तीकृद्धेभगवदुक्तंवचनमनुस्मरंति॥अतोयथावयंमुच्येमहितथानोस्मान्शाधिशिक्षयेत्यर्थः॥८॥ विचित्राणिव्य
सनानियस्मिन्तस्मात्संसारात्॥तथाविश्वतःसर्वतोभयंयस्मिन् भवद्भिर्हेतुभूतैः अंजसाअनायासेन॥अद्धासाक्षा

ब्रह्मंस्तथापिपृछामोधर्मान्भागवतांस्तव॥ यान्श्रुत्वाश्रद्धयामर्त्योमुच्यतेसर्वतोभयात्॥७॥अहंकि
लपुरानंतंप्रजार्थोभुविमुक्तिदम्॥ अपूजयंनमोक्षायमोहितोदेवमायया॥८॥ यथाविचित्रव्यसनाद्भवद्भि
र्विश्वतोभयात्॥मुच्येमह्यंजसैवाद्धातथानःशाधिसुव्रत॥९॥श्रीशुकः॥ ॥राजन्नेवंकृतप्रश्नोवसुदेवेन
धीमता॥प्रीतस्तमाहदेवर्षिर्हरेःसंस्मारितोगुणैः॥१०॥नारदउवाच॥सम्यगेतद्व्यवसितंभवतासात्व
तर्षभ॥यत्पृछसेभागवतान्धर्मांस्त्वंविश्वभावनान्॥११॥श्रुतोनुपठितोध्यातआदृतोवानुमोदितः स
द्यःपुनातिसद्धर्मोदेवविश्वद्रुहोपिहि॥१२॥ ॥राम

तनिश्चयेनच॥हरेर्गुणैर्वर्णनीयत्वेनप्रस्तुतैः प्रारब्धैः हरिंसंस्मारितइत्यर्थः॥१०॥ प्रीतिमाविष्करोतिसम्यगितिद्वि
भिः॥पृछसेपृछसि विश्वभावनान्॥सर्वशोधकान्॥११॥आदृतःआस्तिकेनगृहीतःअनुमोदितःपरैः क्रियमाणः
संस्ततःसद्धर्मोभागवतोधर्मः॥देवद्रुहेवसदेवेत्यर्थः यद्वादेवेभ्योविश्वस्मैचद्रुह्यंतियेतानपि॥१२॥राम ॥॥ ॥राम

राम
५

किंचत्वयामहानुपकारः कृतइत्याहत्वयेति॥ पुण्येश्रवणकीर्तनेयस्यसः॥१३॥ अत्रापिभगवद्धर्मनिर्णयेपिविदे
हस्यजनकस्य॥१४॥ आर्षभाणामुत्पत्तिंसान्वयांविविच्यकथयतिसत्रिभिः प्रियव्रतइति॥१५॥ मोक्षधर्मविव
क्षयामोक्षधर्माणांवक्तुमिच्छया॥ अवतरणमवतारः॥ अवतीर्णंवासुदेवांशमित्याहुः॥ तस्यचवेदपारगंसुतशतमा
सीत॥१६॥ तेषांऋषभसुतानांमध्येनवयोगेश्वराणांचरितंवक्तुमितरेषांचरितंततोविविच्याह॥ तेषामिति॥ एतदज

त्वयापरमकल्याणः पुण्यश्रवणकीर्तनः॥ स्मारितोभगवानद्यदेवोनारायणोमम॥१३॥ अत्राप्युदा
हरंतीममितिहासंपुरातनं॥ आर्षभाणांचसंवादंविदेहस्य महात्मनः॥१४॥ प्रियव्रतोनामसुतोमनोः
स्वायंभुवस्ययः॥ तस्याग्नीध्रस्ततोनाभिःऋषभस्तत्सुतःस्मृतः॥१५॥ तमाहुर्वासुदेवांशंमोक्षधर्मविव
क्षया॥ अवतीर्णंसुतशतंतस्यासीद्ब्रह्मपारगम्॥१६॥ तेषांवैभरतोज्येष्ठोनारायणपरायणः॥ विख्या
तंवर्षमेतद्यन्नाम्नाभारतमद्भुतम्॥१७॥ सभुक्तभोगांत्यक्त्वेमांनिर्गतस्तपसाहरिम्॥ उपासीनस्तत्पदवीं
लेभेवैजन्मभिस्त्रिभिः॥ तेषांनवनवद्वीपपतयोस्यसमंततः॥ कर्मतंत्रप्रणेतारएकाशीतिर्द्विजातयः॥१९॥
नवाभवन्महाभागामुनयोह्यर्थशंसिनः॥ श्रमणावातरशनाआत्मविद्याविशारदाः॥२०॥ राम॥

जनाभंनामवर्षंयस्यनाम्नाभारतमित्यद्भुतंविख्यातमासीत॥ एतेनतस्यधर्मातिरेकोनिरूपितः॥१७॥ इमांपृथ्वींगृहान्नि
र्गतः हरिमुपासीनः सेवमानःसन्॥१८॥ नवसुताः नवद्वीपपतयः नवानांब्रह्मावर्तादिभूखंडानां॥ पतयः अस्यभारत
वर्षस्यएकाशीतिःसुताःकर्ममार्गप्रवर्तकाः ब्राह्मणाबभूवुः॥१९॥ अर्थशंसिनःपरमार्थनिरूपकाः श्रमणाःश्रमव
न्तः॥ आत्माभ्यासेकृतश्रमाइत्यर्थः वातरशनाः दिगंबराः॥ आत्मविद्यायांविशारदाः निस्नाताः॥२०॥॥ राम॥

श्री॰ भा॰ ए॰ टी॰ ९

तेषांपारमहंस्यचरितमाहद्वाभ्यां॥ तएतइतिभगवद्रूपंविश्वंरूपश्यतः सदसदात्मकंस्थूलसूक्ष्मरूपंतच्चस्वाव्यतिरेकेण
पश्यतः॥२२॥ अव्याहताअप्रतिहताइष्टाअभिप्रेतागतिर्येषांतेसुराद्यनासक्ताः॥२३॥ महात्मनोनिमेःवितायमानंप्र
वर्त्यमानं॥ अजनाभेभारतवर्षे॥२४॥ यजमानोनिमिः अग्नयःआहवनीयादयःविप्राऋत्विगादयः॥२५॥ अभिप्रेत्य

कविःहरिरंतरिक्षःप्रबुद्धःपिप्पलायनः॥ आविर्होत्रोथद्रुमिलश्चमसःकरभाजनः॥२१॥ तएतेभग
वद्रूपंविश्वंसदसदात्मकम्॥ आत्मनोव्यतिरेकेणपश्यंतोव्यचरन्महीम्॥२२॥ अव्याहतेष्टगतयःसुरसि
द्धसाध्यगंधर्वयक्षनरकिन्नरनागलोकान्॥ मुक्ताश्चरंतिमुनिचारणभूतनाथविद्याधरद्विजगवांभु
वनानिकामं॥२३॥ तएकदानिमेःसत्रमुपजग्मुर्यदृच्छया॥ वितायमानमृषिभिरजनाभेमहात्मनः
॥२४॥ तान्दृष्ट्वासूर्यसंकाशान्महाभागवतान्नृप॥ यजमानोग्नयोविप्राःसर्वएवोपतस्थिरे॥२५॥ विदे
हस्तानभिप्रेत्यनारायणपरायणान्॥ प्रीतःसंपूजयांचक्रेआसनस्थान्यथार्हतः॥२६॥ तान्रोचमाना
न्स्वरुचाब्रह्मपुत्रोपमान्नव॥ पप्रच्छपरमप्रीतःप्रश्रयावनतोनृप॥२७॥ विदेहउवाच॥ मन्येभगवतः
साक्षात्पार्षदान्वोमधुद्विषः॥ विष्णोर्भूतानिलोकानांपावनार्थंचरंतिहि॥२८॥ रामायनमः॥

ज्ञात्वा॥२६॥ स्वरुचैवरोचमानानन्त्वाभरणादिप्रकाशैः ब्रह्मपुत्रोपमान्सनत्कुमारादिसदृशान्परमप्रीत्या
॥२७॥ तद्दर्शनममभिनंदतिद्वाभ्यांमन्यइतिनन्वभगवतःपार्षदानांकथमत्रोपलब्धिः॥ तत्राह विष्णोरिति॥ विश्वंभर राम ९
स्यालोकपावनार्थंसर्वत्रपर्यटनंतीर्थैः॥ राम

मायाद्दुर्लभं लब्ध्वा महो भाग्यमित्याह॥ दुर्लभ इति॥ बहवो देहा भवंति येषां त्वदेहिनो जीवास्तेषां क्षणभंगुरोपि मानुषो देहो दुर्लभः प-
रमपुरुषार्थसाधनत्वात्॥ वैकुंठः प्रियो येषां वैकुंठस्य वा प्रियास्तेषां दर्शनम्॥२९॥ हे अनघाः निरवद्याः भवतः पृच्छामो आत्यंतिकं क्षेमं पृ-
च्छामः॥ यतः क्षणार्द्धकालभवोपि सत्संगः शेवधिः निधिः॥ निधिलाभे यथानंदो भवति तथात्र परमानंद इत्यर्थः॥३०॥ तदर्थं च भगवता-
न्धर्मान्ब्रूत यदि भो अस्माकं श्रुतये श्रवणाय क्षमं योग्यं भवति॥ कथंभूतान्यैर्धर्मैः प्रपन्नाय भक्ताय अजो हरिः॥ आत्मानमपि दास्यति॥

दुर्लभो मानुषो देहो देहिनां क्षणभंगुरः॥ तत्रापि दुर्लभं मन्ये वैकुंठप्रियदर्शनम्॥२९॥ अत आत्यंतिकं क्षेमं पृच्छामो
भवतोनघाः॥ संसारेस्मिन्क्षणार्द्धोपि सत्संगः शेवधिर्नृणां॥३०॥ धर्मान्भागवतान्ब्रूत यदि नः श्रुतये क्षमं॥ यैः प्र-
सन्नः प्रपन्नाय दास्यत्यात्मानमप्यजः॥३१॥ श्रीनारदः॥ एवं ते निमिना पृष्टा वसुदेव महत्तमाः॥ प्रतिपूज्याब्रुवन्
प्रीत्या ससदस्यर्त्विजं नृपं॥३२॥ ॥ ॥राम॥ ॥ ॥

ताच्॥३२॥ महत्तमाः सदस्यैः ऋत्विग्भिश्च वर्तमानं तेपि भगवद्धर्मश्रवणपरा बभूवुरित्यर्थः॥ भगवद्धर्मं तद्भक्तिमाया तत्तत्त्वानि
च॥ ब्रह्मकर्मावतारेहा भक्त प्राप्य युगक्रमात्॥ ज्ञातं क्रमेण कृतवान्नव पृष्टान्निमिर्नृप॥ एकैकस्योत्तरं प्रोचुः कविमुख्या
मुनीश्वराः॥ ॥ ॥३२॥ ॥ ॥ रामायनमः॥ ॥ ॥ रामायनमो नमः॥ ॥ ॥३२॥ ॥ ॥ ॥
॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

श्री॰
भा॰ ए॰
टी॰ ७

प्रपद्यममात्यंतिकंक्षेमंकथयति॥मन्यइतिनकुतश्चिद्भयंयस्मात्तदकुतश्चिद्भयं॥अत्रसंसारेअसदात्मभावात्॥असति
देहादौआत्मभावनातः नित्यंसर्वदाउद्विग्नबुद्धेः॥विश्वात्मनासर्वथानिःशेषंयत्रपदांबुजोपासनेभीर्निवर्ततेतत्॥सू०
भागवतधर्मलक्षणमाह॥येवैइतिमन्वादिमुखेनवर्णाश्रमादिधर्मानुक्त्वातिरहस्यत्वात्स्वमुखेनैवभगवताविदुषामपि१
पुंसांअंजःसुखेनैवात्मलब्धयेयेवैउपायाःप्रोक्ताःतान्भागवतधर्मान्विद्धि॥३४॥अंजःपदेनोक्तंसुकरत्वंविवृणोति१

श्रीकविरुवाच॥मन्येकुतश्चिद्भयमच्युतस्यपादांबुजोपासनमत्रनित्यं॥उद्विग्नबुद्धेरसदात्मभावात्१
विश्वात्मनायत्रनिवर्ततेभीः॥३३॥येवैभगवताप्रोक्ताउपायाह्यात्मलब्धये॥अंजःपुंसामविदुषांवि
द्धिभागवतान्हितान्॥३४॥यानास्थायनरोराजन्नप्रमाद्येतकर्हिचित्॥धावन्निमील्यवानेत्रेनस्ख
लेन्नपतेदिह॥३५॥॥राम॥

यानिति॥यानास्थायाश्रित्ययोगादिषुनप्रमाद्येतविघ्नैर्नविहन्येत॥किंचनिमील्यनेत्रेधावन्नपिइहएषुभागवतध१
र्मेषुनस्खलेत्॥निमीलनंनामाज्ञानं॥यथाहुः॥श्रुतिस्मृतीउभेनेत्रेविप्राणांपरिकीर्तिते॥एकेनविकलःकाणोद्वा१
भ्यामंधःप्रकीर्तितइति॥अज्ञात्वापीत्यर्थः॥यथापदन्यासस्थानमतिक्रम्यशीघ्रंपरतःपदन्यासेनगतिर्द्धावनंतद्वदत्रा
पि॥किंचित्किंचिदतिक्रम्यातिशीघ्रमनुष्ठानंधावनंतथानुतिष्ठन्नपिनस्खलेत्नप्रत्यवायीस्यात्॥तथानपतेत्फ

राम
७

किंच खमिति ॥ सत्वानि भूतानि प्राकाशादि यत्किंचिद्भूतमात्रं हरेः शरीरमिति मत्वा प्रणमेत् संभावनायां लिङ् ॥४१॥ ननु विषयमारू-
ढानामपि बहुजन्मभिर्दुर्लभा गतिः कथं नामकीर्तनमात्रेणैकस्मिन्नपि जन्मनि भवेदित्याशंक्य ॥ सदृष्टांतमाह ॥ भक्तिरिति ॥ प्रपद्य-
मानस्य हरिं भजतः पुंसः भक्तिः प्रेमलक्षणा परेशानुभवः प्रेमास्पद भगवद्रूपस्फूर्तिः ॥ तया निर्वृतस्य ततोऽन्यत्र गृहादिषु विरा-
क्तिरित्येष त्रिकः एककालः भजनसमकाल एव स्यात् ॥ यथाश्नतो भुंजानस्य तुष्टिः सुखं पुष्टिः उदरभरणं क्षुन्निवृत्तिश्च प्र-

प्रेमास्पद भगवद्रूपस्फूर्तिः अनुभवः २ अन्यत्र गृहादिषु विरक्तिः ३ हरिं भजतः ४

खं वायुमग्निं सलिलं महीं च ज्योतींषि सत्वानि दिशो द्रुमादीन् ॥ सरित्समुद्रांश्च हरेः शरीरं यत्किंच भूतं प्रणमे-
दनन्यः ॥४१॥ भक्तिः परेशानुभवो विरक्तिरन्यत्र चैष त्रिक एककालः ॥ प्रपद्यमानस्य यथाश्नतः स्युस्तुष्टिः पुष्टिः
क्षुदपायोनुघासं ॥४२॥ इत्यच्युतांघ्रिं भजतोनुवृत्त्या भक्तिर्विरक्तिर्भगवत्प्रबोधः भवंति वै भागवतस्य राजंस्त-
तः परां शांतिमुपैति साक्षात् ॥४३॥ राजोवाच ॥ ॥ अथ भागवतं ब्रूत यद्धर्मो यादृशो नृणां ॥ यथाचरति यद्ब्रूते यै-
र्लिंगैर्भगवत्प्रियः ॥४४॥

तिग्रासं स्युः उपलक्षणमेतत् प्रतिसिक्थमपि यथा स्युः तद्वत् ॥ एवमेकैकस्मिन्भजने किंचित्प्रेमादित्रिके जायमाने अनुवृत्त्या नि-
रंतरं भजतः परमप्रेमादित्रयेण बहुधा संभोजिनइव परमतुष्ट्यादि ॥४२॥ ततश्च भगवत्प्रसादेन कृतार्थो भवतीत्याह ॥ इत्यच्यु-
तांघ्रिमिति ॥ भागवतस्य भवंतीत्युक्ते ॥ तस्य लक्षणं पृच्छति ॥४३॥ अथेति ॥ यद्धर्मा यस्मिन्धर्मे परिनिष्ठितः यादृशः यत्स्वभावः
यथाचरति वर्तते यद्ब्रूते यैश्च लिंगैर्भगवतः प्रियो भवति ॥ ॥४४॥ ॥ रामाय नमः ॥ ॥ ॥ ॥ ॥

श्री॰ भा॰ ए॰ टी॰ ५

यद्धर्म इत्यस्योत्तरमाह ॥ त्रयेणा सर्वभूतेष्विति ॥ आत्मनः स्वस्य सर्वभूतेषु ब्रह्मभावेन समन्वयं यः पश्येत् तथा ब्रह्मरूपे आत्म
न्यधिष्ठाने भूतानि च यः पश्येत् यद्वा आत्मनस्तत्त्वाब्रमात्मत्वादात्माहि परमो हरिरिति तत्रोक्तेः ॥ आत्मनो हरेः सर्वभूतेषु मश
कादिष्वपि नियंतृत्वेन वर्तमानस्य भगवद्भावं निरतिशयैश्वर्यमेव यः पश्येत् न तु तस्य तारतम्यं तथात्मनि हरावेव भूतानि
च पश्येत् ॥ कथंभूते भगवति ॥ अपश्यते स्वर्यादिरूपेण न तु नजे तु मलिनभूताश्रयत्वेन जाड्यादिप्रसक्त्यापि स्वर्यादि प्रम्य

अधुनैव प्रारब्धभक्तिः शनैः शनैरुत्तमो भविष्यतीत्यर्थः

हरिरुवाच ॥ सर्वभूतेषु यः पश्येद्भगवद्भावमात्मनः ॥ भूतानि भगवत्यात्मन्येष भागवतोत्तमः ॥४५॥
ईश्वरे तदधीनेषु बालिशेषु द्विषत्सु च ॥ प्रेममैत्रीकृपोपेक्षा यः करोति स मध्यमः ॥४६॥ अर्चायामेव हर
ये पूजां यः श्रद्धयेहते ॥ न तद्भक्तेषु चान्येषु स भक्तः प्राकृतः स्मृतः ॥४७॥ गृहीत्वापीन्द्रियैरर्थान्यो न द्वेष्टि
न हृष्यति ॥ विष्णोर्मायामिदं पश्यन्स वै भागवतोत्तमः ॥४८॥

॥ रामाय नमः ॥ ॥ ॥

तिं पश्येत् स सर्वत्रापदिष्टां भगवत्तत्त्वं पश्यन्भागवतोत्तम इत्यर्थः ॥४५॥ प्रेम च मैत्री च कृपा च उपेक्षा च ताः ईश्वरादि
षु चतुर्षु यः करोति स मध्यमो भागवतः ॥ एवंभूतस्य भेददर्शनात् ॥४६॥ अर्चायां प्रतिमायां पूजां यः ईहते करोति न
तद्भक्तेषु अन्येषु च सत्कारं न करोति ॥ प्राकृतः प्रकृतिप्रारंभः अधुनैव प्रारब्धभक्तिः शनैः शनैरुत्तमो भविष्यतीत्यर्थः
पुनरष्टभिः श्लोकैरुत्तमभागवतस्यैव लक्षणान्याह ॥ गृहीत्वापीति श्रीवासुदेवो विष्णुश्चित्तो न गृह्णातीति ताव राम ५
द्भिरैरर्थान्गृहीत्वापीत्यपि शब्दार्थः इति दिक् ॥८॥

त

ननु के ते भागवता धर्माः ईश्वरार्पितानि सर्वकर्माण्यपीत्याह ॥ कायेनेति ॥ आत्मना चित्तेनाहंकारेण वा ॥ अनुसृतो यः स्व
भावस्तस्मात् अयमर्थः न केवलं विधितः कृतमेवेति नियमः स्वभावानुसारि लौकिकमपीति ॥ तथा च भगवद्गीतासु
यत्करोषि यदश्नासि यज्जुहोषि ददासि यत् ॥ यत्तपस्यसि कौंतेय तत्कुरुष्व मदर्पणमिति ॥ यद्वा ननु कायादीनामेव कर्म नात्म
न इत्याशंक्याह ॥ बुद्ध्यात्मना चानुसृतात्तत्त्वबुद्ध्या स्वात्मत्वादिस्वभावाद्यद्यत्करोतीत्यर्थः ॥ तत्सकलं परस्मै परमेश्वराय नारा
यणायेति समर्पयेत् ॥ तथा सति सकलमपि कर्म भागवतो धर्मो भवतीति भावः ॥ ३६ ॥ ननु किमेवं परमेश्वरभजनेन च
ज्ञानकल्पितभयसंज्ञानैकनिवृत्त्यत्वादित्याशंक्याह भयमिति यतो भयं तन्मायया भवेत् ॥ अतो बुधो बुद्धिमान् तमेवा

ईशाद्विमुखस्य २ तन्मायया स्मृतिः २

कायेन वाचा मनसेंद्रियैर्वा बुद्ध्यात्मना वानुसृतस्वभावात् ॥ करोति यद्यत्सकलं परस्मै नारायणायेति समर्पये
त्तत् ॥ ३६ ॥ भयं द्वितीयाभिनिवेशतः स्यादीशादपेतस्य विपर्ययोऽस्मृतिः ॥ तन्माययातो बुध आभजेत्तं भ
क्त्यैकयेशं गुरुदेवतात्मा ॥ ३७ ॥ राम ॥ ॥ ॥

देहाभिनिवेशतो

ततो विपर्ययो देहोऽस्मीति

भजेत् ॥ ननु भयं देहाभिनिवेशतो भवति स च देहोऽहंकारतः ॥ स च स्वरूपास्मरणात् किं तत्र तस्य माया करोति तत आह ई
शादपेतस्येति ईशाद्विमुखस्य तन्मायया स्मृतिः भगवतः स्वरूपास्फूर्तिः ततो विपर्ययो देहोऽस्मीति ततो द्वितीयाभिनिवे
शाद्भयं भवति एवं हि प्रसिद्धं लौकिकीष्वपि मायासु ॥ उक्तं च भगवता ॥ दैवी ह्येषा गुणमयी मम माया दुरत्यया ॥ मामेव ये
प्रपद्यंते मायामेतां तरंति ते इति ॥ एकया अव्यभिचारिण्या भक्त्या भजेत् ॥ किंच गुरुदेवतात्मा गुरुरेव देवता ईश्वर आत्मा
प्रेष्ठश्च यस्य तथाभूतः सन्नित्यर्थः ॥ ३७ ॥ ॥ रामाय नमः ॥ ॥ ॥॥ ॥ राम ॥॥ ॥ ॥ राम ॥ ॥

श्री॰ भा॰ ए॰ टी॰ ८

ननुविषयविहितमस्यकुतोऽव्यभिचारिणीभक्तिः संभवति अतस्तरामभयंतत्रनतावद्विषयोनामवास्तवोस्ति ॥ किंतुमनोविलासमा-
त्रं ॥ अतोमनोनियमनेनभजनादभयंस्यादित्याह ॥ अविद्यमानोपीति । द्वयोर्द्वैतप्रपंचः ध्यातुः पुंसः धियामनसास्वप्नस्वप्नमनोरथा-
वद्यथेत्यर्थः ॥ तत्तस्मात्कर्माणिसंकल्पयतिविकल्पयतिचयन्मनः तन्निरुंध्यान्नियच्छेत ॥ ततस्तुकयाभक्त्याभजनादभयंस्यादि-
त्यर्थः ॥ ३८ ॥ एतदत्यंतमशक्यमित्याशंक्यसुगमंमार्गमाह ॥ शृण्वन्निति तदर्थकानिजन्मानिकर्माणितदर्थोयेषांतानि-
एतान्यपिसाकल्येनज्ञातुमशक्यानीत्याशंक्याह ॥ यानिलोकेगीतानिप्रसिद्धानितानिनामानिशृण्वन्गायंश्चविचरेत ॥ असंगोनिः-

अविद्यमानोप्यवभातिहिद्वयोर्ध्यातुर्धियास्वप्नमनोरथौयथा ॥ तत्कर्मसंकल्पविकल्पकंमनोबुधोनिरुंध्या-
दभयंततःस्यात् ॥ ३८ ॥ शृण्वन्सुभद्राणिरथांगपाणेर्जन्मानिकर्माणिचयानिलोके ॥ गीतानिनामानितद-
र्थकानिगायन्विलज्जोविचरेदसंगः ॥ ३९ ॥ एवंव्रतःस्वप्रियनामकीर्त्याजातानुरागोद्रुतचित्तउच्चैः ॥ हसत्य-
थोरोदितिरौतिगायत्युन्मादवन्नृत्यतिलोकबाह्यः ॥ ४० ॥ ॥ ॥ रामायनमः ॥ ॥ ॥ ॥

स्पृहः ॥ ३९ ॥ एवंचभजतः संप्राप्तप्रेमलक्षणाभक्तियोगस्यधर्मस्यसंसारधर्मातीतांगतिमाह ॥ एवमिति ॥ एवंव्रतंवृत्तं
आचारोयस्यसः स्वप्रियस्यहरेर्नामकीर्त्याजातोनुरागःप्रेमयस्यसः अतएवद्रुतचित्तः श्लथहृदयः कदाचिद्भक्तपरा-
जितंभगवंतमालक्ष्यकलयोप्युच्चैर्हसति ॥ एतावंतंकालमुपेक्षितोस्मीतिरोदिति ॥ अन्योन्यकांक्षेतिक्रोशतिहेहरेमाम-
नुगृहाणेति ॥ अतिहर्षेणगायतिजितंजितमितिचनृत्यति किंदांभिकवत्त्वप्रख्यातिप्रकाशयितुं ॥ नउन्मादवत्तत्रगृही-
तवत् ॥ लोकबाह्यः विवशः ॥ ४० ॥ ॥ राम ॥ ॥ ॥ रामायनमः ॥ ॥ राम ॥ ॥ ॥ राम ॥ ॥

राम
८

श्री॰ भा॰ अ॰ टी॰ ५२

५४

तं त्वामिति प्रतिबोधनाय उपदेशाय अर्थदीपैः परमार्थप्रकाशकैः हृदये भवान् अहंकारादीन् स्वमोकः स्वरूपं विवृणु प्रकाशय
५३ नृपतिं प्रति पुराणसंहितां मत्स्यपुराणम् अशेषतः अब्रवीदित्यनुषंगः ५५ योयं हरेरवतारः तं यः प्रकीर्तयेत् ६० अतीतस्

तं त्वामहं देववरं वरेण्यं प्रपद्य ईशं प्रतिबोधनाय छिंध्यर्थदीपैर्भगवद्वचोभिर्ग्रंथीन्हृदिस्थान्विवृणुस्वमोकः
५३ शुकः इत्युक्तवंतं नृपतिं भगवानादिपूरुषः मत्स्यरूपी महांभोधौ विहरंस्तत्वमब्रवीत् ५४ पुराणसंहितां
दिव्यां सांख्ययोगक्रियावतीं सत्यव्रतस्य राजर्षेरात्मगुह्यमशेषतः ५५ अश्रौषीदृषिभिः साकमात्मतत्वमसं
शयं नाव्यासीनो भगवता प्रोक्तं ब्रह्म सनातनं ५६ अतीतप्रलयापाय उत्थिताय स वेधसे हत्वासुरं हयग्री
वं वेदान्प्रत्याहरद्धरिः ५७ स तु सत्यव्रतो राजा ज्ञानविज्ञानसंयुतः विष्णोः प्रसादात्कल्पेस्मिन्नासीद्वैवस्वतो म
नुः ५८ सत्यव्रतस्य राजर्षेर्मायामत्स्यस्य शार्ङ्गिणः संवादं महदाख्यानं श्रुत्वा मुच्येत किल्बिषात् ५९ अवतारो
हरेर्योयं कीर्तयेदन्वहं नरः संकल्पास्तस्य सिध्यंति स याति परमां गतिं ६० प्रलयपयसि धातुः सुप्तशक्तेर्मुखे
भ्यः श्रुतिगणमपनीतं प्रत्युपादत्त हत्वा दितिजमकथयद्यो ब्रह्म सत्यव्रतानां तमहमखिलहेतुं जिह्ममीनं
नतोस्मि ६१ इति श्रीभागवते महापुराणे अष्टमस्कंधे आदिमत्स्यावतारकथनं नाम चतुर्विंशोऽध्या
यः ॥ २४
संपूर्णमिति अष्टमस्कंधः शुभमस्तु ॥ राम

वेधसः प्रलयः तस्य अपाये अवसाने सत्यव्रतानां सत्यव्रतस्य ऋषीणां च बहुवचनं तल्लिंगसमवायाद्बहुवचनं जिह्ममी
नं मायामीनं ६१ इति श्रीभावार्थदीपिकायामष्टमस्कंधे चतुर्विंशोऽध्यायः २४ समाप्तः शुभम् ॥

राम॰ ५२

याभैः स्वपुत्रैः त्रिविष्टपं स्वर्गमपालयत् स्वयमेवेंद्रो बभूवेत्यर्थः तत्र प्रतिमन्वंतरं मन्वादयः षड् न्ये भवंति तथा हि स्वतो द्वादशे
वक्ष्यति मन्वंतरं मनुर्देवा मनुपुत्राः सुरेश्वराः ऋषयोंऽशावताराश्च हरेः षड्विधमुच्यते तत्राद्ये स्वायंभुवो मनुः प्रियव्रतो
त्तानपादौ मनुपुत्रौ यमादयो देवा मरीचिप्रमुखाः सप्तर्षयः यज्ञो हरेरवतारः इंद्रस्तु स एवेति तन्मन्वंतरं पंचविधमेव तच्च
चतुर्थ स्कंधे प्रपंचेन निरूपितं १८ द्वितीयादिषु त्रिषु मन्वंतरेषु मन्वादीन् षट् क्रमादाह स्वारोचिष इति द्वितीयः स्वारोचिष इति यावत् गजे

तोस्तथा वसितात्वीत्यायतः सर्वगतो हरिः यामैः परिवृतो देवैर्लापामत्रिविष्टपं १८ स्वारोचिषो द्विती
यस्तु मनुरग्नेः सुतोऽभवत् द्युमत्सुषेणरोचिष्मत्प्रमुखास्तस्य चात्मजाः १९ तत्रेंद्रो रोचनस्त्वासीद्देवाश्च तु
षितादयः ऊर्जस्तंभादयः सप्त ऋषयो ब्रह्मवादिनः २० ऋषेस्तु वेदशिरसस्तुषिता नाम पत्न्यभूत् तस्यां जज्ञे
ततो देवो विभुरित्यभिविश्रुतः २१ अष्टाशीतिसहस्राणि मुनयो ये धृतव्रताः अन्वशिक्षन्व्रतं तस्य कौ
मारब्रह्मचारिणः २२ तृतीय उत्तमो नाम प्रियव्रतसुतो मनुः पवनः सृंजयो यज्ञहोत्राद्यास्तत्सुता नृप
२३ वसिष्ठतनयाः सप्त ऋषयः प्रमदादयः सत्या वेदश्रुता भद्रा देवा इंद्रस्तु सत्यजित् २४ धर्मस्य सूनृतायां तु
भगवान्पुरुषोत्तमः सत्यसेन इति ख्यातो जातः सत्यव्रतैः सह २५ सोऽनृतव्रतदुःशीलानसतो यक्षराक्षसान्
भूतद्रुहो भूतगणांस्त्ववधीत्सत्यजित्सखः २६ चतुर्थ उत्तमभ्राता मनुर्नाम्ना च तामसः पृथुः ख्यातिर्नरः के
तुरित्याद्या दश तत्सुताः २७ सत्यका हरयो वीरा देवास्त्रिशिख ईश्वरः ज्योतिर्धामादयः सप्त ऋषयस्तामसेंऽतरे २८
देवा वैधृतयो नाम विधृतेस्तनया नृप नष्टाः कालेन यैर्वेदा विधृताः स्वेन तेजसा २९ तत्रापि जज्ञे भगवान्हरिण्यां
हरिमेधसः हरिरित्याहृतो येन गजेंद्रो मोचितो ग्रहात् ३० राजा बादरायणं पृच्छति प्रश्नमिच्छामः देवयं दी

द्रमोक्षप्रश्न १९ विभोराचार्याचरितमाह अष्टाशीतिसहस्राणीति २२ सत्यजित इंद्रस्य सखा मनुः उत्तमस्तस्तोयामनुः २४
उत्तमभ्राता स च चतुर्थो मनुरिति २७ त्रिशिख ईश्वर इंद्रः अन्यानपि विशिष्टान् क्रमाद्देवानाह देवा वैधृतय इति हरिरित्याहृतः ख्यातः २८

श्रीः भा० स्कं० ८

तत्कथासु श्रीविष्णुकथासु प्रवृत्तात्मस्वकथासु महत्सु गुणेषु गुणस्य विशेषणं यथा सुमितादि ३२ इति श्रीभावार्थदीपिकायां अ-
ष्टमस्कंधे प्रथमोऽध्यायः १ तुर्ये मन्वन्तरे प्रोक्तं गजेन्द्रस्य विमोक्षणम् द्वितीयादित्रिभिस्तत्र विस्तरेणोपवर्ण्यते द्वितीये तु गजेन्द्र-
स्य गजीभिः क्रीडतो जले दैवाद्ग्राहगृहीतस्य दुःखं सम्यङ्निरूप्यते आसीदिति १ तावता योजनायुतेन पर्यक् सर्वतः विस्तृतः
समा आयामविस्तारमाह त्रिभिः शृंगैः पयोनिधिं २ अन्यैश्च शृंगैर्निर्जरैः समानि निर्घोषैश्च ककुभः सर्वा रोचयन्नास्ते इति शेषः नानावयः

तत्कथासु महत्पुण्यं धन्यं स्वस्त्ययनं महत् यत्र यत्रोत्तमश्लोको भगवान् गीयते हरिः ३२ सूतः परीक्षितैवं स तु
बादरायणिः प्रायोपविष्टेन कथासु चोदितः उवाच विप्राः प्रतिनन्द्य पार्थिवं मुदा मुनीनां सदसि स्म शृण्वतां
३३ इति श्रीभागवतेऽष्टमस्कंधे प्रथमोऽध्यायः १ श्रीशुकः आसीद्गिरिवरो राजंस्त्रिकूट इति विश्रुतः क्षीरो-
देनावृतः श्रीमान् योजनायुतमुच्छ्रितः १ तावता विस्तृतः पर्यक् त्रिभिः शृंगैः पयोनिधिं दिशः खं रोचयन्नास्ते रौप्या-
यसहिरण्मयैः २ अन्यैश्च ककुभः सर्वा रत्नधातुविचित्रितैः नानाद्रुमलतागुल्मैर्निर्घोषैर्निर्झराम्भसां ३
स चावनिज्यमानाङ्घ्रिः समन्तात्पयऊर्मिभिः करोति श्यामलां भूमिं हरिन्मरकताश्मभिः ४ सिद्धचारणगन्ध-
र्वविद्याधरमहोरगैः किन्नरैरप्सरोभिश्च क्रीडद्भिर्जुष्टकन्दरः ५ यत्र संगीतसन्नादैर्नदद्गुहममर्षया अभिगर्जन्ति
हरयः श्लाघिनः परशङ्कया ६ नानारण्यपशुव्रातसङ्कुलद्रोण्यलङ्कृतः चित्रद्रुमसुरोद्यानकलकण्ठवि-
हंगमः ७ सरित्सरोभिरच्छोदैः पुलिनैर्मणिवालुकैः देवस्त्रीमज्जनामोदसौरभाम्ब्वनिलैर्युतः ८ रम

कथंभूतैः शृंगैः रत्नैश्च धातुभिः विचित्रितैः नानाद्रुमलतानां गुल्मा येषु तैः ३ पयसः ऊर्मिभिः समन्तादवनिज्यमानाः अंघ्रयो मूल-
प्रान्ता यस्य सः हरिद्भिः पालाशवर्णैः ४ किन्नरादीनां संगीतसन्नादैः नदन्तो गुहा यस्मिन् प्रदेशे तत्र अभिगर्जन्ति हरयः सिंहाः अमर्षया अप्र-
हनेन ६ नानारण्यपशुव्रातसङ्कुलाभिर्द्रोणीभिरलङ्कृतः तत्र आस्ते किंच चित्रद्रुमा येषु सुरोद्यानेषु कलकण्ठा मधुर-
स्वना विहंगमा यस्मिन् ७ किंच स्वच्छोदकैः सरित्सरोभिश्छुतैः
मणय एव वालुका येषु तैः पुलिनैश्च युतः देवस्त्रीणां मज्जनेन
गन्धमोदः तेन सौरभयुक्तानामम्बूनामनिलानां च संश्रितैश्च युतः तत्र आस्ते

तस्यद्रोण्यांवरुणस्यउद्यानमास्ते गिरिवनादिसंवेष्ट्यमितिवत्यति ग्रतोगिरिमुपवर्णयति ९ तस्मिन्गिरोसरआस्तेतद्वर्णयतिस्सुवि
पुलमित्यादिसार्धैःपंचभिःलसंतिकांचनपंकजानियस्मिन् १४ कुमुदादीनांश्रियाऊर्जितेकलःस्वनोयेषांतैःशकुंतैश्चनिर्घुष्टं
चक्राह्वैःसारसैरपिआकीर्णंजलकुक्कुटादीनांकुलैःसमूहैःकूजितंनिनादितं मत्स्यानामनिमिषाणांकच्छपानांकूर्माणांचसंचा

तस्यद्रोण्यांभगवतोवरुणस्यमहात्मनः उद्यानमृतुमन्नामआक्रीडंसुरयोषितां ९ सर्वतोलंकृतंदिव्यैर्नित्यपु
ष्पफलद्रुमैः मंदारैःपारिजातैश्चपाटलाशोकचंपकैः १० चूतैःप्रियालैःपनसैराम्रैराम्रातकैरपि क्रमुकै
र्नारिकेलैश्चखर्जूरैर्बीजपूरकैः ११ मधूकैःसालतालैश्चतमालैरसनार्जुनैः अरिष्टोडुंबरप्लक्षैर्वटैःकिंशु
कचंदनैः १२ पिचुमंदैःकोविदारैःसरलैःसुरदारुभिः द्राक्षेक्षुरंभाजंबूभिर्बदर्यक्षाभयामलैः १३ बिल्वैःकपित्थ
र्जंभीरैर्वृतोभल्लातकादिभिः तस्मिन्सरःसुविपुलंलसत्कांचनपंकजं १४ कुमुदोत्पलकल्हारशतपत्रश्रि
योर्जितं मत्तषट्पदनिर्घुष्टंशकुंतैश्चकलस्वनैः १५ हंसकारंडवाकीर्णंचक्राह्वैःसारसैरपि जलकुक्कुटको
यष्टिदात्यूहकुलकूजितं १६ मत्स्यकच्छपसंचारचलत्पद्मरजःपयः कदंबवेतसनलनीपवंजुलकैर्वृतं १७
कुंदैःकुरुबकाशोकैःशिरीषैःकुटजेंगुदैः कुब्जकैःस्वर्णयूथीभिर्नागपुन्नागजातिभिः १८ मल्लिकाशतपत्रैश्च
माधवीजालकादिभिः शोभितंतीरजैश्चान्यैर्नित्यर्तुभिरलंद्रुमैः १९ तत्रैकदातद्गिरिकाननाश्रयःकरेणुभि
र्वारणयूथपश्चरन् सकंटकान्कीचकवेणुवेत्रवद्विशालगुल्मंप्रभंजन्वनस्पतीन् २० राम ॥

रेणचलतांपद्मानांरजसायुक्तंपयोजलंयस्मिन्सरसितत्तथानित्यऋतवःफलपुष्पादिसंपत्तिहेतवोयेषांतैरलंशोभितं १९ तत्रैवसतिप
कदाततगिरिकाननाश्रयःवारणयूथपःकरेणुभिश्चरन् तृषादितःस्वयूथेनस्वकीयदारैःसमूहेनवृतःसरोवराभ्याशंसमीपंतत्सरस
रसमागमत् अतिपंचमश्लोकेनान्वयः किंकुर्वन्कीचकवेणुवेत्रवंतंविशालगुल्मलतादिमंतंप्रभंजन्समंतात्प्रभंजन्प्रभंजनाग्राम

श्री



कथंभूतो गजेंद्रः यस्य गंधमात्राद्धरयः सिंहाद्याश्च नागेंद्राः दंदशूकाश्च भयाद्द्रवंति त्रिरूपसर्पेति पलायंते २१ वृकादयस्तु क्षुद्रप्राणिनः अन्यत्र तत्र हरिण
यत्र तत्राचरंति २२ पुनश्च कीदृशो गजः घर्मतप्तः मदच्युत् मदस्रावी मदमत्त इति तत्पश्चात् २३ निजेन पुष्करेण कराग्रेण उद्धृतं पुष्करेक

यद्गंधमात्राद्धरयो गजेंद्रा व्याघ्रादयो व्यालमृगाः सखड्गाः महोरगाश्चापि भयाद्द्रवंति सगौरकृष्णाः शरभाश्चमर्यः २१
वृका वराहा महिषर्क्षशल्या गोपुच्छशालावृकमर्कटाश्च अन्यत्र क्षुद्रा हरिणाः शशादयश्चरंत्यभीता यदनुग्रहेण
२२ सरोऽनिलं पंकजरेणुरूषितं जिघ्रन्विदूरान्मदविह्वलेक्षणः वृतः स्वयूथेन तृषार्दितेन तत्सरोवराभ्याशमथागमत्
द्रुतं २३ स घर्मतप्तः करिभिः करेणुभिर्वृतो मदच्युत्कलभैरनुद्रुतः गिरिं गरिम्णा परितः प्रकंपयन्निषेव्यमाणोऽलि
कुलैर्मदाशनैः २४ विगाह्य तस्मिन्नमृतांबु निर्मलं हेमारविंदोत्पलरेणुवासितं पपौ निकामं निजपुष्करोद्धृतमा
त्मानमद्भिः स्नपयन्गतक्लमः २५ स्वपुष्करेणोद्धृतशीकरांबुभिर्निपाययन्संस्नपयन्यथा गृही घृणी करेणुः कलभां
श्च दुर्मदो नाचष्ट कृच्छ्रं कृपणोऽजमायया २६ तं तत्र कश्चिन्नृप दैवचोदितो ग्राहो बलीयांश्चरणे रुषाग्रहीत् यदृच्छ
यैवं व्यसनं गतो गजो यथाबलं सोऽतिबलो विचक्रमे २७ तथातुरं यूथपतिं करेणवो विकृष्यमाणं तरसा बलीयसा
विचुक्रुशुर्दीनधियोऽपरे गजाः पार्ष्णिग्रहास्तारयितुं न चाशकन् २८ नियुध्यतोरेवमिभेंद्रनक्रयोर्विकर्षतोरंतरतो
बहिर्मिथः समाः सहस्रं व्यगमन्महीपते सप्राणयोश्चित्रममंसतामराः २९ ततो गजेंद्रस्य मनोबलौजसां कालेन
दीर्घेण महानभूद्व्ययः विकृष्यमाणस्य जलेऽवसीदतो विपर्ययोऽभूत्सकलं जलौकसः ३० राम ॥ राम

रिह स्नात्वा वाद्यभांडमूर्तीपिबति शाश्वत कोपः गतक्लमः सन् २५ निकामं पपौ दीनधियः करेणवः केवलं विचुक्रुशुः २८ मनउत्साह
पार्ष्णि वेलक्षणारीरं ओजः येषां इयतेषां सकलं बलादि विपर्ययो विपरीतमधिकं जलौकसः ग्राहस्य ३० ॥ राम ॥

राम ८

आशुशुक्षणिरग्निः २६ सिद्धो दृष्टकृतार्थ एव एतावता सर्वास्वापदाः सिद्धेः इति गूढोभिप्रायः तदेवाह वित्तं द्रविणं यावत्प्रयोजन
मेव स्वीकार्यमधिकस्य तु ग्रहणानर्हत्वादित्यर्थः २७ अनयः अन्यायः अन्यायमेवाह एष इति ३० मया पदत्रयमेवांगीकृतं नाधिकं तत्राह
३२ त्रिभिरिति क्रमतामिति चेत्तत्राह सर्वस्वमिति ३३ तथापि प्रतिश्रुतं संपादनीयमेवेति चेत्तत्राह क्रमत इति द्वाभ्यां एकेन पद

यदृच्छालाभतुष्टस्य तेजो विप्रस्य वर्धते तत्प्रशाम्यत्यसंतोषादंभसेवाशुशुक्षणिः २६ तस्मात्त्रीणि पदान्येव वृणे
त्वद्वरदर्षभात् एतावतैव सिद्धोहं वित्तं यावत्प्रयोजनं २७ शुकः इत्युक्तः स हसन्नाह वांछातः प्रतिगृह्यतां वा
मनाय महीं दातुं जग्राह जलभाजनं २८ विष्णवे क्ष्मां प्रदास्यंतमुशना असुरेश्वरं जानंश्चिकीर्षितं विष्णोः शि
ष्यं प्राह विदां वरः २९ प्रतिश्रुतं त्वयैतस्मै यदनर्थमजानता न साधु मन्ये दैत्यानां महानुपगतोनयः ३० पा
शुक्रः एष वैरोचने साक्षाद्भगवान्विष्णुरव्ययः कश्यपाददितेर्जातो देवानां कार्यसाधकः ३१ एष ते स्थानमैश्व
र्यं श्रियं तेजो यशः श्रुतं दास्यत्याच्छिद्य शक्राय मायामाणवको हरिः ३२ त्रिभिः क्रमैरिमाँल्लोकान्विश्वकायः
क्रमिष्यति सर्वस्वं विष्णवे दत्वा मूढ वर्तिष्यसे कथं ३३ क्रमतो गां पदैकेन द्वितीयेन दिवं विभोः खं च कायेन मह
ता तार्तीयस्य कुतो गतिः ३४ निष्ठां ते नरके मन्ये ह्यप्रदातुः प्रतिश्रुतम् प्रतिश्रुतस्य योनीशः प्रतिपादयि
तुं भवान् ३५ न तद्दानं प्रशंसंति येन वृत्तिर्विपद्यते दानं यज्ञस्तपः कर्म लोके वृत्तिमतो यतः ३६ धर्माय यशसे
र्थाय कामाय स्वजनाय च पंचधा विभजन्वित्तमिहामुत्र च मोदते ३७ राम. ॥

न्यासेन भूमिं क्रममाणस्येत्यर्थः द्वितीयेन दिवं खं च तार्तीयस्य तृतीयपदन्यासस्य ३४ तथापि सर्वस्वदानात्कीर्तिः स्याद्भविष्य
तीति चेत्तत्राह न तद्दानमिति ३६ तपः चित्तैकाग्र्यं कर्म स्पर्शनं ननु तर्हि प्रतिश्रुतं नेति कथं मत्तेन वाच्यं तत्राह ३७ राम.

समयदा संमितानीति त्रिविक्रमपदाभिप्रायेणानवावृत्तवादः तत्रापि स्वपदत्वात्तेनुपगमात् १६ यावदर्थमेव प्रतिग्रहो यस्य सः १७ ईश्वरस्य याञ्चाकारणं याञ्चाप्रकारं चोक्त्वा बलेर्बंधनप्रश्नोत्तरत्वेन तद्व्यतिरेकेण प्रथितेपप्रकारमाह अहो इति त्रिभिः तेवाचो वृद्धानां संमताः त्वं तु बालः बालिशमतिश्चेति छेदः स्वार्थं प्रत्यबुध इति च भक्तानामेवार्थं बुध्यसे न स्वार्थं परिपूर्णस्य तद्व्यतिरेकेण स्वार्थाभावादित्यर्थः अबुधत्वमेवाह १८ मामिति द्वीपस्य दाशुषं दातारं अबुद्धिमान् वस्तुतस्तु बुद्धिमा

तस्मात्त्वत्तो महीमीषद्वृणेहं वरदर्षभात् पदानि त्रीणि दैत्येंद्र संमितानि पदा मम १६ नान्यत्ते कामये राजन्वदान्या
ज्जगदीश्वरात् नैनः प्राप्नोति वै विद्वान्यावदर्थपरिग्रहः १७ बलिः अहो ब्राह्मणदायाद वाचस्ते वृद्धसंमताः
त्वं बालो बालिशमतिः स्वार्थं प्रत्यबुधो यथा १८ मां वचोभिः समाराध्य लोकानामेकमीश्वरं पदत्रयं यो वृणी
ते बुद्धिमान्द्वीपदाशुषं १९ न पुमान्मामुपव्रज्य भूयो याचितुमर्हति तस्माद्वृत्तिकरीं भूमिं वटो कामं प्रतीच्छ मे
२० श्री भ उ यावंतो विषयाः प्रेष्ठाः त्रिलोक्यामजितेंद्रियं न शक्नुवंति ते सर्वे प्रतिपूरयितुं नृप २१
त्रिभिः क्रमैरसंतुष्टो द्वीपेनापि न पूर्यते नववर्षसमेतेन सप्तद्वीपवरेच्छया २२ सप्तद्वीपाधिपतयो नृपा वै
न्यगयादयः अर्थैः कामैर्गता नांतं तृष्णाया इति नः श्रुतं २३ यदृच्छयोपपन्नेन संतुष्टो वर्तते सुखं नास
तुष्टः त्रिभिर्लोकैरजितात्मोपसादितैः २४ पुंसोयं संसृतेर्हेतुरसंतोषोर्थकामयोः यदृच्छयोपपन्नेन संतो
षो मुक्तये स्मृतः २५

नित्यवच्छेदः १९ कामं यथेच्छं स्वयं कामादप्रसरणं तत्त्वार्थः अतएव तथा करिष्यति २० पुनरपि तिः स्वद्वत्वमेव प्राविष्कुर्वन्नाह यावंत इति सप्तभिः २१ नववर्षसमेतेन द्वीपेनापि सप्तानां द्वीपवराणामिच्छया २२ तृष्णाया अंतं न गता इत्यस्माभिः श्रुतं २३ असंतुष्टः पुमान् त्रिभिर्लोकैरपि न सुखं वर्तते २४ ॥ २५ ॥ राम राम

श्री. भा. स्कं. टी. ८

यं हिरण्याक्षं कृच्छ्रेण जित्वा भुव उद्धारे हृते सति विष्णुरात्मानं जयिनं मेने तद्वीर्यं भूरिग्रहणं पश्चात्स्मरन् ६ पराग्दृशः बहिर्दृष्टेः अतो हृदये स्थितं मां न द्रक्ष्यति इत्येवं निश्चित्य ९ श्वासानिलेनांतर्हितः सूक्ष्मो देहो यस्य विविग्नमतिकंपितं चेतो यस्य प्रत्युत कंपितचित्त इति वास्तवार्थः १० न ददर्श यतः प्रविष्टत्वात् ११ पुमान्मत्तः सकाशान्नावर्तते तद्भूमिं च भूनगतः नितरां कृत्वादिति वास्तवार्थः १२ एवं भूतस्य पर्यन्तमायं वैरस्य श्रीविष्णोर्वैरयत्नकृतवान् तद्वचिंतेमतस्याप्रतिद्वंद्वमहाबलपराक्रमस्य शूरान्दमानविजृंभितक्रोधानुबंधस्य १२ कथं नामासौ श्

यतो जातो हिरण्याक्षः चरन्नेक इमां महीं प्रतिवीरं दिग्विजये नाविंदत गदायुधः ५ यं विनिर्जित्य कृच्छ्रेण वि
ष्णुः क्ष्मोद्धार आगते नात्मानं जयिनं मेने तद्वीर्यं भूर्यनुस्मरन् ६ निशम्य तद्वधं भ्राता हिरण्यकशिपुः पुरा हंतुं भ्रा
तृहणं क्रुद्धो जगाम निलयं हरेः ७ तमायांतं समालोक्य शूलपाणिं कृतांतवत् चिंतयामास कालज्ञो विष्णुर्मा
याविनां वरः ८ यतो यतोहं तत्रासौ मृत्युः प्राणभृतामिव अतोहमस्य हृदयं प्रवेक्ष्यामि पराग्दृशः ९ एवं स नि
श्चित्य रिपोः शरीरमाधावतो निर्विविशेसुरेंद्रः श्वासानिलांतर्हितसूक्ष्मदेहः तत्प्राणरंध्रेण विविग्नचेताः १०
स तन्निकेतं परिमृश्य शून्यमपश्यमानः कुपितो ननाद क्ष्मां द्यां दिशः खं विवरान्समुद्रान्विष्णुं विचिन्वन्न ददर्श
वीरः ११ अपश्यन्निति होवाच मयान्विष्टमिदं जगत् भ्रातृहा मे गतो नूनं यतो नावर्तते पुमान् १२ वैरानुबंध एता
वानामृत्योरिह देहिनां अज्ञानप्रभवो मन्युरहंमानोपबृंहितः १३ पिता प्रह्लादपुत्रस्ते तद्विद्वान्द्विजवत्सलः स्व
मायुर्द्विजलिंगेभ्यो देवेभ्योदात्स याचितः १४ भवानाचरितान्धर्मानास्थितो गृहमेधिभिः ब्राह्मणैः पूर्वजैः शू

[illegible]

शिरोमणिः जीवन्नेव कातरत्वेन रणोपेतितवानित्यप्रायेनाह वैरानुबंध एतावानामृत्योर्भवतीति हि देहिनां देहनिमित्ताभिमानवतां शूराणां तथाहंमानेनोपबृंहितो मन्युश्च भवति यतोऽज्ञानप्रभवः अज्ञाननिवृत्तेः आक्रोपाक्षयत्यागोमार्गमेवेत्यर्थः १३ तदेवं सर्वं ज्ञात्वा स्तुत्वा तत्पितरोस्त्वाति द्विजवेषधारिणो महेंद्रादेवा पतेन तद्विजा इति तद्विद्वानपि मया याचितः सन् स्वीयमायुः देवेभ्योददौ १४

राम. ३८

देशार्थं ता तो सा तात्स्वयं ब्रह्मर्षीणां तपप्रवर्तमैव कंचं भूतं तपः स्वधर्थं स्थूर्तिर्थापि २४ त्वच्चरणावनेजनैर्वार्भिर्जलैर्हतमंहो दुष्कर्मत
स्य मे पुनीता पवित्री कृता ३१ मेमतः प्रतीच्छ दृष्टप्राणे हे भूदेव मृष्टमस्तु पतम ३३ इति श्रीभागवते टीपिकायां अष्टमस्कंधेऽष्टदशोऽध्यायः १८
उत्तीर्णेताद्वारिणा याचितेन पदत्रयं प्रतिश्रुतेन बलिना ज्ञान्मुगुरुवारयत् दातुः स्तुतिः स्वयं तुष्टिरित्यादि प्रस्तुतो चित वक्तामितिभि

श्रयन्तः पितरः तस्मा श्वघनः पावितं कुलं श्रद्यस्विष्टः क्रतुरयं यद्भवानागतो गृहान् ३० अद्याग्नयो मे सुहुता यथा-
विधि द्विजात्मज त्वच्चरणावनेजनैः हतांहसो वार्भिरियं च भूरहो तथा पुनीता तनुभिः पदैस्तव ३१ यद्यद्बटो वाञ्छ-
सि तत्प्रतीच्छ मे त्वामर्थिनं विप्रसुतानुतर्कये गां काञ्चनं गुणवद्धाम मृष्टं तथान्नपेयमुत वा विप्र कन्यां ३२ ग्रामा-
न्समृद्धांस्तुरगान्गजान्वा रथांस्तथार्हत्तम संप्रतीच्छ ३३ इति श्रीभागवते ष्टमस्कंधे ष्टदशोध्यायः १८ शुकः
इति वैरोचनेर्वाक्यं धर्मयुक्तं स सूनृतं निशम्य भगवान्प्रीतः प्रतिनंद्येदमब्रवीत् १ श्रीभगवानुवाच वचस्तवैत-
ज्जनदेव सूनृतं कुलोचितं धर्मयुतं यशस्करं यस्य प्रमाणं भृगवः सांपराये पितामहः कुलवृद्धः प्रशांतः २ न ह्येत-
स्मिन्कुले कश्चिन्निःसत्त्वः कृपणः पुमान् प्रत्याख्याता प्रतिश्रुत्य यो वादाता द्विजातये ३ न संति तीर्थे युधि चा-
र्थिनार्थिताः पराङ्मुखा ये त्वमनस्विनो नृपाः युष्मत्कुले यद्यशसामलेन प्रह्लाद उद्भाति यथोडुपः खे ४ राम

हे सूनृत प्रियं तत्र यथार्हवाम नः वचस्तवैतदिति षोडशभिः हे जनदेव सांपराये पारलौकिके धर्मे पितामहः प्रह्लादः प्रमाणं २ निःसत्त्व स्वल्पल-
त्येयो द्विजातये याचकाय प्रत्याख्याता ननदास्यामीति वक्ता कृपणः स्वल्पत्वेन प्रथमं प्रतिश्रुत्य यो वा नददातीति उक्तं च ब्राह्मणेभ्यः प्रतिश्रु-
त्य यो न ददाति ते न राधमः तस्मात्कुल वृत्तवस्या दददन्यत्र तास्कीति ३ तीर्थे दाने तीर्थदानावसरे यस्यकथ्यतांले ४ यतः यस्मिन्कुले जातः ५
यतस्त्वापुनर साकं टीकयम् त्वाहारे भूम्यां उररीकृत उवाच मतीत्वम् ४ राम राम राम

श्री० भा० स्कं० टी० ८

यदर्थं वटुर्बभूव तदाह श्रुत्वेत्यादि यावदध्यायसमाप्ति यजमानं यजंतं भृगूणां भृगुभिः उपकल्पितैः प्रवर्तितैरखिलेन सारेण बलेन
संभृतः परिपूर्णः २० नर्मदाया उत्तरे तटे भृगुकच्छसंज्ञके क्षेत्रे क्रतूत्तमं प्रवर्तयंतो ये बलेरृत्विजो भृगवः ते तं वामनं व्यचक्षत तापस्य

श्रुत्वाश्वमेधैर्यजमानमूर्जितं बलिं भृगूणामुपकल्पितैस्ततः जगाम तत्राखिलसारसंभृतो भारेण गां सन्नम
यन्पदेपदे २० तं नर्मदायास्तट उत्तरे बलेर्य ऋत्विजस्ते भृगुकच्छसंज्ञिते प्रवर्तयंतो भृगवः क्रतूत्तमं व्यचक्षता
रादुदितं यथा रविं २१ त ऋत्विजो यजमानाः सदस्या हतत्विषो वामनतेजसा नृप सूर्यः किलायात्युत वा विभा त्सु
वसुः सनत्कुमारोऽथ दिदृक्षया क्रतोः २२ इत्थं सशिष्येषु भृगुष्वनेकधा वितर्क्यमाणो भगवान्स वामनः सद
ण्डं छत्रं सजलं कमंडलुं विवेश बिभ्रद्धयमेधवाटं २३ मौंज्या मेखलया वीतमुपवीताजिनोत्तरं जटिलं वाम
नं विप्रं मायामाणवकं हरिं २४ प्रविष्टं वीक्ष्य भृगवः सशिष्यास्ते सहाग्निभिः प्रत्यगृह्णन्समुत्थाय संक्षिप्ता
स्तस्य तेजसा २५ यजमानः प्रमुदितो दर्शनीयं मनोरमं रूपानुरूपावयवं तस्मा आसनमाहरत् २६ स्वाग
तेनाभिनंद्याथ पादौ भगवतो बलिः अवनिज्यार्चयामास मुक्तसंगमनोरमं २७ तत्पादशौचं किल कल्मषाप
हं स धर्मविन्मूर्ध्न्यदधात्सुमंगलं यद्देवदेवो गिरिशश्चंद्रमौलिर्दधार मूर्ध्ना परयाच भक्त्या २८ बलिः स्वाग
तं ते नमस्तुभ्यं ब्रह्मन् किं करवाम ते ब्रह्मर्षीणां तपः साक्षान्मन्ये त्वार्य वपुर्धरम् २९ राम रा

तस्माद्आरात्समीप एव समुदितं रविमिव ते व्यचक्षत विभावसुः सूर्यः किल इत्येवमादि वितर्कयन्निति शेषः २१ हयमेधवाटं अश्वमेधमंडपं वि
वेश २३ उपवीताजिने उपवीतं धृतमजिनमेव उत्तरमुत्तरीयं यस्य २४ संक्षिप्ता अभिभूताः संतः २५ रूपस्यानुरूपा अवयवा य
स्य तं देहेत्तिति शेषः २६ चंद्रमौलिरित्यन्वयः अपर्थे भक्त्या च कारश्चंद्रमौलिरपि गंगां मूर्ध्ना दधार यत्कारोत्पर्थः २८ २७

ति

मानवाद्यप्सरादीनांकुसुमैः समवाकिरन्निति तत्तीयेनान्वयः ८ विस्मयोत्तरमाह यत्तद्वपुर्हरिरधारयत्प्रकटितवान्नूतेनैववर
पुषा मातापित्रोः संपश्यतोरेववामनोवटुर्बभूवदिव्यगतिरद्भुतचेष्टितः स्वयंकथंभूतः अव्यक्तः विरूपः कथमधारयत्तभारी
रिर्विभूषणानिचगाथायानिचतैर्व्यक्तोयथाभवतितथा १२ कर्माणिजातकर्मादीनि १३ वनस्पतिर्वनानांपतिःसोमः १९

गीताश्चाप्सरसोनृत्यन्गंधर्वप्रवराजगुः तुष्टुवुर्मुनयोदेवामानवाःपितरोग्नयः ८ सिद्धविद्याधरगणाःस१
किंपुरुषकिन्नराः चारणायक्षरक्षांसिसुपर्णाभुजगोत्तमाः ९ गायंतोतिप्रशंसंतोनृत्यंतोविबुधानुगाः
अदित्याआश्रमपदंकुसुमैःसमवाकिरन् १० दृष्ट्वादितिस्तंनिजगर्भसंभवंपरंपुमांसंमुदमापविस्मिता
गृहीतदेहंनिजयोगमाययाप्रजापतिश्चाहजयेतिविस्मितः ११ यत्तद्वपुर्भातिविभूषणायुधैरव्यक्तचिद्व्यक्तम
धारयद्धरिः बभूवतेनैवसवामनोवटुःसंपश्यतोर्दिव्यगतिर्यथानटः १२ तंवटुंवामनंदृष्ट्वामोदमानामहर्षयः
कर्माणिकारयामासुःपुरस्कृत्यप्रजापतिं १३ तस्योपनीयमानस्यसावित्रींसविताब्रवीत् बृहस्पतिर्ब्रह्मसूत्रं१ ति
मेखलांकश्यपोददात् १४ ददौकृष्णाजिनंभूमिर्दण्डंसोमोवनस्पतिः कौपीनाच्छादनंमातायौश्छत्रंजगतःपतेः
१५ कमण्डलुंवेदगर्भःकुशान्सप्तर्षयोददुः अक्षमालांमहाराजसरस्वत्यव्ययात्मनः १६ तस्मायुपनीताय
यक्षराट्पात्रिकामदात् भिक्षांभगवतीसाक्षादुमादादंबिकासती १७ सब्रह्मवर्चसेनैवंसभांसंभावितोवटुः ब्र
ह्मर्षिगणसंजुष्टामत्यरोचतमारिषः १८ समिद्धमाहितंवह्निंकृत्वापरिसमूहनं परिस्तीर्यसमभ्यर्च्यसमिद्भिरजुहोद्द्विजः

पात्रिकांभिक्षापात्रीं १९ सएवंसंभावितोवटुःब्रह्मर्षिगणसंजुष्टांसभामतिक्रम्यारोचत १४ रामायनमः राम १४

स्मराजो मकरः तदाकारयोः कुंडलयोः त्विषा उल्लसंती श्रीवदनांबुजे यस्य श्रीवत्सो वक्षसि यस्य वलयैः अंगदैश्च सह उल्लसंति किरीटा
दीनि यस्य २ श्रीमत्या वनमालया विराजितो वेश्मगात्तमः ३ अग्निजिह्वा देवा नगाः पर्वताः तत्प्रादुर्भावसमयमाह ४ श्रोणायामि
ति भाद्रपद शुक्लो द्वादशी श्रवणद्वादशीति प्रसिद्धा तत्रापि श्रोणायां श्रवणस्य चैवैतदर्थः तत्रापि श्रवणस्य प्रथमांशे अभिजिति न
क्षत्रे एतच्च कृत्यादर्शितं अभिजिन्नाम नक्षत्रं उपरिष्टादाषाढानां अधस्तात् श्रोणायामिति एवं विशिष्टे मुहूर्ते प्रभुः प्रादुर्बभूव तथा:

श्यामावदातो झषराजकुंडलत्विषोल्लसच्छ्रीवदनांबुजः पुमान् श्रीवत्सवक्षः वलयांगदोल्लसत्किरीटकांचीगु
णचारुनूपुरः २ मधुव्रतव्रातविघुष्टया स्वया विराजितः श्रीवनमालया हरिः प्रजापतेर्वेश्मतमः स्वरोचिषा वि
नाशयन् कंठनिविष्टकौस्तुभः ३ दिशः प्रसेदुः सलिलाशयास्तदा प्रजाः प्रहृष्टा ऋतवो गुणान्विताः द्यौरंतरि
क्षं क्षितिरग्निजिह्वा गावो द्विजाः संजहृषुर्नगाश्च ४ श्रोणायां श्रवणद्वादश्यां मुहूर्तेऽभिजिति प्रभुः सर्वे नक्षत्र
ताराद्याश्चक्रुस्तज्जन्मदक्षिणं ५ द्वादश्यां सविता तिष्ठन्मध्यंदिनगतो नृप विजया नाम सा प्रोक्ता यस्यां जन्म विदु
र्हरेः ६ शंखदुंदुभयो नेदुर्मृदंगपणवानकाः चित्रवादित्रतूर्याणां निर्घोषस्तुमलोभवत् ७ राम

नुग्रहः म

किंच नक्षत्राणि अश्विन्यादीनि ताराः शोहेनताः ग्रहाः शुक्रादयः तेषामाद्या येषां ते सूर्योदयोपि सर्वे तस्य जन्मदक्षिणामुदारं चक्रुः ज
न्ममुहूर्ते गुणवद्देवा बभूवुरित्यर्थः ५ विशेषांतरमाह यस्यां द्वादश्यां हरेर्जन्म तत्र स्यात् तामेव विदुः तदा च मध्यंदिनगतः सवि
ता तिष्ठत् सा च द्वादशी विजया नाम प्रोक्तेत्यन्वयः ६ शंखा दुं दुभयो ये तेषां अन्येषां च चित्रतूर्याणां निर्घोषोभवत् ७ ॥

समीडे तुष्टावेत्यर्थः २५ अदितेरेव पूर्वस्मिन् जन्मनि पृश्निरिति नाम तस्या गर्भाय अर्भकाय वेदा गर्भे यस्य यद्वा वेदानां गर्भाय वेदेषु प्रकाश्यमानायेत्यर्थः त्रयो लोका नाभौ यस्य स त्रिनाभस्तस्मै त्रयाणां लोकानां पृष्ठे उपरि स्थिताय शिपिविष्टाय हेन पशवो जीवाः तेषु अन्तर्यामितया प्रविष्टाय यज्ञो वै विष्णुः पशवः शिपिर्यज्ञ एव पशुषु प्रतितिष्ठतीति श्रुतेः यद्वा शिपयो रश्मयः तैर्वेष्टितायेत्यर्थः तथापि विश्वव्यापिने २७ अतः पतितं तृणादि यथा गंभीरं स्रोतः आक्षिपेत् आकर्षति तथा कालात्मा भवान् विश्वमाक्षिपति २८ संभविष्णुरुत्पादनशीलोसि अयं भावः नह्येवंभूतस्य तव जन्मादि संभवः किं तु देवानां प्रजापतीनां परमाश्रयत्वं

हिरण्यगर्भो विज्ञाय समीडे गुह्यनामभिः २५ ब्रह्मा जयोरुगाय भगवन्नुरुक्रम नमोस्तु ते नमो ब्रह्मण्यदेवाय त्रिगुणाय नमो नमः २६ नमस्ते पृश्निगर्भाय वेदगर्भाय वेधसे त्रिनाभाय त्रिपृष्ठाय शिपिविष्टाय विष्णवे २७ त्वमादिरन्तो भुवनस्य मध्यमनन्तशक्तिं पुरुषं यमाहुः कालो भवानाक्षिपतीश विश्वं स्रोतो यथान्तः पतितं गभीरं २८ त्वं वै प्रजानां स्थिरजंगमानां प्रजापतीनामपि संभविष्णुः दिवौकसां देव दिवश्च्युतानां परायणं नौरिव मज्जतोप्सु २९ इति श्रीभागवते महापुराणे अष्टमस्कंधे सप्तदशोऽध्यायः ॥१७॥ श्रीशुकः। इत्थं विरिंचस्तुतकर्मवीर्यः प्रादुर्बभूवामृतभूरदित्यां चतुर्भुजः शंखगदाब्जचक्रः पिशंगवासा नलिनायतेक्षणः १

ननु तत्कार्यसाधनाय अवतारो यं अतः तान् स्वर्गच्युतान् पुनः स्वर्गे स्थापयेति २९ इति श्रीभावार्थदीपिकायां अष्टमस्कंधे सप्तदशोऽध्यायः १७ ततः तुष्टाद्देवो अश्वतावामनः तत्कृतो बलेः यज्ञंगतो बलेस्तेन सत्कृत्य क्रमत्रयं वृतः इत्थं विरिंचेन स्तुतं कर्म
देव वक्रादिलक्षणं वीर्यं च प्रभावो यस्य हरिरदित्यां प्रादुर्बभूवेति अन्वयः अमृतभूः मृत्युजन्मशून्यः शंखगदाब्जचक्राण्यस्य सन्तीति तथा अर्शआदित्वेन मत्वर्थीयो अच्प्रत्ययः अविसर्गपाठे सचासौ पिशंगवासाश्च १ राम

कोऽहितमेवाह तानिति त्रिभिः प्रतिलब्धा जयस्य श्रीः श्रियो यैः तैः पुत्रैः सह उपासितुमिच्छसि १२ प्रत्याहृते यशःश्रियौ यैः तान् १४
अपारणीया अनतिक्रमणीयाः यद्यस्मात् अनुकूल ईश्वरः कालो येषां तैर्विप्रैरभिगुप्ता रक्षिताः अनुकूलैरीश्वरैः समर्थैः विप्रैर्गु-
प्ता इति वा १५ मम मया चिन्त्य एव तत्र हेतुः संतोषितस्येत्यादि श्रद्धानुरूपे इच्छानुसारेण फलहेतुत्वात् १७ मारीचस्य तपसि

तान्विनिर्जित्य समरे दुर्मदानसुरर्षभान् प्रतिलब्धजयश्रीभिः पुत्रैरिच्छस्युपासितुं १२ इंद्रज्येष्ठैः स्वतनयैर्हता-
नां युधि विद्विषां स्त्रियो रुदंतीरासाद्य द्रष्टुमिच्छसि दुःखिताः १३ आत्मजान्सुसमृद्धांस्त्वं प्रत्याहृतयशःश्रि-
यः नाकपृष्ठमधिष्ठाय क्रीडतो द्रष्टुमिच्छसि १४ प्रायोऽधुना तेऽसुरयूथनाथा अपारणीया इति देवि मे मतिः
यत्तेऽनुकूलेश्वरविप्रगुप्ता न विक्रमस्तत्र सुखं ददाति १५ तथाप्युपायो मम देवि चिंत्यः संतोषितस्य व्रतचर्य-
या ते ममार्चनं नार्हति गंतुमन्यथा श्रद्धानुरूपं फलहेतुकत्वात् १७ त्वयार्चितश्चाहमपत्यगुप्तये पयो-
व्रतेनानुगुणं समीडितः स्वांशेन पुत्रत्वमुपेत्य ते सुतान्गोप्तास्मि मारीचतपस्यधिष्ठितः १८ उपधाव पतिं
भद्रे प्रजापतिमकल्मषं मां च भावयती पत्यावेवं रूपमवस्थितं १९ नैतत्परस्मा आख्येयं पृष्टयापि कथं-
चन सर्वं संपद्यते देवि देवगुह्यं सुसंवृतं २० श्रीशुकः एतावदुक्त्वा भगवांस्तत्रैवांतरधीयत अदितिर्दु-
र्लभं लब्ध्वा हरेर्जन्मात्मनि प्रभोः २१ उपाधावत्पतिं भक्त्या परया कृतकृत्यवत् स वै समाधियोगेन क-
श्यपस्तदबुध्यत २२ प्रविष्टमात्मनि हरेरंशमवितथेक्षणः सोऽदित्यां वीर्यमाधत्त तपसा चिरसंभृतं
२३ समाहितमना राजन्दारुण्यग्निं यथानिलः अदितेर्धिष्ठितं गर्भं भगवंतं सनातनं २४ नाम

अधिष्ठाय स्थितः सन् गोप्तास्मि पालयिष्यामि १८ अतः पतिमुपधाव भजस्व १९ देवानां गुह्यं रहस्यं सर्वं सुसंवृतं गुप्तं
सत्संपद्यते सिद्ध्यति २० प्रभोर्हरेर्जन्म निजजन्मनि लब्ध्वा २१ अवितथमीक्षणं दृष्टिर्यस्य सः २२ अनिलो यथा सर्वं समोऽपि
दारुणि संघर्षेण वनदाहके अग्निमाधत्ते एवं स्वयं पुत्रत्वेन समोऽपि दित्यपत्ततपसा वीर्यमाधत्ते तपसः धिष्ठितमधिष्ठाय स्थि-

तदृष्टावसेतिविगृहीतमाणोतिचक्रियाभेदात्मेऽस्यपदस्यद्विरुक्तेरदोषः अतस्त्वतोविनिर्जितभक्तानन्तर्जितानपि भक्तानूर।
तित्वमीशस्त्वमि त्यस्तोटदितिःत्रिभिः ७ यत्नेशोत्पादिदपाभिःसेवार्थेनेःतवाशक्तकिमपिवास्तीतिवदेतीप्रार्थयती अनः
कृपयकुरु येताहीनानानाद्यासित्वेतीर्थश्रवःकीर्तियस्यश्रवणमेवमंगलयस्यतन्नामधेयंयस्य आपन्नानांशरणगतानांला
कानांदृजिनोपशमायऽरयोयस्य ८ भूम्नमहतेनमःमदृश्वेदतवः विश्वायविश्वस्यभवनस्थितिसंयनार्थस्वैरंगृहीताःपुरु
प्रीत्याशानेर्गृहदयाग्निमाद्रीतदृष्टावसादेवदितिःऊहहद उद्दीवतीमापिवतीवचचुषारमापतियज्ञपतिज्ञ
गत्पति ७ अरितिः यज्ञेशायज्ञपुरुषाच्युततीर्थपादतीर्थश्रवःश्रवणमंगलनामधेय आपन्नलोकवृजिना
पशमोदयाद्यशनःकृधीशभगवन्नसिदीननाथः ८ विश्वायविश्वभवनस्थितिसंयमायस्वैरंगृहीतपुरुषा
क्तियगुणायभूम्न स्वस्थायशाश्वदुपबृंहितपूर्णबोधव्यापादितात्मतमसेहरयेनमस्ते ९ आयःपरंवपुरभी
ष्टमतल्पलक्ष्मीर्द्यौर्भूरसाःसकलयोगगुणास्त्रिवर्गः ज्ञानंचकेवलमनंतभवंतितुष्टात्वत्तोनृणांकिमुसप
त्नजयादिराशीः १० शुकः इतिवलतोराजन्भगवान्पुष्करेक्षणः देवऽत्नःसर्वभूतानामितिहोवाच।
भारत ॥ श्री ग ऋ देवमातर्भवत्यामेविज्ञातंचिरकांक्षितं यत्सपत्नेर्हृतश्रीणांच्यावितानांस्वधामतः

१२

शकेर्मायायाशरणायेनतस्मैतथापिस्वस्यायाअच्युतस्वरूपायऊतःशश्वदुपबृंहितः नित्यार्जितोयःपूर्णोबोधःतेनव्या
पादितंनित्यनिरस्तंआत्मनितमोमायालक्षणंयेनतस्मै ९ अस्मदीयमनोरथप्रपूरणमीषत्करमेवतवेतिकैमुतिकन्या
येनाहआयःपरंवपुरायःपुनरपिद्यौश्च भूश्च रसातलंचद्यौर्भूरसाःधाऽर्गीतिपृथक्पाठे भूश्चरसाश्चविलस्वर्गाइतिविग्र
हेसतिपाठेत्रीसेवेरियमक्ष्वतापदाणिसकलायोगगुणाअणिमादयः १० देवऽत्नःअंतर्यामी ११ सपत्नैर्हृताश्रीर्येषांस्वधा
मतः च्यावितानांचपुत्राणांसंवर्धयितुं इच्छतः चिरमाकांक्षितंमयाज्ञातं १२ राम ॥ ॥ राम

श्री. भा. स्कं. ८. ३४

मयाचेतेभवत्याःसमुदाहृतं ५८ सर्वयज्ञाख्योयंयज्ञःसर्वव्रतमितिचस्मृतमेतद्व्रतं ६० इतिश्रीभावार्थदीपिकायांअष्टमस्कंधेषोडशोध्या
यः ॥१६ ततःसप्तदशेदित्याकृतेतस्मिन्व्रतेहरिः तत्कामपूरणायाविरासीत्तत्तुष्टावादितीर्यते प्रीतिविह्वलत्वादेवबद्धांजलिःसतीस्थि

चरेन्निरूप्यपयसिशिपिविष्टायविष्णवे सूक्तेनतेनपुरुषंयजेतसुसमाहितः ५२ नैवेद्यंचातिगुणवद्दद्यात्पुरुषतु
ष्टिदं आचार्यंज्ञानसंपन्नंवस्त्राभरणधेनुभिः तोषयेदृत्विजश्चैवतद्विद्ध्याराधनंहरेः भोजयेत्तान्गुणवतासदन्नेनशु
चिस्मिते ५३ अन्यांश्चब्राह्मणाञ्छक्त्यायेचतत्रसमागताः ५४ दक्षिणांगुरवेदद्यादृत्विग्भ्यश्चयथार्हतः अन्नाद्ये
नश्वपाकांश्चप्रीणयेत्समुपागतान् ५५ भुक्तवत्सुचसर्वेषुदीनांधकृपणेषुच विष्णोस्तत्प्रीणनंविद्वान्भुंजीतसहबं
धुभिः ५६ नृत्यवादित्रगीतैश्चस्तुतिभिःस्वस्तिवाचकैः कारयेत्तत्कथाभिश्चपूजांभगवतोन्वहं ५७ एतत्पयो
व्रतंनामपुरुषाराधनंपरं पितामहेनाभिहितंमयातेसमुदाहृतं ५८ त्वंचानेनमहाभागेसम्यक्चीर्णेनकेशवं आ
त्मनाशुद्धभावेननियतात्माभजाव्ययं ५९ अयंवैसर्वयज्ञाख्यःसर्वव्रतमितिस्मृतं तपःसारमिदंभद्रेदानंचेश्वरतर्प
णं ६० तएवनियमाःसाक्षात्तएवचयमोत्तमाः तपोदानंव्रतंयज्ञोयेनतुष्यत्यधोक्षजः ६१ तस्मादेतद्व्रतंभद्रेप्रय
ताश्रद्धयाचर भगवान्परितुष्टस्तेवरानाशुविधास्यति ६२ इतिश्रीभागवतेअष्टमस्कंधेषोडशोध्यायः १६ शुकः
इत्युक्तासादितीराजन्स्वभर्त्राकश्यपेनवै अन्वतिष्ठद्व्रतमिदंद्वादशाहमतंद्रिता १ चिंतयत्येकयाबुद्ध्यामहापुरुष
मीश्वरं प्रगृह्येंद्रियदुष्टाश्वान्मनसाबुद्धिसारथिः २ मनश्चैकाग्रयाबुद्ध्याभगवत्यखिलात्मनि वासुदेवेसमाधाय
चचारहपयोव्रतं ३ तस्याःप्रादुरभूत्तातभगवानादिपुरुषः पीतवासाश्चतुर्बाहुःशंखचक्रगदाधरः ४ तंनेत्रगो
चरंवीक्ष्यसहसोत्थायसादरं ननामभुविकायेनदंडवत्प्रीतिविह्वला ५ सोत्थायबद्धांजलिरीडितुंस्थितानोत्सेहआनं

ताकेवलमीडितुंप्रवृत्तानोत्सेहेनशशाकव्यापितत्सर्वंविश्वसृष्टसंख्यातमानंदजलैरश्रुजलैराकुलेईक्षणेयस्याःपुलकैराकुलाआकृतिर्देहोयस्याःतस्यद
र्शनेनयोत्युत्सवःतेनगात्रेवेपथुःकंपोयस्याः ६ ॥

राम. ३४

पयसि शृते पक्वे पायसे ४० मूलविद्यया द्वादशाक्षरेणैव ४१ सूक्ताभिरन्याभिश्च स्तुतिभिः ४२ तत्स्वशेषं निर्माल्यं ४२ द्वौ अवरौ ये
षां तान् असंभवे द्वावपि भोजयेदित्यर्थः समाज्ञितैः तैरनुज्ञातः सन् शेषं बंधुभिः सहितः ४३ तस्यां रात्र्यां ब्रह्मचारी सन् श्वोभूते प्र

अर्चितां गंधमाल्याद्यैः पयसा स्नापयेद्विभुं वस्त्रोपवीताभरणपाद्योपस्पर्शनैस्ततः ३९ गंधधूपादिभिश्चार्चेद्द्वाद
शाक्षरविद्यया शृतं पयसि नैवेद्यं शाल्यन्नं विभवे सति ४० ससर्पिः सगुडं दद्याज्जुहुयान्मूलविद्यया निवेदितं तद्भक्ता
य दद्याद्भुंजीत वा स्वयं ४१ दत्त्वाचमनमर्चित्वा ताम्बूलं च निवेदयेत् जपेदष्टोत्तरशतं स्तुवीत स्तुतिभिः प्रभुं ४२ कृत्वा
प्रदक्षिणं भूमौ प्रणमेद्दंडवन्मुदा कृत्वा शिरसि तच्छेषं देवमुद्वासयेत्ततः ४३ द्व्यवरान्भोजयेद्विप्रान्पायसेन यथोचितं
भुंजीत तैरनुज्ञातः सेष्टः शेषं समाहितः ४४ ब्रह्मचार्यथ तद्रात्र्यां श्वोभूते प्रथमेऽहनि स्नातः शुचिर्यथोक्तेन विधिना
सु समाहितः ४५ पयसा स्नापयित्वार्चेद्यावद्व्रतसमापनं पयोभक्षो व्रतमिदं चरेद्विष्ण्वर्चनादृतः ४६ सर्ववज्जु
यादग्निं ब्राह्मणांश्चापि भोजयेत् एवं त्वहरहः कुर्याद्द्वादशाहं पयोव्रतः ४७ हरेराराधनं होममर्हणं द्विजतर्पणं प्र
तिपद्दिनमारभ्य यावच्छुक्लत्रयोदशी ४८ ब्रह्मचर्यमधःस्वप्नं स्नानं त्रिषवणं चरेत् वर्जयेदसदालापं भोगानुच्चावचां
स्तथा ४९ अहिंस्रः सर्वभूतानां वासुदेवपरायणः त्रयोदश्यामथो विष्णोः स्नपनं पंचकैर्विभोः ५० कारयेत्
शास्त्रदृष्टेन विधिना विधिकोविदैः पूजां च महतीं कुर्याद्वित्तशाठ्यविवर्जितः ५१ राम

भाते सति ४५ पय एव भक्ष्यं आहारो यस्य ४६ अधःस्वप्नं भूशयनं ४९ पंचकैः पंचामृतैः ५० राम ॥
राम राम राम

नज्ञानादृत्तानादीनवसंज्ञान्नाद् नमस्तुभ्यमिति २९ पाद्यादौविशेषतस्तुद्वादशनामान्येवदति चतुर्विंशतिगुणाः तिज्ञानितानिजाना
तीतितस्मैतथागुणसंख्यानस्यहेतवेसांख्यप्रवर्तकाय ३० एवंसामान्येनानुत्वावरतोवृत्रणामतित्रिभिः मंत्राद्येमंत्रोक्तयज्ञरूपेणाविष्णो
ःप्रणामोनमइति द्वेशीर्षेयस्यत्रयःपादायस्यततत्वेफलविस्तारकायत्रय्याविद्यायामात्मायस्येति त्रिधाबद्धइत्यस्यार्थउक्तः त
थाचमंत्रः चत्वारिशृंगास्त्रयोअस्यपादाद्वेशीर्षेसप्तहस्तासोअस्य त्रिधाबद्धोवृषभोरोरवीतिमहोदेवोमर्त्यांआविवेशेति मार्ग

नमस्तुभ्यंभगवतेपुरुषायमहीयसे सर्वभूतनिवासायवासुदेवायसाक्षिणे २९ नमोव्यक्तायसूक्ष्मायप्रधान
पुरुषायच चतुर्विंशद्गुणज्ञायगुणसंख्यानहेतवे ३० नमोद्विशीर्ष्णेत्रिपदेचतुःशृंगायतंतवेसप्तहस्ताय
यज्ञायत्रयीविद्यात्मनेनमः ३१ नमःशिवायरुद्रायनमःशक्तिधरायच सर्वधिपतयेभूतानांपतयेनमः ३२ ना विद्या
रायणायऋषयेनरायहरयेनमः नमोहिरण्यगर्भायप्राणायजगदात्मने ३३ नमस्तआदिदेवायसाक्षिभू
तायतेनमः योगैश्वर्यशरीरायनमस्तेयोगहेतवे ३४ नमोमरकतश्यामवपुषेधिगतश्रियै केशवायन
मस्तुभ्यंनमस्तेपीतवाससे ३५ त्वंसर्ववरदःपुंसांवरेण्यवरदर्षभः अतस्तेश्रेयसेधीराःपादरेणुमुपासते ३६
अन्ववर्ततयंदेवाःश्रीश्चतत्पादपद्मयोः स्पृहयंतइवामोदंभगवान्मेप्रसीदतां ३७ एतैर्मंत्रैर्हृषीकेशमावा
हनपुरस्कृतं अर्चयेच्छ्रद्धयायुक्तःपाद्योपस्पर्शनादिभिः ३८ ॥ राम ॥

गृहवदात्मनःसोयंयत्तैर्यथायथं विष्णुस्तुयज्ञरूपेणास्तूयतेनेनतत्त्वतः तथाचयास्कः चत्वारिशृंगेतिवेदावाएवोक्ताःत्रयोअस्य
पादाइति सवनानिद्वेशीर्षेप्रायणीयोदयनीयेसप्तहस्ताःसप्तछंदांसित्रिधाबद्धःत्रेधाबद्धोमंत्रब्राह्मणकल्पैर्वृषभोरोर
वीति रोरवणमस्यसवनक्रमेणऋग्भिर्यजुर्भिःसामभिर्यदेनमृग्भिःशंसतियजुर्भिर्यजंतिसामभिःस्तुवंतीति ३१ प्राणायसूत्रात्मनेयो राम
गैश्वर्यंशरीरंयस्य ३४ अधिगताप्राप्ताश्रीःयेनतस्मै ३५ तत्पादपद्मयोरामोदंस्पृहयंतइव ३६ देवाश्चश्रीश्चयमन्ववर्तंततेममप्रसीदतु ३७ ३३

कश्यपः श्रुत्वेमं तां तु ब्रवेहं त्वा जयितेऽविस्मयव्याजेन तत्त्वमुपदिश्यति अहोऽद्भुतिमार्येन १८ अपरिलक्षंतीशत्वात् उपतिष्ठस्वेतिद्वाभ्यां
२१ नेनेवंभूतकामप्राप्तिर्दैवं तोतरप्रसिद्धातज्ञात् अमोघेति २२ यथासमेममनोरथंविदध्यात् २३ यथा च मे आशुतुष्यतितत
थात्तत्सवाप्रकारमुपदिश २४ मयापृष्टः पद्मजोमेयदुक्तमात् तन्नेप्रवक्ष्यामीत्यन्वयः २५ अमलेशुक्लेतज्ञादोदप्रवैष्ठः हत्वमात्

यथातानिपुनःसाधोप्रपद्येरन्ममात्मजाः तथाविधेहिकल्याणंधियाकल्याणसुव्रत १७ कउ॰ एवमभ्य
र्थितोदित्याकस्तामाहस्मयन्निव अहोमायाबलंविष्णोःस्नेहबद्धमिदंजगत् १८ क्वदेहोभौतिकोनात्माक्वचात्मा
प्रकृतेःपरः कस्यकेपतिपुत्राद्यामोहएवहिकारणं १९ उपतिष्ठस्वपुरुषंभगवंतंजनार्दनं सर्वभूतगुहावासंवासु
देवंजगद्गुरुं २० सविधास्यतितेकामान्हरिर्दीनानुकंपनः अमोघाभगवद्भक्तिर्नेतरेतिमतिर्मम २१ अदितिः
केनाहंविधिनाब्रह्मन्नुपस्थास्येजगत्पतिं यथामेसत्यसंकल्पोविदध्यातिमनोरथं २२ आदिशत्वंद्विजश्रेष्ठविधिंत
दुपधावनं आशुतुष्यतिमेदेवःसीदंत्याःसहपुत्रकैः २३ कश्यपः एतन्मेभगवान्पृष्टःप्रजाकामस्यपद्मजः यदा
हतेप्रवक्ष्यामिव्रतंकेशवतोषणं २४ फाल्गुनस्यामलेपक्षेद्वादशाहंपयोव्रतः अर्चयेदरविंदाक्षंभक्त्यापरमयान्वि
तः २५ सिनीवाल्यांमृदालिप्यस्नायात्क्रोडविदीर्णया यदिलभ्येतवैस्रोतस्येतंमंत्रमुदीरयेत् २६ त्वंदेव्यादिव
राहेणरसायाःस्थानमिच्छता उद्धृतासिनमस्तुभ्यंपाप्मानंमेप्रणाशय २७ निर्वर्तितात्मनियमोदेवमर्चेत्समा
हितः अर्चायांस्थंडिलेसूर्येजलेवह्नौगुरावपि २८ ॥ राम

२६ ब्रह्मचार्यथतत्प्रभृत्यंत्यं तेनग्रंथेनयदिलभ्येततर्हिक्रोडविदीर्णयावराहोत्खातयामृदालिप्यतत्रमंत्रःत्वंदेवीति २७ त्वंदेवीतिमंत्रेः
हेदेविलंरसायाउद्धृता २७ निर्वर्तितआत्मनियमोनित्यनैमित्तिकोयेन २८ ॥ राम ॥

हरेरनुचरा दैत्या दैवेनर्द्धैः समृद्धैर्भवद्भिः २३ अर्थं तायाणेकल्पाय २४ विभुपतिः शिष्य राजते इति विराड्रूपभोगौ मनस्य चिकी
र्षितं ज्ञात्वा अथ मर्षः अस्य सर्वस्वापहारेण ममेत्यभिमानं संत्यजेदानीं देहस्वीकारेण अहंकारमपित्याजयित्वा परमानुग्रह
कर्तुमिच्छति न चानेन तस्यान्यः कोपि सत्यसंधो धीरो नास्तीति तद्यशः प्रख्यापनार्थं किंचिद्धातयित्वमपीच्छतीति मनोभिप्रा

भवद्भिर्निर्जिता ह्येते बहुशोऽनुचरा हरेः दैवेनर्द्धैस्त एवाद्य युधि जित्वा नदंति नः २३ एतान्वयं विजेष्यामो
यदि दैवं प्रसीदति तस्मात्कालं प्रतीक्षध्वं यो नोर्थत्वाय कल्पते २४ शुकः पतिं निगदितं श्रुत्वा दैत्यदान
वयूथपाः रसां निर्विविशू राजन्विष्णुपार्षदताडिताः २५ अथ तार्क्ष्यसुतो ज्ञात्वा विराट्प्रभुचिकीर्षितं ब
बंध वारुणैः पाशैर्बलिं सौत्येहनि क्रतौ २६ हाहाकारो महानासीद्रोदस्योः सर्वतो दिशं निगृह्यमाणे
ऽसुरपतौ विष्णुना प्रभविष्णुना २७ तं बद्धं वारुणैः पाशैर्भगवानाह वामनः नष्टश्रियं स्थिरप्रज्ञमुदारय
शसं नृप २८ पदानि त्रीणि दत्तानि भूमेर्मह्यं त्वयासुर द्वाभ्यां क्रांता मही सर्वा तृतीयमुपकल्पय २९
यावत्तपत्यसौ गोभिर्यावदिंदुः सहोडुभिः यावद्वर्षति पर्जन्यस्तावती भूरियं तव ३० पदैकेन मयाक्रांतो
भूर्लोकः खं दिशस्तनोः स्वर्लोकस्ते द्वितीयेन पश्यतस्ते स्वमात्मना ३१ प्रतिश्रुतमदातुस्ते निरये वास इ
ष्यते विश त्वं निरयं तस्माद्गुरुणा चानुमोदितः ३२ वृथा मनोरथस्तस्य दूरे स्वर्गः पतत्यधः प्रतिश्रुतस्या दानेन योर्थिनं विप्रलंभते ३३
यं ज्ञात्वा तं बबंध सौत्येहनि सोमाभिषवदिने २६ रोदस्योर्द्यावापृथिव्योः २७ असौ सूर्यो मयात्मनेत्यन्वयः व्यापिनेत्यर्थः खं च
दिशश्च तनोः तत्र ते स्वकीयं सर्वं स्वं स्वर्लोकादीकमपि इहैव ३१ गुरुणा शुक्रेणानुमोदितः सन् ३२ एवमुक्तेपि निरयपरिहारा
र्थं स्वर्गाद्युपायपरिहारार्थं च मनोरथं कुर्वंतं प्रत्याह वृथेति यः प्रतिश्रुतस्यादानेन याचकं विप्रलभते तस्य मनोरथो व्यर्थ एव स्वर्गः
श्रुतस्य दूर एव स च अधः पतत्येव त्वया चाहं विप्रलब्धः तस्माद्व्यलीकफलमनृतस्य फलं निरयं भुंक्ष्वेत्यर्थः ३३ राम॰

विप्रलब्धो ददामीति त्वयाहं चाढ्यमानिना तद्व्यलीकफलं भुंक्ष्व निरयं कति
चित्समाः ॥३४॥

श्री भा ग स्कं टी ७७

इति श्रीभावार्थदीपिकायां अष्टमस्कंधे एकविंशोऽध्यायः २१ द्वाविंशे तु प्रसन्नः सन्नस्य स्थाप्य सुतलं बलिं दत्वा वरान् हरिर्न्यस्तं मत्वा तद्द्वारपो भवत् विप्रकृतः अपकृतः भिद्यमानः सत्याच्चाल्यमानः १ हे उत्तमश्लोकेति करालः मम वच ईरितं प्रतिश्रुतं नतो व्यलीकं तत्र यां कपटेन वामनतेन मिलितां रूपं ततस्या विष्कृततात् एवमपि यदि भवान्व्यलीकं मन्यते तथापि ऋतमेवाहं करोमि मदुक्तप्रलंबनं न भवतु मे शीर्ष्णि निजं पदं तृतीयं कुरु न च द्वाभ्यां विश्वक्रामतो विक्रांतवतो मे तव शिरः पदपर्यंतं न भवतीति मंतव्यः चिन्नेन वित्तद्वयं जातं तदिदमधिकमेव स्यात् वित्तादपि चित्ततोधिकत्वादिति भावः नन्त्वच आपदर्थं धनं

इति श्रीभागवते अष्टमस्कंधे बलिनिग्रहो नाम एकोविंशोऽध्यायः २१ शुक उवाच एवं विप्रकृतो राजन् बलिर्भगवतासुरः भिद्यमानोऽप्यभिन्नात्मा प्रत्याहाविक्लवं वचः १ बलिः यद्युत्तमश्लोक भवान्ममेरितं वचो व्यलीकं सुरवर्य मन्यते करोम्यृतं तन्न भवेत्प्रलंबनं पदं तृतीयं कुरु शीर्ष्णि मे निजं २ बिभेमि नाहं निरयात्पदच्युतो न पाशबंधाद्व्यसनाद्दुरत्ययात् नैवार्थकृच्छ्राद्भवतो विनिग्रहादसाधुवादाद्भृशमुद्विजे यथा ३ पुंसां श्लाघ्यतमं मन्ये दंडमर्हत्तमार्पितं यन्न माता पिता भ्राता सुहृदश्चादिशंति हि ४ त्वं नूनमसुराणां नः परोक्षः परमो गुरुः यो नोऽनेकमदांधानां विभ्रंशं चक्षुरादिशत् ५

रक्षेद्दारान् रक्षेद्धनैरपि आत्मानं सर्वतो रक्षेद्दारैरपि धनैरपि इत्यादिवचनादात्मभयपरिहाराय सर्वस्वं त्यज्यते त्वं तु अतो भीतः १ सन्नात्मानमर्पयसि अत आह बिभेमीति २ असाधुवादादपकीर्तेर्यथा भृशमुद्विजे तथा निरयादिभ्यो न बिभेमि ३ ननु मया निग्रहादपकीर्तिस्तिष्ठत्येव नैवेत्याह पुंसामिति अर्हत्तमैरर्पितं दंडं मातादयोऽपि नादिशंति हि नैवापर्यंति किंतु वा तथा निगृहीतोऽहं श्लाघ्य एवास्मीति भावः ४ ननु अहं देवानां हितैषी नो असुराणां तत्राह त्वं नूनमिति परोक्षः प्रच्छन्नेन वर्तमानः शत्रुत्वेन भंगानिवा

राम: ७७

उग्रुहोद्दूश्यसिद्धे ६ श्रुतो मम नाथ लज्जानापि ड्डः खमित्याह तेन गरुणा भवता किंच योयं दंडइपोम मानुग्रहः त्वया कृतः सत
त्वद्दृक्रूपो ऽत्रेत्वेन ७ नत्वहमनुग्रहस्य पात्रमित्याशयेनाह पितामह इति भवदीयानां सम्मतः यतश्चा विष्कृतः साधुवादाय
स्यत्वमेव परमश्राश्रयो यस्य सः श्रुता भवता विदेश विविद्विषादिरा एकशिश्चना विचित्रवैशसद्धितैः संप्रापितोसि ८ देहा
दीनामसारतां निश्चित्य श्रुकुतोभयं भूवच भवतः पादपद्ममेव प्रपेदे श्रथ तस्मादहमपि देवेन तस्यैव भोगान्तवांतिकं नीतइ
ति चतुर्णामन्वयः श्रततः श्रायुषा तेरिक्थदारैः पुत्रैरहगेहैश्च केवलमायुषा व्यययपवनतम्हवं किंचित् ९ सप्र

यस्मिन्वैरानुबंधेन हृदयेनाविबुधेतराः बद्धोवेलेभिरेसिद्धियां सुद्धैकांतयोगिनः ६ तेनाहं निगृहीतोस्मि
भवता भूरिकर्मणा बहुश्रवाहृणोः पाशेनानुब्रीडेन च माथे ७ पितामहो मे भवदीयसंमतः प्रह्लाद आवि
ष्कृतसाधुवादः भवद्विपक्षेण विचित्रवैशसं संप्रापितस्त्वत्परमः स्वपित्रा ८ किमात्मनानेन जहाति योन्ततः
किं रिक्थहारैः स्वजनाख्यदस्युभिः किंजायया संसृतिहेतुभूतया मर्त्यस्य गेहैः किमिहायुषो व्ययः ९
इत्थं स निश्चित्य पितामहो महानगाधबोधो भवतः पादपद्मं ध्रुवं प्रपेदे ह्यकुतोभयं जनाद्भीतः स्वपक्षक्षपण
स्य सत्तमः १० अथाहमप्यात्मरिपोस्तवांतिकं दैवेन नीतः प्रसभं त्याजितश्रीः इदं कृतांतांतिकवर्ति
जीवितं ययाध्रुवं स्तब्धमतिर्न बुध्यते ११ ॥ राम

सिद्धो महान्स्वपक्षं दैत्यकुलं क्षपयतीति तथा १० प्रसभं बलात् त्याजिता श्रीर्यस्य यया स्वश्रिया स्तब्धमतिः सन्
इमां निदं जीवितं ध्रुवं न बुध्यते कथंभूतं कृतांतस्यांतिकवर्ति मृत्योः सन्निहिते ११ ॥ राम

राकापतिः पूर्णेन्दुः १२ अंजनत्विषं श्यामं १३ स्वकृतात् हेलनादिरूपादपराधस्मरणेन सव्रीडं नीचीनमधोमुखं यस्य सः शिरसा न
मनोऽत्युत्कटत्वमूर्ध्ना ननाम १४ वेलस्व कृतमनुग्रहं दृष्ट्वा पुलकैरश्रुभिश्च विक्लवो विह्वलः १५ त्वयैवेति न हि ईदृशं पदं मे न दीयं

शुकः तस्येत्थं भाषमाणस्य प्रह्लादो भगवत्प्रियः आजगाम कुरुश्रेष्ठ राकापतिरिवोत्थितः १२ तमिंद्रसेन
:स्वपितामहं श्रिया विराजमानं नलिनायतेक्षणं प्रांशुं पिशंगांबरमंजनत्विषं प्रलंबबाहुं सुभगर्षभमैक्ष
त १३ तस्मै बलिर्वारुणपाशयंत्रितः समर्हणं नोपजहार पूर्ववत् ननाम मूर्ध्नाश्रुविलोललोचनः सव्री
डनीचीनमुखो बभूव ह १४ स तत्र हासीनमुदीक्ष्य सत्पतिं सुनंदनंदाद्यनुगैरुपासितं उपेत्य भूमौ शिरसा म
हामना ननाम मूर्ध्ना पुलकाश्रुविक्लवः १५ प्रह्लादः त्वयैव दत्तं पदमैंद्रमूर्जितं हृतं तदेवाद्य तथैव शोभनं
मन्ये महानस्य कृतो ह्यनुग्रहो विभ्रंशितो यच्छ्रिय आत्ममोहनात् १६ यया हि विद्वानपि मुह्यते यतः तत्को
विचष्टे गतिमात्मनो यथा तस्मै नमस्ते जगदीश्वराय वै नारायणायाखिललोकसाक्षिणे १७ शुकः
बद्धं वीक्ष्य पतिं साध्वी तत्पत्नी भयविह्वला प्राञ्जलिः प्रणतोपेन्द्रं बभाषेऽवाङ्मुखी नृप १८ राम

त्वया एव दत्तं किं तत्स्वीयमेव पुनः स्वीकृतं तत्र च शोभनमेव कृतं तत्र हेतुमनुग्रहमिति यद्यस्मात् श्रियो विभ्रंशितः आत्ममोहनेन तस्मात् हि भ्रंशि
तः १६ मोहनत्वमेवाह यया श्रिया विद्वानपि यतः मुह्यते तेन तत्संसारमध्ये कोऽन्यः पुमानात्मनो गतिं तत्त्वं यथावद् विचष्टे पश्यति

श्रीभा. स्कं. ८ ५५

२ टीकासमेतम् रामः ५५

समर्पयंति

तस्य प्रह्लादस्यानुशृण्वत उवाचेति किं विहन्तुं प्रवृत्तस्त्वमर्थः तथैव विंध्यावलिः बलिपत्न्यापि वक्तुं प्रवृत्तेत्यर्थः तां च संमानयन्हि
रण्यगर्भः तामनुसंभूतः अतस्तस्या एव वाक्यं प्रथममवतारयति वदंतीत्याह त्रिजगतः कर्तुः प्रभोः पालकस्य स्वतस्तदर्थं स्वं इ
परस्य तव किमस्य आवहंतीति किं संपादयंति त्वयावरोपितः कर्तृवादः कर्तारः स्वतंत्रा वयमिति वादमात्रमपि येषां ते अयं भावः लो
कत्रयं मयार्पितं तत्तु ईयपराय देहं समर्पयं प्रतिश्रुतं तत्कृतं करोति दिदानीं स्वाम्याविष्कारेण त्वं च त्वबुद्धिः निर्लज्जश्चयतः त्वमेव
सर्वस्यापि स्वामी अतो मंदबुद्धिमतेकेवलं कृपया विभुमपालयेति तदेव प्रह्लादस्य विंध्यावलेश्च परमाधाराता प्रसन्नो हरिः ब्रह्मा

विंध्यावलिः क्रीडार्थमात्मन इदं त्रिजगत्कृतं ते स्वाम्यं तु तत्र कुधियो पर ईश कुर्युः कर्तुः प्रभोस्तव किमस्यत
तो आवहंति त्यक्तह्रियस्त्वदवरोपितकर्तृवादाः १९ तस्यानुशृण्वतो राजन्प्रह्लादस्य कृतांजलेः हिरण्यगर्भो भगवा
नुवाच मधुसूदनं २० ब्रह्मा भूतभावन भूतेश देवदेव जगन्मय मुंचैनं हृतसर्वस्वं नायमर्हति निग्रहं २१ कृ १८
त्स्ना तेनेन दत्ता भूः लोकाः कर्मार्जिताश्च ये निवेदितं च सर्वस्वमात्माविक्लवया धिया २२ यत्पादयोरशठधीः स
लिलं प्रदाय दूर्वांकुरैरपि विधाय सतीं सपर्यां अप्युत्तमां गतिमसौ भजते त्रिलोकीं दाश्वानविक्लवमनाः कथमा हि
र्तिमृच्छेत् २३ श्री भ उ व ब्रह्मन्यमनुगृह्णामि तद्विशो विधुनोम्यहं यन्मदः पुरुषः स्तब्धो लोकं मां चावम

तलोकद्दृष्टो वृवित्ताप पतिभूतभावनेति त्रिभिः १९ निग्रहानर्हत्वे हेतुः कृत्स्नेति सर्वस्वमेवात्मेति २२ तदेव कैमुत्यन्यायेनाह
यस्य तव पादयोः सलिलमात्रमपि प्रदाय सर्वोपि जन उत्तमां गतिं प्राप्नोति तस्मात्भ मसौ बलिः त्रिलोकीं दाश्वान्दत्तवान् आर्तिं कः
त्वं प्राप्नुयात् २३ नहि पाठ इति पाठः तस्य विधास्यथान्न नन्वयापहारः कोयमनुग्रहः तत्राह यन्मदः येरर्थो मे दाय स्यात्सः अ
तएव वस्तृत अनम्रः संसारस्त बद्धे तून अपहारएवात्र ग्रहः इत्यर्थः २४ रामायनमः २४

दुर्लभं पुरुषजन्म कथंचिल्लब्धवतो जीवस्य जन्मादिनिमित्तो गर्वोमहादानिकरः तस्य च नाशो मदनुग्रहादेवेत्याह यदेति द्वाभ्यां अ
नीशः परतंत्रः सन्निजैः कर्मभिर्नानायोनिषु कृमिकीटादिषु संसरन् तत्र पौरुषीं गतो जन्मादिभिरस्य यदि स्तंभो न भवेत् तर्ह्ययं
मदनुग्रह एव २५ कथं तर्हि प्रह्लादादिभ्यः संपदो ददासीति चेत्तत्राह मान एव स्तंभः अनम्रता तस्य निमित्तभूतानां समंततः सर्वश्रे
यःप्रतिकूलानां जन्मादीनां सत्त्वेपि जन्मादिभिरिति वा हंत देवस्मिन् मत्परो न मुह्येत् अतो भक्तस्येच्छया संपदोपि ददामि अभक्त२

यदा कदाचिज्जीवात्मा संसरन्निजकर्मभिः नानायोनिष्वनीशोयं पौरुषीं गतिमाव्रजेत् २५ जन्मकर्मवयोरूपवि२
द्यैश्वर्यधनादिभिः यद्यस्य न भवेत्स्तंभः तत्रायं मदनुग्रहः २६ मानस्तंभनिमित्तानां जन्मादीनां समंततः सर्वश्रे
यःप्रतीपानां हंत मुह्येन्न मत्परः २७ एष दानवदैत्यानामग्रणीः कीर्तिवर्धनः अजैषीदजयां मायां सीदन्नपि न मुह्य
ति २८ क्षीणरिक्थश्च्युतः स्थानात्क्षिप्तो बद्धश्च शत्रुभिः ज्ञातिभिश्च परित्यक्तो यातनामनुयापितः २९ गुरुणा
भर्त्सितः शप्तो जहौ सत्यं न सुव्रतः छलैरुक्तो मया धर्मो नायं त्यजति सत्यवाक् ३० एष मे प्रापितः स्थानं दुष्प्रापममर
रैरपि सावर्णेरंतरस्यायं भवितेंद्रो मदाश्रयः ३१ तावत्सुतलमध्यास्तां विश्वकर्मविनिर्मितं ३२ यत्राधयो व्याधय
श्च क्लमः तंद्रा पराभवः नोपसर्गा निवसतां संभवंति ममेक्षया ३३ राम·

स्तु मुह्येदिति तदपहाररूपमेव तस्यानुग्रहं करोमीति भावः २६ सुर्वंटीको २७ अस्य चेदानीं मत्परत्वादन्यैर्दुष्प्रापमपि दास्यामीति वक्तुं
तस्य मोहाभावमाह एष इति त्रिभिः नह्येतस्मिन् कुले कश्चिन्निःसत्त्वः कृपणः पुमान् इत्यादिना छलैरेव मया धर्म उक्तः तथापि
स्वधर्मं सत्यं न त्यजति २८ सत्या वाक् यस्य ३० मे मया अहमेवाश्रयः पालको यस्य सः ३१ स्थानं प्रापित इति यदुक्तं तदेव स्थानमा
ह तावत्सावर्णिमन्वंतरपर्यंतं सुतलमध्यास्तां अधिवसत्वित्यर्थः ३२ यद्यस्मिन्निवसतां आध्यादयो ममेक्षया न संभवंति ३३

एवंब्रह्मणा प्रत्युक्त्वा कृतप्रणामः परवशः सोत्साहबलिं प्रत्याह इंद्रसेनेति चतुर्भिः ३४ त्वच्छासनमतिगच्छति प्रतिवर्तते इति तथा त्राता र
नू ३५ तथापि भगवद्वियोगाद्दैन्यं निरीक्ष्य प्रत्याह सदेति ३६ संगाच्चासुरो भावः स विनंक्ष्यति ३७ इति श्रीभावार्थदीपिका-
यांमष्टमस्कंधे द्वाविंशोऽध्यायः २२ त्रयोविंशे बलौ याते सुतलं सपितामहे उपेंद्रेणादितेः सर्वं स्वं मोदते हरिः बाष्पकलाभिर्वि
उद्विग्नाकुले ईक्षणे यस्य भक्त्या उत्कल उत्कंठः १ अहो त्वत्प्रणामस्य महिमा यदर्थं कृतः समुद्यम एव प्रपन्नानां भक्तानां योऽर्थः तस्य

इंद्रसेन महाराज याहि भो भद्रमस्तु ते सुतलं स्वर्गिभिः प्रार्थ्यं ज्ञातिभिः परिवारितः ३४ न त्वामभिभविष्यंति
लोकेशाः किमुतापरे त्वच्छासनातिगान्दैत्यांश्चक्रं मे सूदयिष्यति ३५ रक्षिष्ये सर्वतोऽहं त्वां सानुगं सपरिच्छदं स
दा सन्निहितं वीर तत्र मां द्रक्ष्यते भवान् ३६ तत्र दानवदैत्यानां संगात्ते भाव आसुरः दृष्ट्वा मदनुभावं वै सद्यः कुंठो
विनंक्ष्यति ३७ इति श्रीभागवते ऽष्टमस्कंधे द्वाविंशोऽध्यायः २२ श्रीशुकः इत्युक्तवंतं पुरुषं पुरातनं महानुभावो
ऽखिलसाधुसंमतः बद्धांजलिर्बाष्पकलाकुलेक्षणो भक्त्युत्कलो गद्गदया गिराब्रवीत् १ बलिः अहो प्रणामा
य कृतः समुद्यमः प्रपन्नभक्तार्थविधौ समाहितः यल्लोकपालैस्त्वदनुग्रहोऽमरैरलब्धपूर्वोऽपसदेऽसुरेऽर्पितः २ राम
श्रीशुकः इत्युक्त्वा हरिमानम्य ब्रह्माणं सभवं ततः विवेश सुतलं प्रीतो बलिर्मुक्तः सहासुरैः ३

विधौ अभक्तैरर्पितस्य संपादने समाहितः अप्रमत्तः स्थितः कृतः यद्येनोद्यमेन लोकपालैरमरैः सत्त्वप्रधानैरपि अलब्धपूर्वः
त्वदनुग्रहः अपसदे नीचे राजसे तामसे चार्पितः अयं भावः परमेश्वराय तुभ्यं अदेवदाकः त्रिलोकीं दत्तवानिति तदा सम्यक् प्रणामो
न सम्यक्कृतः किं तत्तदर्थं उद्यममात्रं कृतं तेन तपोदानादिकोटिभिरप्यलभ्यः त्वदनुग्रहः संपादितः अहो त्वत्प्रणामाय
यमिति २ ३ रामायनमः श्रीगोपालायनमः राम

श्री॰ भा॰ स्कं॰ टी॰ ७२

अयमासद्भूपेंद्रः सन्पालयामास ७ दुर्गपालो गिरिशादिभिर्देवैः सर्वतः इत्युक्तत्वात् ६ हे शरणद अश्नुवते अथ प्रकृतस्तयो दुर्हन्ताः खलयोन
यः उत्पन्नास्ते वयं तव भवतो दाक्षिण्यदृष्टेः पदवीं कस्माद्धेतोः प्रणीताः बहुमानेन चिन्तानुवर्तिनं दाक्षिण्यं तेन दृष्टिस्तस्या वि
षयतां प्रापिताः ७ भक्तप्रियत्वात्स्वतन्त्रोऽसि एवं तवेहितं अहो चित्रं किं तत्सर्वात्मनः समदृशश्च स्वभावो विषम इति यत् सर्वात्मत्वेऽपि

प्रह्लाद उवाच

एवमिंद्राय भगवान्प्रत्यानीय त्रिविष्टपं पूरयित्वादितेः काममशासत्सकलं जगत् ४ लब्धप्रसादं निर्मुक्तं पौत्रं
वंशधरं बलिं निशाम्य भक्तिप्रवणः प्रह्लाद इदमब्रवीत् ५ नेमं विरिंचो लभते प्रसादं न श्रीर्न शर्वः किमुताप
रेऽन्ये यन्नोऽसुराणामसि दुर्गपालो विश्वाभिवंद्यैरभिवंदितांघ्रिः ६ यत्पादपद्ममकरंदनिषेवणेन ब्रह्मादयः श
रणदाश्नुवते विभूतीः कस्माद्वयं कुसृतयः खलयोनयस्ते दाक्षिण्यदृष्टिपदवीं भवतः प्रणीताः ७ चित्रं तवे
हितमहोऽमितयोगमायालीलाविसृष्टभुवनस्य विशारदस्य सर्वात्मनः समदृशोऽविषमः स्वभावो भक्तप्रियो
यदसि कल्पतरुस्वभावः ८ श्री भ उ व वत्स प्रह्लाद भद्रं ते प्रयाहि सुतलालयं मोदमानः स्वपौत्रेण ज्ञा
तीनां सुखमावह ९ नित्यं द्रष्टासि मां तत्र गदापाणिमवस्थितं मद्दर्शनमहाह्लादध्वस्तकर्मनिबंधनः १०

अवरिते देवः अमिता अचिंत्या योगमाया तया लीलातया विसृष्टानि रचितानि भुवनानि येन तस्य अतो ऽत्र संधिरार्षः समदृ
शो हेतुः विशारदस्य सर्वज्ञस्य अथवा भक्तप्रियत्वेऽपि वैषम्यं नास्त्येव यतः कल्पतरुस्वभावः सन् भक्तप्रियोऽसि न हि कल्पतरुराश्रि
तानामेव कामान्पूरयन्नपि विषमो भवतीत्यर्थः ८ मद्दर्शनेन यो महाह्लादः तेन ध्वस्तं कर्मबंधनं अज्ञानं यस्य १० राम॰

राम॰ ७२

कर्मवितन्वतःशिष्यस्ययच्छिद्रंमंतरेणन्यूनंजातंतत्संतनुविस्तारयसंधत्स्वयजमानेनविनाकथंसंधातव्यमित्यतआह यत्
तद्वितिब्रह्मदृष्टंब्राह्मणैर्दृष्टंएवसमंभवेत् किंपुनस्त्वद्दृष्टमित्यर्थः १४ भगवान्यस्यसर्वेणापिभावेनवस्तुमात्रेणपूजितः त
स्यकर्मसुकुतोवैषम्यंकथंभूतःकर्मणामीश्वरःप्रवर्तकःयज्ञेशःयज्ञफलदःयज्ञमयश्चपुरुषः १५ आस्तांतावत्पूजायस्मा

शुकः आज्ञांभगवतोराजन्प्रह्लादोबलिनासह बाढमित्यमलप्रज्ञोमूर्ध्न्याधायकृतांजलिः ११ परिक्रम्यादि
पुरुषंसर्वासुरचमूपतिः प्रणतस्तदनुज्ञातःप्रविवेशमहाबिलं १२ अथाहोशनसंराजन्हरिर्नारायणोंति
के आसीनमृत्विजांमध्येसदसिब्रह्मवादिनां १३ ब्रह्मन्संतनुशिष्यस्यकर्मछिद्रंवितन्वतः यत्तत्कर्मसुवै
षम्यंब्रह्मदृष्टंसमंभवेत् १४ शुक्रः कुतस्तत्कर्मवैषम्यंयस्यकर्मेश्वरोभवान् यज्ञेशोयज्ञपुरुषःसर्वभावे
नपूजितः १५ मंत्रतस्तंत्रतःछिद्रंदेशकालार्हवस्तुतः सर्वंकरोतिनिछिद्रमनुसंकीर्तनंतव १६ तथा नाम
पिवदतोभूमन्करिष्याम्यनुशासनं एतच्छ्रेयःपरंपुंसांयत्तवाज्ञानुपालनम् १७ शुकः अभिनंद्यहरे
राज्ञामुशनाभगवानिति यज्ञछिद्रंसमाधत्तबलेर्विप्रर्षिभिःसह १८ एवंबलेर्महींराजन्भिक्षित्वावा
मनोहरिः ददौभ्रात्रेमहेंद्रायत्रिदिवंयत्परैर्हृतं १९ प्रजापतिपतिर्ब्रह्मादेवर्षिपितृभूमिपैः दक्षभृग्वंगि
राम
रोमुख्यैःकुमारेणभवेनच २० ॥

मंत्रतःस्वरादिभ्रंशेनतंत्रतःक्रमव्यत्यासादिनादेशतःकालश्चअर्हतःपात्रतःवस्तुतःदक्षिणादिनायच्छिद्रंन्यूनंतत्सर्वंत राम
वानुकीर्तनमात्रमेवनिछिद्रंकरोतीति १६ हरेराज्ञांप्रतिनंद्यबलेर्यज्ञछिद्रंसमाधत्तसंदधेपाठांतरेसमादधायता राम
माज्ञासंपादितवानितिशेषः १८ देवाश्चऋषयश्चभूमिपाश्चमनवश्चतैःसहितः २० ॥ राम

नतु लोकादीनां पतिरिंद्रोऽस्यैव सत्यं तथापि वेदादीनां कल्पं पालने ददे २२ वामनमुपेंद्रं कल्पयांचक्रे २३ देवयानेन गा विमानेन मार्गेण २४ एतच्चरितं सर्वमाख्यातमिति विशेषाज्ञयाऽन्यान्यपि संतीत्युक्तं तानि तर्हि निःशेषाणि वर्णनीयान्यपीत्यपेक्षायां आह पारमिति उरुवक्रमधाविक्रमतो विष्णोर्महिम्नः पारं यो मर्त्यः गणनो भवति समर्त्यः पार्थिवानि रजांसि अपि विममे गणितवान् १

कश्यपस्यादितेः प्रीत्यै सर्वभूतभयाय च लोकानां लोकपालानामकरोद्वामनं पतिं २१ वेदानां सर्वदेवानां
धर्मस्य यशसः श्रियः मंगलानां व्रतानां च कल्पं स्वर्गापवर्गयोः २२ उपेंद्रं कल्पयांचक्रे पतिं सर्वविभूतये
तदा सर्वाणि भूतानि भृशं मुमुदिरे नृप २३ ततस्त्विंद्रः पुरस्कृत्य देवयानेन वामनं लोकपालैर्दिविं निन्ये ब्र
ह्मणा चानुमोदितः २४ प्राप्य त्रिभुवनं चेंद्र उपेंद्रभुजपालितः श्रिया परमया जुष्टो मुमुदे गतसाध्वसः २५
ब्रह्मा शर्वः कुमारश्च भृग्वाद्या मुनयो नृप पितरः सर्वभूतानि सिद्धा वैमानिकाश्च ये २६ सुमहत्कर्म त
द्विष्णोर्गायंतः परमाद्भुतं धिष्ण्यानि स्वानि ते जग्मुरदितिं च शशंसिरे २७ सर्वमेतन्मयाख्यातं भवतः कु
लनंदन उरुक्रमस्य चरितं श्रोतॄणामघमोचनं २८ पारं महिम्न उरुविक्रमतो गृणानो यः पार्थिवानि वि
ममे स रजांसि मर्त्यः किं जायमान उत जात उपैति मर्त्य इत्याह मंत्रदृगृषिः पुरुषस्य यस्य २९ य इदं देव
देवस्य हरेरद्भुतकर्मणः अवतारानुचरितं शृण्वन्याति परां गतिं ३० राम राम

यथा पार्थिवपरमाणुगणनं न संभवं तथा विष्णोर्गुणगणनमिति एवमाह किं जायमानो जातो वा उपैति न कोपीति वद
न्नेतत्तेनैवाह तस्यार्थः यथा च मंत्रः न ते विष्णो जायमानो न जातो देव महिम्नः परमंतमापेति २९ य इदं शृण्वन्भवति स परां
गतिं याति ३० 

सुकृतं यथावत्कृतं विदुः ३१ इति श्रीभावार्थदीपिकायामष्टमस्कंधे त्रयोविंशोध्यायः २३ चतुर्विंशे प्रसंगेन मत्स्यरूपस्य शा
र्ङ्गिणः लीलोच्यते यया तत्त्वं सत्यव्रतस्तामहार्णवे तत्तत्तु निर्दर्शनादौ निजैश्वर्यनिदर्शनात् मत्स्यरुक्तिपृथ्वीगोलीलयावा
मनोपमे मायया मत्स्यरूपानुकरणं यस्मात्तद्रूपं तत १ ननु कस्मादकस्मादेव मत्स्यावतारश्रवणेच्छा श्रीवामनसाहचर्याद्विना
हु यदर्थमिति द्वाभ्यां दुर्मर्षं दुस्सहं बलेरनुग्रहाय जुगुप्सितमपि याचकरूपं धृतवानिति फलमुक्तं यदर्थं तल्लोकजुगुप्सि

क्रियमाणे कर्मणीदं दैवे पित्र्येथ मानुषे यत्र यत्रानुकीर्त्येत तत्तेषां सुकृतं विदुः ३१ इति श्रीभागवतेऽष्टम
स्कंधे त्रयोविंशोध्यायः २३ राजा भगवञ्छ्रोतुमिच्छामि हरेरद्भुतकर्मणः अवतारकथामाद्यां
मायामत्स्यविडंबनं १ यदर्थमदधाद्रूपं मात्स्यं लोकजुगुप्सितं तमःप्रकृतिदुर्मर्षं कर्मग्रस्त इवेश्वरः २ एतन्नो
भगवन्सर्वं यथावद्वक्तुमर्हसि उत्तमश्लोकचरितं सर्वलोकसुखावहं ३ सूतः इत्युक्तो विष्णुरातेन भगवान्बा
दरायणिः उवाच चरितं विष्णोर्मत्स्यरूपेण यत्कृतं ४ शुकः गोविप्रसुरसाधूनां छंदसामपि चेश्वरः रक्षा
मिच्छंस्तनूर्धत्ते धर्मस्यार्थस्य चैव हि ५ उच्चावचेषु भूतेषु चरन्वायुरिवेश्वरः नोच्चावचत्वं भजते निर्गुणत्वा
द्धियो गुणैः ६ आसीदतीतकल्पांते ब्राह्मो नैमित्तिको लयः समुद्रोपप्लुतास्तत्र लोका भूरादयो नृप ७ ॥

तं मात्स्यं रूपमधारयत् एतन्नो यथावद्वक्तुमर्हसीत्यर्थः २ सामान्येनावतारप्रयोजनमाह गोविप्रेति जुगुप्सितत्वं परिहरति
५ धियो गुणैर्योन्युच्चावचानि रूपाणि तैः नियंत्रस्तेन चरन्नपीश्वरो नोच्चावचत्वं भजते निर्गुणत्वात् अतः पुनः शुद्धसत्त्वम
यैर्मत्स्याद्यवतारैरुच्चावचत्वं शंकेतिभावः ६ विशेषतो मत्स्यावतारप्रयोजनमाह आसीदिति त्रिभिः ब्रह्मणो निद्रायां ब्राह्मः ते
नैव निमित्तेन जातो नैमित्तिकः समुद्रे उपप्लुतानि मग्नाः ७ ॥

श्री मं भा स्कं ८

ग्रीवोंतिके निःसृतान् ८ शाफरीरूपं मत्स्यरूपं ९ प्रयोजनांतरं च लीलाप्रकारं चाह तत्र राजऋषिरित्यादिया वत्समाप्ति १० स एव श्राद्ध
देव इति ख्यातः १२ कृतमालायां नद्यां १३ उदंचनोदके मणिकस्थजले १९ रक्षायोगेनोपायेन यथा महाह्रदप्राप्तेर्वा कुज

कालेनागतनिद्रस्य धातुः शिशयिषोर्बली मुखतो निःसृतान्वेदान्हयग्रीवोंतिकेहरत् ८ ज्ञात्वा तद्दानवेंद्रस्य हयग्री
वस्य चेष्टितं दधार शफरीरूपं भगवान्हरिरीश्वरः ९ तत्र राजऋषिः कश्चिन्नाम्ना सत्यव्रतो महान् नारायणपरो
तपत्तपः स सलिलाशनः १० योसावस्मिन्महाकल्पे तनयः स विवस्वतः श्राद्धदेव इति ख्यातो मनुत्वे हरि
णार्पितः ११ एकदा कृतमालायां कुर्वतो जलतर्पणं तस्यांजल्युदके काचिच्छफर्येकाभ्यपद्यत १२ सत्यव्रतों
जलिगतां सह तोयेन भारत उत्ससर्ज नदीतोये शफरीं द्रविडेश्वरः १३ तमाह सातिकरुणं महाकारुणिकं नृ
पं यादोभ्यो ज्ञातिघातिभ्यो दीनां मां दीनवत्सल १४ कथं विसृजसे राजन्भीतामस्मिन्सरिज्जले तमात्मनोनु
ग्रहार्थं प्रीत्या मत्स्यवपुर्धरं १५ अजानन्रक्षणार्थाय शफर्याः स मनो दधे तस्या दीनतरं वाक्यं श्रुत्वा स मही
पतिः १६ कलशाप्सु निधायैनां दयालुर्निन्य आश्रमं सा तु तत्रैकरात्रेण वर्धमाना कमंडलौ १७ अलब्ध्वात्माव
काशं वा इदमाह महीपतिं नाहं कमंडलावस्मिन्कृच्छ्रं वस्तुमिहोत्सहे १८ कल्पयौकः सुविपुलं यत्राहं निवसे
सुखं १९ स एनां तत आदाय न्यधादौदंचनोदके २० तत्र क्षिप्ता मुहूर्तेन हस्तत्रयमवर्धत न म एतदलं राजन्सुखं
वस्तुमुदंचनः २० पृथु देहि पदं मह्यं यत्त्वाहं शरणं गता तत आदाय सा राज्ञा क्षिप्ता राजन्सरोवरे २१ तदावृत्या
त्मना सोयं महामीनोन्ववर्धत नैतन्मे स्वस्तये राजन्नुदकं सलिलौकसः २२ निधेहि रक्षायोगेन ह्रदे माम विदासिनि

लेविनाशे श्रेष्ठं यतेनोपायेन निधेहि अविदासिनि अनुपक्षये २३ ॥ श्रीराम ॥ राम

२४

ह

राम.
४९

संमितंतत्तज्जलाशयपरिमितंसंतं २४ अभिमानपोऽस्मभितोव्याप्तवान्‌ २७ मुख्यःसम्यगात्मावगतिश्चाश्रयः २८ हेअर
रविंदाक्षपदोपसर्पणंमृषाभवेत्पृथगात्मनांदेहाद्यभिमानिनांसतामितरेषांयथातथासर्वसुहृत्प्रियात्मनःतवपादोपस

जलाशयेसंमितंतेसमुद्रेप्रात्रिपङ्कषं तिष्यमाणस्तमादेदमिक्रमांमकरादयः २४ अदंत्वतिवल्गावीरसं
नेदात्मत्वमर्हसि एवंविमोहितस्तेनवदतावल्गुभारती २५ तमाहकोभवानस्मान्मत्स्यरूपेणमोहयन्‌ नै
वंवीर्योजलचरोदृष्टोस्माभिःश्रुतोपिवा २६ योभवान्योजनशतंअह्नाभिव्यानशेसरः नूनंतंभगवान्साक्षा
द्धरिर्नारायणोव्ययः २७ अनुग्रहायभूतानांधत्सेरूपंजलौकसां २७ नमस्तेपुरुषश्रेष्ठस्थित्युत्पत्त्यप्ययेश्व
वर भक्तानांनःप्रपन्नानांमुख्योह्यात्मगतिर्विभो २८ सर्वेलीलावतारास्तेभूतानांभूतिहेतवः ज्ञातुमिच्छा
म्यदोरूपंयदर्थंभवताधृतं २९ नतेरविंदाक्षपदोपसर्पणंमृषाभवेत्सर्वसुहृत्प्रियात्मनः यथेतरेषांपृथगात्म
नांसतामदीदृशोयद्वपुरद्भुतंहिनः ३० इतिब्रुवाणंनृपतिंजगत्पतिःसत्यव्रतंमत्स्यवपुर्युगक्षये विहर्तुकामः
प्रलयार्णवेब्रवीच्चिकीर्षुरेकांतजनप्रियःप्रभुः ३१ श्रीभगवान्‌ सप्तमेद्यतनादूर्ध्वमहन्येतदरिंदम विनं
क्ष्यत्यप्ययांभोधौत्रैलोक्यंभूर्भुवादिकं ३२ राम॰ राम॰

र्पणंमृषानभवेत यद्यस्मात्त्वंनोभक्तानामद्भुतंवपुरदीदृशःदर्शितवानसि पाठांतरेपृथगात्मनोभेददर्शिनःपुंसः असतांपरिच्छि
न्नानांपदोपसर्पणंयथामृषेत्यर्थः ३० एकांतजनाभक्ताःप्रियायस्य ३१ अप्ययांभोधौप्रलयार्णवेभूर्भुवआदिकमित्यर्थः ३२

संवर्तांभसिप्रलयोदके तामुपस्थास्यतिप्राप्स्यति ३३ ओषधीरादायेतिशेषः ३४ ऋषीणामेवालोकेनविचरिष्यसि ३५ महाहि

त्रिलोक्यांलीयमानायांसंवर्तांभसिवैतदा उपस्थास्यतिनौःकाचिद्विशालात्वांमयेरिता ३३ त्वंतावदोषधीः
सर्वाबीजान्युच्चावचानिच सप्तर्षिभिःपरिवृतःसर्वसत्वोपबृंहितः ३४ आरुह्यबृहतींनावंविचरिष्यस्यवि
क्लवः एकार्णवेनिरालोकेऋषीणामेववर्चसा ३५ दोधूयमानांतांनावंसमीरेणबलीयसा उपस्थितस्य
मेशृंगेनिबध्नीहिमहाहिना ३६ अहंत्वामृषिभिःसाकंसहनावमुदन्वति विकर्षन्विचरिष्यामियावद्ब्राह्मी
निशाप्रभोः ३७ मदीयंमहिमानंचपरंब्रह्मेतिशब्दितं वेत्स्यस्यनुगृहीतंमेसंप्रश्नैर्विवृतंहृदि ३८ इ
त्थमादिश्यराजानंहरिरंतरधीयत सोन्ववैक्षततंकालंयंहृषीकेशआदिशत् ३९ आस्तीर्यदर्भान्प्राक्कू
लान्राजर्षिःप्रागुदङ्मुखः निषसादहरेःपादौचिंतयन्मत्स्यरूपिणः ४० ततःसमुद्रउद्वेलःसर्वतःप्ला
वयन्महीं वर्धमानोमहामेघैर्वर्षद्भिःसमदृश्यत ४१ ध्यायन्भगवदादेशंददृशेनावमागतां तामारुरोह
विप्रेंद्रैरादायौषधिवीरुधः ४२ तमूचुर्मुनयःप्रीताराजन्ध्यायस्वकेशवं सवैनःसंकटादस्मादविताशंवि
धास्यति ४३ सोनुध्यातस्ततोराज्ञाप्रादुरासीन्महार्णवे एकशृंगधरोमत्स्योहैमोनियुतयोजनः ४४ नि
बध्यनावंतच्छृंगेयथोक्तोहरिणापुरा वरत्रेणाहिनातुष्टःतुष्टावमधुसूदनम् ४५ राम।

नावासुकिना ३६ मेमयाअनुगृहीतंप्रसादीकृतंहृदिप्रपरोक्षंवेत्स्यसि ३८ वरत्रेणडोरकेण ४५ रामराम॥

सागरे तावत्स्थितं तेन विष्णुना विवस्वत्सागरे सत्यव्रतो गुरुतेन तत्स्थावदृषिभिः अथेदं चिंत्यं किमयं महाप्रलयो दैनंदिनो वेति तत्र तावत्
ब्राह्मो लय इति यो सावस्मिन्महाकल्प इति चोक्तं मैत्र प्रलय इति प्रश्नेनेति न्यूनः महाप्रलये पृथिव्यादीनामेव शेषासंभवात्
यावद्ब्राह्मी निशोत्यादि उक्तिविरोधात् अतो दैनंदिन इति वक्तुं न चैतदपि संगच्छते संवर्तकैरनावृष्ट्यादिभिर्विना कस्मादेव स
मेरुनिशैलोकं निमंक्ष्यतीति मत्स्योक्तेरनुपपत्तेः यच्चोक्तं प्रथमस्कंधे रूपं स जगृहे मात्स्यं चाक्षुषांतरसंप्लवे नाव्यारोप्य मही
मय्यामपाद्वैवस्वतं मनुमिति तदपि तदा दुर्घटं न हि प्रलयद्वयेपि महीमय्यां नाव्यारोहः संभवति न चाक्षुषमन्वंतरे प्रलयोस्ति तर
थाच सति मत्स्येनामनुर्वैवस्वत इत्यपि दुर्घटं स्यात् तत्ता वदोषधीः सर्वा इत्यादि निर्देशोपि न संगच्छते न दितिदा ओषध्यादीनां सत्वा

राजा अनाद्यविद्योपहतात्मसंविदस्तन्मूलसंसारपरिश्रमातुराः यदृच्छयेहोपसृता यमाप्नुयुर्विमुक्तिदो नः पर
मो गुरुर्भवान् ४६

नो वा वशेषः संभवति तस्मादन्यथा वर्ण्यते नैवायं वास्तवः कोपि प्रलयः किंतु सत्यव्रतस्य ज्ञानोपदेशाय आविर्भूतो भगवान्नैरायणार्थ
मकस्मात्प्रलयं दर्शयामास यथास्मिन्नेव वैवस्वतमन्वंतरे मार्कंडेयाय दर्शितवान् तदपेक्षयैव च महाकल्पेस्मिन्निति विशेषणं सं
गच्छते तथा च ततः समुद्र उद्वेलः सर्वतः समप्लावयत्तेति तमेव तथादर्शनमूर्ज्जमित्यपारिक यस्तु तस्ला व्याख्यास्यामः तत्र नाना
योनिषु संसरतः सत्यभगवत्कृपैव तत्त्वामिह हा उक्तये तमेव प्रार्थयते अनादीति अविद्यातया उपहता आवृता आत्मसंविद्येषां ते
अत एवा विद्यामूलैः संसारपरिश्रमैरातुरा इह संसारे यदृच्छया यदनुग्रहादीश्वोपसृता आश्रिताः संतो यं प्राप्नुयुः सभवान्नेव सा
क्षान्नो गुरुः सन् ग्रंथिं भिंद्यादिति परेणान्वयः ४६ राम ४६ राम ४६

श्री. भा. स्कं. टी. ४२

ननुवैराग्यंविनाकुतोमुक्तिः तर्दितस्यतत्तेवैकफलत्वात्मनेवामादिशेत्तत्रापायेनाह अबुधोयंजनःअसुखंयथाभवतितथाकर्मस
मीहते तांतुविद्यामोहरूपग्रंथिंसभिंद्यात् यतःसएवपरमोगुरुः ४७ ननुयज्ञदानादिभिःसत्वशुद्धिंविनाकथंग्रंथिभेदःस्या
त्तत्राह यस्यसेवयैवपुमानात्मनोमनसोमलंतमोविजह्यात्प्रहीनमलः निजवर्णंचस्वरूपंभजतेसईशोनःगुरुर्भूयात् यतःस
एवगुरोरपिपरमोगुरुः मलत्यागेदृष्टांतः रुद्ररोदनंरजतं यदरोदीत्तद्रुद्रस्यरुद्रत्वंयदश्रुअशीर्यततद्रजतंहिरण्यमभवदितिश्रुतेः
तद्यथाग्नेःसंपर्कान्मलंजहातिस्ववर्णंभजतेनतुक्षालनादिभिः तथानयज्ञादिभिर्मलत्यागः किंतुतत्सेवयैवतेषांतत्सेवांगतमेवेति

जनोबुधोयंनिजकर्मबंधनःसुखेछयाकर्मसमीहतेसुखं यत्सेवयातांविधुनोत्यसन्मतिंग्रंथिंसभिंद्या
द्धृदयंसनोगुरुः ४७ यत्सेवयाग्नेरिवरुद्ररोदनंपुमान्विजह्यान्मलमात्मनस्तमः भजेतवर्णंनिजमेवसोव्ययोभू
यात्सईशःपरमोगुरोर्गुरुः ४८ नयत्प्रसादायुतभागलेशमन्येचदेवागुरवोजनाःस्वयं कर्तुंसमेताःप्रभवंति
पुंसःतमीश्वरंत्वांशरणंप्रपद्ये ४९ अचक्षुरंधस्ययथाग्रणीःकृतस्तथाजनस्याविदुषोबुधोगुरुः त्वमर्कदृक्सर्व
दृशांसमीक्षणोवृतोगुरुर्नःस्वगतिंबुभुत्सतां ५० जनोजनस्यादिशतेसतींमतिंययाप्रपद्येतदुरत्ययंतमः त्वं
त्वव्ययंज्ञानममोघमंजसाप्रपद्यतेयेनजनोनिजंपदं ५१ त्वंसर्वलोकस्यसुहृत्प्रियेश्वरोह्यात्मागुरुर्ज्ञानमभीष्ट
सिद्धिः तथापिलोकोनभवंतमंधधीर्जानातिसंतंहृदिबद्धकामः ५२

भावः ४८ परमेश्वरत्वेपरमगुरुत्वेचउपपत्तिमाह यत्प्रसादस्यायुतभागः तस्यलेशमात्रमपिअन्येदेवादयःसर्वेसमेताअपि
स्वयंतत्प्रियेताः संतःकर्तुंनप्रभवंति ४९ तदेवदृष्टांतेनस्पष्टयन्नाह अचक्षुरिति अविदुषोपिजनस्याबुधोविद्वान्गुरुस्तस्येका
केषकाशवस्तुतएवत्वात्तेषस्यतः अर्केदृक्अतःसर्वदृशांसर्वेंद्रियाणांसमीक्षणःप्रकाशकः अतएवस्वगतिंबोद्धुमिच्छद्भिर्नोस्मा
भिर्गुरुर्वृतोसि ५० किंचप्राकृतोगुरुरनर्थहेतुरेवेत्याह जनइतिप्राकृतोजनउपदिशतिअसतींमतिमर्थकामादिमतिंतमःसंसारं ५१

ननुतर्हिसर्वोपिलोकोमामेवकिंनोपसरति अज्ञानादित्याह
त्वमितिप्रियःचासावीश्वरश्चहृदिनुत्वामेवपादलयामीत्याह ५२

तथापि विशेषत एव सर्वात्रापि संदेहतः कथयामीत्याह तेजः प्रभावः श्रीः संपत् सौभगं मनोनयनाह्लादकत्वं
भगः भाग्यं वीर्यं प्रभावकः विभूतिः ४१ उपसंहरति एताइति एते विभूतिभेदाः मयि चिन्तावता राघक कथिताः अतो
नात्रातीवाभिनिवेशः कर्तव्य इत्याह मनोविकारा एव न तु परमार्थो यथा किंचित्त वषष्ठादिवाक्यात्रेणाभि

कौ

तेजः श्रीः कीर्तिरैश्वर्यं ह्रीस्त्यागः सौभगं भगः वीर्यं तितिक्षा विज्ञानं यत्र यत्र स मेंऽशकः ४१ एतास्
ते कीर्तिताः सर्वाः संक्षेपेण विभूतयः मनोविकारा एवैते यथा वाचाभिधीयते ४२ वाचं
यच्छ मनो यच्छ प्राणान् यच्छेन्द्रियाणि च आत्मानमात्मना यच्छ न भूयः कल्पसेऽध्वने ४३ ॥
यो वै वाङ्मनसी सम्यगसंयच्छन् धिया यतिः तस्य व्रतं तपो दानं स्रवत्यामघटाम्बुवत् ४४ तस्मा
द्वचो मनः प्राणान्नियच्छेन्मत्परायणः मद्भक्तियुक्तया बुद्ध्या ततः परिसमाप्यते ४५ इति श्री
भागवते एकादशस्कंधे षोडशोऽध्यायः ॥१६॥

धीयते तत्तुल्याः ४२ तस्माद्वागादीन्द्रियं यच्छ आत्मानं बुद्धिमात्मना सत्त्वसंपन्नया तयैव नियच्छ अध्वने सं
सारमार्गाय ४३ असंयमने दोषमाह य इति असंयच्छन् न संयतिमत्परायणः मदाश्रय एव ध्यात्वा वागा
दीनि संयच्छन् विमुच्यते तथैव मद्भावयुक्तयापि बुद्ध्या सर्वं कर्म ममैव परिपश्यन् ४४ परिसमाप्यते कृ
कृतकृत्यो भवति न भूयः संसारमायातीत्यर्थः ४५ इति श्री भावार्थ एकादशस्कंधे षोडशोऽध्यायः ॥१६॥

श्री
भा० ए०
टी०
७८

ततः सप्तदशे एष्टे स्वधर्मैर्भक्तिलक्षणे हंसोक्तं धर्ममन्वाह ब्रह्मचारिगृहस्थयोः कर्माहं विद्धि सापेक्षतामित्यत्र भक्त्या
कृतं कर्म मोक्षसाधनमुक्तं भक्तिरिस्तु नो भक्तिसाधनत्वं च मयोदितेष्ववहितः स्वधर्मेषु मदाश्रयादिना न तत्रोक्तं न
च कर्मानुष्ठानं तेन नियमेन भक्तिर्हि स्थाप्यते अतः एच्छति यस्त्वयेति सप्तभिः पूर्वं कल्पादौ त्वद्भक्तिलक्षणः तत्सापेक्षं
तत्साधनमित्यर्थः वर्णाश्रमहीनानामपि द्विपदां नराणां १ यथा येन प्रकारेणानुष्ठीयमानेन स्वधर्मेण २ ननु

श्री उद्धव उवाच ॥ यस्त्वयाभिहितः पूर्वं धर्मस्त्वद्भक्तिलक्षणः वर्णाश्रमाचारवतां सर्वेषां द्विपदामपि १
यथानुष्ठीयमानेन त्वयि भक्तिर्नृणां भवेत् स्वधर्मेणारविन्दाक्ष तन्ममाख्यातुमर्हसि २ पुरा किल
महाबाहो धर्मं परमकं प्रभो यत्तेन हंसरूपेण ब्रह्मणेऽभ्यात्थ माधव ३ स इदानीं सुमहता काले
नामित्रकर्षन न प्रायो भविता मर्त्यलोके प्रागनुशासितः ४ वक्ता कर्ताविता नान्यो धर्मस्याच्युत
ते भुवि सभायामपि वैरिञ्च्यां यत्र मूर्तिधराः कलाः ५ कर्त्रावित्रा प्रवक्त्रा च भवता मधुसूदन त्यक्ते
महीतले देव विनष्टं कः प्रवक्ष्यति ६ तत्त्वं नः सर्वधर्मज्ञ धर्मस्त्वद्भक्तिलक्षणः यथा यस्य विधीयेत
तथा वर्णय मे प्रभो ७ श्रीशुकः इत्थं स्वभृत्यमुख्येन पृष्टः स भगवान्हरिः प्रीतः क्षेमाय मर्त्याना धर्मानाह सनातनान् ८

संप्रदायादेव ज्ञास्यते किं पुनर्वर्णनेन तत्राह पुरेति परमकं परमश्रामैकमुक्तं तमन्त्रं यत्तेयोहंसरूपेण धर्मो
मुक्त एवं न तु यागमात्रं ३ आगतं यत्तु पुष्मदुर्मे विरहयेस्तु कर्त्वान ३ प्रागनुशासितोपि न भविता न भ
विष्यति ४ अत्र हेतुमाह वक्तेति द्वाभ्यां ये वदन्ति ब्राह्मणा ये च कर्तारो महान्तो ये च पालयन्ते ते क्षत्रिया स्तेषामे
ध स्वधर्मस्य ते त्वत्तो नान्यः कलावेदाद्याः ५ तन्मात्रः अस्माकं मनुष्याणां मध्ये यस्य यथा विधीयेत तथेति ७

ॐ
रामं
७८

धर्म्यो धर्मादनपेतः नैःश्रेयसकरः भक्तिजनकः अतो मे मत्तः तं धर्मं निबोध ८ तत्रादौ मदुपासनालक्षण एव सुखो धर्मः
आसीत् आचारलक्षणस्तु पश्चात् प्रवृत्तः स चैवमनुष्ठितो भक्तिहेतुरिति वर्णयितुमाह आदाविति कल्पादौ यत्कृतयुगं त
स्मिंस्तु च तदा मामुपासत एव केवलं नान्यत्कुर्वन्तीति वक्तुं कृतयुगनाम निरुक्तिमाह कृतकृत्या इति जात्या जन्मनैव ९ किंच
विधायकाभावादपि तदानीं नान्यत्कर्मास्तीत्याह वेद इति धर्मश्च मनो विषयो अहमेव वृषरूपधृक् तत् वत् ध्यानं न क्रियाविषयो यः

श्रीभगवानुवाच धर्म्य एष तव प्रश्नो नैःश्रेयसकरो नृणां वर्णाश्रमाचारवतां तमुद्धव निबोध मे ८ आदौ
कृतयुगे वर्णो नृणां हंस इति स्मृतः कृतकृत्याः प्रजा जात्या तस्मात्कृतयुगं विदुः ९ वेदः प्रणव एवाग्रे ध
र्मोऽहं वृषरूपधृक् उपासते तपोनिष्ठा हंसं मां मुक्तकिल्बिषाः १० त्रेतामुखे महाभाग प्राणान्मे हृदयात्त्र
यी विद्या प्रादुरभूत्तस्या अहमासं त्रिवृन्मखः ११ विप्रक्षत्रियविट्शूद्रा मुखबाहूरुपादजाः वैराजात्पुरु
षाज्जाता य आत्माचारलक्षणाः १२ गृहाश्रमो जघनतो ब्रह्मचर्यं हृदो मम वक्षःस्थलाद्वनेवासो
न्यासः शीर्षणि संस्थितः १३ ॥

ज्ञादिः अतस्तपोनिष्ठा मनसश्चेंद्रियाणां च ह्यैकाग्र्यं परमं तप इति वचनादैकाग्रतया हंसं शुद्धं मां ध्यायंतीत्यर्थः
१० पश्चात्त्रेतायुगप्रवेशे मे वैराजरूपस्य प्राणान्निमित्ताद्धृदयात् सकाशात् तस्याः त्रय्याः सकाशात् होत्राध्वर्यवौ
द्गात्रैः तैः त्रिवृत् त्रिरूपः यज्ञो वै विष्णुरिति श्रुतेः ११ वर्णानामाश्रमाणां च धर्मान्वक्तुं तेषामुत्पत्तिमाह विप्रेति
द्वाभ्यां आत्माचारः स्वधर्म एव लक्षणं ज्ञापको येषां १२ मम वैराजस्य हृदः वक्षसोऽधस्तात् ब्रह्मचर्यमिति नैष्ठि
काभिप्रायं १३ श्रीरामायनमः ॥ ॥ ॥ ॥ ॥

श्री भा० ए० टी० ७७

तेषामधिकारविशेषेण स्वभावानाह वर्णानामितिपंचभिः जन्मस्थानानुसारिणीनीचैरित्यस्यायमर्थः मंदा
भिर्जन्मस्थानिभिर्मंदा उत्तमाभिरुत्तमाश्चेति १४ तपआलोचनं १५ तेजः प्रतापः एतैरेवाश्रमस्वभावा अपि ज्ञेयाः १६ ॥
अंत्यजादीनां स्वभावानाह अशौचमितिशुष्कविग्रहः निर्मूलकलहः तर्षः तृष्णा १७ १८ १९ तत्र तावत्सर्वसाधा

वर्णानामाश्रमाणां च जन्मभूम्यनुसारिणी आसन्प्रकृतयो नृणां नीचैर्नीचोत्तमोत्तमैः १४ शमो दम
स्तपः शौचं संतोषः क्षांतिरार्जवं मद्भक्तिश्च दया सत्यं ब्रह्मप्रकृतयस्त्विमाः १५ तेजो बलं धृतिः शौर्यं ति
तिक्षौदार्यमुद्यमः स्थैर्यं ब्रह्मण्यमैश्वर्यं क्षत्रप्रकृतयस्त्विमाः १६ आस्तिक्यं दाननिष्ठा च अदंभो ब्र
ह्मसेवनं अतुष्टिरर्थोपचयैर्वैश्यप्रकृतयस्त्विमाः १७ शुश्रूषणं द्विजगवां देवानां चाप्यमायया ।
तत्र लब्धेन संतोषः शूद्रप्रकृतयस्त्विमाः १८ अशौचमनृतं स्तेयं नास्तिक्यं शुष्कविग्रहः कामः क्रो
धश्च तर्षश्च स्वभावोंऽतेवसायिनां १९ अहिंसा सत्यमस्तेयमकामक्रोधलोभता भूतप्रियहि
तेहा च धर्मोयं सार्ववर्णिकः २० द्वितीयं प्राप्यानुपूर्व्याज्जन्मोपनयनं द्विजः वसन्गुरु
कुले दांतो ब्रह्माधीयीत चाहूतः २१ ॥ राम ॥ राम ॥ ॥

रणधर्ममाह अहिंसेति वर्णग्रहणमाश्रमाणामप्युपलक्षणार्थं मिति वर्णधर्मानुग्रहस्य प्रकरणे वक्ष्यति प्रथमं ताव
दाश्रमेषु ब्रह्मचारिणो धर्मा वर्ण्यंते स च द्विविधः उपकुर्वाणको नैष्ठिकश्च तत्राद्यस्य धर्मानाह २० ॥
द्वितीयमिति नवभिः द्विजः त्रैवर्णिकः आनुपूर्व्याद्गर्भाधानादिसंस्कारक्रमेण द्वितीयमुपन
यनाख्यं जन्म प्राप्याचार्येणाहूतो ब्रह्म वेदमधीयीत तच्च कारणात्तदर्थं च विचारयेत् २१ ॥ ॥ ॐ ७७

किंच मेखलादीन् उपर्युक्तान् धारयेत् तत्र सूत्रेण ब्रह्मसूत्रमालाकथं भूतः जटिलः अनभ्यंगादिना जातजटः तथा अधौत
तद्वासोरक्तपीठः दत्ताश्च वासश्च तद्वद्वासांसि नधौतानि तानि यस्य सः अधौतदद्वासाः सचासावरक्तपीठश्च न
कौतुकादिना रक्तं पीठमासनं यस्य सः २२ जपश्च उच्चारो मूत्रपुरीषोत्सर्गश्च जपोच्चारं तस्मिन् वाग्यतः मौनी
भवेत् २३ रेतो बुद्धिपूर्वं नावकिरेत् नोत्सृजेत् ब्रह्मव्रतधरः अगृहस्थः स्वयमेव कथंचिदवकीर्णे अवगाह्य

मेखलाजिनदंडात् ब्रह्मसूत्रकमंडलून् जटिलो धौतदद्वासो ऽरक्तपीठः कुशान्दधेत् २२ स्नानभो
जनहोमेषु जपोच्चारे च वाग्यतः न छिंद्यान्नखरोमाणि केशांश्च कदाचनापि २३ रेतो नावकि
रेज्जातु ब्रह्मव्रतधरः स्वयं अवकीर्णे ऽवगाह्याप्सु यतासुस्त्रिपदीं जपेत् २४ अग्न्यर्काचार्यगोवि
प्रगुरुवृद्धसुरान् शुचिः समाहित उपासीत संध्ये द्वे यतवाक् जपन् २५ आचार्यं मां विजानीया
न्नावमन्येत कर्हिचित् न मर्त्यबुद्ध्यासूयेत सर्वदेवमयो गुरुः २६ सायं प्रातरुपानीय भैक्ष्यं तस्मै
निवेदयेत् यच्चान्यदप्यनुज्ञातमुपभुंजीत संयतः २७ शुश्रूषमाण आचार्यं सदोपासीत नीच
वत् यानशय्यासनस्थानैर्नातिदूरे कृतांजलिः २८ एवं वृत्तो गुरुकुले वसेद्भोगविवर्जितः विद्या

स्नात्वा यतासुः कृतप्राणायामः त्रिपदीं जपेत् २४ संध्ये द्वे यतवाक् जपन् उपासीत एवं मध्याह्नेसंध्यानिमि
त्तमौनेनास्तीति द्विवचनं २५ अन्यदपि यत्संप्राप्तं तच्च निवेदयेत् तेनानुज्ञातं तु संयतः सन् उपभुंजीत सर्थः २६
२७ यानशय्यासनस्थानैः यांतं पृष्ठतो यानेन तिष्ठंतमग्रमतिस्तनया समीपशयनेन विश्रांतं पादसंवाहनादिभिः
समीपासनेन आसीनं कृतांजलिर्नियोगप्रतीक्षया नातिदूरे स्थानेन तत्पर्यः एवं गुरुं सेवेत २८ एवंभूतेन वृत्ते

॥ २८ ॥ संस्कार

एवमुपकुर्वाणस्य धर्मानुक्त्वा नैष्ठिकस्य विशेषधर्मानाह यदीति त्रिभिः असौ ब्रह्मचारी यदि छंदसां लोकं महो
लोकं ततो ब्रह्मलोकं च आरोढ्न् आरोढुमिच्छतीति त्यर्थः यद्वा छंदसां लोकमिति ब्रह्मलोकविशेषणं यत्र मंत्रमूर्ति
धराः कलाः इत्युक्तत्वात् दिग्बृहद्व्रतः सन्नैष्ठिकव्रतस्सन् विन्यसेत् समर्पयेत् अधिकस्वाध्यायार्थं वा अधीतनि:
ष्क्रयार्थं वा २० सर्वत्र विशेषोपास्तिं ब्रह्मचारिणः कर्तव्यत्वेनाह अग्नाविति ब्रह्मवर्चस्वीति वेदाभ्यासजं तेजः तद्वान् २१

यद्यसौ छंदसां लोकमारोढ्न् ब्रह्मविष्टपं गुरवे विन्यसेद्देहं स्वाध्यायार्थं बृहद्व्रतः २० अग्नौ गुरावात्म
नि च सर्वभूतेषु मां परं अपृथग्धीरुपासीत ब्रह्मवर्चस्व्यकल्मषः २१ स्त्रीणां निरीक्षणस्पर्शसंला
पक्ष्वेलनादिकं प्राणिनो मिथुनीभूतानगृहस्थोग्रतस्त्यजेत् २२ शौचमाचमनं स्नानं संध्योपा
सनमार्जवं तीर्थसेवा जपोस्पृश्याभक्ष्यासंभाष्यवर्जनं २३ सर्वाश्रमप्रयुक्तोयं नियमः कुलनंदन ॥
मद्भावः सर्वभूतेषु मनोवाक्कायसंयमः २४ एवं बृहद्व्रतधरो ब्राह्मणोग्निरिव ज्वलन् मद्भक्तस्ती
व्रतपसा दग्धकर्माशयोमलः २५ अथानंतरमावेक्ष्यन् यथाजिज्ञासितागमः गुरवे दक्षिणां दत्वा
स्नायाद्गुर्वनुमोदितः

तस्यैव वनस्थयति साधारणधर्मानाह स्त्रीणामिति निरीक्षणं भावगर्भं क्ष्वेलनं परिहासः एवमादिकं त्यजेत्
मिथुनीभूतानामग्रतस्त्यजेन्न पश्येदित्यर्थः तस्यैव सर्वाश्रमसाधारणं धर्ममाह शौचमिति द्वाभ्यां २३ नि
ष्कामनैष्ठिकस्य तद्धर्मानंतफलमाह एवमिति अमलः निष्कामश्चेद्दग्धकर्माशयो अंतःकरणं यस्य तथाभूतः स
न्मद्भक्तो भवति २४ उपकुर्वाणस्य समावर्तनप्रकारमाह अथेति अनंतरं द्वितीयाश्रममावेक्ष्यन् प्रवेष्टुमि
च्छन् यथायथावद्विज्ञातवेदार्थः स्नायात् अभ्यंगादिकं कृत्वा समावर्तेतेत्यर्थः २५ ॥ ॥ ॥

तस्याधिकारानुरूपमाश्रमविकल्पसमुच्चयानाह गृहमिति सकामस्य गृहं मतः करणात् च्छ्वादिकामस्य वनं च
विशोत शुद्धातः करणः स च द्विजोत्तमः इत्युक्तेः तत्र वैश्यायोनं प्रव्रजनाधिकार इति सूचयति ब्राह्मणश्च प्रव्र
जेदित्यर्थः यद्वा आश्रमादाश्रमान्तरं गच्छेत् अन्यथा अनाश्रमी प्रतिलोमं च न चाचरेदित्यर्थः अमत्सर इति वाक्ले
दः स्वभक्तस्याश्रमनियमाभावस्य बुद्धमोपगत्वात् ३६ विवाहनियमपूर्वकं वर्णधर्मैः सह गृहस्थधर्मानाह
गृहार्थीति सदृशीं सवर्णाम् अजुगुप्सितां कुललक्षणतस्तानिंदितां कामतस्तु यामन्यामुद्वहेत् असवर्णामपि

गृहं वनं वोपविशेत् प्रव्रजेद्वा द्विजोत्तमः आश्रमादाश्रमं गच्छेन्नान्यथा मत्सरं चरेत् ३७ गृहा
र्थी सदृशीं भार्यामुद्वहेदजुगुप्सिताम् यवीयसीं तु वयसा यः सवर्णामनुक्रमात् ३८ इज्याध्ययन
दानानि सर्वेषां वा द्विजन्मनाम् प्रतिग्रहोऽध्यापनं च ब्राह्मणस्यैव याजनम् ३९ प्रतिग्रहं समन्यमा
नः तपस्तेजो यशांसि नुदेत् अयाचिताभ्यामेव जीवेत् शिलैर्वा दोषदर्शयोः ४० ब्राह्मणस्य हि देहोऽयं
तुच्छकामाय नेष्यते कृच्छ्राय तपसे चेह प्रेत्यानन्तसुखाय च ४१ ॥ ॥ ॥

तस्मात् अनन्तरं तत्रापि वर्णक्रमेणोद्वहेदित्यर्थः तिस्रो वर्णानुपूर्व्येण द्वे तथैका यथाक्रमं ब्राह्मणक्षत्रियविशां
भार्याः स्वा शूद्रजन्मनः इति स्मृतेः शूद्रैव भार्या शूद्रस्य सा च स्वा च विशः स्मृते ते चैव स्वाः च राज्ञश्च ताश्च
स्वा चाग्रजन्मन इति मनुः ३८ इज्यादयः त्रैवर्णिकानां साधारणो धर्मः प्रतिग्रहादित्रयं तु वृत्तिः सा च ब्रा
ह्मणस्यैव ३९ तत्रापि श्रेयस्त्वमुत्तमाचार्यादृत्तिमाह प्रतिग्रहमिति तयोर्याजनाध्ययनयोरपि कर्मो
पदिष्टदोषप्रपन्नं शिलैः स्वामिनत्यकैः दोषपतितैः कणिशैः एवं च वृत्तिकार्पण्यं ब्राह्मणेन मोढव्यमित्याह ब्राह्मण

श्री
भा० ए०
टी०
७४

ऽकृत्तिर्नोमविप्रत्वादपि ततकणादानंतं शिलवृत्त्येकीकृत्य तत्यानुष्ठचिन्नसमोत्तफलमाह ॥
शिलोञ्छेति ॥ महातमातिथ्यादिलक्षणे विरजं निष्कामं सेवमानः गृहस्थ एव गृहस्थाश्रम एव नातिप्रस
क्तः यतिधर्मेण विरागमजर्वन् शान्तिमुपैति मुक्तोऽधिकारी भवति ॥ ४३ ॥ एवमधनस्य महाफलमुक्त्वा स
धनानामप्याह त्रिभिः समुद्धरंति दारिद्र्याद्दन्नं ददंति विप्रमित्युपलक्षणं मन्त्रपारायणं पक्वमपि दातव्यं स्त्रावद्वृष्य
कमेन दिव्यमाह सर्वाइति ॥ ४४ ॥ सर्वेषामाप्यहृत्तीराह ॥ सीदन्निति त्रिभिः पल्पे विक्रयार्हेनंत मृणालवणाद्येः तत्रा

शिलोञ्छमप्याददीत विप्रो धर्मे महात्मते विरजं त्यागरतः ॥ मध्यपि तात्मा गृहस्थ एव तिष्ठन्नातिप्रस
क्तः समुपैति शान्तिं ॥ ४३ ॥ समुद्धरंति ये विप्रं सीदन्तं मन्त्रपारगं ॥ तावुद्धरिष्ये न चिरादापद्भ्यो नोवि
वार्णवात् ॥ ४४ ॥ सर्वोः समृद्धोऽहं ज्ञातिपितवसन्तात्मजाः ॥ आत्मानमप्रयं धीरोयध्यागजप
तिर्मेज्ञानू ॥ ४५ ॥ एवं विधो नृपतिर्विमानेन नाके वर्द्धमानः ॥ विधूय हास्तुभं हृत्वर्द्धेन सह मोदते ॥ ४६
सीदन्नपि विप्रो वणिग्वृत्त्यापण्येषु व्यापद्दं तोयेत ॥ लवणं न चापदा कान्तानां स्त्रीरक्षाकण्यचन ॥ ४७ ॥ वैश्यप
वृत्त्या तु जातान्नाजीवेन्मृगयया पदि चेद्वा विप्र दृष्टेपण्यानश्येत्सकाकथ्यचन ॥ ४७ ॥ शूद्रवृत्तिं भजेद्वैश्यः
शूद्रः कारुकर्मक्रियाः ॥ कृष्णात्मज्ञानगम्यत्वं लिप्सत कर्मणा ॥ ४८ ॥

व्यापदं ज्ञात्वा स्वत्व कुलेन ददत्प्रियकृत्वा ॥ यद्यपि गौतमोऽनन्तरां पापीयसीं वृत्तिमातिष्ठेदिति स्मरेत् ॥ वस्तु धारणं पण्य
विक्रयात् श्रेयं मन्यते तथापि हि सा नो वणिग्वृत्तिरेव श्रेष्ठेति भगवतो मतं ततस्तद्वत्मानीचसेवया नीचानामावे
लव ॥ ४६ ॥ तत्रापापदि मृगया याविशुद्रूपेणा वाध्याय नादिनावा ॥ ४७ ॥ कारवः प्रतिलोमजविशूद्राः यल्लेषां वे
कटादिक्रिया श्रापद्वृत्तीर्णस्तु नानुकल्पेन वर्त्तेताह ॥ कृच्छ्रादिति ॥ ४८ ॥

८८

श्रीः
७४

तदेवं इति व्यवस्थामुक्त्वा उत्तमगृहस्थस्यावश्यकान् पंचयज्ञानाह वेदाध्ययनं ब्रह्मयज्ञः तेन ऋषीन् स्वधाका-
रेण पितॄन् स्वाहाकारेण देवान् बलिहरणेन भूतानि अन्नाद्यैरन्नोदकादिभिर्मनुष्यानिति ज्ञातव्यं यथोदयं वि-
भवानुसारतः तेषां स्वरूपदृष्टिं विधत्ते मद्रूपाणीति ४९ आवश्यकं धर्ममुक्त्वा काम्यमनुसारं धर्ममाह यदृच्छयाउद्य-
मं विना उपार्जितेन वा शुक्लेन स्ववृत्त्या लब्धेन शुद्धेन धनेन वा भृत्यान् पोष्यान् ५० गृहस्थस्यापि निवृत्तिनिष्ठामेवा-

वेदाध्यायस्वधास्वाहाबल्यन्नाद्यैर्यथोदयं देवर्षिपितृभूतानि मद्रूपाण्यन्वहं यजेत् ४९ यदृच्छयोपप-
न्नेन शुक्लेनोपार्जितेन वा धनेनापीडयन्भृत्यान्न्यायेनैवाहरेत्क्रतून् ५० कुटुंबेषु न सज्जेत न प्रमा-
द्येत्कुटुंब्यपि विपश्चिन्नश्वरं पश्येददृष्टमपि दृष्टवत् ५१ पुत्रदाराप्तबंधूनां संगमः पांथसंगमः
अनुदेहं वियंत्येते स्वप्नो निद्रानुगो यथा ५२ इत्थं परिमृशन्मुक्तो गृहेष्वतिथिवद्वसन् न गृ-
हैरनुबध्येत निर्ममो निरहंकृतः ५३ कर्मभिर्गृहमेधीयैरिष्ट्वा मामेव भक्तिमान् तिष्ठेद्वनं वोपवि-
शेत्प्रजावान्वा परिव्रजेत् ५४

ह कुटुंबेष्विति त्रिभिः न प्रमाद्येत् ईश्वरनिष्ठायां प्रमत्तो न भवेत् ननु दृष्टादृष्टार्थकर्मसक्तस्य कथमप्रमादः विचा-
रेणेत्याह विपश्चिदिति ५१ तत्रापि हेतुमासक्तेरधिकत्वात् तेषां नश्वरतां प्रपंचयति पुत्रादीनामेकसंगमः ए-
पथ्यानां प्रपायां संगमः इव तत्र हेतुः अनुदेहं प्रतिदेहमेते वियंति नश्यंति निद्रानुवर्ती स्वप्नो निद्रापाये यथे-
ति ५२ अतिथिवदुदासीनः न पुत्रदारादिषु प्रसक्तः ५३ अस्याप्याश्रमविकल्पमाह कर्मभिरिति अत्र गृहा-
श्रम एव तिष्ठेत् गृहस्थाश्रमोक्तैः कर्मभिर्मामेवेज्यन् वनं वा विशेत् यदि प्रजावांस्तर्हि प्रव्रजेद्वा ५४ ॥ ॥

गृहाद्यासंसक्तदोषमाह ॥ यस्त्विति त्रिभिः ॥ बंधमेव प्राप्नोति न मोक्षं स एवं गृहस्थस्तु दारादिष्वासक्तमतिः ॥ कथितं सूढनाम
मतातिमहितं इति ताहृपेणानस्माति ॥ ५५ ॥ बंधमेवाभिनयेन दर्शयति ॥ अहो इति ॥ बालात्मजायस्याः सा आत्मजा अस्मा
बिना अनाथाः मतः कथं जीविष्यंतीति ॥ ५६ ॥ गृहेषु आशयो वासना तेन आदिसंहृदयं यस्य स ॥ अधृतमः अतितामसं यो
नि ॥ ५७ ॥ इति एकादशे सप्तदशः ॥ १७ ॥ अष्टादशे वदंडमेवनस्थयतिगोचरं ॥ अधिकारविशेषेविशेषं वापितं कृतं ॥ कमशान्त

यस्त्वासक्तमतिर्गेहे पुत्रवित्तैषणातुरः ॥ स्त्रैणः कृपणधीर्मूढो ममाहमिति बध्यते ॥ ५५ ॥ अहो मे पितरौ वृ
द्धौ भार्या बालात्मजात्मजाः ॥ अनाथा मामृते दीनाः कथं जीवंति दुःखिताः ॥ ५६ ॥ एवं गृहाशयाक्षिप्तहृदयो
मूढधीरयं ॥ अतृप्तस्ताननुध्यायन्मृतोन्धं विशते तमः ॥ ५७ ॥ इति श्रीभागवते एकादशस्कंधे सप्तदशोध्यायः ॥
श्रीभगवानुवाच ॥ वनं विविक्षुः पुत्रेषु भार्यां न्यस्य सहैव वा ॥ वन एव वसेच्छांतस्तृतीयं भागमायुषः ॥ १ ॥
कंदमूलफलैर्वन्यैर्मेध्यैर्वृत्तिं प्रकल्पयेत ॥ वसीत वल्कलं वासस्तृणपर्णाजिनानि वा ॥ २ ॥ केशरोमनखश्म
श्रुमलानि बिभृयाद्दतः ॥ न धावेदप्सु मज्जेत त्रिकालं स्थंडिलेशयः ॥ ३ ॥ ग्रीष्मे तप्येत पंचाग्नीन्वर्षास्वा
सारषाड्जले ॥ आकंठमग्नः शिशिर एवंवृत्तस्तपश्चरेत ॥ ४ ॥

वनस्थधर्मानाह वनमिति आयुषस्तृतीयभागं पंचसप्ततिवर्षपर्यंतं ततः परं तुरीये इंद्रियस्थैर्ये सति संन्यासाधिका
रः स्यादिति भावः ॥ १ ॥ वसीत परिदधीत ॥ २ ॥ दतः दंतान् न धावेत् न शोधयेत् ॥ त्रिकालमप्सु मज्जेत् मुसलवत्स्नायात् स्थंडि
ले प्रायः भूमिशायी ॥ ३ ॥ तप्येत पंचाग्नीन् सूर्येण सह चतुर्दिक्षु अग्नीन् निधाय यत्मानं तापयेदित्यर्थः ॥ आसारषाट् आस
रधारासंपातं सहते इति तथा ॥ अभ्रावकाशानाम व्रतं चरेत् ॥ जले आकंठमग्नः उदकवासं नाम व्रतं चरेत् ॥ ४ ॥ ९ ॥

उलूखलेन चाश्मना वा कुट्टयति कंडयतीति तथा दंता एवोलूखलं यस्य स तथा ५ संचिनुयात् आहरेत् अन्यदा कालांतरे आहृतं कालांतरेणाददीत लब्धेन वेन वेन्नाद्येषु रा णत्तप रिस्पजेरिति नारदोक्तेः ६ कालचोदितान् आग्रयणादीन् ७ किं चाग्निहोत्रमिति मुनेश्च नैगमैर्वेदवादिभिः आम्नातानि कथितानि ८ अस्य निष्कामस्य

अग्निपक्वं समश्नीयात्कालपक्वमथापि वा उलूखलाश्मकुट्टो वा दंतोलूखल एव वा ५ स्वयं संचिनुयात्सर्वमात्मनो वृत्तिकारणं देशकालबलाभिज्ञो नाददीतान्यदाहृतं ६ वन्यैश्चरुपुरोडाशैर्निर्वपेत्कालचोदितान् न तु श्रौतेन पशुना मां यजेत वनाश्रमी ७ अग्निहोत्रं च दर्शश्च पौर्णमासश्च पूर्ववत् चातुर्मास्यानि च मुनेराम्नातानि च नैगमैः ८ एवं चीर्णेन तपसा मुनिर्धमनिसंततः मां तपोमयमाराध्य ऋषिलोकादुपैति मां ९ यस्त्वेतत्कृच्छ्रतश्चीर्णं तपो निःश्रेयसं महत् । कामायाल्पीयसे युञ्ज्याद्बालिशः कोऽपरस्ततः १० ॥ राम राम राम ॥

फलमाह एवमिति धमनिभिः सिराभिः संततः व्याप्तः यावज्जीवं कृतेन तपसा शुष्कमांस इत्यर्थः ऋषिलोकान्महर्लोकादिक्रमेणायं भावः अंतःकरणशुद्धिभक्तिद्वारा नैव तावन्मुच्यते प्रतिबंधकबाहुल्ये चानेन क्रमेण मुच्यत इति ९ तं सकामं निंदति यस्त्विति निःश्रेयसं मोक्षफलमल्पीयसे आविरिंच्यादल्प
ल्पमेव तस्मै १० ॥ ॥

श्री भा॰ ए॰ टी॰ ८१

एवं यावज्जीवं वर्तमानस्य मोक्षः तृतीयभागावसाने तु मंदविरागेणापि संन्यासाधिकारः यदिति तावद्योगवलाद्धर्म्मो
पाक्तो भवेत् तदापि सम्यग्विरक्तः विरक्तो वा तत्र विरक्तस्य क्रममाह यदेति जातो वेपथुः कंपो देहे यस्य सः
११ विरक्तस्याह यदेति लोकेषु ब्रह्मलोकपर्यंतेषु निरयात्मसु दुःखोदर्केषु न्यस्ताग्निः त्यक्ताग्निः तत इति ॥
अग्निहोत्रादिकर्म्मत्यागः वर्णाश्रमाहा १२ तत्रादौ कृत्यमाह इष्ट्वेति यथोपदेशं श्राद्धादिपूर्वकं प्राजा
पत्येष्ट्या मामिष्ट्वा स्वप्राणे आत्मनि १३ संन्यासे विघ्नाः संभवंति तानविगणय्य संन्यसेदित्याशयेना

यदासौ नियमे कल्पो जरया जातवेपथुः आत्मन्यग्नीन्समारोप्य मच्चित्तोऽग्निं समाविशेत्
११ यदा कर्मविपाकेषु लोकेषु निरयात्मसु विरागो जायते सम्यङ्न्यस्ताग्निः प्रव्रजेत्ततः १२
इष्ट्वा यथोपदेशं मां दत्त्वा सर्वस्वमृत्विजे अग्नीन्स्वप्राण आवेश्य निरपेक्षः परिव्रजेत् १३ विप्र
स्य वै संन्यसतो देवा दारादिरूपिणः विघ्नान्कुर्वंत्ययं ह्यस्मानाक्रम्य समियात्परं १४ बिभृ
याच्चेन्मुनिर्वासः कौपीनाच्छादनं परं त्यक्तं न दंडपात्राभ्यामन्यत्किंचिदनापदि १५ दृष्टिपूतं
न्यसेत्पादं वस्त्रपूतं पिबेज्जलं सत्यपूतां वदेद्वाचं मनःपूतं समाचरेत् १६ मौनानीहानिला
यामा दंडा वाग्देहचेतसां नह्येते यस्य संत्यंग वेणुभिर्न भवेद्यतिः १७ ॥ ॥ ॥

ह विप्रस्येति केनाभिप्रायेण कुर्वंतीत्यत आह अयमिति परं ब्रह्म १४ एवं प्रव्रजितस्य धर्मानाह बिभृयाच्चेदि
ति परं कौपीनादन्यद्वासो यदि धारयितुमिच्छति तर्हि कौपीनमाच्छाद्यते यावता तावन्मात्रं धारयेदित्यर्थः
त्यक्तं प्रेषोच्चारात्पूर्वमेव यत्तोन्यत् किंचिदपि न बिभृयात् दंडपात्राभ्यामित्यावश्यकजलपात्रादेरुपलक्षणं १५
परमहंसस्य विधिनिषेधागोचरत्वात् बहूदकानामतः क्रमं भगवानुधर्मानाह मनः पूतं मनसा सम्य
क् विचार्य यत्शुद्धं तदाचरेत् परमहंसिको भवेत् मौनं वाचो दंडः अनीहा काम्यकर्मत्यागो देहस्य प्राणायामः चेतसः

॥ १८ ॥

चतुर्ष्विति ब्राह्मणेष्वेव वृत्तिभेदेन चतुर्विधेषु एवासंभवे वा विगर्ह्यान् अभिशापपतितान् असंकॢप्तान् अत्रायं लाभो भविष्यतीति पूर्वमनुद्दिष्टान् १८ बहिर्ग्रामात् पाचितं ब्राह्मणादिभिः शोधितं विभज्य विष्णुब्रह्मार्कभूतेभ्यः शेषमित्यधिकाहरणं निरस्तं याचितमिति पाठे माधुकरेण याचितमन्नं चेत्तर्हि विभज्य भुञ्जीत न तु याचितादिभेदचतुष्टयमित्यर्थः माधुकरे तु नैवेद्यभेदेनान्येषु विधीयते नैवेद्यकल्पितपदस्य त्रितयं भौतिकं बहिरिति स्मृतेः यद्वा

भिक्षां चतुर्षु वर्णेषु विगर्ह्यान्वर्जयंश्चरेत् सप्तागारानसंकॢप्तांस्तुष्येल्लब्धेन तावता १८ बहिर्जलाशयं गत्वा तत्रोपस्पृश्य वाग्यतः विभज्य पाचितं शेषं भुञ्जीताशेषमाहृतं १९ एकश्चरेन्महीमेतां निःसंगः संयतेंद्रियः आत्मक्रीड आत्मरतः आत्मवान्समदर्शनः २० विविक्तक्षेमशरणो मद्भावविमलाशयः आत्मानं चिंतयेदेकमभेदेन मया मुनिः २१ अन्वीक्षेतात्मनो बंधं मोक्षं च ज्ञाननिष्ठया बंध इंद्रियविक्षेपो मोक्ष एषां च संयमः २२ तस्मान्नियम्य षड्वर्गं मद्भावेन चरेन्मुनिः विरक्तः क्षुद्रकामेभ्यो लब्ध्वात्मनि सुखं महत् २३ ॥ ॥

न दानीं केनापि याचितं चेत्तन्मध्ये तस्मै किंचिद्विभज्य दत्वेत्यर्थः १९ किंच एकश्चरेदिति आत्मन्येव क्रीडा कौतुकं यस्य सः आत्मन्येव रतः संतुष्टः आत्मवान् धीरः २० विविक्तं विजनं क्षेमं निर्भयं शरणं स्थानं यस्य सः मयि भावेन विमल आशयो यस्य सः २१ बंधमोक्षौ च केन बंधः केन वा मोक्ष इति नावाहं बंध इति विमृश्याभिलाषो बंधः तद्रहितत्वं मोक्ष इति एषामिंद्रियाणां च कामादात्मसंयमनं २२ यस्मादेवंभूतो बंधमोक्षौ तस्मात् मद्भावेन मां स्मरन् मां स्मरन् मद्भावेन मां स्मरन् षड्वर्गादिकं च विद्वान् महीं विचरेदित्यन्वयः २३ ॥ श्री ॥ श्री

श्री भा० ए० टी० ८२

पुराणि हस्त्यादिमंति ग्रामास्तद्रहिताः व्रजा गोष्ठानि तान् सार्थान् यात्रिकजनसमूहान् २४ यतः शिलवृत्त्या प्राप्ते
न तदीयेनांधसान्नेन शुद्धसत्त्वः सन् निरस्तमोहः संसिध्यति मुच्यते २५ ननु मिष्टान्नं विहाय कदन्नं शिलान्नं प्र
वृत्तिः स्यात् तत्राह नैतदिति एतद्दृश्यमानं मिष्टादि वस्तुतया न पश्येत् यतो नश्यति अत इहामुत्र च लोके असक्त

पुरग्रामव्रजान्सार्थान्भिक्षार्थं प्रविशंश्चरेत् पुण्यदेशसरिच्छैलवनाश्रमवतीं महीं २४ वान
प्रस्थाश्रमपदेष्वभीक्ष्णं भैक्ष्यमाचरेत् संसिध्यत्याश्वसंमोहः शुद्धसत्त्वः शिलांधसा २५ नैतद्वस्तुतया
पश्येद्दृश्यमानं विनश्यति असक्तचित्तो विरमेदिहामुत्रचिकीर्षितात् २६ यदेतदात्मनि जगन्मनो
वाक्प्राणसंहतं सर्वं मायेति तर्केण स्वस्थः त्यक्त्वा न तत्स्मरेत् २७ ॥ ॥ ॥ ॥

चित्तः सन् चिकीर्षितात् तदर्थं कर्मणो विरमेत् २६ ननु तथापि प्रियावद्धिनाशं स्वदेहत्वान्न खिन्नतावतः कुतो विरा
गः स्यात् तत्राह यदेतदिति एतज्जगत् ममतास्पदं मनोवाक्प्राणैः संहतं सहितं सहंकारास्पदं शरीरं च सर्वं चेत
ज्जन्म स्वं स्वं च आत्मनि मायामात्रमिति तर्केण स्वप्नादिदृष्टान्तेन त्यक्त्वा स्वस्थः आत्मनिष्ठः सन् पुनः
तन्न स्मरेत् न चिंतयेत् २७ ॥ ॥ ॥ ॥ ॥ श्री ८२

तदा सकिं त्यक्त्वा २।

एवं बहूदकादिधर्मानुक्त्वा परमहंसधर्मानाह ज्ञाननिष्ठ इति सार्द्धैर्दशभिः बहिर्विरक्तो मुमुक्षुः मन्दयोग्यो ज्ञाननिष्ठो वा
वा मोक्षेऽप्यनपेक्षो मद्भक्तो वा सलिंगान् त्रिदंडादिसहितान् आश्रमान् तद्धर्मांस्त्यक्त्वा यथोचितं धर्मानाचरेदित्यर्थः
न पुनरवधूतत्यागमेव विवक्षितः पुनर्धर्मविधानात् अक्रियत्वस्याग्रेऽध्याये वक्ष्यमाणत्वाच्च तर्हि एवं तस्मात् को विशेषः
तमाह अविधिगोचरः विधिकिंकरो न स्यादिति एतदेव स्फुटीकरिष्यति शौचमाचमनं स्नानं न तु चोदनया चरेदि
त्यादिना २८ कथं चरेत्तदाह बुधो विवेकवानपि बालकवन्मानावमानविवेकशून्यः कुशलो निपुणोऽपि जडवत्

ज्ञाननिष्ठो विरक्तो वा मद्भक्तो वानपेक्षकः सलिंगानाश्रमांस्त्यक्त्वा चरेदविधिगोचरः २८ बुधो
बालकवत्क्रीडेत् कुशलो जडवच्चरेत् वदेदुन्मत्तवद्विद्वान्गोचर्यां नैगमश्चरेत् २९ वेदवादर
तो न स्यान्न पाषंडी न हैतुकः शुष्कवादविवादे न कंचित्पक्षं समाश्रयेत् ३० नोद्विजेत जनाद्धी
रो जनं चोद्वेजयेन्न तु अतिवादांस्तितिक्षेत नावमन्येत कंचन ३१ देहमुद्दिश्य पशुवद्वैरं कुर्यान्न
केनचित् एक एव परो ह्यात्मा भूतेष्वात्मन्यवस्थितः ३२ यथेंदुरुदपात्रेषु भूतान्येकात्मकानि च ३३

लानुसंधानाभावेन विद्वान् पंडितोऽप्युन्मत्तवत् लोकरंजनाभावेन नैगमः वेदार्थनिष्ठोऽपि गोचर्यां अनियताचा
रमिव २९ वेदवादरतः कर्मकांडव्याख्यानादिनिष्ठः पाषंडी श्रुतिस्मृतिविरुद्धानुष्ठाता हैतुकः केवलतर्क
निष्ठः शुष्कवादे निःप्रयोजने गोष्ठ्यां यो विवादस्तस्मिन् ३० अतिवादान् जनकृतदुरुक्तानि देहमुद्दिश्य वैरं न
कुर्यात् आत्मदृष्ट्या तावद्वैरकारणं नास्तीत्याह एक एवेति देहदृष्ट्यापि नास्तीत्याह भूतानि च देहा अपि कारण

श्री॰ भा॰ ए॰ टी॰ ८३ देवतंत्रितं दैवाधीनं यतः न तु सर्वं दैवतंत्रितं जन्ममरणयोरपि दैवतंत्रित्वात् ३३ अलं तर्हि भिक्षाप्रयत्नेनापि तत्राह आहारमात्रार्थं समीहेत वृत्तनस्तस्य प्राणधारणं युक्तं सम्यक् कथं तेन प्राणधारणेन तत्त्वं विचार्यते किं तेनापि तदाह त द्विज्ञायेति ३४ तर्हि किं मिष्टान्नादिकमग्राह्यमेव केनैवमुक्तमित्याह यदृच्छयेति ३५ यथाहमेश्वरोऽचरामि लीलया तथा ज्ञानी ज्ञाननिष्ठः न नामसक्तः चरेत् न तु विधिकिंकरत्वेन तस्य ज्ञाननिष्ठाविरोधादित्यर्थः ३६ ननु विधिकिंकरत्वा

अलब्ध्वा न विषीदेत काले कालेऽशनं क्वचित् लब्ध्वा न हृष्येद्धृतिमानुभयं दैवतंत्रितं ३३ आहारार्थं स मीहेत युक्तं तत्प्राणधारणं तत्त्वं विमृश्यते तेन तद्विज्ञाय विमुच्यते ३४ यदृच्छयोपपन्नान्नमद्या च्छ्रेष्ठमुतापरं तथा वासस्तथा शय्यां प्राप्तं प्राप्तं भजेन्मुनिः ३५ शौचमाचमनं स्नानं न तु चोदन याचरेत् अन्यांश्च नियमान् ज्ञानी यथाहं लीलयेश्वरः ३६ न हि तस्य विकल्पाख्या या च मद्वी क्षया हता आदेहान्तात् क्वचित् ख्यातिः ततः संपद्यते मया ३७ दुःखोदर्केषु कामेषु जातनिर्वेद आत्म वान् अजिज्ञासितमद्धर्मो गुरुं मुनिमुपाव्रजेत् ३८ ॥ ॥

भावः न स्यात्तत्राह नहीति अन्यांश्च नियमान् यथा ज्ञानी चरेत् न हि तस्य विकल्पाख्या भेददृष्टिरिति नेत्यस्ति सा सत्वे या चासीत्सापि मद्वीक्षया ज्ञानेन हता ननु न हता पुनर्दृश्यमानत्वात्तत्राह आदेहान्तात् क्वचित् कदाचिद्बाधितैव ख्यातिर्भवति ३७ तदेवं विरक्तस्य परोक्षज्ञानवतः संन्यासं तदुर्भमं न चात्मा केवलं वैराग्यवंतं विविदिषुं प्रत्याह दुः खोदर्केषु इति विषयेषु पर्यंते दुःखेषु जातनिर्वेदो जातनिर्वेदः सन् ... भवति न जिज्ञासितो मद्धर्मो मत्प्राप्तिसाधनं ॥ ८३ ॥

मामेव मदृश्यैव गुरुं परिचरेत्ततः परमेकश्चरेदित्यादिधर्मैर्वर्तेतेति भावः ३९ अनधिकारिणः संन्यासं नि-
दति द्वाभ्यां यस्त्विति प्रचंडोऽत्यासक्तः इंद्रियसारथिर्बुद्धिर्यस्य सः ४० सुरान् यज्ञभागान् देवान् स्वात्मानं चा-

तावत्परिचरेद्भक्तः श्रद्धावाननसूयकः यावद्ब्रह्म विजानीयान्मामेव गुरुमादृतः ३९ यस्त्वसंयत-
षड्वर्गः प्रचंडेंद्रियसारथिः ज्ञानवैराग्यरहितः त्रिदंडमुपजीवति ४० सुरानात्मानमात्मस्थं निह्नुते
मां च धर्महा अविपक्वकषायोऽस्मादमुष्माच्च विहीयते ४१ भिक्षोर्धर्मः शमोऽहिंसा तप ईक्षा वनौ-
कसः गृहिणो भूतरक्षेज्या द्विजस्याचार्यसेवनं ४२ ब्रह्मचर्यं तपः शौचं संतोषो भूतसौहृदं गृह-
स्थस्याप्यृतौ गंतुः सर्वेषां मदुपासनं ४३ ॥ ॥ ॥ ॥ ॥

त्मस्थं मां च निह्नुते प्रतारयति निकृष्टफलमाह अस्मादिति ४१ चतुर्णां धर्मानाह भिक्षोरिति अस्य धर्मानुक्ता-
प्युक्तं गृहस्थस्याप्यतिदिशति ब्रह्मचर्यमिति शौचं रागादिराहित्यं तस्य ब्रह्मचर्यप्रकारमाह ऋतौ गंतुरिति
गृहिणो गृहस्थस्य स न ब्रह्मचर्यभंगः ४३ ॥ ॥ ॥ ॥ ॥
श्रीकृष्णाय नमः श्रीरामरामो जयति ॥ ॥ ॥
॥ ॥

श्री॰ भा॰ ए॰ टी॰ २४

एवंभूतवर्णाश्रमधर्मफलमाह इतिमामिति दृढां भक्तिं विंदते ४४ ततः किम् तत्राह भक्त्येति महेश्वरत्वे हेतुः सर्वोत्पत्त्यप्ययं सर्वस्योत्पत्त्यप्ययौ यस्मात् अतएव तत्कारणं मां ब्रह्मरूपं वैकुंठनिवासिनं यद्वा ब्रह्मणो वेदस्य कारिणं माम् उपयाति सामीप्येन प्राप्नोति ४५ ततश्चासौ मोक्ष्याम्युक्तः चेत्याह इतीति एवंभूतेन स्वधर्मेण

इति मां यः स्वधर्मेण भजेन्नित्यमनन्यभाक् सर्वभूतेषु मद्भावो मद्भक्तिं विंदते चिरात् ४४ भक्त्योद्धवानपायिन्या सर्वलोकमहेश्वरं सर्वोत्पत्त्यप्ययं ब्रह्म कारणं मोपयाति सः ४५ इति स्वधर्मनिर्णिक्तसत्त्वो निर्ज्ञातमद्गतिः ज्ञानविज्ञानसंपन्नो नचिरात्समुपैति मां ४६ वर्णाश्रमवतां धर्म एष आचारलक्षणः स एव मद्भक्तियुतो निःश्रेयसकरः परः ॥४७ एतत्तेभिहितं साधो भवान्पृच्छति यच्च मां यथा स्वधर्मसंयुक्तो भक्तो मां समियात्परं ४८ इति श्रीभागवते एकादशे देवनस्पयतिधर्मवर्णनेष्टादशोध्यायः ॥१८॥ ॥ ॥ ॥

निर्णिक्तं शुद्धं सत्त्वं यस्य सः अतएव निर्ज्ञाता मम गतिरैश्वर्यं येन ४६ उक्तमर्थं संक्षिप्याह यएष आचारलक्षणः पितृलोकप्राप्तिफलो मद्भक्तियुक्तः मदर्पणेन कृतः ४७ प्रकरणार्थमुपसंहरति एतत्तेभिहितं यथा भक्तो भूत्वा मां परं समाप्नुयादिति ४८ इति श्रीभावार्थदीपिकायामेकादशस्कंधे टीकायामष्टादशोध्यायः ॥१८॥ ॥ ॥

ॐ॰ २४

ज्ञानादेर्निर्णयः पूर्वं कृतो ह्याश्रमधर्मतः एकोनविंशतितमे ज्ञानादेः त्याग उच्यते तदेवं तर्कतो बाहितोपि देहादिप्र
पंचस्यावस्तुत्वेनानुभवेन दृश्ये देहादि विलीयते तावज्ज्ञानाभ्यासः ततो मुक्तिरित्युक्तं आदेहांताच्च विद्योतितस्त
तः संपद्यते मयेत्यादिना यस्य त्वपरोक्षानुभवेन प्रपंचो लीनप्रायस्तस्य न किंचित् कृत्यमस्तीत्याह य इति विद्यानु॰
नुभवस्तात्पर्यं तेन श्रुतेन संपन्नः अत एवात्मवान् प्राप्तात्मतत्त्वः नानुमानिकः केवलपरोक्षज्ञानवान् भवति
अनकारणपाठे प्राक्स्फुरत् अनुकूलतर्केणो निर्णीतार्थः इत्यर्थः सइदं द्वैतं तन्निवृत्तिसाधनं च मयि मायामात्रमिति ज्ञाने

श्रीभगवानुवाच योविद्याश्रुतसंपन्नआत्मवान्नानुमानिकः मायामात्रमिदं ज्ञात्वा ज्ञानं च मयि सं
न्यसेत् १ ज्ञानिनस्त्वहमेवेष्टः स्वार्थो हेतुश्च संमतः स्वर्गश्चैवापवर्गश्च नान्योर्थो मदृते प्रियः २
ज्ञानविज्ञानसंसिद्धाः पदं श्रेष्ठं विदुर्मम ज्ञानी प्रियतमोतो मे ज्ञानेनासौ बिभर्ति मां ३ तपस्ती
र्थं जपो दानं पवित्राणीतराणि वा नालं कुर्वंति तां सिद्धिं या ज्ञानकलया कृता ४ तस्माज्ज्ञानेन
सहितं ज्ञात्वा स्वात्मानमुद्धव ज्ञानविज्ञानसंपन्नो भज मां भक्तिभावितः ५ ॥ ॥ ॥

च तत्साधनं च संन्यसेत् अयमेव विद्वत्संन्यासो नाम १ अत्र हेतुमाह ज्ञानिनस्त्विति यस्मादहमेव तस्येष्टः अपे
क्षितः स्वार्थः फलं हेतुः तत्साधनं च संमतः स्वर्गोऽभ्युदयश्च अपवर्गः संसारनिवृत्तिश्च अत एतस्य न प्राप्यं कृत्य
ज्ञानीति वा किंचिदस्तीत्यर्थः अत्र विद्वदनुभवं प्रमाणयति ज्ञानेति यथोक्ते ज्ञानिनमभिनंदति यतोसौ ज्ञाने
न मां धारयति ३ तस्य ज्ञानं स्तौति तप इति अलं कुर्वंति अत्यर्थं ज्ञानस्य कलया लेशेन योपिता चोपसंहरति ज्ञाने
न सहितं तत्पर्यंतं यथा भवति तथा स्वात्मानं ज्ञात्वा ज्ञानसंपन्नः सन् मामेव भज अन्यत्सर्वं त्यजेत्यर्थः ४५ ॥ ॥

तेस्य ब्रह्मयार्थेहृदैवं धाद्रूपेनाह ज्ञानेनेति मामेव संसिद्धिं प्राप्ताः ६ तदेवं ज्ञानं संक्षेपत उपदिशति त्वयीति त्रिविधः
श्री आध्यात्मिकादिविकारः देहादिः सा मायैव न तु परमार्थः यद्यस्माद् अन्तरा मध्य एवापतति रज्जौ सर्पमालादिव
भा० ए० त् नाद्यपवर्गयोः न त्वादावंते वास्ति अतः यद्यदास्य विकारस्यामी जन्मादयः स्युः तदा तस्य तवाधिष्ठानभूत
टी० स्य किं न किंचिदित्यर्थः तस्यापि वस्तुतो न संततस्यासत्वादित्याह आद्यन्तयोरिति असतः सर्पादेः आद्यन्त॰
८५

ज्ञानविज्ञानयत्नेन मामिष्ट्वात्मानमात्मनि सर्वयज्ञपतिं मां वै संसिद्धिं मुनयोऽगमन् ६ त्व
य्युद्धवाश्रयति यः त्रिविधो विकारो मायांतरापतति नाद्यपवर्गयोर्यत् जन्मादयोऽस्य यदमी
तव तस्य किं स्युराद्यन्तयोर्यदसतोऽस्ति तदेव मध्ये ७ ब वाव ज्ञानं विशुद्धं विपुलं
यथैतद्वैराग्यविज्ञानयुतं पुराणं आख्याहि विश्वेश्वर विश्वमूर्ते त्वद्भक्तियोगं च महद्विमृग्यं ८
तापत्रयेणाभिहतस्य घोरे संतप्यमानस्य भवाध्वनीश पश्यामि नान्यच्छरणं तवांघ्रिद्वंद्वातपत्रा
दमृताभिवर्षात् ९ ॥

योर्यदस्ति रज्ज्वादि तदेव मध्येपि न तु सर्पादि तद्वदयं विकारो नास्तीत्यर्थः यद्वा आद्यन्तयोर्यदस्ति तन्मध्येप्यस्ति ॐ
व न तस्य जन्मादयः संति अतस्त्वं निर्विकारं ब्रह्मेति ७ ज्ञानादेर्विशेषजिज्ञासुः पृच्छति ज्ञानमिति विशुद्धमेतज्ज्ञानं ८५
विपुलं निश्चितं यथा भवति तथाकथयेति महद्भिर्ब्रह्मादिभिर्मृग्यं ८ महद्विमृग्यत्वमभिनयेनाह तापत्रयेणाभिहत
स्य पुंसः अतः संतप्यमानस्यांघ्रिद्वंद्वमेवातपत्रं तस्मात् न केवलमातपत्रात् किं त्वमृतमभितो वर्षति यत्तस्मात् ९

श्री
भा० ए०
टी०
२६

विज्ञानमाह एतदेवेति श्लोकाद्वयेन यद्यदा येनैकेनानुगतानेकात्मकान् भावान्सर्वमेवैततत्तानत्यागर्ववैन्नेदेत
किलतदेकं परमकारणं ब्रह्मैवं तदा एतदेव विज्ञानमुच्यते एतदुक्तं भवति परोक्षज्ञानेनापरोक्षभ्रमस्य दिङ्मोहा
दिष्विव निवृत्त्यभावान्नटात्मकं जगत्स्वप्नवन्न्याऽऽत्मनः पृथगिविसदिति मन्यते अपरोक्षज्ञानेन तु बाधितमेव जीव
न्मुक्तः संस्कारवशेन पश्यति ततः परं न पश्यति च अतः परोक्षापरोक्षज्ञानेन ज्ञानं विज्ञानं शब्दाभ्यामुच्यतेऽद्वृति एते
न सर्वकार्याणामनुगतिकार्याणां कारणात्स्ययासत्वं चोपपादयति सङ्ग्रेन तत्त्रयदिन कदाचिदनीदृशं जगदि

एतदेव हि विज्ञानं न तथैकेन येन यत् स्थित्युत्पत्त्यप्ययान्पश्येद्भावानां त्रिगुणात्मनां २५ आ
दावन्ते च मध्ये च सृज्यात्सृज्यं यदन्वियात् पुनस्तत्प्रतिसंक्रामे यच्छिष्येत तदेव सत् २६ ॥

त्यादि मन्तेनैतेषां भावानामुत्पत्त्यादयो न स्युः तर्हि कारणस्यैकस्याभावादेकात्मनामिथ्यात्वं च न स्यात् अत
स्तेषामुत्पत्त्यादीन्साधयति स्थित्येति त्रिगुणात्मनां सावयवानामित्यर्थः विमतानाभावाउत्पत्त्यादिमन्तः सा
वयवत्वात् घटादिवदिति पश्येत् २५ ततआदावुत्पत्तौ अन्ते परिणामान्तरापत्तौ च कारणत्वेन मध्ये वाश्रयत्वेन
सृज्यात् सृज्यं कार्यात् कार्यान्तरं प्रतियदन्वियात् अनुगच्छेत् तत्प्रतिसंक्रामे तेषां प्रलये च यदवशिष्येत ॥
तदेव सदिति पश्येदित्यर्थः २६ ॥ राम ॥ राम ॥ राम ॥ ॥ ॐ ॥ श्री
२६

अतिकृपामुत्पादयन्नाह दृष्टमिति अस्मिन्बिले संसारकूपे च पतितं तत्र च कालाहिना दष्टं एवमपि तुच्छसुखेषु व
द्धतर्षं तस्मादप्यतद्ब्रह्माणः कथं समुद्धरणीय इति चेत्तत्राह आपवर्ग्यैः अपवर्गबोधकैः वाक्यैस्तैरासिंच
तितहिस्वासार्थं विहतस्तमायानिर्णीतमहं वक्ष्यामीत्याह श्रीपुराणपुरुषः इत्थमेतदिति श्लोकेकत्रेरमवदत्
भूतभावनः भूतभविष्यद्वर्तमानत्वः अथवा भूतानि पंचमहाभूतानि प्रकृतिपुरुषादिसहितानि तन्मात्रा

दृष्टं जनं संपतितं बिलेस्मिन्कालाहिनात्तद्रसुखोरुतर्षं समुद्धरैनं कृपयापवर्ग्यैर्वचोभिरासिंच
महानुभाव ९ श्रीशुकः इति पृष्टो महाबुद्धिः पुराणपुरुषोव्ययः उद्धवप्रस्तवाचेदं वचनं भूतभाव
नः १० श्रीभगवानुवाच इत्थमेतत्पुरा राजा भीष्मं धर्मभृतां वरं अजातशत्रुः पप्रच्छ सर्वेषां नोनुशृ
ण्वतां ११ निवृत्ते भारते युद्धे सुहृन्निधनविह्वलः श्रुत्वा धर्मान्बहून्पश्चान्मोक्षधर्मानपृच्छत
१२ तानहं तेभिधास्यामि देवव्रतमुखाच्छ्रुतान् ज्ञानवैराग्यविज्ञानश्रद्धाभक्त्युपबृंहितान् १३ न
वैकादश पंच त्रीन्भावान्भूतेषु येन वै ईक्षेताथैकमप्येषु तज्ज्ञानं मम निश्चितम् १४ ॥ ॥

णि च ज्ञानानीति भूतः भावनः इत्थं ज्ञानादिभिरुपबृंहितानित्यर्थः १३ तत्र ज्ञानं कथयति नवेति प्रकृतिपुरुषम
हदहंकारपंचतन्मात्राणि एकादशेन्द्रियाणि पंचमहाभूतानि त्रयो गुणाः एतान्भावानष्टाविंशतितत्त्वानि भूतेषु
ब्रह्मादिस्थावरान्तेषु कार्येषु अनुगतानि येन ज्ञानेनेक्षेत अथ एष्वपि भावेषु एकं परमात्मतत्त्वं अनुगतं येनेक्षेत
कार्यकारणात्मकं जगत् अपश्यन् परमकारणात्मकमेव तत्तत् अनुगतं ततः पृथगिति येन न पश्येत् तत् ज्ञानमित्यर्थः १४ ॥

वैराग्यमाह श्रुतिरिति ऐतिह्यं श्रुतिः नेह नानास्ति किंचन नेत्यादि घटत्वं पटादिकार्यं तंत्वादिव्यतिरेकेण न दृश्य
ते चैतन्यव्यतिरेकेण च न किंचिद्दृश्यत इति ऐतिह्यं महाजनप्रसिद्धिः सेयं ब्रह्मविद्येति एक एव हि भूता
त्मा भूते भूते व्यवस्थितः इति पर्यायश्च अनुमानं विमतं विवादास्पदं विश्वं मिथ्या दृश्यत्वात् शुक्तिरजतवत्
इत्यादि एवं प्रमाणचतुष्टयेपि तेष्वनवस्थानात् एतैर्बाधितत्वात् स एव सर्वानुगतं सत्यमात्मतत्त्वमेव प्रपञ्चविक
ल्पस्य च मिथ्यात्वात्ततो विरज्यते सत्यज्ञानप्राप्तित्वादसज्ज्ञानात् विरक्तो भवतीत्यर्थः एवं वैराग्ये मिथ्यात्वा

श्रुतिः प्रत्यक्षमैतिह्यमनुमानं चतुष्टयं प्रमाणेष्वनवस्थानाद्विकल्पात्स विरज्यते १७ कर्मणां
परिणामित्वादाविरिंचादमंगलं विपश्चिन्नश्वरं पश्येददृष्टमपि दृष्टवत् १८ भक्तियोगः पुरैवोक्तः
प्रीयमाणाय तेऽनघ पुनश्च कथयिष्यामि मद्भक्तेः कारणं परं १९ श्रद्धामृतकथायां मे शश्वन्मद
नुकीर्तनं परिनिष्ठा च पूजायां स्तुतिभिः स्तवनं मम २० आदरः परिचर्यायां सर्वांगैरभिवंदनं
मद्भक्तपूजाभ्यधिका सर्वभूतेषु मन्मतिः २१ ॥

टी
नाज्ञाते सत्ज्ञानं भक्तिरेव प्रकटीकरोति १७ न च वेदोक्तस्वर्गादिसुखाशया न विरज्येतेत्याह कर्मणामि
ति आविरिंचात् ब्रह्मलोकपर्यंतं अदृष्टमपि स्वर्गमंगलं दुःखरूपं नश्वरं च पश्येत् १८ भक्तियोगं स
कारणमाह भक्तियोगः पूर्वमुक्त एव तथापि तस्मिन्प्रीतिं प्राप्नुवते तुभ्यं पुनश्च कथयिष्यामि १९ ॥
श्रद्धा श्रवणादरः शश्वदिति सर्वत्रानुषज्यते मदनुकीर्तनं श्रवणानंतरं मत्कथाख्यानमित्यर्थः २० २१

ऽंगचेष्टा लौकिकीक्रियापि वचसा लौकिकेनापि मद्गुणानामीरणं प्रेरणं कथनं ॥२२॥ मदर्थे मद्भजनार्थे नतु हि वैधि
तेऽर्थस्य परित्यागः भोगस्य तत्साधनस्य चंदनादेः सुखस्य पुत्रोपलालनादेः ॥ इष्टादि वैदिकं यत्कर्म तदपि मद
र्थं कृतं भक्तेः कारणमित्यर्थः ॥२३॥ भक्तिः प्रेमलक्षणा संजायते अस्य भक्तस्य अन्यः कोऽर्थः साधनरूपः साध्य
रूपो वावशिष्यते सर्वोपि स्वत एव भवतीत्यर्थः ॥२४॥ तदेवाह किं बहुना चित्तमेवानवैहिः निष्टमर्थानर्थयोः

मदर्थेऽंगचेष्टा च वचसा मद्गुणेरणं ॥ मय्यर्पणं च मनसः सर्वकामविवर्जनं ॥२२॥ मदर्थेऽर्थपरि
त्यागो भोगस्य च सुखस्य च ॥ इष्टं दत्तं हुतं जप्तं मदर्थं यद्व्रतं तपः ॥२३॥ एवं धर्मैर्मनुष्याणामुद्ध
वात्मनिवेदिनां ॥ मयि संजायते भक्तिः कोऽन्योऽर्थोऽस्यावशिष्यते ॥२४॥ यदात्मन्यर्पितं चित्तं
शांतं सत्वोपबृंहितं ॥ धर्मं ज्ञानं सवैराग्यमैश्वर्यं चाभिपद्यते ॥२५॥ यदर्पितं तद्विकल्पे इंद्रियैः प
रिधावति ॥ रजस्वलं चासन्निष्टं चित्तं विद्धि विपर्ययं ॥२६॥ धर्मो मद्भक्तिकृत्प्रोक्तो ज्ञानं चैकात्म्यदर्शनं
धी गुणेष्वसंगो वैराग्यमैश्वर्यं चाणिमादयः ॥२७॥ ॥ ॥ ॥

कारणं तदेवाह ॥ यदात्मनीति द्वाभ्यां यदात्मनि मयीश्वरे चित्तमर्पितं तदा उत्तमान् धर्मादीन् प्राप्नोत्येव ॥२५॥ एतदेव
व्यतिरेकेणाह यदीति यद्यदा तच्चित्तं विकल्पे देहगृहादावर्पितं सत् विषयैः परिधावति तदाधिके रजस्वलं ऽस
न्निष्टं च भवति ततश्च विपर्ययं अधर्मादिकं विद्धि ॥२६॥ स्वाभिप्रेतान् धर्मादीन् व्याचष्टे धर्मो मद्भक्तिकृत न ततः स

धर्मादीनां महाजनप्रवृत्तिज्ञानामन्यथाज्ञानस्यानंतत्वात्समादिष्टपि संख्यातः स्वरूपेणवा किंचिद्वैलक्षण्यं स्यादिति सं
भावनया तद्विशेषजिज्ञासुः पृच्छति यम इति पंचभिः ॥२८॥ इह मय्यधिके प्रोक्तं च यथं वच किं परे ति विद्यादीनां वि
शेषणं श्रीमद्भूतं ॥२९॥ प्रश्नानेतान्यथा च विपरीतान्न पापमाहीन ॥३०॥ यमनियमनाह ॥ अहिंसेति त्रिभिः ॥ मूल

उवाच ॥ यमः कतिविधः प्रोक्तो नियमो वारिकर्षण ॥ कः शमः को दमः कृष्ण ॥ का तितिक्षा धृतिः प्र
भो ॥२८॥ किं दानं किं तपः शौर्यं किं सत्यमृतमुच्यते ॥ कस्त्यागः किं धनं चेष्टं को यज्ञः का च दक्षिणा ॥२९॥
पुंसः किंस्विद्बलं श्रीमद्भगो लाभश्च केशव ॥ का विद्या ह्रीः परा का श्रीः किं सुखं दुःखमेव च ॥३०॥
कः पंडितश्च को मूर्खः कः पंथा उत्पथश्च कः ॥ कः स्वर्गो नरकः कः स्वित्को बंधुरुत किं गृहं ॥३१॥ क
आढ्यः को दरिद्रो वा कृपणः कः क ईश्वरः ॥ एतान्प्रश्नान्मम ब्रूहि विपरीतांश्च सत्पते ॥३२॥ श्रीभग
वानुवाच ॥ अहिंसा सत्यमस्तेयमसंगो ह्रीरसंचयः ॥ आस्तिक्यं ब्रह्मचर्यं च मौनं स्थैर्यं क्षमाभ
यं ॥३३॥ शौचं जपस्तपो होमः श्रद्धातिथ्यं मदर्चनं ॥ तीर्थाटनं परार्थेहा तुष्टिराचार्यसेवनं ॥३४॥
एते यमाः सनियमाः उभयोर्द्वादश स्मृताः ॥ पुंसामुपासितास्तात यथाकामं दुहंति हि ॥३५॥

यं मनसापि परस्वानपहरणं आस्तिक्यं धर्मे विश्वासः ॥ शौचं बाह्यमाभ्यंतरं चेति द्वयमतो द्वादश नियमाः अ
द्धा धर्मादरः ॥३१॥ उभयोः श्लोकयोः ये स्मृताः ते यमा नियमाश्च यद्वा उभयोः प्रवृत्तिनिवृत्तयोः मुमुक्षोर्यमा मुख्या
सकामस्य च नियमा मुख्याः स्मृता इत्यर्थः ॥ अत्रैव हेतुमाह ॥ हि यस्मात् उपासिताः सेविताः संतः पुंसां प्रवृत्तानां
निवृत्तानां च यथाकामं कामानुसारेण भोगमभ्युदयं च दुहंतीति ॥३२॥३३॥३४॥३५॥ ॥ ॥ ॥ ॥

श्री भा. ए. टी. ८८

मुमुक्षोः कण्ठादयो ये शमादीन् हेयांश्च दुःखादीन् महाजनप्रसिद्धेभ्यो विलक्षणानाह शम इत्यादिना यावत्समाप्तिः
एतेनैव न हि विपरीतास्च अशमादयो ज्ञेयाः शमो मन्निष्ठता बुद्धेर्न तु शान्तिमात्रं दम इन्द्रियस्य संयमः न चौरादिदम
नं तितिक्षा विहितदुःखस्य संमर्षः सहनं न भारादेः जिह्वोपस्थयोर्वेगधारणं जयो धृतिः न तु उद्वेगमात्रं ३६ दंडो
भूतद्रोहः तस्य त्यागो दानं न धनार्पणं कामस्त्यागः भोगोपेक्षा न तपः न कृच्छ्रादि स्वभावो वासना तस्या जयः श्रुतिबधः
वैरादेन विक्रान्तिः समं ब्रह्म तस्य दर्शनं समालोचनं सत्यविषयत्वात्सत्यं न यथार्थभाषणमात्रं ३७ अन्यच्च ऋतं सूनृ

शमो मन्निष्ठता बुद्धेर्दम इन्द्रियसंयमः तितिक्षा दुःखसंमर्षो जिह्वोपस्थजयो धृतिः ३६ दंडन्यासः
परं दानं कामत्यागस्तपः स्मृतं स्वभावविजयः शौर्यं सत्यं च समदर्शनं ३७ ऋतं च सूनृता वाणी क
विभिः परिकीर्तिता कर्मस्वसंगमः शौचं त्यागः संन्यास उच्यते ३८ धर्म इष्टं धनं नृणां यज्ञोऽहं भगव
त्तमः दक्षिणा ज्ञानसंदेशः प्राणायामः परं बलम् ३९ ॥ ॥ ॥ ॥

ता सत्या प्रिया च वाक् एवं च ऋतसत्ययोः स्फुट एव विवेकः कर्मस्वसंगं त्यागं व्याख्यातुं मादौ तेनाभेदेन शौचं व्याख्या
य तस्यापि मलत्यागरूपत्वेन त्यागाद्भेदप्रतीतेः कर्मसु असंगमः अनासक्तिः शौचं त्यागस्तु संन्यास इति ए.
तयोर्भेद इत्यर्थः ३८ नृणामिष्टं धनं धर्मः न पश्वादि साधारणं भगवत्तमः परमेश्वरोऽहमेव यज्ञः न तु द्रव्यदेवतो ८८
द्देशः न क्रियाबुद्ध्यर्थं यत्नाच्चदानं दक्षिणा सा च ज्ञानोपदेशः न हिरण्यादि दानं न तु हि यज्ञरूपो विलः प्रा
प्यते इंद्रियदमनं बलं तच्च मनोदमहेतुत्वात् प्राणायाम इति ३९ ॥ ॥ ॥ ॥

लाभं व्याचिख्यासुः प्रथमं भगं तत्तो भेदेन व्याचष्टे तयोरभेदप्रसिद्धेः भगो भाग्यं तच्च मे ऐश्वरो भावो मदीयऐ
श्वर्यादिषाड्गुण्यमित्यर्थः उत्तमो लाभस्तु मद्भक्तिर्न पुत्रादिः विद्या चात्मनि प्रतीतस्य भेदस्य बाधः नाशो नेन
ज्ञानमात्रं अकर्मसु जुगुप्सा ह्रीः यत्तु दर्शने स्त्रीणां लज्जामात्रं ४० गुणा एव श्रीर्मण्डनं न किरीटादि दुःखसु
खयोरत्ययः अतिक्रमः अनुसंधानेन सुखं न भोगः विषयभोगापेक्षैव दुःखं न त्वग्निदाहादि बंधमोक्ष

भगो म ऐश्वरो भावो लाभो मद्भक्तिरुत्तमः विद्यात्मनि भिदाबाधो जुगुप्सा ह्रीरकर्मसु ४०
श्रीर्गुणा नैरपेक्ष्याद्याः सुखं दुःखसुखात्ययः दुःखं कामसुखापेक्षा पण्डितो बन्धमोक्षवित्
४१ मूर्खो देहाद्यहंबुद्धिः पन्था मन्निगमः स्मृतः उत्पथश्चित्तविक्षेपः स्वर्गः सत्त्वगुणो
दयः ४२ ॥

द्वयं वा यो वेत्ति स पण्डितः न विद्वन्मात्रं ४१ अहंबुद्धिरित्युपलक्षणं देहगेहादिष्वहंममेत्यभिमानवा
न्मूर्ख इत्यर्थः मन्निगमः मां नितरां गमयति प्रापयतीति यो निवृत्तमार्गः स तु पन्थाः सन्मार्गः न कंटका
दिमत्पथः चित्तविक्षेपः प्रवृत्तिमार्गः स उत्पथः कुमार्गः न तु चौराद्याकुलः सत्त्वगुणस्योदयः उद्रेकः
स्वर्गः न त्विन्द्रादिलोकः ४२ ॥ ॥ ॥ ॥ ॥

श्री॰ भा॰ ए॰ टी॰ २९

तामसःउन्नाहउद्रेकःसनरकःनतामिस्रादिः गुरुरेवबंधुर्नभ्रात्रादिःसचाहमेवयथाहंजगद्गुरुःएकएवपरो
बंधुःविप्रमेसमुपस्थितेगुरुःसकलधर्मान्नायज्ञाकिंचनगोहरिरितिससाधनभोगायतनंगृहंतच्चमानुष्यं
मानुषरूपंशरीरमेवनहर्म्यादिगुणैःसंपन्नआढ्यउच्यतेनधनी ४२ असंतुष्टोयःसदरिद्रःननिःस्वःयोजितेंद्रि
यःकृपणःसोन्यःनदीनःविषयेष्वनासक्तधीर्यःसईश्वरःस्वतंत्रःनराजादिःगुणसंगःगुणेषुसंगोयस्यसःवि
ईशः

नरकस्तमउन्नाहोबंधुर्गुरुरहंसखे गृहंशरीरंमानुष्यंगुणाढ्योह्याढ्यउच्यते ४२ दरिद्रोयस्त्व
संतुष्टःकृपणोयोजितेंद्रियः गुणेष्वसक्तधीरीशोगुणसंगोविपर्ययः ४४ एतउद्धवतेप्रश्नाः
सर्वेसाधुनिरूपिताः किंवर्णितेनबहुनालक्षणंगुणदोषयोः ४५ गुणदोषदृशिर्दोषोगुण
स्तूभयवर्जितः ॥४६॥ इतिश्रीभागवतेएकादशेयोकविंशोध्यायः ॥१९॥

पर्ययःअनीशः ४४ एतच्चशमादिविपर्ययोपलक्षणार्थंउपसंहरतिएतइतिसाधुमोक्षोपयोगित्वेनयाएतच्च
सर्वंगुणदोषयोर्विवेकायोद्धवेनपृष्टमितितयोःसंक्षेपतोलक्षणमाह किंबहुनावर्णितेनगुणदोषयो
र्लक्षणमेतावदेवतावदाह गुणदोषयोर्दृशिर्दृष्टिरेवदोषःगुणस्तूभयदर्शनवर्जितःस्वभावइति ४५ इ
तिश्रीभागवतेभावार्थदीपिकायांएकादशस्कंधेएकाविंएकोनविंशोध्यायः ॥१९॥ ॥ ॥ ॥ ॥ श्री २९

विशेषेण त्रयं प्रोक्तं भक्तिज्ञानक्रियात्मकं गुणदोषव्यवस्थायै अधिकारिविभागतः गुणदोषदृशिर्दोषो गु
णस्तूभयवर्जितः इत्युक्तं तदाक्षिपति विधिश्चेति पंचभिः विधिश्च प्रतिषेधश्च ईश्वरस्य तव निगमः आज्ञारूपो वेदः
स च विहितानां प्रतिषिद्धानां च कर्मणां गुणं च दोषं च पुण्यपापफलरूपं अवेक्षते १ उत्तमाधमभावेन तदा
धिकारिणां वर्णानाम् आश्रमाणां च विकल्पभेदं च गुणदोषरूपमेवावेक्षते प्रतिलोमानुलोमजं च गुणदोषं त

उद्धव उवाच॥ विधिश्च प्रतिषेधश्च निगमो हीश्वरस्य ते अवेक्षतेऽरविंदाक्ष गुणं दोषं च कर्मणां
१ वर्णाश्रमविकल्पं च प्रतिलोमानुलोमजं द्रव्यदेशवयःकालान्स्वर्गं नरकमेव च २ ॥

थैवावेक्षते प्रतिलोमजा उत्तमवर्णास्त्रीषु हीनवर्णेभ्यः पुरुषेभ्यो जाताः सूतवैदेहकादयः अनु
लोमजाश्चोत्तमवर्णेभ्यः पुरुषेभ्यो हीनवर्णास्त्रीषु जाता मूर्धावसिक्ताम्बष्ठादयः तेषां च असत्त्वसत्
त्व विज्ञेयाः प्रतिलोमानुलोमजा इति गुणदोषौ द्रव्यादीनां कर्मार्हतानर्हताभ्यां स्वर्गं नरकं च तत्फलं
तथा गुणदोषरूपमेवावेक्षते एतच्चोत्तराध्याये प्रपंचयिष्यते २ ॥ राम ॥ राम ॥ राम ॥

तथापि प्रस्तुते किमायातं तत्राह गुणदोषेति गुणदोषदृष्टिर्दोष इति निराकृतत्वाद्गुणदोषभिदादृष्टिमंतरेण तां विना निषेधविधिलक्षणं कर्मकांडं तव वचः त्वदीयं वचनं त्वद्धेदवचो तेरेण नृणां निःश्रेयसं कथं स्यात् तथा पित्रादीनामपि श्रेयः साधनविधेः नानुध्यायेद्बहून् शब्दान् वाचो विग्लापनं हि तदित्यादि निषेधस्य चावश्यकत्वादिति भावः यद्वा गुणदोषभिदादृष्टिमंतरेण निषेधविधिलक्षणं तव वचो विनेति सामानाधिकरण्येनैव वा त्वद्वा गुणदोषभिदादृष्टिमंतरेण निषेधविधिलक्षणमपि वचः कथं तत्तच्च मस्यादिवाक्यवन्निःश्रेयसम

गुणदोषभिदादृष्टिमंतरेण वचस्तव निःश्रेयसं कथं नृणां निषेधविधिलक्षणं ३ पितृदेवमनुष्याणां वेदश्चक्षुस्तवेश्वर श्रेयस्त्वनुपलब्धेर्थे साध्यसाधनयोरपि ४ गुणदोषभिदादृष्टिर्निगमात्तेन हि स्वतः निगमेनापवादश्च भिदाया इति विभ्रमः ५ ॥ ॥ ॥

स्यात् सर्वस्य च वेदस्य तत्परत्वांगीकारादित्यर्थः ३ ननु पितरो देवाश्च सर्वज्ञाः प्रत्यक्षतो दृष्टा मनुष्येभ्यः कथयिष्यंतीति तत्राह पित्रादीनां सर्वेषां तव त्वद्वाक्यरूपो वेद एव तेषु श्रेयः श्रेष्ठं चक्षुः प्रमापकं कुतः अनुपलब्धेर्थे मोक्षे स्वर्गादौ च तथा साध्यसाधनयोः इदं साध्यमिदमस्य साधनमित्यत्रापि पितृदेवं गुणदोषदृष्ट्यभावे निःश्रेयसं तद्दृढतः ४ किंच शास्त्रेणैव विहिता च भेददृष्टिस्तस्मिन्नेव विषये शास्त्रं कथं निवर्तयेदित्याह । तेन निगमात् त्वदाज्ञारूपात् वेदादेव न हि स्वतः यस्मादर्थेषु शास्त्रेणैव निवर्तितेन निगमेनैतस्य अपवाद इति श्रुत्वा

तस्य स्फुटं भ्रमो भवति तन्निवर्तयेति शेषः ५

विषयाभेदेप्यधिकारिभेदेनाविरोधं वक्तुं प्रथमं योगत्रयमाह योगा उपाया ब्रह्मकर्मदेवताकांडैः प्रोक्ताः कर्म च निष्का
मं श्रेयोविधित्सया मोक्षसाधनेच्छया अन्य उपायो नास्तीति काम्यकर्मादिकं व्यावर्त्तयति तथा चोत्तराध्याये स्फुटीकरि
ष्यति यएतानित्यादिना ६ तेष्वधिकारिभेदमाह निर्विण्णानामित्यादिद्वाभ्यां इह एषां मध्ये कर्मसु निर्विण्णानां दुःखबुद्ध्या
तत्फलेषु विरक्तानां अत एव तत्साधनेषु कर्मसु न्यासिनां ज्ञानयोगः सिद्धिद इत्युत्तरेणान्वयः अनिर्विण्णचित्तानां दुःख

श्रीभ वा उ च योगास्त्रयो मया प्रोक्ता नृणां श्रेयोविधित्सया ज्ञानं कर्म च भक्तिश्च नोपायोन्योस्ति कु
त्रचित् ६ निर्विण्णानां ज्ञानयोगो न्यासिनामिह कर्मसु तेष्वनिर्विण्णचित्तानां कर्मयोगस्तु कामिनां ७
यदृच्छया मत्कथादौ जातश्रद्धस्तु यः पुमान् न निर्विण्णो नातिसक्तो भक्तियोगोस्य सिद्धिदः ८ तावत्क
र्माणि कुर्वीत न निर्विद्येत यावता मत्कथाश्रवणादौ वा श्रद्धा यावन्न जायते ९ ॥ ॥

बुद्धिशून्यानां अतः कामिनां तत्फलेष्वविरक्तानामित्यर्थः ७ यदृच्छया केनापि भाग्योदयेन न तत्र कामो न तु कर्मस्वप्रव
र्तमानस्य सर्वात्मना विधिप्रतिषेधाधिकार इत्युत्तराध्यायेपि च वक्ष्यति निष्कामकर्मयोगाधिकारिणस्तु तत्रैव नि
ष्कामकर्मणि वर्तमानस्य यथाशक्ति सर्वज्ञानभक्तियोगाधिकारः प्रागेव तदधिकृतयोः तयोस्ताभ्यां सिद्धानां तु न
किंचिदिति ८ सावधिकं कर्मयोगमाह तावदिति नवभिः कर्माणि नित्यनैमित्तिकानि यावत् यावता ९ ॥ ॥

श्रीं भा पं हीं ५१

कर्मयोगिनोज्ञानभक्तिशमिकारोहप्रकारमाहस्वधर्मस्थइति अनाशीःकामःअफलकामःअमत्रिषिद्धंनरकयानंहि
दुधैवविहितातिक्रमाद्वानिषिद्धाद्वा अतःस्वधर्मस्थत्वान्निषिद्धवर्जनाच्चनरकंनयातिअफलकामत्वाच्चस्वर्गमपीत्य
र्थः १० किंतुअस्मिन्नेवदेहेअनवद्यःनिषिद्धत्यागीअतःशुचिःनिवृत्तरागादिमलःयद्दृच्छयेतिकेवलज्ञानादेपिभ
तोर्ह्वैलभतांप्रोतयति ११ अनेनप्रकारेणज्ञानभक्तिसाधनत्वात्रदेहंस्तौतिस्वर्गिणोपीतिनिरयिणइतिदृष्टांत

स्वधर्मस्थोयजन्यज्ञैरनाशीःकामउद्धव नयातिस्वर्गनरकौयद्यन्यन्नसमाचरेत् १० अस्मिंल्लोकेवर्त
मानःस्वधर्मस्थोनघःशुचिः ज्ञानंविशुद्धमाप्नोतिमद्भक्तिंवायदृच्छया ११ स्वर्गिणोप्येतमिच्छंतिलोकं
निरयिणस्तथा साधकंज्ञानभक्तिभ्यांउभयंतदसाधकं १२ ननरःस्वर्गतिंकांक्षेन्नारकींवाविचक्षणः
नेमंलोकंचकांक्षेतदेहावेशात्प्रमाद्यति १३ एतद्विद्वान्पुरामृत्योरभवायघटेतसः अप्रमत्तइदंज्ञा
त्वामर्त्यमप्यर्थसिद्धिदं १४ ॥

त्वेनोक्तंज्ञानभक्तिभ्यांज्ञानभक्त्योःतदुभयंस्वर्गिनारकिशरीरं १२ अतोनरःस्वर्गतिंनकांक्षेत्ननारकीमितिदृ
ष्टांतःयद्वास्वर्गनरकसाधनकर्माणिनकुर्यादित्यर्थः अस्यातिश्रेष्ठत्वात्नरयिमनुष्यंभवेयइत्यपिनकांक्षेत
यतोदेहावेशात्देहासक्त्यास्वार्थप्रमाद्यति अवधानशून्योभवति १३ अपितुएतद्देहंसाधकमितिविद्वान्तत्
त्वार्थसिद्धिदमपिमर्त्यंज्ञात्वाअप्रमत्तःअनलसःसन्मृत्योःपूर्वमेवमोक्षायघटेतयत्नंकुर्यात् १४ ॥ ५२

अथ मन्दो मुक्तसंगः सुखं प्राप्नोतीत्यत्र दृष्टान्तः छिद्यमानमिति यमैर्यमवन्निर्दयैः पुरुषैः कृतं नीडं यस्मिंस्तं स्वकेतनं स्व
कृतं स्वस्याश्रयं अलंपटः अनासक्तः याति १५ पुनरपि दार्ष्टान्तिकमाह अहोरात्रैश्छिद्यमानमायुर्बुद्ध्वा भयेन वेपथुः
कंपो यस्य सः १६ एवमप्रयतमानं प्रमत्तं निंदति नृदेहं प्लवं प्राप्येत्यध्याहारः यो भवाब्धिं न तरेत्स आत्महा तत्र हे
तवः आद्यं सर्वफलानां मूलमेतदुपार्जितकर्मभिः सर्वप्राप्तेः किंच सुदुर्लभं उत्तमकोटिभिरपि प्राप्तुमशक्यं त
थापि सुलभं यदृच्छयालब्धत्वात् तं च सुकल्पं पटुतरं किंच गुरुः संश्रितमात्र एव कर्णधारो नेता यस्य तं मया

छिद्यमानं यमैरेतैः कृतनीडं वनस्पतिं खगः स्वकेतमुत्सृज्य क्षेमं याति ह्यलंपटः १५ अहोरात्रैश्छि
द्यमानं बुद्ध्वायुर्भयवेपथुः मुक्तसंगः परं बुद्ध्वा निरीह उपशाम्यति १६ नृदेहमाद्यं सुलभं सुदुर्लभं
प्लवं सुकल्पं गुरुकर्णधारं मयानुकूलेन नभस्वतेरितं पुमान्भवाब्धिं न तरेत्स आत्महा १७ यदारं
भेषु निर्विण्णो विरक्तः संयतेंद्रियः अभ्यासेनात्मनो योगी धारयेदचलं मनः १८ धार्यमाणं मनो
यर्हि भ्राम्यदाश्वनवस्थितं अतंद्रितोनुरोधेन मार्गेणात्मवशं नयेत् १९ ॥

वस्वतमात्रेणानुकूलमाह तेन प्रेरितं १७ एवं तावदविरक्तस्य वैराग्यद्वारा ज्ञानशक्तिसाधकं कर्मयोगमुक्त्वा इदानीं
सम्यग्विरक्तस्य ज्ञानयोगं च तस्य ज्ञानप्राप्तेः पूर्वं किंचित्कृत्यं तदनुजनीयं चाह सार्धैर्नवभिः यदा त्वारंभेषु कर्मसु
निर्विण्णः दुःखदर्शनेनोद्विग्नः तत्फलेषु विरक्तश्च तदा संयतेंद्रियः सन् आत्मनोभ्यासेन आत्मविषयहतिसंततया
अचलं यथा भवति तथा मनो धारयेत् १८ तत्र प्रथमं चापल्येन धारणासंभवात्तत्स्वभावानुसारेण वशीकरणमाह य
र्हि आशु भ्राम्यत् परिभ्रमत् अनवस्थितं भवति तदानुरोधेन किंचिदपत्ताप्रसरणद्वारेण १९ ॥ राम ॥

श्रीः भा. ए. टी. २२

ननुतर्हियथापूर्वमेवस्यान्नेत्याह मनोगतिंनविसृजेन्नोपेक्षेत किंतुप्रथमतःसानुकूलतयैवेत्यर्थः २० अत्र
रोधमार्गमसृष्टोऽन्तस्ततोऽपिएषअनुग्रहतिमार्गेणमनसःसंग्रहःपरमोयोगःतत्साधनत्वादुपचारेणस्तुतियथाश्वदां
तस्यहृदयमनोऽश्वस्याबेतः अश्वस्यहृदयज्ञत्वंस्वाभिप्रायेणगतिमनिच्छन्नुपेक्षमाणःअश्वधारकःप्रथमंकिंचि
दनुगतिमनुवर्ततेनैवदाचरणतिनातं धृत्वैवगच्छतिनतमुपेक्षतेतद्वदित्यर्थः २१ एवमीषद्वशीकृतस्यमनसोऽस्यतनेः

मनोगतिंनविसृजेज्जितप्राणोजितेंद्रियः सत्वसंपन्नयाबुद्ध्यामनआत्मवशंनयेत् २० एषवैपरमो
योगोमनसःसंग्रहःस्मृतः हृदयज्ञत्वमन्विच्छन्दम्यस्येवार्वतोमुहुः २१ सांख्येनसर्वभावानांप्रति
लोमानुलोमतः भवाप्ययावनुध्यायेन्मनोयावत्प्रसीदति २२ निर्विण्णस्यविरक्तस्यपुरुषस्यो
क्तवेदिनः मनस्त्यजतिदौरात्म्यंचिंतितस्यानुचिंतया २३

मुख्योपायानाह सांख्येनेतित्रिभिः सांख्येनतत्त्वविवेकेनसर्वभावानांमहदादिदेहांतानांअनुलोमतःप्रकृत्यादिक्र
मेणएवंप्रतिलोमतः पृथिव्यादिक्रमेणलयंचअनवनुध्यायेत् प्रसीदतिनिश्चलंभवति २२ ततश्चागमापायिषुतेषु
अवधिभूतात्मदर्शनात् तदविवेकापन्नसंसारेनिर्विण्णस्यातोविरक्तस्यततउक्तवेदिनः गुरूपदिष्टार्थालोचक
स्यततोगुरूपदिष्टस्यैवचिंतितस्यपुनः पुनरनुचिंतयादौरात्म्यंदेहाद्यभिमानंत्यजति २३ ॥ राम ॥ १२

किं च यमादिभिर्योगमार्गैः आन्वीक्षिक्या पदार्थद्वयशोधनेन ममार्चनध्यानादिभिर्वा वाशब्देनास्य पदस्य स्वान्तं ध्येयं दर्शय-
ति एतैरुपायैर्योग्यं परमात्मानं मनः स्मरेत् नान्यैः व्रतोमन्त्रकुर्यादित्यर्थः २४ ननु नान्यैरिति कथं योगिभिः प्रमादात्कि-
ल्मषप्राप्तौ पापापनुत्तये प्रायश्चित्तं कार्यमेवेत्यत आह यदीति योगेन ज्ञानाभ्यासेनैव एतच्च भक्तस्यापि नामकीर्तनाद्यु-
पलक्षणार्थं नान्यत्कृच्छ्रादि ननु नित्यनैमित्तिकं कर्म सत्त्वशोधकत्वाद्गुणः हिंसादिकं तदशुद्धिहेतुत्वाद्दोषस्तच्च तन्नि-
वर्तकत्वात्कृच्छ्रादिप्रायश्चित्तं गुण इति विधिप्रतिषेधाभ्यामुक्तत्वात् प्रायश्चित्तं विना योगेनैव कथं पापं दहेत् २५

यमादिभिर्योगपथैरान्वीक्षिक्या च विद्यया ममार्चोपासनाभिर्वा नान्यैर्योग्यं स्मरेन्मनः २४ यदि कु-
र्यात्प्रमादेन योगी कर्म विगर्हितं योगेनैव दहेदंहो नान्यत्तत्र कदाचन २५ स्वे स्वेऽधिकारे या निष्ठा
स गुणः परिकीर्तितः कर्मणां जात्यशुद्धानामनेन नियमः कृतः २६ गुणदोषविधानेन संगानां
त्याजनेच्छया २७ ॥

तत्राह स्वे स्व इति सार्धेन स एव गुणः नेतरः तदुपपादयति यस्माद्विधिनिषेधाभ्यामनेन गुणदोषविधानेन कर्मणां
नियमः संकोचः कृतः कुतः इत्यत आह जात्या उत्पत्त्यैवाशुद्धानां कर्मणां सर्वप्राणिनां संगानां त्याजनेच्छया अयं भा-
वः पुरुषस्याशुद्धिर्नाम न प्रवृत्तेरन्यास्ति स्वाभाविकप्रवृत्त्यैव तस्य मलिनत्वात् न च सहसा सर्वतो निवृत्तिः कर्तुं शक्य-
ते अत इदं न कर्तव्यं इदमेव कर्तव्यमिति स्वाभाविकप्रवृत्तिरेव संक्षिप्यते यथा च न प्रवृत्तिपरो वेदः तथोक्तं तृतीयाध्याये वक्ष्या-
मः उत्पत्त्यैव हि कामेष्वित्यादिना अतो योगिनः स्वाभाविकप्रवृत्त्यभावात् न प्रायश्चित्तादिविधिगोचरतेति २६

श्री भा. ए. टी. ५३

भक्त्यधिकारिणो भक्तियोगमाह जातश्रद्ध इति नवभिः मत्कथासु जातश्रद्धः अत एवान्येषु कर्मसु उद्विग्नः न च तत्फ-
लेषु विरक्तः तदाह वेदेति यद्यपि वेद तथापि न त्वपरित्यागे ऽनीश्वरः अशक्तः २७ एवं भूतो यः श्रद्धालुः भक्त्यैव सर्वं भ-
विष्यतीति दृढनिश्चयः स तु तदा तदनेन तरं मां प्रीतो भजेत् हि विषयांस्तु सेवमानोऽपि तेषु प्रीतिं न कुर्यात् इत्याह विगर्हयन्नि-
ति २८ कथं भजेत किं वा ततो भवति तदाह प्रोक्तेनेति द्वाभ्यां श्रद्धामृतकथायां मे शश्वन्मदनुकीर्तनमित्यादिना तद्वत

जातश्रद्धोमत्कथासुनिर्विण्णःसर्वकर्मसु वेददुःखात्मकान्कामान्परित्यागेप्यनीश्वरः २७ त
तोभजेतमांप्रीतःश्रद्धालुर्दृढनिश्चयः जुषमाणश्चतान्कामान्दुःखोदर्कांश्चगर्हयन् २८ प्रोक्ते
नभक्तियोगेनभजतोमासकृन्मुनेः कामाहृदय्यानश्यंतिसर्वेमयिहृदिस्थिते २९ भिद्यतेहृद
यग्रंथिःछिद्यंतेसर्वसंशयाः क्षीयंतेचास्यकर्माणिमयिदृष्टेखिलात्मनि ३० तस्मान्मद्भक्तियु
क्तस्ययोगिनोवैमदात्मनः नज्ञानंनचवैराग्यंप्रायः
श्रेयोभवेदिह ३१

प्रोक्तेन मामसकृन्नित्यं भजतः हृदय्याः हृद्गताः कामा नश्यंति २९ हृदये भवग्रंथिरहंकारः तत्स्थेकाश्च सर्वे संशया
असंभावनादयः कर्माणि अनारब्धफलानि संसारहेतुभूतानि तदेवं त्र्यवस्थ्याधिकारत्रयमुक्तं ३० तत्र च भक्तेरन्यनि
रपेक्षत्वादन्यस्य च तदपेक्षत्वाद्भक्तियोग एव श्रेष्ठ इत्युपसंहरति तस्मादिति त्रिभिः मदात्मनः मयि आत्मा चित्तं यस्य तस्य श्रे

एकादशस्कंधे २०

५३

तत्रहेतुर्यत्कर्मभिः इत्यादि द्वाभ्यां इतरैरपितीर्थयात्राव्रतादिभिः श्रेयःसाधनैर्यद्भाव्यं सत्त्वशुद्ध्यादि तत्सर्वं मद्भक्तो अञ्जसानायासेनै
वस्वर्गमपवर्गंमद्धाम चवैकुण्ठं लभत एव वाञ्छा तु नास्तीत्युक्तं यदि वाञ्छतीति ३२ तत्र हेतुमाह किंचिदिति धीराः धी
मंतः यतो मम एकांतिनः मय्येव प्रीतिशुक्ताः अतो मया दत्तमपि न गृह्णन्ति किंवत् तत्त्वं न वाञ्छन्तीत्यर्थः अपुनर्भवं आत्यं
तिकमपि कैवल्यं ३३ तदुपपादयति नैरपेक्ष्यमेव परमुत्कृष्टं अनल्पकं महद्भिः श्रेयः फलं तत्साधनं च प्राहुः मे भ
क्तिः निराशिषः प्रार्थनाशून्यस्य प्रार्थनाकारणाभूतयेक्षारहितस्य पुंसो भवेत् यद्वा मे निरपेक्षस्य या भक्तिः सा निराशि

यत्कर्मभिर्यत्तपसा ज्ञानवैराग्यतश्च यत् योगेन दानधर्मेण श्रेयोभिरितरैरपि ३२ सर्वं मद्भक्ति
योगेन मद्भक्तो लभतेञ्जसा स्वर्गापवर्गं मद्धाम कथंचिद्यदि वाञ्छति ३३ न किंचित्साधवो धीरा
भक्ता ह्येकांतिनो मम वाञ्छंत्यपि मया दत्तं कैवल्यमपुनर्भवं ३४ नैरपेक्ष्यं परं प्राहुर्निःश्रेयसमनल्प
कं तस्मान्निराशिषो भक्तिर्निरपेक्षस्य मे भवेत् ३५ न मय्येकांतभक्तानां गुणदोषोद्भवा गुणाः सा
धूनां समचित्तानां बुद्धेः परमुपेयुषां ३६ एवमेतान्मयादिष्टाननुतिष्ठंति मे पथः क्षेमं विंदंति म
त्स्थानं यद्ब्रह्म परमं विदुः ॥३७॥ इति श्रीभागवते एकादशस्कंधे विंशतितमोध्यायः ॥२०॥ ॥ ॥

षो भवेदित्यर्थः ३४ अनेन च प्रकारेण सिद्धानां न गुणदोषाः इति विधिनिषेधपरिहाररूपमुपसंहरति न मयीति गुणदोषैर्विहितप्र
तिषिद्धैरुद्भवो येषां ते गुणाः पुण्यपापादयः साधूनां निरस्तरागादीनां अतः समचित्तानां अत एव बुद्धेः प्रकृतेः परमीश्व
रं प्राप्तानां ३५ काम्यकर्मनिष्ठानिंदितानि तान्भक्तिमार्गान्उपसंहरति एवमिति मत्पथः मत्प्राप्त्युपायान् ये अनुति
ष्ठंति ते क्षेमं कालभयरहितं मम लोकं वैकुण्ठं विंदंति यत्परमं ब्रह्म तच्च विदुरित्यन्वयः ॥३६॥ इति श्रीएकादशे विंशः

मायादि

श्री
भा० ए०
टी०
५४

जयति स्वपदानंदः ॥ यमनंदोद्भवकेसरी यत्कृपालवलेशेन श्रीधरः सुकृतिः कृती ॥१॥ ईदृशं तावत्सिद्धयासंतः त्वमंतं मम सात्म्यमं
मयाहि स्वीयबोधयद्वत्तमेतत्त्व सर्वतः ॥२॥ एकविंशे क्रियाज्ञानभक्तिष्वनधिकारिणाम् ॥ कामिनां द्रव्यदेशादिगुणदोषाः प्र
पंचिताः ॥३॥ तदेवं गुणदोषव्यवस्थार्थं योगत्रयमुक्तं तत्र च ज्ञानभक्तिसिद्धानां न किंचिद्गुणदोषौ साधकानां तु प्रथमतो
निवृत्तकर्मनिष्ठानां यथाशक्ति नित्यनैमित्तिकं कर्म सत्त्वशोधकत्वाद्गुणः तदकरणं निषिद्धकरणं च तन्मलीमसकरण
त्वाद्दोषस्तन्निवर्तकत्वाच्च प्रायश्चित्तकरणं गुणः ॥ विशुद्धसत्त्वानां तु ज्ञाननिष्ठानां ज्ञानाभ्यास एव सिद्धिहेतुत्वाद्गुणः अ

श्रीभगवानुवाच ॥ य एतान्मत्पथो हित्वा भक्तिज्ञानक्रियात्मकान् ॥ क्षुद्रान्कामांश्चलैः प्राणैर्जुषं
तः संसरंति ते ॥१॥ स्वे स्वेऽधिकारे या निष्ठा स गुणः परिकीर्तितः ॥ विपर्ययस्तु दोषः स्यादुभयोरेष निश्च
यः ॥२॥

इत्युक्तं

क्तिनिष्ठानां तु पुनः श्रवणकीर्तनादिभक्तिरेव गुणः तद्विरुद्धं सर्वं दोषः इदानीं ये तु न सिद्धा न साधकाः किंतु
केवलं काम्यकर्मप्रधानाः तेषां सकलगुणदोषान्प्रपंचयिष्यन्प्रथमं तावत्तान्निंदति य एतानिति मत्पथः
मद्गतिमार्गान्क्षुद्रान्तुच्छान्कामांश्चलैः अस्थिरैः प्राणैर्वा प्रमितैरिंद्रियैर्वा जुषंतः सेवमाना भवंति ते संसरंति निखिलगुण
दोषभाक्तेन नानायोनीः प्राप्नुवंतीत्यर्थः ॥१॥ ननु तैरेव कर्मभिः केचिद्गुणदोषभाजः ॥ केचिन्नेति कुतो वैषम्यं न ह्यग्निना के
चिन्न दह्यंते केचिन्नेति संभवति तत्राह स्वे स्वे इति ॥ अधिकारिभेदेन कल्पितौ गुणदोषौ न वस्तुनिष्ठाविति भावः ॥२॥ ५४

तदाह शुद्ध्यशुद्धी इति विचिकित्सार्थं योग्यमयोग्यं चेति संदेहद्वारा स्वाभाविकप्रवृत्तिप्रतिबंधनार्थमित्यर्थः त
त्र शुद्ध्यशुद्धी योग्यत्वायोग्यत्वे गुणदोषौ तन्निमित्तोपादेयत्वानुपादेयत्वे शुभाशुभौ तन्निमित्तावर्थानर्थौ २ तत्र शु
द्ध्यशुद्धी धर्मार्थं शुद्धेन धर्मः अशुद्धेनाधर्मः इति गुणदोषौ व्यवहारार्थं अशुद्धावपि राजादीनां व्यवहारदर्शनादुपादेयौ
नास्यादिति शुभाशुभौ यात्रार्थं प्राणधारणार्थं दोषवत्वेप्यापन्नस्य शरीरनिर्वाहमात्रोपादानेन पापं अधिकोपादाने तु पापमि

शुद्ध्यशुद्धी विधीयेते समानेष्वपि वस्तुषु द्रव्यस्य विचिकित्सार्थं गुणदोषौ शुभाशुभौ २ धर्मा
र्थं व्यवहारार्थं यात्रार्थमिति चानघ दर्शितोयं मयाचारो धर्ममुद्वहतां धुरं ३ भूम्यंब्वग्न्यनिला
काशा भूतानां पंच धातवः आब्रह्मस्थावरादीनां शारीरा आत्मसंयुताः ५ वेदेन नामरूपा
णि विषमाणि समेष्वपि धातुषूद्धव कल्प्यंत एतेषां स्वार्थसिद्धये ६ ॥ गम ॥ ॥

ति मयाम्नादिरूपेण धर्ममुद्वहतां धुरं भारं कर्म जडानामित्यर्थः ३ शुद्ध्यशुद्धी प्रपंचयिष्यन्वेदोक्तत्वेन तदभिनिवेशो
माभूदिति समानेष्वपि वस्तुष्वित्युक्तं तत्प्रपंचयति भूमीति त्रिभिः भूतानां प्राणिनां धारयंतीति धातवः कारणा
निशाखाः शरीरारंभकाः देहतः साम्यमुक्तं जीवतोप्याह आत्मसंयुता इति ५ धातुषूद्धव नामरूपाणि वर्णाश्रमा
दीनि कल्पनायाः प्रयोजनमाह एतेषां प्राणिनां स्वार्थसिद्धये प्रवृत्तिनियमद्वारा धर्मादिपुरुषार्थसिद्धये ६ ॥ ॥

श्री भा० ए० टी० ३८

नकेवलंदेहेष्वेवअपितुदेशकालादिभावानामपिआदिशब्देनानुपादेयानांफलनिमित्ताधिकारिणांग्रहणंवस्तूनांउ
पादेयानांव्रीह्यादीनामपिममभयानियमार्थंसंकोचार्थमित्यर्थः ॥७॥ एवंगुणदोषविषयेपरोक्षोऽनयोःशुद्ध्यशुद्धिस्थल
नानिशुद्ध्यशुद्धीप्रपंचयति ॥ अकृष्णसारइत्यष्टभिः ॥ देशानांमध्येकृष्णसारहरिणरहितोऽशुचिः ॥ तत्रापिअब्रह्मण्यःब्राह्मण
भक्तिशून्योऽसंतमशुचिः ॥ कृष्णसारोऽपिकृष्णसारेणमृगेणसारःश्रेष्ठोयःसोऽपिअसौवीरःकीकटः ॥ सौवीराःसन्तुहवाःतद्दा

देशकालादिभावानांवस्तूनांममसत्तम ॥ गुणदोषौविधीयेतेनियमार्थंहिकर्मणां ॥७॥ अकृष्णसा
रोदेशानामब्रह्मण्योऽशुचिर्भवेत् ॥ कृष्णसारोऽप्यसौवीरकीकटासंस्कृतेरिणं ॥८॥ कर्मण्योगुणवा
न्कालोद्रव्यतःस्वतएववा ॥ यतोनिवर्ततेकर्मसदोषोऽकर्मकःस्मृतः ॥९॥ ॥ राम ॥ ॥

सौवीरःकीकटोऽपिअशुचिः ॥ नतं ॥ सर्वेगुणएतमोदेशाःमत्वाद्वंयत्रलभ्यतइतितदर्जितोयःकीकटः ॥ अंगवंगकलिंगादिः
असंस्कृतःसंमार्जनादिरहितःम्लेच्छबहुलोवाईरिणंऊषरंएकवृक्षावःतदशुचितदसौअशुचिरित्यर्थःद्रव्यंभवति ॥८॥ का
लस्यशुद्ध्यशुद्धीदर्शयतिद्रव्यतःद्रव्यसंपन्नस्वतोवापूर्वाह्णादियःकर्मण्यःकर्मार्हःसकालःतस्मिन्कर्मणिगुणवान्यतः
यस्मिन्द्रव्यालाभेनवाराष्ट्रविप्लवादिनावाकर्मनिवर्ततेयश्चस्वतएवाशौचादिलक्षणोऽकर्मकःकर्मानर्हःस्मृतःसका

त

वस्त्रशाल्योपात्रानांद्रव्यानांशुद्ध्यशुद्धीदर्शयतिद्रव्यस्येतिचतुर्भिः द्रव्येणतोयादिनाशुद्धिः मूत्रादिनात्वशुद्धिः वचनेनशुद्ध
मशुद्धंवेतिसंदेहेशुद्धमित्येवंरूपेणब्राह्मणवचनेनशुद्धिः विपरीतेनाशुद्धिः संस्कारेणप्रोक्षणादिनापुष्पादिःशुद्धिः
प्रवज्ञाणादिनात्वशुद्धिः कालेनदशाहादिनानवोदकादेःशुद्धिः कालमेवोदकेप्राप्येवर्जयेत्तत्र्यहमेवहि अकालेदशा(
हात्रैस्नात्वतःशुद्धिर्विधीयतेपर्युषितान्नादेरशुद्धिः अस्यंजायफलहितानांतद्गणायकादकानांमहत्त्वाल्पत्वाभ्यांशुद्ध्यशुद्धी
१० शक्त्याशक्त्यास्तुर्योपरागादिस्नानकान्नादेःशक्त्यास्नानशुद्धिः अशक्त्याकृच्छ्रदुर्बलकादवतिशुद्धिः उद्याश्वजन्मादौ

द्रव्यस्यशुद्ध्यशुद्धीचद्रव्येणवचनेनच संस्कारेणाथकालेनमहत्वाल्पतयाथवा १० शक्त्याशक्त्याथवाऽ
ज्ञामस्यआत्मनोयदात्मने यद्यंकुर्वंतिहियस्यादेशावस्थानुसारतः ११ ॥ राम ॥ राम ॥

शुद्धिं
स्नानादिना

दशाहाद्यतिज्ञानेनशुद्धिः अंतर्ज्ञानेनाशुद्धिः सप्तद्वाजीर्णमलवस्त्रादेःसप्तर्षप्रस्थशुद्धिः दरिद्रंप्रतिशुद्धिः तथापिवि
शेषमाहयदिति एतेनचद्रव्यवचनादयोद्रव्यशुद्धिद्वारा आत्मनेयदयंकुर्वंतितद्देशावस्थानुसारतएवयथायथावत(
कुर्वंतिनसर्वतः तथाहिनिर्भयएवदेशेकुर्वंति नतचौराद्याकुलेतथारोगादिव्यतिरिक्तप्रवाद्यवस्थायामेवंकुर्वंतिने
वाल्परोगाद्यवस्थायामिति तथाचस्मृतिः देशंकालंतथात्मानंद्रव्यंद्रव्यप्रयोजनंउपपत्तिमवस्थांचज्ञात्वाशौचंप्रकल्प

वेदपि ११८ ॥

धा

श्री भा॰ टी॰ ५९

ध्यादिभिरेवास्य शुद्धिरित्युक्तं तत्र च वचनादि शुद्धिरेकरूपैवस्य तस्य शुद्धिर्वैरूप्येति ततो प्रपंचयति धान्येति दारुतां कि
हवमसादिच अस्थिगजदंतादि रसाः तैलघृतादयस्तैजसाः सुवर्णादयस्तेषां पार्थिवानां च वस्या कर्दनघटेष्टका
दीनां यथायथं कालादिभिः शुद्धिः तत्रापि का कोत्र ज्ञेय पद्याततारतम्येन देशकालावस्थाद्यनुसारेण च एते रमेश्चय
तायुतैर्मिलितैः केवलैश्च कालमग्र नयेहगंयुतत्व प्रदर्शनार्थं १२ अमेध्यस्पर्शे शुद्धिम् आह अमेध्यलिप्तमिति यद्यत्पीव
पात्रवस्त्रादि येन तत्क्षणादारास्त्रोदकादिना गंधं च लेपं च व्यपोहति त्यजति स्वगतं च मलं तत्रापि प्रकृतिं स्वमेव रूपं भजते

धान्यदार्वस्थितंतूनां रसतैजसचर्मणां कालवाय्वग्निमृत्तोयैः पार्थिवानां युतायुतैः १२ अमेध्यलिप्तं यद्येन गं
धंलेपं व्यपोहति भजते प्रकृतिं तस्य तच्छौचं तावदिष्यते १३ स्नानदानतपोवस्थावीर्यसंस्कारकर्मभिः म
त्स्मृत्या चात्मनः शौचं शुद्धः कर्माचरेद्द्विजः १४

तस्य तच्छौचं शोधकं यावता च तत्क्षणादिना व्यपोहति तावत्प्रमाणं स्वरूपत आह त्रिनितोवान कर्तव्यमिष्यते १३ एवं ताव
त्द्रव्यशुद्धिरुक्ता इदानीं कर्तृशुद्धिमाह स्नानेति अवस्था कौमारादिः वीर्यं शक्तिः संस्कार उपनयनादिः कर्म संध्योपासन
दीक्षादिलक्षणं आत्मनः साहंकारस्य कर्तुः एतैः स्नानादिभिर्यथायथं तत्कालानुसारिणी शुद्धिरियं च शुद्धिर्नैयव
हारणाद्यार्थोक्तं विहितकर्मार्थं त्वाह शुद्ध इति द्विजः स्वस्वपलक्षणं शूद्रादेरपि १४ ॥

५६

मंत्रशुद्धिमाह सद्गुरुमुखाद्यथावत्परिज्ञानं मंत्रस्य शुद्धिः कर्मशुद्धिमाह ईश्वरार्पणं कर्मणः शुद्धिर्धर्माय
र्थं शुद्ध्यशुद्धी प्रपंचतः प्रदर्श्योपसंहरति धर्मः इति देशकालद्रव्यकर्तृमंत्रकर्मभिः षड्भिः शुद्धैर्धर्मः संपद्यते एतेषां यो विप
र्ययः सोऽधर्मस्तु हेतुरित्यर्थः १५ अयं च गुणदोषविभागो न वास्तव इत्याह क्वचिदिति अपि च प्रतिग्रहो गुणः आपद्यनापदि
निषिद्धत्वाद्दोषः परधर्मस्य परस्य गुणोऽपि स्वस्य चानुष्ठीयमानो दोषः दोषोऽपि कुटुंबत्यागादि विरक्तादेर्न दोषः अपि तु वि
धिबलेन गुणः एवं योऽयं गुणदोषयोरेकस्मिन्नेवार्थे नियमः गुणदोषार्थयोर्नियमः नियामकं शास्त्रं स तयोर्भेदमे

मंत्रस्य च परिज्ञानं कर्मशुद्धिर्मदर्पणं धर्मः संपद्यते षड्भिरधर्मस्तु विपर्ययः १५ क्वचिद्गुणोऽपि दोषः स्या
द्दोषोऽपि विधिना गुणः गुणदोषार्थनियमः तद्भिदामेव बाधते १६ समानकर्माचरणं पतितानां न पातकं
औत्पत्तिको गुणः संगो न शयानः पतत्यधः १७

व बाधते १६ दोषस्य क्वचिद्दोषत्वाभावे गुणत्वे चोदाहरणं दर्शयति समानकर्मेत्यादिना समानस्य तस्यैव कर्मणः सुरापाना
देराचरणं अपतितानां पतनहेतुरपि जात्या कर्मणा वा पतितानां पुनः पातकमधिकाराभावात्केन भवति पूर्वमेव पति
तत्वात् अतोऽत्र दोषस्यापि दोषता नास्तीत्यर्थः तथा संगोऽपि वियोगे दोषः स गृहस्थस्यौत्पत्तिकः पूर्वसिद्धस्ततो न दोषः अ
पि तु गुणः भार्यामुपेयादिति विधानादुभयत्र दृष्टान्तः पूर्वमेवाधः शयानो यथा न पतति १७ ॥ राम ॥ ॥

श्री॰
भा॰ए॰
टी॰
४१

अतो गुणदोषनियमविधीनां प्रवृत्तिसंकोचहानिष्टत्वावेव तात्पर्यमित्यभिप्रेत्याह यतो यत इति १८ यथाश्रुतप्रवृत्ति
परतां वैरस्यविपाकत्वे प्रवृत्तिमार्गस्यानर्थहेतुतां दर्शयति विषयेष्विति चतुर्भिः संगः आसक्तिः तत्र तेषु विषयेषु येन
प्रतिहन्यते कामः तेन सह कामादेव कलहो विवादः १९ दुर्विषहस्तीव्रस्तमः संमोहस्तं क्रोधं चेतना कार्याकार्यस्फू
तिः द्रुतं शीघ्रं २० शून्याय कल्पते असत्तुल्यो भवतीत्यर्थः स्वार्थविभ्रंशः पुरुषार्थहानिः मूर्छितस्य मृततुल्यस्य २१
ततुल्यत्वं प्रपंचयति विषयेति नापरं परमात्मानं देहादिकं च वेद व्यर्थं वृक्षजीविकयेव यो जीवन्वै तेन मूर्छिततुल्यः

यतो यतो निवर्तेत विमुच्येत ततस्ततः एष धर्मो नृणां क्षेमः शोकमोहभयापहः १८ विषयेषु गुणाध्या
सात्पुंसः संगस्ततो भवेत् संगात्तत्र भवेत्कामः कामादेव कलिर्नृणां १९ कलेर्दुर्विषहः क्रोधः तमस्त
मनुवर्तते तमसा ग्रस्यते पुंसः चेतना व्यापिनी द्रुतं २० तया च रहितः साधो जंतुः शून्याय कल्पते
ततोस्य स्वार्थविभ्रंशो मूर्छितस्य मृतस्य च २१ विषयाभिनिवेशेन नात्मानं वेद नापरं [illegible]
वृक्षजीविकया जीवन्व्यर्थं भस्त्रेव [illegible] निःश्वसन् २२ फलश्रुतिरियं नृणां न
श्रेयो रोचनं परं श्रेयोविवक्षया प्रोक्तं यथा भैषज्यरोचनं २३॥

अत एव च यो भस्त्रेव श्वसन्वर्तते स मृततुल्यः अतः स्वार्थनाश इत्यर्थः २२ ननु श्रवणस्य स्वर्गादिफलश्रवणात्कथं तस्या
र्थविभ्रंशः तत्राह इयं फलश्रुतिर्न श्रेयः परमपुरुषार्थपरा न भवतीत्यर्थः किंतु बहिर्मुखानां नृणां मोक्षविवक्षया श्रेयो
ऽवांतरफलैः कर्मसु रुच्युत्पादनमात्रं यथा भैषज्ये रोचनं तु हस्तुत्यादनं तथाहि पिबनिंबं प्रदास्यामि खलु ते खंडलड्डुकान्

न् पित्रैवमुक्तः पिबति न फलं तावदेव तत् २३

ननु कर्मकाण्डे मोक्षस्य नामापि न श्रूयते कुत एवं व्याख्यायते यथाश्रुतस्य ग्रहणादित्याह उत्पत्त्यैवेति द्वाभ्यां उत्पत्त्यैव स्वभाव
त एव कामेषु पश्वादिषु प्राणेषु आयुरिन्द्रियबलवीर्यादिषु स्वजनेषु पुत्रादिषु अनर्थहेतुषु परिपाकतो दुःखहेतुषु आसक्ता
स्वार्थं परमपुरुषार्थमविदुषः अतो न तान् प्रति श्रुतिर्वेदो यद्बोधयिष्यति तदेव श्रेयः इति विश्वसितानि तदर्थः २४ तानेवं
भूतान् वृजिनाध्वनि कर्मवर्त्मनि देवादियोनिषु भ्राम्यतः पुनस्तमः वृक्षादियोनिं विशतः पशुकामः इति आयुरिन्द्रियादिका
मः इति च कथं युञ्ज्यात् तेष्वेव कामेषु स्वयं बुधो वेदो युञ्ज्यात् प्रवर्तयेत् तथा सति तस्याप्तता न स्यादिति भावः २५ कथं तर्हि मीमांसकाः फ

उत्पत्त्यैव हि कामेषु प्राणेषु स्वजनेषु च आसक्तमनसो मर्त्या आत्मनोऽनर्थहेतुषु २४ न तानविदुषः स्वा
र्थं भ्राम्यतो वृजिनाध्वनि कथं युञ्ज्यात्पुनस्तेषु तांस्तमो विशतो बुधः २५ एवं व्यवसितं केचिदविज्ञाय कु
बुद्धयः फलश्रुतिं कुसुमितां न वेदज्ञा वदंति हि २६ कामिनः कृपणा लुब्धाः पुष्पेषु फलबुद्धयः अग्नि
मुग्धा धूमतान्ताः स्वं लोकं न विदंति ते २७

लपरतां वदंति तत्राह एवमिति व्यवसितं वेदस्याभिप्रायं कुसुमितामवान्तरफलश्रुतिं रोचनार्थां रमणीयां परमफलश्रु
तिं वदंति कुतस्ते कुबुद्धयस्तदाह हीत्यस्माद्वेदज्ञा व्यासादयः तथा न वदंतीति २६ कुबुद्धित्वं प्रपंचयति कामिन इत्यष्ट
भिः कामित्वात्कृपणाः ततो लुब्धाः तस्मादाकुलाः अतः पुष्पेष्ववान्तरफलेषु परमफलबुद्धयः अतएवाग्निमुग्धाः अग्नि
साध्यकर्मभिर्निवेशेन लुप्तविवेके काले तत्त्वधूमतान्ताः धूममार्गः इते येषां ते स्वं लोकमात्मतत्त्वं तथा च श्रुतिः कश्चिद्
वा अस्माल्लोकात्प्रेत्य आत्मानं वेद अयमहमस्मीति वा कश्चित्स्वं लोकं न प्रतिजानाति अग्निमुग्धो हैव धूमतान्तः इति २७

श्री॰
भाग॰
टी॰
५८

कोऽसौ स्वर्लोकः तमाह नेति हृदिस्थमात्मानं मां स्वर्लोकं न तु हृदिस्थं ग्रहं कामस्य इदं ज्ञाने तस्यैव सत्यं परमात्मानं न तु जानन्ती-
त्याह यः इदं मद्व्यतिरिक्तं जगन्नास्ति कुतः यत इदं जगज्जातं तं कुतो न जानन्ति हि यस्मात् उक्तं कर्मैव शस्त्रं शंसं कथनीयं पशुहिं-
सासाधनं वा येषां ते उक्थशस्त्राः कर्मैव देवप्रेरिताः यतः केवलं प्रसक्ततृषः प्राणतर्पणपराः नीहारं न मस्तेन व्याप्तानि च-
क्षूंषि येषां ते यथा संनिहितमपि न जानन्ति तद्वत् तथा च श्रुतिः न तं विदाथ य इमा जजानान्यद्युष्माकमन्तरं बभूव
नीहारेण प्रावृता जल्प्या चासुतृप उक्थशास्त्राः चरन्तीति २८ वेदतात्पर्यज्ञानाच्चान्यान्यजन्तीत्याह ते परोक्षमस्फुटं मे

वश्य

न ते मामंग जानन्ति हृदिस्थं य इदं यतः उक्थशस्त्रा ह्यसुतृपो यथा नीहारचक्षुषः २८ ते मे मतमवि-
ज्ञाय परोक्षं विषयात्मकाः हिंसायां यदि रागः स्याद्यज्ञ एव न चोदना २९ हिंसाविहारा ह्यालब्धैः पशु-
भिः स्वसुखेच्छया यजन्ते देवता यज्ञैः पितृभूतपतीन्खलाः ३० ॥ नम ॥

वर

मतमविज्ञाय देवादीन्यजन्ते इत्यन्वयः स्वमतमेवाह हिंसायां मांसभक्षणार्थं तत्फलार्थं च यदि रागः स्यात् त-
र्हि यज्ञ एवेत्यभ्यनुज्ञा तद्द्वारा परिसंख्येयं न त्वावश्यकत्वेन चोदनेत्येवं हृदयं २९ यद्यपि नित्यनैमित्तिकयोः कामविशे-
षानुबन्धो नास्ति तथापि कर्मणा पितृलोक इति श्रुतेः सामान्यतः पितृलोककामनास्त्येव अन्तःकरणशुद्धिकामना
वेति भावः तदुक्तं नाकामस्य क्रिया काचिद्दृश्यते चेह कर्हिचित् यद्यद्धि कुरुते जन्तुः तत्तत्कामस्य चेष्टितमिति यज्ञ-
नादेव हिंसया विहारः क्रीडा येषां ते ३० ॥ ५८

किंच तेऽतिमंदबुद्धयः स्ताहु स्वप्नोपममिति अमुं परलोकं आशिषश्चाशिं स्विल्लोके संकल्पनेन निश्चित्य विद्वद्वाङ्ल्पात्म(
नैतिकर्मस्वविनियोजयंति यथा कश्चिद्वणिक् कुङ्कुमरसमृग्मादिलेशवेनेन बहुधनार्जनेच्छया स्विदं धनं त्यजन्नुभयभ्रष्टो भ
वति तद्वदित्यर्थः ३१ अतः रजः सत्त्वतमोनिष्ठास्ते रजः सत्त्वतमोजुषः स्वानुरूपानिंद्रादीनेवोपासते न तु मां यद्यपिइं
द्रादीनामपि मदंशत्वान्मदुपासनमेव तत्तथापि यथावन्नोपासनमेव दर्शितादित्यर्थः ३२ इतिसंकल्प्यते इत्येतमेव संक
ल्पं दर्शयति इष्टेहेति तमस्मोगमन्तेतमहाशालामहागृहस्थाः ३३ ततः किमित्यत आह एवमिति अतो मत्यवण

स्वप्नोपममिमुं लोकमसंतं श्रवणप्रियं आशिषो हृदि संकल्प्य त्यजंत्यर्थान्यथावणिक ३१ रजःसत्त्व
तमोनिष्ठा रजःसत्त्वतमोजुषः उपासत इंद्रमुख्यान्देवादीन्नतथैवमां ३२ इष्टेह देवतायज्ञैर्गत्वारं
स्यामहे दिवि तस्यांतइहभूयास्ममहाशालामहाकुलाः ३३ एवं पुष्पितया वाचा व्याक्षिप्तमनसांनृणां
मानिनां चातिलुब्धानां मद्वार्तापि न रोचते ३४ वेदा ब्रह्मात्मविषयास्त्रिकांडविषया इमे परोक्षवादा
ऋषयः परोक्षं मम च प्रियं ३५ ॥

त्वाभावान्नित्यं संसारिणो भवंतीति भावः ३४ तदेवं प्रवृत्तिपरत्वं निराकृत्य प्रकृतं निवृत्तिपरत्वमेवोपसंहरति वेदा इ(
ति कर्मब्रह्मदेवताकांडविषया इमे वेदा ब्रह्मात्मविषयाः ब्रह्मैवात्मा न संसारीत्येतत्पराः तत्परत्वाप्रतीतौ च फल
श्रुतिरियं नृणां न श्रेयोरोचनं परं श्रेयो विवक्षया श्रोतव्यायथा भैषज्यरोचनमित्युक्तमेव कारणमत्रस्मारयति परोक्षेति
ऋषयो मंत्राः तद्द्रष्टारो वा नतु किमिति यतः परोक्षमेव मम च प्रियं अयं भावः शुद्धांतःकरणैरेव तद्बोद्धव्यं तामेरनधिकारि

मिः वृथाकर्मत्यागेनपंषप्रसंगादिति ३५

श्री॰
भा॰ ए॰
टी॰
५५

ननुवेदज्ञाअपिजैमिन्यादयः किमितितथानवर्णयंतिमांविनातत्त्वतोवेदार्थंचनकोपिवेदेत्याशयेनाह शब्दब्रह्मे
तियावत्समाप्ति स्वरूपतोर्थतश्चदुर्विज्ञेयंतत्त्वंसूक्ष्मंस्थूलंचेतिद्विविधंतत्रसूक्ष्मंतावत्स्वरूपतोपिदुर्विज्ञेयमित्याहप्राणे
न्द्रियमनोमयंप्रथमेप्राणमयेपराख्येततोमनोमयेपश्यंत्याख्येततःइंद्रियमयेमध्यमाख्येतस्यवाक्व्यंजकत्वेनवागिंद्रि
यप्रधानत्वात् किंचअनंतपारंसमष्टिप्राणादिमयस्यनिर्विशेषस्यचतस्यकालतोदेशतश्चापरिछेदात्अर्थतोपिदु
र्विज्ञेयत्वमाहगंभीरंनिगूढार्थमतोदुर्विगाह्यमतिप्रवेशानर्हं तथाचश्रुतिः चत्वारिवाक्परिमितापदानितानिवि
दुर्ब्राह्मणायेमनीषिणः गुहायांत्रीणिनिहितानिनेंगयंतितुरीयंवाचोमनुष्यावदंतीति अयमर्थः वाचःशब्दब्र

शब्दब्रह्मसुदुर्बोधंप्राणेंद्रियमनोमयं अनंतपारंगंभीरंदुर्विगाह्यंसमुद्रवत् ३६ मयोप
बृंहितंभूम्नाब्रह्मणानंतशक्तिना भूतेषुघोषरूपेणविसेषूर्णेवलक्ष्यते ३७ ॥ ॥

ह्मणःपरिमितानिगणितानिपद्यंतेज्ञायतेपरंतत्त्वमेभिरितिपदानिरूपाणिचत्वार्यपियेमनीषिणोतर्हृषयःतेविदुः
नान्येयतोगुहायांदेहमध्येत्रीणिनिहितानिनेंगयंतिस्वरूपंनप्रकाशयंति यतःकेवलंवाचः तुरीयंचतुर्थंभागंवैखरी
रूपंमनुष्याः प्राणिनोवदंतितमपिवदंत्येवनतुतत्त्वतोजानंति ३६ तत्रमनीषिभिरेवज्ञेयंसूक्ष्मंरूपंदर्शयतिम
येति मयांतर्यामिणोपबृंहितं अधिष्ठितमेवंःस्यत्वेष्यपरिछेदमाह भूम्नेतिअधिष्ठातृत्वेपिअविकारित्वमाहब्र
ह्मणेति अविकृतस्यापिनियंतृत्वंद्योतयति अनंतशक्तिनेतिभूतेषुसर्वप्राणिषुघोषरूपेणनादरूपेणलक्ष्यतेम
नीषिभिः अंतःसूक्ष्मत्वेनदर्शनेदृष्टांतःविसेषूर्णांतंतुरिवेति ३७ ॥ राम ॥ राम ॥ ५५

ततो वैखर्या व्याख्यया बृहत्या वाच उत्पत्तिप्रकारं सदृष्टांतमाह यथेति त्रिभिः हृदयात्मकाशात् घोषवान्नादात् उद्गम
ते बहिः प्रकटयति दार्ष्टांतिके दर्शयति आकाशादिति प्राणः तदुपाधिर्हिरण्यगर्भरूपः प्रभुर्भगवान् तेन रूपेण
३८ छंदोमयो वेदमूर्त्तिः स्वतः अमृतमयः घोषवान्नादोपादानवान् मनसा निमित्तभूतेन मितेनामेव दर्शयति स्प
र्शादीन् वर्णान् रूपयति संकल्पयतीति स्पर्शरूपिणेति तेन स्पर्शग्रहणमुपलक्षणं हृदयाकाशात् बृहतीं सृजतीति त्रि

यथोर्णनाभिर्हृदयादूर्णामुद्वमते मुखात् आकाशाद्घोषवान्प्राणो मनसा स्पर्शरूपिणा ३८ छं
दोमयोऽमृतमयः सहस्रपदवीं प्रभुः ओंकाराद्व्यंजितस्पर्शस्वरोष्मांतःस्थभूषितां ३९ विचित्रभा
षाविततां छंदोभिश्चतुरुत्तरैः अनंतपारां बृहतीं सृजत्याक्षिपते स्वयम् ४० ॥ राम ॥

तीयश्लोकेनान्वयः बृहतीं शब्दार्थव्याख्यानाय विशेषणानि सहस्रपदवीं बहुमार्गां तदेवाह ओंकाराडदरः कंठादि
संयोगेन व्यंजितैः स्पर्शादिभिर्भूषितां ओंकारस्यात्र हेतुः ततः हृल्लेखाभिप्रेतः नत्वकारादिवर्णरूपः तस्य व्यंजकास्त्वत्र स्प
र्शाः कादिपंचवर्गाः स्वराः अकारादयः षोडश ऊष्माणः शषसहाः अंतःस्था यरलवाः ३९ विचित्राभिर्वैदिकलौकि
कभाषाभिर्विततां यथोत्तरं चत्वारि चत्वार्यक्षराणि अधिकानि येषां तैः छंदोभिरुपलक्षितां एवमनंतपारां सृजति

श्री॰
भा॰ ए॰
टी॰
१००

तेषुकतिचित्तछंदांसिदर्शयति गायत्र्यैतितत्रचतुर्विंशत्यक्षरागायत्री ततश्चतुरश्चतुरक्षरवृद्ध्योष्णिगादिछंदांसि प्रत्यक्षि
त्रिष्टुकतिचित्तछंदांसिदर्शयति गायत्र्यैतितत्र... अतोवृहत्यपिमाकल्पेनस्वरूपतोऽ
ष्णिग्जगती अतिविराड्वुत्सर्गः एतैःछंदोभिरुपलक्षितामितिशेषैर्णावान्वयः ४१ अतोवृहत्यपिमाकल्पेनस्वरूपतोऽ
श्रुतिजगतीअतिविराडुत्सर्गः एतैःछंदोभिरुपलक्षितामितिशेषैर्णावान्वयः ४१ अतोवृहत्यपिमाकल्पेनस्वरूपतोऽ
विज्ञेयत्वमाह किमितिकर्मकांडेविधिवाक्यैःयदभिधत्ते किंविधत्ते मां विना देवताकांडेमं
त्रवाक्यैः किमाचष्टे प्रकाशयति ज्ञानकांडे च किमनूद्यविकल्पयेन्निषेधायेत्यमित्येवमस्याहृदयं नान्योमत्मत्तोमद्यःक
श्चिद्वेदपिनवेद ४२ ननुतर्हिमद्भ्रूपयाभेकथयेत्याह उँ इतिकथयति मामेवयज्ञरूपंविधत्ते मामेव तत्तद्देवतारूपम
भिधत्ते नमन्त्रः पृथक्रूपच्चाकाशाद्यप्रपंचजातं तस्माद्वापतस्मादात्मनआकाशःसंभूतइत्यादिनाविकल्प्यापोह्यते

सा॰ मां विधत्तेऽभिधत्ते मां विकल्प्यापोह्यते त्वहम्। एतावान्सर्ववेदार्थः शब्द आस्थाय मां भिदाम् ४३ ... मायामात्रमनूद्यान्ते प्रतिषिध्य प्रसीदति ४३

गायत्र्युष्णिगनुष्टुप् च बृहती पंक्तिरेव च। त्रिष्टुब्जगत्यतिच्छन्दो ह्यत्यष्ट्यतिजगद्विराट् ४१ किं विधत्ते किमा
चष्टे किमनूद्य विकल्पयेत्। इत्यस्या हृदयं लोके नान्यो मद्वेद कश्चन ४२ मां विधत्तेऽभिधत्ते मां विक
ल्प्यापोह्यते त्वहम्। एतावान्सर्ववेदार्थः शब्द आस्थाय मां भिदाम्। मायामात्रमनूद्यान्ते प्रतिषिध्य प्र
सीदति ४३ इति श्रीभागवते महापुराणे एकादशस्कंधे एकविंशोऽध्यायः ॥

तदप्यहमेव नमत्तःपृथगस्ति ४२ ... ततःस्वप्नेत्यावांसर्ववेदार्थंसंक्षेपतःकथयति एतावानेवसर्वेषांवेदानामर्थोनिरूपितः
तदप्यहमेवनमत्तःपृथगस्ति ४२ ... मायामात्रमित्यनूद्यनेहनानास्तिकिंचनेतिप्रतिषिध्यप्रसीदतिनिवृ
त्तमेवाहशब्दोवेदः मांपरमार्थरूपमाश्रित्यभिदांमायामात्रमित्यनूद्य... एवंवस्तुविवेकविरताकाशाद्वायुःसृष्टिपि...
त्यापारोभवतिअयंभावःयथाहिषुंडरीकयोरसःसएवतद्विस्तारभूतानांनानावांकुरशाखास्वपितिष्ठेवप्रमाणवस्त्या
र्थःपरमेश्वरःसएवतद्विस्तारभूतानांसर्ववेदकांडशाखानामपिसंगच्छतेनान्यइति ४२ निरुपकःस्वतःसर्ववेदहृत

स्वपरज्ञानसन्तायः तंवंदेपरमेश्वरं २६ भावा
र्थदीपिकायामेकादशेएकविंशः २१ ॥ ॥

द्वाविंशेतत्त्वसंख्यानामविरोधविधोच्यते पुंप्रकृत्योर्विवेकश्चजन्ममृत्युविधादिच १ तदेवंवेदानांप्रवृत्तिपरत्वंनिराकृ
त्यमोक्षपरत्वंविर्णीतं संतिचमोक्षपरत्वेपिनतत्त्वांतरविवादः तथाहिकेचित्तत्त्वसंख्यासुविवदंतेतत्राविवादार्थम
दमन्नेप्यात्मतत्त्वेष्वेकत्वनानात्वादिषु तत्रकिंसत्यमितिजिज्ञासयापृच्छतिकतीति ऋषिभिरागमेषुबहुधासंख्यातान्
नितेषुमध्येकतियुक्तानीत्यर्थः भगवन्मतानुवादपूर्वकंबहुधासंख्यानेप्रपंचयतिनवेतित्रिभिः त्वंतावदष्टाविंश(

श्रीउद्धवः कतितत्त्वानिविश्वेशसंख्यातान्यृषिभिःप्रभो नवैकादशपंचत्रीण्यात्थत्वमितिशुश्रुम १
केचित्षड्विंशतिंप्राहुरपरेपंचविंशति सप्तैकेनवषट्केचिच्चत्वार्येकादशापरे २ केचित्सप्तदशप्राहुः
षोडशैकेत्रयोदश ३ एतावत्त्वंहिसंख्यानामृषयोयद्विवक्षया गायंतिपृथगायुष्मन्निदंनोवक्तुमर्ह(
सि ४ श्रीभगवानुवाच युक्तंचसंतिसर्वत्रभाषंतेब्राह्मणायथा मायांमदीयामुद्गृह्यवदतांकिंनुदुर्घटं ५

तितत्त्वान्यात्थतानिचवयंशुश्रुमश्रुतवंतः ११ एतावतीनांभावस्तावत्त्वंनानात्वमित्यर्थः यद्विवक्षयायत्प्रयोज
नमभिप्रेत्यचगायंतिप्राहुरायुष्मन्नित्यस्मृतेः २ ३ विवक्षयाभेदेनसर्वंयुक्तमेवमाययाचकिंनामनयुक्तमित्याहयुक्त
मिति यथाब्राह्मणाभाषंतेतत्युक्तंचनवत्वतः यस्मात्संतिचसर्वत्रांतर्भूतानितत्त्वानि किंचमायामितिमम
त्वेपिमायामाश्रयतांतदघटमेवेत्यर्थः उद्गृह्यस्वीकृत्यतद्युमरीविज्जलपरिमाणादिविवादेकिंविदघटितमिवतत्रभवति १

श्री॰ भा॰ टी॰ १०१

ननु यदि सर्वेप्यपि युक्तं कुतो विवादः यदि च मायैवावलंबनं कुतो हेतुं प्रति विवादस्तत्राह नैतदिति हे तत्त्वं प्रति च विवद
मानानां मदीया दुरतिक्रमाः शक्तयः सत्त्वाद्याः अतः कारणद्वयं विशिष्टरूपेणापरिगणनात्त्वेव हेतुरित्यर्थः ६ तासां वि
वादे हेतुत्वमुपपादयति यासामिति यासां व्यतिकरात्क्षोभाद्वदतां परे विषये विकल्पो भेदश्चासीत्तस्मात्ततः कारणद्व
न्विकल्पो वा तन्मूलश्रुतः एतदेव व्यतिरेकेण द्रढयति शमदमयोरीदृशेऽवंतस्मिन्नात्मन्येव विकल्पोऽप्येति लीयते तेन विवि

नैतदेवं यथात्थ त्वं यदहं वच्मि तत्तथा एवं विवदतां हेतुं शक्तयो मे दुरत्ययाः ६ यासां व्यति
करादासीद्विकल्पो वदतां पदं प्राप्ते शमदमेऽप्येति वादस्तमनुशाम्यति ७ परस्परानु
प्रवेशात्तत्त्वानां पुरुषर्षभ पौर्वापर्यप्रसंख्यानं यथा वक्तुर्विवक्षितं ८ एकस्मिन्नपि दृ
श्यंते प्रविष्टानीतराणि च पूर्वस्मिन्वा परस्मिन्वा तत्त्वे तत्त्वानि सर्वशः ९ ॥ राम

कल्पमनुवादः शाम्यतीति ७ संति सर्वत्रेति यदुक्तं तत्प्रपंचयति परस्परेति द्वाभ्यां अन्योन्यस्मिन्ननुप्रवेशात्तत्त्वं कार्ये
ष्वाविवक्षितं तत्र यथा पूर्वं कारणं अपरं कार्यं कार्य कारणभावेन प्रसंख्यानं भवति यदा पूर्वापरसंख्याः परास्थि
क संख्यानं तयोर्भावः पौर्वापर्यं तेन संख्यानं गणनं इति ८ अनुप्रवेशं दर्शयति एकस्मिन्नपीति पूर्वस्मिन्कारणभू
ते तत्त्वे कार्यतत्त्वानि सूक्ष्मरूपेण प्रविष्टानि मृदि घटवत् अपरस्मिन्कार्यतत्त्वे कारणतत्त्वान्यनुगतत्वेन प्रविष्टानि

॥ ५ ॥ एकादशस्कंधे

१०१

अविरोधमुपसंहरति अतः अमीषांतत्त्वानांपौर्वापर्येकार्यकारणत्वंप्रसंख्यानंचन्यूनाधिकमभीप्सतांवादिनांमध्येय
थायथाविविक्तयायद्वक्त्रंयन्मुखंप्रवर्ततेतत्सर्वंविविक्तंनिश्चितंवयंगृह्णीमः उक्तन्यायेनसर्वत्रयुक्तेःसंभवात्
१० ननुकार्यकारणात्तत्त्वानांपृथक्त्वापृथक्त्वविवक्षयाभवतुनामसंख्याभेदः जीवेश्वरयोस्तुकथंभेदाभेदविव( २
क्षयाषड्विंशतिपंचविंशतिपक्षौप्रवृत्तौअतआह अनादीति स्वतोनसंभवति अन्यतस्तुसंभवात् स्वतःसर्वज्ञःपरमेश्व
रोऽन्योभवितव्यइतिषड्विंशतिपक्षाभिप्रायइत्यर्थः ११ कथंतर्हिपंचविंशतिपक्षः तत्राह पुरुषेति वैलक्षण्यंविसदृ

पौर्वापर्यमतोमीषांप्रसंख्यानमभीप्सतां यथाविविक्तंयद्वक्त्रंगृह्णीमोयुक्तिसंभवात् १० अनाद्य
विद्यायुक्तस्यपुरुषस्यात्मवेदनं स्वतोनसंभवादन्यः तत्त्वज्ञोज्ञानदोभवेत् ११ पुरुषेश्वरयोरत्रनवै
लक्षण्यमण्वपि तदन्यकल्पनापार्थाज्ञानंचप्रकृतेर्गुणः १२ प्रकृतिर्गुणसाम्यंवैप्रकृतेर्नात्मनो
गुणाः सत्त्वंरजस्तमइतिस्थित्युत्पत्त्यंतहेतवः १३

शत्वंनास्तिद्वयोरपिचिद्रूपत्वात् अतस्तयोरत्यंतमन्यत्वकल्पनाअपार्थाव्यर्था एवंपंचविंशतिपक्षप्रवृत्तिरित्यर्थः
ननुएवमपिईश्वरप्रसादलभ्यज्ञानस्यपृथक्त्वात्पक्षद्वयमपिनघटते अतआह ज्ञानंचेति सत्त्वगुणवृत्तित्वात्तदं
तर्भूतमित्यर्थः १२ ननुज्ञानंजीवधर्मःकथंप्रकृतेर्गुणःस्यात् अतआह प्रकृतिरिति गुणसाम्यंहिप्रकृतिः अतः
तद्विशेषरूपागुणाः तस्मादेवनत्वात्मनोजीवस्याकर्तृत्वात् तस्मात्स्थित्यादिहेतुभूतगुणाश्रयतानुपपत्तेः १३

श्री॰
भा॰ ए॰
टी॰
१०२

अतः सत्वं सत्वमयं ज्ञानं प्रकृतेर्गुणः इति पृथग्वैतोवानयः ननु तर्हि तत्तन्निवर्त्यकर्मचाज्ञानं च तत्त्वांतरं स्यात् न रजः कर्मैव
तमो हि नित्यः अज्ञानं च तम एवेति अतः कर्माज्ञानयोः रजस्तमोरूपाप्रकृतावेवांतर्भाव इति भावः तथापि कालस्वभा
वयोः तत्त्वांतरता स्यात् न गुणानां व्यतिकरो यस्मात् स एवेश्वरः कालो नाम स्वभावो नाम सूत्रं महत्तत्वं एव तस्य सर्व
शक्तिमत्वात् तदेवं ज्ञानादीनां यथायथमंतर्भावात्त्रयपदद्वयेपि तत्त्वदृष्टिः एतच्च पदार्थांतरेष्वपि ज्ञेयं स्वमते तु गुणाना
मागमापायित्वात् प्रकृतेर्भेदो विवक्षितः अतो गुणाः त्रीणि तत्त्वानि १४ अपराणि पंचविंशति तत्त्वानि दर्शयन्पदद्वय

सत्वं ज्ञानं रजः कर्म तमोऽज्ञानमिहोच्यते गुणव्यतिकरः कालः स्वभावः सूत्रमेव च १४ पुरुषः प्रकृ
तिर्व्यक्तमहंकारो नभोऽनिलः ज्योतिरापः क्षितिरिति तत्त्वान्युक्तानि मे नव १५ श्रोत्रं त्वग्दर्शनं घ्राणो
जिह्वेति ज्ञानशक्तयः वाक्पाण्युपस्थपाय्वंघ्रिः कर्माण्यंगोभयं मनः १६ शब्दः स्पर्शो रसो गंधो रूपं चे
त्यर्थजातयः गत्युक्त्युत्सर्गशिल्पानि कर्मायतनसिद्धयः १७ ॥ ॥

साधारणानि दर्शयति पुरुष इति सार्द्धद्वाभ्यां व्यक्तं महत्तत्त्वं नभआदीनि तन्मात्राणि मे मया १५ एकादश दर्शयति श्रो
त्रमिति दर्शनं चक्षुः ज्ञानशक्तयः ज्ञानेंद्रियाणि पंच वागादिपाय्वंतानि देहैकदेशोक्तानि चत्वारि अंघ्रिश्चेति कर्माणि कर्मेंद्रि
याणि पंच उभयं उभयात्मकं मनः अंग हे उद्धव एवमेतान्येकादश १६ पंच दर्शयति शब्द इति शब्दादीनि विषयतया परि
णतानि पंचमहाभूतानि न तु आत्मादिभिः तत्त्वाधिक्यं एवं तद्द्वयेपि स्यात् नेत्याह गतीति गतिश्च उक्तिश्च उत्सर्गश्च शिल्पं १२
च तानि कर्मायतनानां कर्मेंद्रियाणां सिद्धयः फलानि न तत्त्वांतराणीत्यर्थः १७ ॥ राम ॥ ॥

तदेवंगतत्रयेणतत्त्वसंख्याभेदाग्निरष्ट्यर्यद्विवदत्यागाचंतीतियत्तत्त्दंतत्तन्मतत्त्वात्पर्यंदर्शयति सर्गादाविति कार्यो
त्पत्तिरूपेसर्गेमहदादीनितत्त्वानिप्रसूतेसतीप्रकृतिः अस्यविश्वस्यसर्गादौगुणैःसाम्यतावस्थायांवर्तते
णोडशविकाराः कारणानिमहदादीनितत्त्वरूपिणीसतीप्रकृतिः अस्यविश्वस्यसर्गादौगुणैःसाम्यतावस्थायांधत्ते
उपादानकारणत्वप्रवृत्तात्पुरुषः तत्पुनः अपरिणामीनिमित्तभूतः केवलमीक्षते अतःपरिणामिन्याःप्रकृतेःपुरुष
षोभिन्नइति १६ तत्त्वैरारब्धस्यकार्यस्यतदंतर्भावमभिप्रेत्याह व्यक्तादयइति व्यक्तादयोमहदादयःप्रकृतेरंशभूता
येधातवस्तेविकुर्वाणाः पुरुषेक्षणलब्धवीर्याःसंहताः अंडंकार्यमसृजंतीत्यन्वयः प्रकृतेर्बलात्तामाश्रित्येत्यर्थः १७

सर्गादौप्रकृतिर्यस्यकार्यकारणरूपिणी सत्त्वादिभिर्गुणैर्धत्ते पुरुषोव्यक्तईक्षते १८ व्यक्तादयोवि
कुर्वाणाधातवःपुरुषेक्षया लब्धवीर्याःसृजंत्यंडं संहताःप्रकृतेर्बलात् १९ सप्तैवधातवइतितत्रा
र्थाःपंचखादयः ज्ञानमात्मोभयाधारस्ततोदेहेंद्रियासवः २० षडित्यत्रापिभूतानिपंचषष्ठःप
रःपुमान् तैर्युक्तआत्मसंभूतैःसृष्ट्वेदंसमुपाविशत् २१ चत्वार्येवेतितत्रापितेजआपोन्नमात्म
नः जातानितैरिदंजातंजन्मावयविनःखलु २२ ॥

एवंस्वमतमुपसंहृत्य मतांतरेष्वपिमामात्मनोविरूपितंवदतांविशेषतः स्वतात्पर्यंदर्शयति सप्तैवेति ज्ञानंज्ञा
नातीतिदृष्टाजीवः उभयोर्दृष्टृदृश्ययोराधारात्मानेतिसप्त तत्रप्रकृत्यादीनांकारणत्वेनतदादिष्वंतर्भावउक्तःशेषा
णांतर्भावार्थमाह ततस्तेभ्यःसप्तभ्यःदेहेंद्रियासवः कार्याणिजायंतइतिमतेषष्ठिभौतिकस्यभूतांतर्भावंजीवस्य
चपरमात्मांतर्भावमाहतैर्युक्तइति २१ अन्नेपृथ्वीआत्मनोजातानि आत्मनासहचत्वारितत्त्वानि अंतर्भावार्थमा

श्रीः
भा॰ ए॰
१०३
टी॰

भूतानिचमात्राणिचइंद्रियाणिचपंचपंचएकेनमनसासह आत्मासप्तदशः २३ आत्मैवसंकल्पयन्मनउच्यते त्र-
योदशपक्षेभूतानितन्मात्रैरेकीकृतानिइंद्रियाणिचतत्प्रकाशकानिपंचैवमनश्चैकमिंद्रियाधिष्ठातृ आत्माचद्विवि-
धःजीवात्मापरमात्माच एवंत्रयोदशपक्षेएकादशपक्षेपंचमहाभूतानिपंचेंद्रियाणि जीवमनसोरात्मांतर्भावेनैतान्ये-
वैकादश नवपक्षेऽष्टप्रकृतयःपुरुषश्चविकाराणामंतर्भावः २४ उपसंहरतीतिएभिःप्रकारैःप्रकृतिपुरुषभेदज्ञा-

संख्यानेसप्तदशकेभूतमात्रेंद्रियाणिच पंचपंचैकमनसाआत्मासप्तदशस्स्मृतः २३ तद्वत्षो-
डशसंख्यानेआत्मैवमनउच्यते भूतेंद्रियाणिपंचैवमनआत्मात्रयोदश २४ एकादशत्वमा-
त्मासौमहाभूतेंद्रियाणिच अष्टप्रकृतयश्चैवपुरुषश्चनवेत्यथ २५ श्रीशुकः इतिनानाप्र-
संख्यानंतत्त्वानामृषिभिःकृतं सर्वंन्याय्यंयुक्तिमत्त्वाद्विदुषांकिमशोभनं २६ उद्धवः प्रकृतिः
पुरुषश्चोभौयद्यप्यात्मविलक्षणौ अन्योन्यापाश्रयात्कृष्णदृश्यतेनभिदातयोः २७ प्रकृतौ-
लक्ष्यतेह्यात्माप्रकृतिश्चतथात्मनि एवंमेपुंडरीकाक्षमहांतंसंशयंहृदि २८ ॥ ॥

पनायेत्यर्थः २५ तत्रप्रकृतिप्रकृतिरिति आत्मनाजडाजडस्वभावेनविलक्षणावप्योन्यापाश्रयत्वात्परस्परा-
परिहारेणप्रतीतेरित्यर्थः २६ तदेवव्यनक्ति प्रकृतौतत्कार्येदेहेप्रकृतिश्चात्मनितेनविनातस्याप्रतीतेः अहमि-
त्यभेदप्रतीतेर्नदेहात्मनोर्भेदोलक्ष्यतेइत्यर्थः हृदिवर्तमानंसंशयंनयेनप्रज्ञानैपुण्यंप्रावीण्यंयेषांतत्त्वमिवदांतर्भावमाया

१०३

अर्हसीत्युक्तं तत्र हेतुमाह त्वित्ति यस्मात्त्वत्त एवात्माहादेव अत्र ज्ञाने प्रमोषः भ्रंशश्च ते शक्तितो मायातः ननु चस्व
प्रकाशस्यात्मनः कथं ज्ञानप्रमोषः ज्ञानदानेन त्वत्प्रमोषेण वा मम किं प्रयोजनं तत्राह त्वमेवेति २९ विकाराविकाराभ्यां नानात्वैकत्वाभ्यां प्रकाशाप्रकाशाभ्यां नानात्वं तद्भेदं वक्तुमाह प्रकृतिः पुरुषश्चेति विकल्पो यत्तत्भेद ए
व कृतः इत्यपेक्षायां प्रकृतिरहो न देहादिसंघातस्य विकारित्वं दर्शयति एष इति द्वाभ्यां एषः सर्गः सृज्यत इति

छेत्तुमर्हसि सर्वज्ञ वचोभिर्नयनैपुणैः २८ त्वत्तो ज्ञानं हि जीवानां प्रमोषस्तेत्र शक्तितः त्वमेव ह्यात्ममायाया गतिं वेत्थ न चापरः २९ श्रीभगवानुवाच प्रकृतिः पुरुषश्चेति विकल्पः पुरुषर्षभ एष वैकारिकः सर्गो गुणव्यतिकरात्मकः ३० ममाङ्ग माया गुणमय्यनेकधा विकल्पबुद्धीश्च गुणैर्विधत्ते वैकारिकस्त्रिविधोध्यात्ममेकमथाधिदैवमधिभूतमन्यत् ॥ एम ॥

सर्गो देहादिसंघातः वैकारिकः विकारवान् अत्र हेतुः गुणव्यतिकरात्मकः गुणक्षोभकृतः ३१ नाना
त्वमाह ममेति विकल्पं भेदं तद्बुद्धीश्च अनेकधात्वं प्रपंचयति वैकारिकः अनेकविकारवानपि स्थूलेन मा
र्गेण तावत्त्रिविधः त्रैविध्यमेवाह अध्यात्ममिति एकं रूपं ३० ॥ रामायेनमः ॥ ॥

श्री॰
भा॰ पु॰
टी॰
१०४

तानि रूपाणि दर्शयति दृक्चक्षुरध्यात्मं रूपमधिभूतं अत्र रंध्रे चक्षुर्गोलके प्रविष्टमार्कं वपुः अंशोऽपि देवमिति सापेक्ष(
प्रकाशतामाह परस्परमिति एवं चक्षुर्वा रूपं ज्ञायते तदन्यथानुपपन्नाच्चक्षुस्तत्र तस्य ज्ञानमन्यथानुपपन्नात् तदधिष्ठा
तृदेवतानतः चक्षुषः प्रवृत्तिस्ततो रूपज्ञानमित्येवमेतत्त्रयं परस्परं सिध्यति अत्र रंध्र इति विशेषणव्यावर्त्यमाह छि
द्रांतोपयोगितया यस्त्वे आकाशे कोऽवर्तते मंडलात्मा स तु स्वतः सिध्यति चक्षुर्विषयत्वेऽपि प्रतियोग्यपेक्षामंतरे(
ण स्वतः इत्युक्तं इदानीमात्मनोऽविकारित्वाद्यभावेन भेदमाह यद्यस्मात् आत्मा एषामध्यात्मादीनामाद्यः कारण(

दृग्रूपमार्कं वपुरत्र रंध्रे परस्परं सिध्यति यः स्वतः खे आत्मा यदेषामपरो य आद्यः स्वयानुभूत्याखिलसि
द्धसिद्धिः ३१ एवं त्वगादि श्रवणादि चक्षुर्जिह्वादि नासादि च चित्तयुक्तं ३२ ॥ तम ॥

मत एकरूपः अभिन्नश्च तस्मादेतेभ्यो परोऽभिन्नः स्वप्रकाशत्वादपीत्याह स्वयानुभूत्या स्वतःसिद्धप्रकाशेनाखिला(
नां सिद्धानां परस्परं प्रकाशकानामपि प्रकाशकः सर्वेषामपि सामान्यतश्चित्प्रकाशविषयत्वात् अत एव तस्य स्व
प्रकाशत्वं सिद्धं चक्षुषि दर्शितं त्रैविध्यमिंद्रियांतरेष्वप्यतिदिशति एवमिति ३२ यथा चक्षुरेवं त्वगपीत्यर्थः त्वक्(
स्पर्शो वायुरिति श्रवणं शब्दो दिश इति जिह्वा रसो वरुण इति नासा गंधोऽश्विनाविति चित्तेन युक्तमंतःकरणं तदम
पि तत्र चित्तं चेतयितव्यं वासुदेव इति मनो मंतव्यं चंद्र इति बुद्धिर्बोद्धव्यं ब्रह्मेति अहंकारोऽहंकर्तव्यं रुद्र इत्येवं त्रिविधमित्य

=
स्कं
३ अ॰
१०४

ननु च पुनरपि वैलक्षण्यमात्रमेवोक्तं त्रिविधप्रपंचव्यतिरिक्तं आत्मनि स्वरूपतः स्यादहंकारनिरूपात्तत्कृतस्त्रिविधविकल्प निरूपणेनैवेत्याशयेनाह योऽसावहंकारस्तमेवाह गुणक्षोभकरोतीति ततः परमेश्वरात् कालादीनिमित्तात्प्रधानं मूलमु पादानं यस्य तस्मान्महतो हि प्रसूतो विकारः स चाहं त्रिविधः मोहमयस्य विकल्पस्य हेतुस्त्रिविधत्वमेवाह वैकारिक इति ३२ स कुतो निवर्तते आत्माज्ञानविलसितत्वात्तज्ज्ञानेनेत्याशयेनाह आत्मापरिज्ञानमय इति ननु कथं मोहमयत्वं वि कल्पस्याहंकारस्य वा केचित्तस्य तां गीकारान्तत्राह विवाद इति अयं भिदार्थनिष्ठो विवादो ह्यात्मापरिज्ञानमयः इत्य

योऽसौ गुणक्षोभकृतो विकारः प्रधानमूलान्महतः प्रसूतः अहं त्रिवृन्मोहविकल्पहेतुर्वैकारिकस्ताम
स ऐंद्रियश्च ३२ आत्मापरिज्ञानमयो विवादो ह्यस्तीति नास्तीति भिदार्थनिष्ठः व्यर्थोऽपि नैवोपरमे
त पुंसां मत्तः परावृत्तधियां स्वलोकात् ३३ देवादितो याति नयोच्चनीचदेहेषु नित्यं परिवर्तमानाः ३४

मयः यद्वा विवादः सर्वो भिदार्थनिष्ठ एव न तु वस्तुमात्रनिष्ठः अतः परस्परयुक्तिभिरेव भेदस्य निराकृतत्वान्मोहमय त्वं सिद्धमिति ननु यद्यहंकारो विकल्पश्च नास्ति मूले तर्हि तन्निवृत्तिप्रयासेन तत्राह व्यर्थोऽपि निष्प्रयोजनः अर्थरहि तोऽपि वा स्वरूपभूतान्मत्तो बहिर्मुखानां दृढीभूतानां पुरुषाणां नैवोपरमेत अहंकारो विकल्पश्च प्रवृत्तस्ततस्तैः कर्मभि रुच्चनीचदेहेषु ते संसरंतीति यतः परिवर्तमानाः अनिश्चितधियः पुनः पुनरुच्चनीचेषु देहेषु संसरंतीति ३३ ॥

श्री॰
भा॰ए॰
टी॰
१०५

तत्र पृच्छति त्वत्त इति व्यापकस्यात्मनो देहाद्देहांतरगमनमकर्तुः कर्माणि नित्यस्य च जन्ममरणादीनि कथमिति भावः
३४ एतद्धि हंसो न संति हि यस्मान्मायया वंचिताः मोहिताः ३५ लिंगशरीराध्यासेन सर्वं घटत इत्युत्तरमाह मन इति प्र
धानत्वेन पंचभिरिति निर्देशोन्येषामप्युपलक्षणार्थः देहाद्देहांतरं प्रतियाति ततोन्य एवात्मा तन्मनोनुवर्तते अहं
कारेणानुगच्छति ननु मनसोपि पूर्वदेहवियोगो देहांतरसंयोगश्च कथं भवतीति चेत् ३६ स्मृतिवियोगयोगाभ्या

श्रीउद्धवः त्वत्तः परावृत्तधियः स्वकृतैः कर्मभिः प्रभो उच्चावचान्यथा देहान्गृह्णंति विसृजंति च
३४ तन्ममाख्याहि गोविंद दुर्विभाव्यमनात्मभिः न ह्येतत्प्रायशो लोके विद्वांसः संति वंचिताः ३५
श्रीभगवानुवाच मनः कर्ममयं नृणामिंद्रियैः पंचभिर्युतं लोकाल्लोकं प्रयात्यन्य आत्मा तदनुवर्त
ते ३६ ध्यायन्मनोनुविषयान्दृष्टान्वानुश्रुतानथ उद्यत्सीदत्कर्मतंत्रं स्मृतिस्तदनु शाम्यति ३७
विषयाभिनिवेशेन नात्मानं यत्स्मरेत्पुनः जंतोर्वै कस्यचिद्धेतोर्मृत्युरत्यंतविस्मृतिः ३८ ॥ ॥

मिति वक्ष्यन् तयोः कारणमाह ध्यायदिति कर्मतंत्रत्वात् कर्मोपस्थापितान्दृष्टांश्चानुश्रुतान्वेदोक्तान्वा विषयाननुध्या
यन् प्रथांतरं ध्यायमाने सृष्ट्यन् आविर्भवत् पूर्वविषयेषु च सीदत् लीयमानं भवति तदनंतरं तस्य स्मृतिः पूर्वापरानु
संधानं नश्यति ३७ ततः किमत आह विषयेति कर्मोपस्थापितदेवादिदेहादत्यंताभिनिवेशेनात्मानं पूर्वदेहं
न स्मरेदिति यस्मै वयात्तनादेहाभिनिवेशेन भयशोकादेः देवादिदेहाभिनिवेशेन वा हर्षतर्षादेर्हेतोः पूर्वदेहे अत्यंतविस्मृतिः १०५
अहंकारनिवृत्तिः तदभिमानिनो जंतोर्जीवस्य मृत्युरुच्यते न तु देहवन्नाशः ३८ ॥
मिनेन

जन्मत्वविषयस्य देहस्यात्मतयास्वीकृतेऽभिमानेनाङ्गः ननु देहवद्धत्वमिनवद्धत्वादिदेहवत्तीत्पत्तिशयमात्रेणकिं
तत्सर्वभावेनअभेदेनअभिमानमात्रेणोत्पत्तिमरणेदृष्टान्तद्वयंयथास्वप्नस्यमनोरथस्यचेत्यर्थः ४९ दृष्टांतौविवृणोति
स्वप्नमितितत्रवर्तमानेस्वप्नादौपूर्वंवेतिअपूर्वमिवेतिवान्वयः पूर्वसिद्धमप्यात्मानमपूर्वमिवाद्यजातमिवपश्यतीव
र्थः ५० उपसंहरति इंद्रियाणामयनंमनः तस्यदेहान्तराभिनिवेशेनयासृष्टिरुत्पत्तिः तयावस्तुनिआत्मनितदभि
मानेनेदंत्रैविध्यमुत्तममध्यमनीचत्वंअसदेवभातीत्यन्वयः एवंभूतः कल्पितान्तःकरणोहिरंतर्भिदाहेतुरेवम

जन्मत्वात्मतयापुंसःसर्वभावेनभूरिद विषयस्वीकृतिंप्राहुर्यथास्वप्नमनोरथौ ४९ स्वप्नंमनो
रथंचेत्थंप्राक्तनंनस्मरत्यसौ तत्रपूर्वमिवात्मानमपूर्वंचानुपश्यति ५० इंद्रियायनसृष्ट्येदंत्रैवि
ध्यंभातिवस्तुनि बहिरंतर्भिदाहेतुर्जनोऽसज्जनकृद्यथा ५१ नित्यदाह्यंगभूतानिभवंतिनभ
वंतिच कालेनालक्ष्यवेगेनसूक्ष्मत्वात्तन्नदृश्यते ५२ ॥ राम ॥

वति आत्मावाह्याभ्यंतरभेदहेतुश्चभवति बाह्यविषयान्आंतरान्सुखादींश्चपश्यतीत्यर्थः यथाजनोजीवः स्व
प्नेबहून्असतोजनान्देहान्कुर्वन्पश्यन्बहुरूपोभाति तद्वत्यद्वाऽदंत्रिविधंअध्यात्मादिरूपंभाति असज्जनकृ
तदुःखपुत्रोत्पादकः जनःपितास्वयंसन्नोपिपुत्राभिमानतस्तदरिमित्रादिषुयथाभयभेदहेतुर्भवति तद्वदिति अ
त्मवाने ५१ तदेवंलोकप्रसिद्धोजन्ममृत्युनिरूपणस्तत्त्वाद्दृष्टावपितौवैराग्यायनिरूपयति नित्यदाइतितेनभू
तानिशरीराणिउत्पद्यंतेनश्यंतिचकालस्यातिसूक्ष्मत्वात्नलक्ष्यतेभावनमभावनंवाअविवेकिभिर्नलक्ष्यते सर्वेषां

श्री॰ भा॰ ए॰ टी॰ १०६

मतोर्जन्ममरणयोरज्ञानेकारणमेतन्नभवेत् सत्त्वमेवतयोः कुतः इत्याशंक्यानुमानेनसाधयति अर्चिषांपरिणामा
दिभिः स्रोतसांगत्यादिभिः फलानांरूपादिभिर्यथावस्थाविशेषाःकृताःकालेनेतिपूर्वेणान्वयः आदिशब्देनते(
जोबलकामक्रोधज्वालादीनामुपादानंविमतंप्रतिक्षणोत्पत्तिविनाशवदवस्थाभेदवत्त्वात्दीपज्वालादिवदित्यनुमानं
कथंतर्हिप्रत्यभिज्ञातत्राहदेवसादृश्यावलंबिनीत्याह सोयमिति सादृश्यादर्चिषामेवयथासोयंदीपइतिप्रत्यभिज्ञा
यथाचस्रोतसांप्रवाहजलानामेवतदिदंजलमितितथासोयंपुमानितिधीर्गीश्चमृषानृणांबहूनांशरीरिणांश

यथार्चिषांस्रोतसांचफलानांवावनस्पतेः तथैवसर्वभूतानांवयोवस्थादयःकृताः ४३ सोयं
दीपोर्चिषांयद्वत्स्रोतसांतदिदंजलं सोयंपुमानितिनृणांमृषागीर्धीर्मृषायुषां ४४ मास्वस्यकर्म
बीजेनजायतेसोप्ययंपुमान् म्रियतेवामरोभ्रांत्यायथाग्निर्दारुसंयुतः ४५ ॥ रम ॥

बाल्यर्थेमायुर्येषामविवेकिनांतेषांभवति ४४ ननुकथंदेहाध्यासवतःपुंसःकर्मजन्ममरणानिसंतिनात्मनस्येतिअव
वस्थानहिघटेतेघटस्यपुरुषभेदेनसत्त्वमसत्त्वंचेतिन अज्ञस्यापिवस्तुतःतदभावादित्याह अयंपुमान् मास्वस्या
त्मनःकर्मणाबीजभूतेनसोपिअज्ञोपिपुमान् जायतेम्रियतेवा किंतर्हिभ्रांत्याअजन्मापिजायतइव अमरोपि(
म्रियतइव यथामहाभूततेजोरूपोग्निराकल्पांतमवस्थितोपिदारुयोगवियोगाभ्यांजन्मनाशौप्राप्नोतीतितद्वत् ४५ १०६

नन्वात्मनो जन्मादेरतात्त्विकत्वे प्रतीयमाने एतेकस्मात्त्विकाद्यारे त्वितिवेनत्राह १ निऽवत्कन्यो नवावयोवस्था प्रपंच इति निषेको जठरे प्रवेशो गर्भः तन्मध्ये वृद्धिः बाल्यमापंचमाद्वात्कौमारमाषोडशवर्षात् ततो यौवनमापंचच त्वारिंशात् ततो वयोमध्यमाषष्टिवर्षात् ४६ देहसंबंधाज्जन्ममरणादीनुपपादितमर्थमुपसंहरति एता इति दि स्पष्टं अन्यस्यानात्मनो देहस्य संबंधिनीर्याएता मनोरथमयीः ननु एवस्य गुणसंगात्तत्कृतमविवेकात्कश्चित्परमेश्व रानुगृहीतकश्चिज्जहाति अवस्थावतो देहस्य इष्टावा नितिविवेकज्ञानेन ४७ ननु तदानीमस्थिनितेनजन्मम
नावस्थावा

निषेकगर्भजन्मानि बाल्यकौमारयौवनं वयोमध्यं जरा मृत्युरित्यवस्थास्तनोर्नव ४६ एता मनोर
थमयीर्ह्यन्यस्योच्चावचास्तनूः गुणसंगादुपादत्ते क्वचित्कश्चिज्जहाति च ४७ आत्मनः पितृपुत्राभ्या
मनुमेयौ भवाप्ययौ न भवाप्ययवस्तूनामभिज्ञो द्वयलक्षणः ४८ तरोर्बीजविपाकाभ्यां यो विद्वा
॥ ॥ ॥ न्जन्मसंयमौ तरोर्विलक्षणो द्रष्टा एवं द्रष्टा तनोः पृथक् ४९

रणावसरे जन्ममरणवान्देहो दृश्यते नेतत्राह आत्मन इति पितृदेहस्योर्ध्वदैहिकं कुर्वता अप्ययदर्शनात् पुत्रदेहस्य च जातकर्मणि जन्मदर्शनादात्मनः स्वदेहस्यापि याव(?)नुमेयौ एवं च द्रष्टानेसत्ताभवाप्ययवतां वस्तूनां देहानामभिज्ञो द्रष्टा द्वयलक्षणः भवाप्ययधर्मको न भवति ४८ एतदेव दृष्टांतेन स्पष्टयति तरोरिति तरुरप्यहेनोद्भिज्जमात्रो पलक्षणं फलपाकांतस्यौषधीस्तारीरित्यर्थः यद्वा तरोर्बीजात्परिणामो विपाकः बीजाज्जन्म विपाकात्संयमं नाशं च विद्वान्द्रष्टा तनोर्दृष्टांतेन तनोः पृथक् स्वतस्तज्जन्मनाशनोपि योभवाप्ययाभ्यां न संबध्यते ४९ ॥ ॥

नेन भवाप्य

अविवेकिनः संसारं प्रपंच इति प्रकृतेरिति पंचभिः तत्वेन तत्वतो विविच्य तत्वदृशा स्पर्शेषु विषयेषु संमूढ इति वा ५०
ततस्तदनुमानेन गुणभेदेन त्रिविधं तत्रापि कर्मानुसारतोऽनेकैकप्रविधं संसारमाह सत्वेति ५१ नन्वकर्तुरात्मनः कुतः
कर्मभिर्भ्रमणं तत्राह नृत्यतो गायतो जनानन्य एव तदनुकरोति तत्कृतं स्वरतालादितानि स्वं गात्रकंपणादि संवमनस्य
न्वर्तते इतीत्यर्थः अनुकार्यते गुणैर्बलादित्यर्थः अनेन दृष्टान्तेन तु एव धर्मो द्रष्टरि स्फुरतीति दर्शितं ५२ उपाधिप
मौश्वोपहितेव भ्रमासंभव इत्यत्र दृष्टान्तमाह यथांभसेति तीरस्थास्तरवो धावन्त इव एवं नेत्रजले प्रतिबिंबिता वा चचला

प्रकृतेरेवमात्मानमविविच्याबुधः पुमान् तत्वेन स्पर्शसंमूढः संसारं प्रतिपद्यते ५० सत्वसंगादृषीन्दे
वान्रजसासुरमानुषान् तमसा भूततिर्यक्त्वं भ्रामितो याति कर्मभिः ५१ नृत्यतो गायतः पश्य
न्यथैवानुकरोति तान् एवं बुद्धिगुणान्पश्यन्ननीहोप्यनुकार्यते ५२ यथांभसा प्रचलता तरवोपि
चला इव चक्षुषा भ्राम्यमाणेन दृश्यते भ्रमतीव भूः ५३ यथामनोरथधियो विषयानुभवो मृ
षा स्वप्नदृष्टाश्च दाशार्ह तथा संसार आत्मनः ५४ अर्थे ह्यविद्यमानेपि संसृतिर्न निवर्तते ध्यायतो

इति विषयग्राहकेन मनसा परिकल्पिता एवं तेषु लावण्यादयो गुणा न वस्तुतः संति अतो मनोनिबंधन एव संसार
इत्यभिप्रेत्य ग्राहकगणग्राह्योर्भ्रमासंभव इत्यत्र दृष्टान्तमाह चक्षुषेति ५३ भोगस्यापि मिथ्यात्वे दृष्टान्तत्रयमा राम
प ह यथेति यथा प्रतीताः प्रसिद्धा मनोरथधियः स्वप्नदृष्टाश्च धियो यथा मृषा एवमात्मनो यानुभवरूपसंसारो मृषा ५४ १०१
ननु यदि मृषा तर्हि किं तन्निवृत्तिश्रमेण तत्राह अर्थेहीति अस्यात्मनः ५५ ॥ ॥ रामाय नमो नमः ॥

गृतो योगोऽप्रमत्तेन कर्त्तव्य इत्याह तस्मादिति ५६ उः एवं प्रतीकारोद्यममपि परित्यज्य परमेश्वरनिष्ठेनैव भावितव्यमित्याह क्षि
प्त इति द्वाभ्यां क्षिप्तस्तिरस्कृतः ... उपहसितः ५७ निष्ठ्यूतः निष्ठीवनविषयीकृतः मूत्रितः मूत्रेणाक्लिन्नीकृ
तः प्रकंपितः परमेश्वरनिष्ठातः प्रच्यावितोपि कृच्छ्रगतः क्लेशं प्राप्तोपि तदा धैर्यमवलंब्यात्मना बुद्ध्यात्मानमुद्धरेत्

तस्मादुद्धव मा भुंक्ष्व विषयानसदिंद्रियैः आत्माग्रहणनिर्भातं पश्य वैकल्पिकं भ्रमं ५६ क्षिप्तोवमानितो
सद्भिः प्रलब्धोसूयितोथवा ताडितः सन्निरुद्धो वा वृत्त्या वा परिहापितः ५७ निष्ठ्यूतो मूत्रितो वाज्ञैर्बहुधैवं
प्रकंपितः श्रेयस्कामः कृच्छ्रगत आत्मनात्मानमुद्धरेत् ५८ उद्धवः यथैवमनुबुध्येयं वद नो वदतां
वर सुदुःसहमिमं मन्ये आत्मन्यसदतिक्रमं ५९ विदुषामपि विश्वात्मन् प्रकृतिर्हि बलीयसी ऋते त्व
द्धर्मनिरतान् शांतांस्ते चरणालयान् ६० इति श्रीभागवते एकादशस्कंधे भगवदुद्धवसंवादे द्वाविंशोध्यायः २२

श्रीनारायणं स्मरेदित्यर्थः ५८ एवं त्वदुक्तं यथावदनुबुध्येयं तथा नः सर्वान् प्रति वदेत्यर्थः ५९ त्वद्धर्मनिरतान् ऋते विदु
षामपि सद्भिः कृतमतिक्रमं परापराधं सोढुं सहं मन्ये इत्यन्वयः प्रकृतिः स्वभावः ६० निरस्य सर्वसंदेहमेकीकृत्य स
र्पितं मम कायात्मने रहस्ये तं भजामीश्वरमीश्वरं इति श्रीभावार्थदीपिकायामेकादशे द्वाविंशोध्यायः ॥२२॥ ॥ ॥ ॥

श्री भा. स्कं. ११

त्रयोविंशे निरस्कारसहनोपायवर्ण्यते भिक्षुगीताप्रकारेण मनसः संयमो धिया १ दुर्जनैः पीड्यमानेन्द्रः सहोपि महा
यशा भ्रुवं सुखमिव ध्यायेः सहनोपायवर्णने २ तत्रतावदस्मिन ध्याये भिक्षुगीतया मनो विजयं तं रक्षुरु खप्रकृतिवि
वेकस्ततद्भेदस्मिन् गुणवृत्ति विजयः ततपरस्मिन्नैलगीतया विषयसंगत्यागेन सत्संगदृ निरुक्ते पाध्याय भगवत
वाणिनाम्प्रकाशितः प्राथितः भक्तस्य वचः सत्कृतेन तं भक्त्य प्रतिस्मानाध्याये १ तत्रतावदंगीकारेण तद्वः सहनयति

श्री शुकः सवश्रमाधंसितद्धवेन भागवतमुख्येन दशाईमेण सभाजयन्भृत्यवचो मुकुन्दस्तमावभाषे
श्रवणीयवीर्यः १ श्री भगवानुवाच गाईस्पत्यनसो ह्यत्र साधवे दुर्जनेरितैः दुरुक्तैर्भिन्नमात्मानं यः स
माधातुमीश्वरः २ ततथामर्षितेविद्धः पुमान्वाणोहिमर्मगैः यथान्तरं तिमर्मस्था ह्यसतो परुषेषवः ३
कथयन्ति महत्पुण्यमितिहासमिहोद्धव तमहंवर्णयिष्यामि निबोध सुसमाहितः ४ केनचिद्भिक्षुणा
गीतंपरिभूतेन दुर्जनैः स्मरताधृतियुक्तेन विपाकं निजकर्मणाम् ५ ॥ रामायनमोनमः ॥ ॥

गाम्भीरे वाईस्पत्यहृदस्य तैस्त्रिविधस्त्रलोके ससाधुर्नास्ति योदुर्जनोक्तैभिन्नं चित्तं भिन्नं मनप्रामयतुमीश्वरस्मात् २
दुर्जनहस्त्वतस्मामाहने तिय यामर्मस्थामर्मसेव निर्भस्थिताः दुर्जनवोक्ति रूपा इषवस्तु दंतिवायर्थं तितन यथा ह्यन्तरं बाणाः १
ननदहन्ति म्रुतस्त्वयानत पुनदहन्त्यर्थः ३ तथापि तेमया वक्ष्यमाणोहयाये सर्वसोढुं प्राकमित्यभिप्रायेणेतिहा
सं प्रस्तौति महय यथाभवतितथा पुण्यमितिहासं गाथाकथयन्ति ४ ५ ॥ राम ॥ ॥ ॥

राम १८

सनुभिरुक्तः सर्वंधनाढ्यः कृच्छ्रार्जितस्य सर्वस्य नाशेन सन्तप्यमानोऽति निर्विण्णः सन् प्रव्रजितं भिक्षामटन्तं दुर्जनैरुपद्रुतः
प्रसन्नोपयोगिनीं गाथामगायदेतिवक्तुं तस्य चरितमाह अवंतिष्वित्यादिना अवंतिषु मालवेषु वार्ताकृषिवा
णिज्यादिरूपा वृत्तीर्यस्य कदर्यस्तु स्वयमनुभुक्तः आत्मानं धर्मं हन्त्यं च पुत्रदारांश्च पीडयन् देवतातिथिभृत्यांश्च म
करर्षं इति स्मृत इति ६ तस्य ये ज्ञातयो बांधवा अतिथयो ध्वनीनाश्च ते नार्चिताः इत्यर्थः शून्यावसथो धर्मकामही

अवंतिषु द्विजः कश्चिदासीदाढ्यतमश्श्रिया । वार्तावृत्तिः कदर्यस्तु कामी लुब्धोऽतिकोपनः ६ ज्ञातयोऽति
थयस्तस्य वाङ्मात्रेणापि नार्चिताः शून्यावसथ आत्मापि काले कामैरनर्चिताः ७ दुःशीलस्य कद
र्यस्य द्रुह्यन्ते पुत्रबांधवाः दारा दुहितरो भृत्या विषण्णा नाचरन्प्रियं ८ तस्यैवं यक्षवित्तस्य च्युत
स्योभयलोकतः धर्मकामविहीनस्य चुक्रुधुः पंचभागिनः ९ तदवध्यानविस्रस्तपुण्यस्कंधस्य
भूरिद अर्थोऽप्यगच्छन्निधनं बह्वायासपरिश्रमः १० ज्ञातयो जगृहुः किंचित्किंचिद्दस्यव उद्धव दै
वतः कालतः किंचिद्ब्रह्मबंधोर्नृपार्थिवात् ११ स एवं द्रविणे नष्टे धर्मकामविवर्जितः उपेक्षितश्च स्व
जनैश्चिंतामाप दुरत्यया १२

नो गृहे देहे वा यक्षाणां वित्तमिव केवलं रक्षणीयं वित्तं यस्य पंचभागिनः पंचयज्ञदेवताः ९ तेषामवध्यानमनाद
रः तेन विस्रस्तो विशीर्णः पुण्यस्कंधः पुण्यराशिर्यस्य लाभमात्रे हेतवं यो यस्य बह्वायासैः कृपाधिभिः केवलं श्रमो यस्मिन्
रः कृतो निधनमगच्छन्नाह ज्ञातय इति दैवतो गृहदाहादिना कालतः निधाने धान्यादिनां पार्थिवान्नाच वंचका

नष्टः राय स्तेह्योरार्थ्ये चोय स्मनस्विनः संततमस्य १३ मे मया ह्यात्मा देहः स्यैवात्मानं तापितं प्रपंचयति न धर्माये त्यादि
नाय संदृष्टो यस्यार्थायासस्तेन वृथा १४ नरकाय च मृतस्य पापार्थं धर्मानुष्ठानात् १५ श्वित्रं श्वेतकुष्ठं १६ सिद्धे अर्थे तस्यो
त्कर्षे वर्द्धने नाशोपभोगयोर्देहे वर्तमानायोपभोगे चेत्यर्थः साधनोत्कर्षयोरायासः नाशे त्रासः चिंता च नाशोप

तस्यैवं ध्यायतो दीर्घं नष्टरायस्तपस्विनः खिद्यतो बाष्पकंठस्य निर्वेदः सुमहानभूत् १३ स चाहेदमहो क
ष्टं वृथात्मा मेनुतापितः न धर्माय न कामाय यस्यार्थायास ईदृशः १४ प्रायेणार्थाः कदर्याणां न सुखा
य कदाचन इह चात्मोपतापाय मृतस्य नरकाय च १५ यशो यशस्विनां शुद्धं श्लाघ्या ये गुणिनां गुणा
लोभः स्वल्पोपि तान्हंति श्वित्रो रूपमिवेप्सितं १६ अर्थस्य साधने सिद्ध उत्कर्षे रक्षणे व्यये नाशोपभो
ग आयासस्त्रासश्चिंता भ्रमो नृणां १७ स्तेयं हिंसानृतं दंभः काम क्रोधः स्मयो मदः भेदो वैरमविश्वा
सः संस्पर्धा व्यसनानि च १८ एते पंचदशानर्था ह्यर्थमूला मता नृणां तस्मादनर्थमर्थाख्यं श्रेयोर्थी
दूरतस्त्यजेत् १९ भिद्यंते भ्रातरो दाराः पितरः सुहृदस्तथा एकास्निग्धाः काकिणिना सद्यः सर्वेरय
कृताः २० अर्थेनाल्पीयसा ह्येते संरब्धा दीप्तमन्यवः त्यजंत्याशु स्पृधो घ्नंति सहसोत्सृज्य सौहृदं २१ लब

मइति १७ किंचार्थप्राप्त्यर्थो यः स्तेयादयः पंचदशानर्थाः प्राप्तेर्थे स्मयादयो व्यसनैः सह नव व्यसनानि स्त्रीद्यूतमद्यविषाया
सोत्रीणि १८ भेदः वैरस्पर्धाः प्रपंचयति द्वाभ्यां भिद्यंते स्नेहं त्यजंति एकास्निग्धाः एके एकचित्ताः काकिणिना स्निग्धाः अ
निखिलाश्चेत्यर्थः काकिणीना पणस्य माषविंशतिचतुरातिका काकिणीनया १९ संरब्धाः घ्नंति स्पृधः स्पर्धमानाः राम १९

[illegible]

रहतावरयंति छातामेतेनर्थाः परलोकेपि नर्थं एवेनेकामित्याह लब्ध्वेति त्रिभिः मानुष्यं जन्म तत्तत्रापि द्विजाग्र्यतां श्रु
कुलब्राह्मण्यं स्वार्थं घ्नंति आत्मन्हितं न कुर्वंति ये ते यांति २२ अमरस्यार्थ्यतां हर्षयन्नाह स्वर्गेति लोकं देहं मनुष्यं लोकं त
स्यानर्थं कुर्यात् २३ आत्मयोनर्थ्यमपवर्गस्य यक्षयोर्वित्तं देवपितृभूतानीति नरेशज्ञातीन्बंधून् स्वगोत्रान्संबंधिनो वा द्वादिना संव
द्धास्तान् अन्यांश्च भागिनः भागार्हान् आत्मानं च असंविभज्य यक्षवित्तः इतिशिरसेताखि २४ एवं विरक्तानेन पश्चात्तापमाह व्य

लब्ध्वा जन्मामरप्रार्थ्यं मानुष्यं तद्द्विजाग्र्यतां तदनादृत्य ये स्वार्थं घ्नंति यांत्यशुभां गतिं २२ स्वर्गापवर्गयोर्द्वा
रं प्राप्य लोकमिमं पुमान् द्रविणे कोनुसज्जेत मर्त्योनर्थस्य धामनि २३ देवर्षिपितृभूतानि ज्ञातीन्बंधूंश्च भा
गिनः असंविभज्य चात्मानं यक्षवित्तः पतत्यधः २४ व्यर्थयार्थेहया वित्तं प्रमत्तस्य वयो बलं कुशला येन
नसिद्ध्यंति जरठः किंतु साधये २५ कस्मात्संक्लिश्यते विद्वान्व्यर्थयार्थेहयासकृत् कस्यचिन्मायया नूनं
लोकोयं सुविमोहितः २६ किं धनैर्धनदैर्वा किं कामैर्वा कामदैरुत मृत्युना ग्रस्यमानस्य कर्मभिर्वोत ज

र्थ्ययार्थेहया प्रमत्तस्य मम वित्तादिगतन्निति पश्चात्तापः येन वित्तादिना कुशला विवेकिनः सिद्ध्यंति मुच्यंते जरठो वृद्धः २५
मतिमभ्रमस्य सदृशपश्चात्तापोचितः कस्मादेवमनर्थे विद्वानपि संक्लिश्यपतति कारणांतरं च धरति कस्यचिदिति २६ ननु नायं
मोहितः क्लिश्यपतति किं तु रमणादिभिर्भोगादिविवक्षया अतआह किं धनैरिति उत पुनरपि २७ राम ॥

मिधः प्रास्यप्रक्षिप्यआघारौतत्संज्ञकौयागौएवमाज्यभागौचदत्वातदर्थावाहुतीकृत्वेत्यर्थः तत्राघारौप्रजापतयेस्वाहा
इंद्रायस्वाहेतिचोत्तरदक्षिणपरिधिसंधिमारभ्याग्निमध्यादापरिधिनेहुतत्वाररणानुरूपो आज्यभागौ अग्नयेस्वाहासोमायस्वा

श्री भाग० टी० १२५

मूलमंत्रेणच्छादितेन तथा षोडशभिश्चोपचारैस्तेन पुरुषसूक्तेन वा अवदानतः प्रत्यृचमाकृतिग्रहणेनेत्यर्थः पुरुषसूक्तेना
राधनपक्षे सर्वं च मूलमंत्रस्थलेनैव प्रत्यृचमवधानतो होमः इति मंत्रैः स्वाहान्तैर्नाममंत्रैर्यथाम्नायं यज्ञाङ्गमेव वा अग्नये स्वि
ष्टकृते च हुत्वा ७१ ततो वह्निस्थं भगवन्तमभ्यर्च्यार्घ्यनमस्कृत्य पार्षदेभ्यो नंदादिभ्यो हुत्वादिभ्यो बलिं हरेत् ततः मूलमंत्रस्था
नमागत्य देवस्याग्रे समुपविश्य यथाशक्ति मूलमंत्रं जपेत् ७२ तत उभयत्र भगवतो भोजनसमाप्तिं ध्यात्वा आचमनं द

जुहुयान्मूलमंत्रेण षोडशर्चावदानतः धर्मादिभ्यो यथान्यायं मंत्रैः स्विष्टकृते बुधः ७१ अभ्यर्च्यार्घ्यनम
स्कृत्य पार्षदेभ्यो बलिं हरेत् मूलमंत्रं जपेद्ब्रह्म स्मरन्नारायणात्मकं ७२ दत्त्वाचमनमुच्छेषं विष्वक्सेना
य कल्पयेत् मुखवासं सुरभिमत्तांबूलाद्यमथार्हयेत् ७३ उपगायन्गृणन्नृत्यन्कर्माण्यभिनयन्मम
मत्कथाः श्रावयन्शृण्वन्मुहूर्तं क्षणिको भवेत् ७४ स्तवैरुच्चावचैः स्तोत्रैः पौराणैः प्राकृतैरपि स्तुत्वा प्र
सीद भगवन्निति वंदेत दंडवत् ७५ शिरो मत्पादयोः कृत्वा बाहुभ्यां च परस्परं प्रपन्नं पाहि मामीश भीतं मृ
त्युग्रहार्णवात् ७६

त्त्वा उच्छेषं विष्वक्सेनाय कल्पयित्वा तदनुज्ञया पश्चात्स्वयं भुंजीत ततः सुरभिमत् गंधवत्तांबूलाद्यं मुखवासं दत्त्वा
ऽपुनरपि अर्हयेत् पुष्पांजलिना पूजयेत् ७३ अभिनयन्नभिनयं विकुर्वन् क्षणिकः वैयग्र्यं परित्यज्य तद्भावस
रतो भवेत् ७४ स्तवस्तोत्रयोर्भेदं दर्शयति पौराणैः प्राकृतैः ग्रान्थैरिति ७५ कथं शरणमित्यपेक्षायामाह शिर इति
बाहुभ्यां दक्षिणोत्तराभ्यां परस्परं मम दक्षिणोत्तरौ पादौ गृहीत्वा यद्वा पृष्ठतः परस्परनिबद्धाभ्यां हस्ताभ्यां ऊर्ध्वमुत्थाय

राम १२५

ततः प्रोक्षाग्रहणपूर्वकं वैकल्पिकोद्वासनप्रकारमाह इत्यनयैव प्रार्थनया शेषां निर्माल्यमपाद्य तां ध्यात्वा शिरस्याधाय धृत्वा चे
दि उद्वासयेत्तर्हि प्रतिमायां यज्ञस्थलं ज्योतिस्तत्पुनः हृत्स्थस्य ज्योतिष्येवोद्वास्य उद्वासनीयं तदेतत्तयापश्चात्स्वयं भुंजेतेति
एतेष्वधिष्ठानेषु किमुत्तममित्यपेक्षायामाह अर्चादिष्विति ४७ यदा यत्र श्रद्धा तदा तत्र तत्राधिष्ठाने मुख्यामुख्यत्वे ऽतो यतः

इति शेषां मया दत्तां शिरस्याधाय सत्कृतं उद्वासयेच्चेदुद्वास्यं ज्योतिर्ज्योतिषि तत्पुनः ४७ अर्चादिषु यदा यत्र श्रद्धा
मां तत्र चार्चयेत् सर्वभूतेष्वात्मनि च सर्वात्माहमवस्थितः ४८ एवं क्रियायोगपथैः पुमान् वैदिकतांत्रिकैः अर्चन्नु
भयतः सिद्धिं मत्तो विंदत्यभीप्सितां ४९ मदर्चां संप्रतिष्ठाप्य मंदिरं कारयेद्दृढं पुष्पोद्यानानि रम्याणि पूजायात्रो
त्सवाश्रितान् ५० पूजादीनां प्रवाहार्थं महापर्वस्वथान्वहं क्षेत्रापणपुरग्रामान् दत्वा मत्सार्ष्टितामियात् ५१

सर्वभूतेष्विति ४८ उभयतः इहामुत्र च समर्थ्यं प्रत्याह मदर्चामिति त्रिभिः ४९ ५० पुष्पोद्यानानि च कारयेत् पूजायात्रो
त्सवाश्रितान् पूजा प्रत्यहं यात्रा विशिष्टे पर्वणि बहुजनसमागमः उत्सवः वसंतादि महोत्सवः तदाश्रितान् क्षेत्रादीन् दत्वा
पूजायात्रोत्सवाश्रिता नित्यस्य विवरणं पूजादीनामिति प्रवाहार्थं सततनानुवृत्त्यर्थं मत्सार्ष्टितां मत्समानैश्वर्यं प्रतिष्ठादी
नां व्यस्तानां समस्तानां फलमाह प्रतिष्ठयेति ५१

श्री
भाग
टी
११

मत्स्याप्यतोमया साम्यमित्यर्थः ५२ सकामंप्रयुक्तं अहैतुकमक्तंप्रत्याह मामेवेति अहैतुकभक्तियोगःकथंभवति भक्तियो
गमिति ५३ दातुःफलमुक्तं अपहर्तोरनिंदतियइति विट्भुक्‌विष्ठाभोजीकृमिः कर्तुर्यत्फलंतदेवान्येषामित्याहकर्तु
रिति ५४ साम्यथ्यःसहकारिणः हेतोःप्रयोजकस्यानुमोदितुःचप्रेत्यतत्फलमित्यन्वयः उक्तोवतःकर्मणएमतेभागीनः भा
गाहीः तत्रापिविशेषमाह भूयसिकर्मणिसाधयादौचभूयः अधिकफलमिति ५५ ययःपत्रादिमात्रेणपूजितोयःपरपद

प्रतिष्ठयासार्वभौमंसत्त्वतामुवनत्रयं प्रज्ञादिनाब्रह्मलोकंयिमिर्मत्साम्यतामियात् ५२ मामेवनिरपेक्षेणभ
क्तियोगेनविंदति भक्तियोगःसलभतेएवयःपूजयेनमां ५३ यःस्वदत्तांपरैर्दत्तांहरेतसुरविप्रयोः वृत्तिंस
जायतेविट्भुक्‌वर्षाणामयुतायुतं ५४ कर्तुश्चसारथेर्हेतोरनुमोदितुरेवच कर्मणांभागिनःप्रेत्यभूयोभूय
सितत्फलं ५५ इ श्री भा तेमभा स्सजानिरूपणंनामविंशो यः २० इत्यद्भुतव परस्वभावकर्माणिन
प्रशंसेन्नगर्हयेत् विश्वमेकात्मकंपश्यन्प्रकृत्यापुरुषेणच १ परस्वभावकर्माणियःप्रशंसतिनिंदति
सआश्वभ्रश्यतेस्वार्थादसत्याभिनिवेशतः २ ॥

प

प्रायोवादिप्रतिष्ठीतःसहृत्ससःश्रयणंमम इति श्रविंशोध्यायः ॥२० अष्टाविंशोध्यायःपूर्वविस्तरेणोपवर्णितः ज्ञानयोगः
१नसमासेनसमाहत्यनिरूप्यते १ इदानीमतिविस्तरेणोक्तंज्ञानयोगंसंक्षेपेणाह परेषांस्वभावानप्रशांतघोरादीन्
कर्माणिचतत्प्रहेतुः विश्वमिति १ विक्षेपदोषमाह स्वार्थात्ज्ञाननिष्ठालक्षणात् असत्यमिथ्याभूतेद्वैतेभि
निवेशात् भ्रंशमेवदृष्टांततोदर्शयति २ रामायनमः ॥ ॥

राम
१२

तैजसे राजसाहंकारकार्ये इंद्रियगणे निद्रयापन्ने अभिभूते सति पिंडस्थो जीवः केवलं मनोमात्रेण मायां स्वप्नरूपां प्राप्नोति त
तो मनस्यपि लीने नष्टचेतनः सन् मृत्युं वा मृत्युतुल्यां सुषुप्तिं प्राप्नोति यथा तद्वदेव नानार्थदृक् देहाभिनिवेशी विक्षेपं ल
यं वा प्राप्नोतीति यथा प्राज्ञसंपर्कात् विघ्नस्य भोग्यत्वं यल्लत्वेन प्रेप्सुः एवमनात्मसंपर्कात् आत्मनोपि स्वरूपभ्रंश इति भावः
हे तात सत्यं तथास्तु ति निद्रयो निर्विषयत्वं प्रपंचयति सार्धैः षड्भिः किं भद्रमिति ३ अवस्तुतो द्वैतस्य मध्ये किं भद्रं किं वाभद्रं कियत्
भद्रं कियद्वा अभद्रमित्यर्थः अवस्तुत्वमेवाह वाचेत्यिबोत्स्वदिगोपलत्वानां वाचोउदितेउक्तं वस्तुरादिभिस्थमिदंस्थपनदरू

तैजसे निद्रयापन्ने पिंडस्थो नष्टचेतनः मायां प्राप्नोति मृत्युं वा तद्वन्नानार्थदृक् पुमान् ३ किं भद्रं किमभद्रं वा द्वै
तस्यावस्तुतः कियत् वाचोदितं तदनृतं मनसाध्यातमेव च ४ छायाप्रत्याह्वयाभासा ह्यसंतोप्यर्थकारिणः
एवं देहादयो भावा यच्छंत्यामृत्युतो भयं ५ आत्मैव तदिदं विश्वं सृज्यते सृजति प्रभुः त्रायते त्राति विश्वात्मा ह्रि
यते हरतीश्वरः ६ तस्मान्नह्यात्मनोन्यस्मादन्यो भावो निरूपितः निरूपितेयं त्रिविधा निर्मूला भातिरात्मनि ७

तमिति ननु एवं सति देहादिभावानामप्यसंभवात् कथं भयहेतुत्वं तत्र सदृष्टांतमाह ४ छायाप्रतिबिंबं प्रत्याह्वयः प्र
तिध्वनिः आभासः शुक्तिरजतादि एते यथा असंतोप्यर्थकारिणो भवंति आमृत्युतः प्रत्युत मभिव्याप्य यद्वा मृत्युर्लयः या
वत् ज्ञानेन न लीयते तावत्पर्यंतमित्यर्थः ननु सृष्ट्यादि श्रुतिभिरेव हेतौ निरूपिते कथमसत्त्वं स्यात् तत्राह आत्मैवेति द्वा
भ्यां ५ त्रायते पाल्यते त्राति पालयति ६ अन्यस्मात् सृष्ट्यादिव्यतिरिक्तात् त्रिविधा अध्यात्मादिरूपा भातिः प्रतीतिः

श्रीं भा० टी० ३१२

ज्ञानविज्ञानयोर्नैपुण्यं विनिष्ठां सत्यं च ममोभूत्वा एतन्निष्ठाप्राप्त्युपायमाह प्रत्यक्षेणेति ८ यद्वाद्यंतवत्तद्दृष्टेन तदसदितिसा
त्वातिः संगो विवर्जयेत् आद्यंतवत्त्वे प्रमाणान्निश्चयते लोहघटादि अनुमानेन सावयवत्वेन दृश्यं पटादि स्यादि निगमेन अप्रत्य
क्षमाकाशादि आत्मसंविदा स्वानुभवेन सर्वे दृश्यमाद्यंतवत् असच्चेति ज्ञात्वेति ननु यद्यात्मसंविदा सर्वे दृश्यमसदि
त्युच्यते तर्ह्यात्मा स्वप्रकाशो देहादिदृष्टेन च जडमित्युक्तं स्यात् तथा च मतिसंसारः प्रतिभासो न न चारे नेति चोदयति
नैवेति ९ अनात्मसदृशोः जडाजडयोः अत्र हेतुः दृष्टृदृश्ययोः माभूत्तद्वयोरपि तत्राह उपलभ्यत इति एतत्प्रपंचय

इदं गुणमयं विद्धि त्रिविधं मायया कृतं एतद्धि हात्मवदृष्टिं ज्ञाने विज्ञाने नैपुणं ८ न निंदति न च स्तौति लोके
चरति सूर्यवत् ८ प्रत्यक्षेणानुमानेन निगमेनात्मसंविदा आद्यंतवदसज्ज्ञात्वा तत्र निःसंगो विवर्जयेदिह ९
उद्धव वाच नैवात्मनो न देहस्य संसृतिर्द्रष्टृदृश्ययोः अनात्मसदृशोरीश कस्य स्यादुपलभ्यते १० आत्मा
व्ययोगुणः शुद्धः स्वयंज्योतिरनावृतः अग्निवद्दारुवदचिद्देहः कस्येह संसृतिः ११ ॥ ॥ ॥ ॥

ति आत्मेति १० अव्ययत्वादिपंचविशेषणैः नाशादिरागादिगुणगुणाज्ञानपरिच्छेदानामसंभवं दर्शयति हेतुहे
तुमत्त्वेन यथेह अचित् जडः अयं भावः यथैवाग्निर्दारुणोभेदेनानुपलंभेपि दारुप्रकाश्यमेव अग्निस्तु प्रकाशकः
तथा देहात्मनोरपीति न संसृतिस्तयोरन्यतरस्यापि घटत इति सत्यं तथापि विभ्रमयोरेवमविवेक एव संसारावल
वनमित्याह पंचभिः यावदिति ११ श्रीगुरुचरणपद्मपरागपुंजेभ्यो नमः ॥

राम ३१२

संनिकर्षणं संबंधः ननु संगमात्रतः संबंधस्तत्राह अविवेकिनः अज्ञानकृतत्वादित्यर्थः ननु स्वप्रकाशस्य कथमज्ञानतः संसारः
तत्राह अपार्थोपि केवलं फलवान् स्फूर्तिः ननु तन्मतोस्तीत्यर्थः ननु सतो देहादेः कुतः संसारस्फूर्तिहेतुत्वमपि तत्राह अ
र्थे ह्यति १२ अस्यात्मनः ननु कथं विद्यमानतो विषयस्फूर्तिर्जीवन्मुक्तस्यापि दुर्निवारेत्यनिर्मोक्षप्रसक्तिः स्यात्तत्राह यथा ही
ति १३ प्रस्वापः स्वप्नः बहूनर्थान्बिभर्ति पुष्णातीति तथाहंकारादिलक्षणो देहादिसंनिकर्षणं संसारालंभनमित्यन्वयः

श्रीभग उवाच यावद्देहेंद्रियप्राणैरात्मनः संनिकर्षणं संसारः फलवांस्तावदपार्थोप्यविवेकिनः १२ अर्थे ह्य
विद्यमानेपि संसृतिर्न निवर्तते ध्यायतो विषयानस्य स्वप्नेनर्थागमो यथा १३ यथा ह्यप्रतिबुद्धस्य प्रस्वापो बह्व
नर्थभृत् स एव प्रतिबुद्धस्य न वै मोहाय कल्पते १४ शोकहर्षभयक्रोधलोभमोहस्पृहादयः अहंकारस्य दृ
श्यंते जन्म मृत्युश्च नात्मनः १५

व

ननु प्रतिबोधमात्रेण आत्मधर्माणां शोकादीनां कथं निवृत्तिस्तत्र व्यतिरेकाभ्यां दर्शयति १४ स्वप्नादौ तेषामदर्शना
त् अहं सुखीति विवेचेतनं सुखीति प्रतीत्यभावाच्च दृश्यत्वात् सुखादीनां कुड्यत्वादिवत् देहधर्मत्वानुपपत्तेरिति
भावः ननु यद्यहंकारस्य संसारः तर्हि मुक्तिरपि तस्यैवेति मुक्तावहंकाराविशेषः प्रसज्येत तत्राह देहेति १५ ॥

श्रीं भाग ११ १२१ देहादिष्वभिमानो यस्य सः आत्मैव तेषां मंतस्थितो जीवः अंतरपवगुणकर्ममयीमूर्तिर्यस्य सः स एव च सूत्रात्मोपाधिभिर्ब
हुधेव सूत्रादिशब्दैर्गीतः संसारोपरमेश्वराधीनः सर्वतो धावति अतो नायं दोषदृष्टिभावः तदेवमहंकारकृतं बंधमु का
पपाद्येदानीं ज्ञानेनैतन्निवृत्तो मुक्तिरित्याह अमूलमिति १६ वस्तुतो मूलशून्यः अज्ञानतस्तु बहुभिः रूपैरूपितप्र
तिमैंद्रजालिकतुल्यमिति वा किं तत्तदाह मनइति मनआदीनां द्वंद्वः यद्वा मनआदिभिः क्रियते यत्कर्म अहंका
रूपं गुरूपासनानिशितेन ज्ञानखड्गेन छित्वा तदेव ज्ञानं स्वरूपसाधनफलैर्निरूपयति ज्ञानमिति १७ विवेको ज्ञानं त
त्साधनान्याह निगमो वेदः तपः स्वधर्मो प्रत्यक्षं स्वानुभवः ऐतिह्यमुपदेशः अनुमानं तर्कः फलं ज्ञानस्वरूपमा

देहेंद्रियप्राणमनोभिमानो जीवोंतरात्मा गुणकर्ममूर्तिः सूत्रं महानित्युरुधेव गीतः संसार आधावति कर्म
तंत्रः १६ अमूलमेतद्बहुरूपरूपितं मनोवचःप्राणशरीरकर्म ज्ञानासिनोपासनयाशितेन छित्वा मुनिर्गाम
वोटतृष्णः १७ ज्ञानं विवेको निगमस्तपश्च प्रत्यक्षमैतिह्यमथानुमानं आद्यंतयोरस्य यदेव केवलं काल
श्च हेतुश्च तदेव मध्ये १८ यथा हिरण्यं स्वकृतं पुरस्तात्पश्चाच्च सर्वस्य हिरण्मयस्य तदेव मध्ये व्यवहार्यमाणं
नानापदेशैरहमस्य तद्वत् १९ ॥ ॥

ह आद्यंतयोर्यदस्य जगतः मध्येपि तदेव केवलं न तु जगदादीति किं तत्कालः कलयति प्रकाशयतीति यः तथा हेतुका
रणं च यत् तदेव एतदुक्तं भवति यदस्य विश्वस्य कारणप्रकाशकं तद्ब्रह्म तदात्मकमेवैतत् ततः इष्यागिम्येव निश्चयफ
लो निगमादिसाधनैर्ज्ञायते यो विवेकः स तज्ज्ञानमिति नन्वनानात्मेदं व्यवहारावलंबनस्यापि विश्वस्य कारणमात्रात्म
कत्वं सदृष्टांतमाह यथेति १८ स्वकृतं स्वस्मात्कृतं कुंडलादिरूपेण विरचितं यद्धिरण्यं कीदृशात् हिरण्मयस्य कुंडलादेरुत्पत्तेः राम १२१
पुरस्तात् नाशाच्च पश्चाद्यद् कटककुंडलमित्यादिनानाव्यपदेशैर्व्यवहार्यमाणमपि तदेव यथा तद्वदस्य
विश्वस्य कारणभूतोहमेव नानाव्यवहारालंबनेनेतमतः इयक विश्वमिति १९ ॥ ॥ ॥ ॥ ॥ ॥

तदेवं कार्यस्य कारणान्मताश्चकाशप्रकाशस्य प्रकाशत्वमताम् आह विज्ञानमिति त्रिविधवस्तुयकारत्वाद य चकपाठः छेदोनुरोधेन तत्प्रदा
द्रिविधवस्तु यद्विज्ञानमतः तदेव वस्त्वाकारणभूतं वयन्गुणत्रयं यच्च कारणकार्यकर्तृकारणमध्यात्मकाद्यमपि भूतेके तेष्वधिदैवं एवं
गुणत्रयकार्यभूतं त्रिविधं जगदेतेन येन तुर्येण सामान्यज्ञानमात्रेण समन्वयेन भवति येनानुगतं प्रकाशते इत्यर्थः तमेव भान्त
मनुभाति तस्य भासा सर्वमिदं विभातीति तथा च तद्वषयत्व तत्तत्र श्रोत्रस्य श्रोत्रं मनसो यो मनो विदुरित्यादि श्रुतेः ननु विशेषविज्ञान

विज्ञानमेतत्रियवस्त्वमंगागुणत्रयं कारणकार्यकर्तृ समन्वयेन व्यतिरेकतश्चयेनैव तुर्येण तदेव सत्यं २॰ नय
त्सुरत्नाद्रुतयत्रपश्यात्मधेयतत्रव्यपदेशमात्रं भूतं प्रसिद्धं च परेण यद्यतदेव तन्मादृतिमेमनीषा २२ ॥ ॥

व्यतिरेकेण तन्तुर्येणामोपलभामहेतत्राह व्यतिरेकतश्च समाभ्यादौ यदस्तिदेव सत्यमिति २॰ एवं कालत्रयेप्यव्यभिचा
रिणः सत्यत्वमुक्तं व्यभिचारिणस्तु सत्यतामाह नयदितिमध्ये च तत्स्यग्राह्याणि किं तु व्यपदेशमात्रं तत्तः यतः पृथ्वन्यरेण
त्वेन भूतं जातं प्रसिद्धं प्रकाशतेचतत्तदेव कारणप्रकाशकत्वाव त्मात्रं स्यात्र एषगीतिमेमनीषाबुद्धिः वाचारंभणं विकारो
नामधेयं मृत्तिकेत्येव सत्यं सर्वं खल्विदं ब्रह्मेत्यादिश्रुतेः कारणप्रकाशकव्यतिरेकेण च कार्यस्य प्रकाशस्यानुपलंभादिति

श्री
भाग०
टी०
३२२

एवं सामान्यतः कार्यप्रकाशकयोः कारणप्रकाशकाभ्यामभेदमुक्त्वाद्य श्लोकेन तद्विभागविवेकेन सर्वस्य प्रपंचस्य ब्रह्माभेद
माह अविद्यमान इति कोऽयं वैकारिकः विकारसमूहः स एष प्रागविद्यमानो राजसः सर्गः इन्द्रियद्वारेण ब्रह्मकार्यं भूत
इत्यर्थः अवभासतेऽपि ब्रह्मप्रकाशेनैवेत्यर्थः ब्रह्म तु स्वयं स्वतः सिद्धं न तु कार्यमित्यर्थः ज्योतिः स्वप्रकाशकमित्यर्थः
अतः कारणादिन्द्रियाणि चार्थाश्च तन्मात्राणि चात्मा मनश्च देवानामप्युपलक्षणं विकाराः पंचभूतानि एवं चित्रं ब्रह्म
विभातीति २२ उपसंहरति एवमिति आगमतः प्रत्यक्षेतिहासानुमानैः स्फुटं यथा भवति तथा ब्रह्मविवेकहेतुभिः तेषां
देहादेरपवादेनात्मत्वनिरासेन च कीदृशेन विशारदेन निपुणेन गुरुमुखेनेति मित्रभूतेनेति वात्मविषयं संदेहं

अविद्यमानोऽप्यवभासते यो वैकारिको राजससर्ग एषः ब्रह्म स्वयंज्योतिरतो विभाति ब्रह्मेन्द्रियार्थात्मविका
रचित्रं २२ एवं स्फुटं ब्रह्मविवेकहेतुभिः परापवादेन विशारदेन छित्वात्मसंदेहमुपारमेत स्वानंदतुष्टो
ऽखिलकामुकेभ्यः २३ नात्मा वपुः पार्थिवमिन्द्रियाणि देवा ह्यसुर्वायुर्जलं हुताशः मनोऽन्नमात्रं धिषणा च
सत्त्वमहंकृतिः खं क्षितिरर्थसाम्यं २४

छित्वा स्वानंदतुष्टः सन्नखिलेभ्यः कामुकेभ्यः इन्द्रियादिभ्य उपारमेत निःसंगो भवेत् २३ परापवादं प्रपंचयति वपुरात्
मा न भवति पार्थिवत्वात् घटवत् तथा इन्द्रियाणि न तदधिष्ठातारो देवा असुस्तु मनः धिषणा बुद्धिः सत्त्वं चित्तमहंकृतिरिति
नैवात्मा न भवति कुतः अन्नमात्रं अन्नोपष्टम्भत्वात् शरीरवत् तथा जलं वह्निर्हुताशः तेजः खं क्षितिरिति पंचभूतानि अ
र्थाः शब्दादयः साम्यं प्रकृतिश्च नात्मा जडत्वात् घटवदिति यद्वा हि शब्देनानुमानानि सूचितानि तद्यथा इं
द्रियाणि आत्मा न भवंति तैजसत्वात् प्रदीपवत् करणत्वात् मनोवत् प्राणश्च वायुत्वाद्बाह्यवायुवदिति २४ ॥

राम
३२२

एवं विवेकज्ञानवतो मुक्तस्य नैंद्रियादिकृतो गुणदोषसंबंध इत्याह समाहितैरिति मत्सुविविक्तधाम्नः मम सम्यक् विविक्तं
धाम स्वरूपं येन तस्य प्रकाशकस्य प्रकाश्यगुणदोषा न भवंतीति रविदृष्टांतेनोक्तं २५ असंगत्वेनावस्थितस्य न
केऽपि गुणदोषा इत्याकाशदृष्टांतेनाह यथेति वाय्वादीनां शोषणदाहक्लेदनमलिनत्वादिभिर्गतागतैरागमापा
यिभिः ऋतुगुणैः शीतोष्णादिभिश्चाकाशं न सज्जते अहंकारात्परमक्षरं संसृतिहेतुभिर्न युज्यते यद्वा अहंकारस्य संसृतिहेतु

समाहितैः कः करणैर्गुणात्मभिर्गुणो भवेन्मत्सुविविक्तधाम्नः विक्षिप्यमाणैरुत किंनु दूषणं घनैरुपेतैर्वि
गतैः रवेः किं २५ यथा नभो वाय्वनलाम्बुभूगुणैर्गतागतैर्वर्तुगुणैर्न सज्जते तथाक्षरं सत्त्वरजस्तमोमलैरहंम
तेः संसृतिहेतुभिः परं २६ तथापि संगः परिवर्जनीयो गुणेषु मायारचितेषु तावत् मद्भक्तियोगेन दृढेन याव
द्रजो निरस्येत मनःकषायः २७ यथामयोऽसाधुचिकित्सितो नृणां पुनः पुनः संतुदति प्ररोहन् एवं मनोऽपक्व
कषायकर्म कुयोगिनं विध्यति सर्वसंगं २८

भिरिति २६ मुक्तवद्गुणसंसर्गं त्यक्त्वा न यथेष्टमाचरेदित्याह तथापीति गुणेषु विषयेषु रजः रागः मनसः कषाय
इति दुर्निरासतामाह २७ एतदेव दृष्टांतेनोपपादयति यथेति नृणामामयो रोगः असाधु असम्यक् यथा भवति तथा प
के कषायकर्म अपक्वाः कषायाः रागादयः तन्मूलानि कर्माणि च यस्मिंस्तत् अत एव सर्वसंगं सर्वेषु पुत्रादिषु सज्ज
मानं मनः कुयोगिनमसम्यक्ज्ञानिनं विध्यति भ्रंशयति २८ ॥ ॥

श्री॰
भा॰
टी॰
१२७

ननु कथं विदेहयसंगे यदि योगभ्रंशः स्यात्तर्हि लंनं नहि सोपायेन योगमार्गेणेत्याह उ॰ योगिन इति मनुष्यभूतैर्बंधुरिशाष्या
दिरूपैस्त्रिदशोपस्पृष्टैः प्रेरितैस्तव्याचक्षीतिः यस्मात्तदेहोनप्रियं यदेतन्मनुष्याविद्यारितिभूयोजन्मांतरेननुक
मैतत्रैकमेवविस्तारं ३१ ननु विदेहाममपि सर्वव्याकमेंडुयादिहरामितिपुनः संसारः स्यात् अतआह करोतीति विदेहो
न्नो सौ जेनुर्देहएव भोजनादिकर्म करोति क्रियते विक्रियते चतेनकर्मणा पुष्पाद्यपि प्राप्नोतीत्यर्थः केनापि संस्का
रादिनाचोदितः सन् आनिपातान्मरणपर्यंतं करोति विदेहास्तु पुरुषो देहस्थितोपितत्कर्मणा न विक्रियते नि

लं॰ उ॰ योगिनो ये विसंतीनतये मनुष्यभूतैस्त्रिदशोपस्पृष्टैः ते प्राप्तेनाभ्यासबलेन भूयो युंजति योगं
ननु कर्मतत्र ३१ करोतिकर्मक्रियते च जंतुः केनाप्यसौ चोदित आनिपातात् न तत्र विद्वान्प्रकृतौ स्थि
तोपि नित्यं नत्वेलः स्वस्तुरवानुभूत्या ३२ तिष्ठन्नमासीनमुतव्रजंतं शयानमुत्थानमदंतमन्नं स्वभावम
न्याकिमपीहमानं मात्मानमात्मस्थमतिर्नवेद ३३ यदिस्मपश्यप्रत्यक्षदिंद्रियार्थं नानानुमानेन वि
रुद्धमन्यत् नमन्यते वस्ततयामनीषी स्वाप्नं यथोत्थाय तिरोदधानं ३४ ॥ ॥ ॥ ॥

संस्कारितान् हर्षविषादादिभिः संसारं न प्राप्नोति ३२ किंच आस्तां तावद्दैहिककर्मभिर्विकार स्पृष्टोक्ता यतो देहम
प्यसौ न वपश्यतीत्याह तिष्ठन्निति उत्थानं मुत्थं येन स्वभावप्राममन्यदपि दर्शनस्पर्शनादि ईहमानं कुर्वंतमात्मानं
देहं ३३ नान्विंद्रियवतः सर्वव्याकथमदर्शनं संभवतीत्याह यदीस्मेति यद्यप्यसतो बहिर्मुखानामिंद्रियाणाम
र्थं पश्यतीति न या पिनानात्वात्मिथ्या स्वप्नवदित्यनुमानेन विरुद्धं बाधितं सदन्यदात्मव्यतिरिक्तं मनीषी वस्तु
न यान मन्यते स्वाप्नादुत्थाय प्रबुद्धः संस्कारमात्रेण स्वाप्नविषयं स्फुरत् अतएव स्वयमेव तिरोभवन्तं यथा न हत ३४

राम
१२७

नदेवमात्मा नविक्रियतइत्युक्तं नन्वेतदनुपपन्नं जाग्रदवस्थायामनुभूयमानत्वात् सुषुप्त्यवस्थायांचाननुभूयमानत्वान्नहिव्रीह
यो ऽवघातेन व्रीहिभावत्यागात् तंडुलाभावेन गृह्यमाणा अविक्रियन्तेनत्वाह एवमिति यथावस्थायोगगुणैः कर्मभिश्चवि
चित्रमज्ञानकार्यं देहेंद्रियादिलक्षणं अध्यासेनात्मनिश्चविविक्तं गृहीतमासेत देव पुनर्ज्ञानेन विनिवर्तते आत्मा तु

सर्वं गृहीतं गुणकर्मचित्रमज्ञानमात्मन्यविविक्तमंग निवर्तते तत्पुनरीक्षयैव न गृह्यते नापि विसृज्य
आत्मा ३३ यथा हि भानोरुदयो नृचक्षुषां तमो निहन्यान्नतु सद्विधत्ते एवं समीक्षानिपुणा सती मे ह
न्यात्तमिस्रं पुरुषस्य बुद्धेः ३४ ॥ ॥ ॥ ॥ ॥ ॥

न केनापि रूपेण गृह्यते नापि त्यज्यते अयं भावः मुक्तेः क्रियाफलत्वेन तावदात्मनो विकारस्तस्यास्त्यागोऽपि नात्मा
न मात्र निवृत्तिरूपत्वात् नात्मनस्तस्यापि तेबंधमोक्षयोः अतो न विकार इति ३३ तदेव दृष्टान्तेन स्पष्टयति
यथेति न तु पूर्वमेवासतः घटादि पुनर्विधत्ते करोति च समीक्षा आत्मविद्या ३४ ॥

श्री
भाग
टी
३२४

आत्मनो निर्विकारत्वं प्रपंचयति एष इत्यनेनापरोक्षतयानित्यप्राप्तस्यात्मनः प्राप्तिं वारयति स्वयंज्योतिरित्यनेनाज्ञानम
लापकरणात्मत्वाणां विज्ञानं वारयति अज इत्यनेनोत्पत्तिं वारयति अप्रमेय इति ज्ञानलक्षणेनित्यप्राधान्येन संस्कारं महानुभ
तिरिति देशकालपरिच्छेदाभावेनास्तित्वबुद्धिविपरिणामापक्षयनाशान् स्वयंज्योतिष्ट्वादेर्हेतुः सकलानुभूतिरिति
एकोऽद्वितीय इति विकारहेतोरन्यस्याभावान्न कोपि विकारयतीति दर्शयति ननु श्रुतिविषयस्य कथं स्वयंज्योतिष्ट्वादित्वम
त्र वचसां विरामे अगोचरत्वेन निवृत्तेरित्यनेन यथाच श्रुतिः यतो वाचो निवर्तंते अप्राप्य मनसा सहेति तत्र हेतुः येनेषि

एष स्वयंज्योतिरजोऽप्रमेयो महानुभूतिः सकलानुभूतिः एकोऽद्वितीयो वचसां विरामे येनेषिता वागसवश्च
रंति ३५ एतावानात्मसंमोहो यद्विकल्पस्तु केवले आत्मन्नृते स्वमात्मानमवलंबो न यस्य हि ३६ ॥

ताः प्रेषिताः तथाच श्रुतिः केनेषितं पतति प्रेषितं मनः केन प्राणः प्रथमः प्रैति युक्तः केनेषितां वाचमिमां वदंति च
क्षुः श्रोत्रं क उ देवो युनक्ति श्रोत्रस्य श्रोत्रं मनसो मनो यद्वाचो ह वाचं स प्राणस्य प्राणश्चक्षुषश्चक्षुरिति ३५ अद्वि
तीयत्वमुपपादयितुं भेदस्यावस्तुत्वमाह एतावानिति केवले अभिन्ने आत्मनि आत्मनः विकल्प इति यदेतावानात्म
वोप्यात्मनो मनसः संमोहः भ्रमः यतः स्वमात्मानमृते विना यस्य विकल्पस्यावलंबः आश्रयो नास्ति रजतत्वभ्रमस्येव
शुक्तिं विनानेह नानास्ति किंचन इंद्रो मायाभिः पुरुरूप ईयते युक्ता ह्यस्य हरयः शता दशेत्यादिश्रुतेरित्यर्थः ३६

राम
३२४

केचित्तुनः प्रत्यक्षादिप्रतीतप्रपंचस्य बाधायोगात् वेदांतार्थानांच ब्रह्मैक्यकर्तृत्वप्रतिपादनपरत्वेनार्थवादत्वात् द्वैतंसत्य
मितिमन्यंते तन्मतमनूद्य दूषयति यदिदमिति नामाद्युक्तेभिः नामरूपोपलक्षितं पंचभूतात्मकं ह्य यद्द्वैतं यत्तद्बाधितमिति
पंडितमानिनां मूढब्रुवं यमेवं पंडितानाद्रुत्याभिमानवतां वेदान्तेषु यमर्थवादइति प्रतीतिः नतत्त्वविदा यतः व्यर्थेनापि वि
नाप्यर्थेन सा प्रतीतिः तथाहि न तावद्धि प्रत्यक्षवाक्यं तत्तेषामस्ति यतोर्थवादत्वं स्यात् न चाकर्तृभोक्तृपरमानंदरूपात्मप्रति
पादने कर्मविधिशेषतोभजनेन चाबाधितत्वं द्वैतस्य नामरूपात्मकत्वात् ग्रासस्तत्त्वं पंचवर्णात्मकत्वात् स्वप्नवदित्या

यन्नामाकृतिभिर्ग्राह्यं पंचवर्णमबाधितं व्यर्थेनाप्यर्थवादोयं द्वयं पंडितमानिनां ३७ योगिनोपक्वयोगस्य
युंजतः काय उत्थितैः उपसर्गैर्विहन्येत तत्रायं विहितो विधिः ३८ योगधारणया कांश्चिदासनैर्धारणान्वितैः
तपोमंत्रौषधैः कांश्चिदुपसर्गान्विनिर्दहेत् ३९ कांश्चिन्ममानुध्यानेन नामसंकीर्तनादिभिः योगेश्वरानुवृ
त्त्या च हन्यादशुभदाञ्छनैः ४० ॥ ॥

घटमानैर्वाचारंभणादिश्रुतिभिश्च बाधितत्वादिति ३७ तदेवं ज्ञानयोगं सपरिकरं निरूप्येदानीं तन्निष्ठस्य विघ्नप्रती
कारमाह योगिन इति त्रिभिर्योगं युंजतः कायोयद्यंतरेवोत्पन्नैरुपसर्गैः रोगाद्युपद्रवैरभिभूयते विधिःप्रतीकारः ३८
योगधारणया सोमसूर्यादिधारणया संतापशैत्यादीन् आसनैर्वायुधारणान्वितैः वातादिरोगान् तपोमंत्रौषधैः
पापग्रहसर्पादिकृतान् ३९ ममानुध्यानादिभिः कामादीन्योगेश्वरानुवृत्त्यादंभमानादीन्हन्यात् ४० ॥ ॥

श्रीं भागं टीं १३९

अन्ये तु देहसिद्ध्यर्थमेवैतत्सर्वं कुर्वंति । न हृष्यतीति केचित्तु न देनैवं न्यस्तोपायैर्देहमेव सुकल्पं जरारोगादिरहितं वयसि स्थिता
हृत्ये स्थिरं चिरजीविनं अत्र इह देहपरकायप्रवेशादिसिद्धये तदभ्यासरूपं योगं युंजंति न तु ज्ञाननिष्ठारूपं ॥४१॥ कुशलैः प्राज्ञैरादृ
त्यं न भवति । वनस्पतेर्वृक्षस्यापि पूर्वीरेणुफलवत्त्र च्यवमित्यर्थः ॥४२॥ ननु तत्त्वचिन्त्यमाधिकं न त्वेनापि । प्राणायामा
दियोगक्रियमालो जरारोगाद्यभावो दृश्यते ॥ सत्यं तथापि तस्मादपि मुमुक्षुजनानत्र सज्जेत्याह । योगमिति तन्नां देहसिद्धिं ।

केचिद्देहमिमं धीराः सुकल्पं वयसि स्थिरं ॥ विधाय विविधोपायैरथ युंजंति सिद्धये ॥४१॥ न हि तत्कुशलादृ
त्यं तदायासो ह्यपार्थकः ॥ अंतवत्त्वाच्छरीरस्य फलस्येव वनस्पतेः ॥४२॥ योगं निषेवतो नित्यं कायश्चेत्क
ल्पतामियात् ॥ तच्छ्रद्दध्यान्न मतिमान्योगमुत्सृज्य मत्परः ॥४३॥ योगचर्यामिमां योगी विचरन्मदुपाश्रयः
नांतरायैर्विहन्येत निःस्पृहः स्वसुखानुभूः ॥४४॥ इति श्री भागवते एकादशस्कंधे भगवदुद्धवसंवादे पर
मार्थनिर्णयो नामाष्टाविंशतितमोध्यायः ॥२८॥ ॥ श्रीरामाय नमः ॥ श्रीरामाय नमः ॥ ॥

न श्रद्दध्यात् । न विश्वसेत् ॥४३॥ न देवं विघ्नप्रतीकारैर्योगं कुर्यादित्युक्तं । मत्परस्य तु न विघ्नशंकापीत्याह । योगच
र्यामिति विचरन् आचरन् । स्वसुखे स्वानुभूः ॥ अनुभूतिर्यस्य सः । स्पृहामूलादि विघ्नाः सा च मदुपाश्रयस्य निवर्तते । अतो
नांतरायैर्विहन्यतः स्वानंदपूर्णो भवतीति ॥४४॥ समासेन त्वस्य योगं तु समस्तोपनिषद्रसं । सत्वेमु त्वेन मां भक्तिमुक्तौ
पुनरुपादिशत ॥ इति श्री भावार्थदीपिकायां एकादशस्कंधे अष्टाविंशः ॥ ॥ २८ ॥ ॥ श्रीरामाय नमः ॥ ॥

रामं १३९

ज्ञानविशेषोद्धवः सर्वविस्तरेणनिरूपितः भक्तियोगस्तमेवाहस्तुभक्त्यायसमासतः १ अतिक्लेशमिवालक्ष्ययोगेऽसंगोकसंपदि
सुलोपायंपुनः कृष्णमुद्धवः परिपृच्छति २ अनात्मनः अवशीकृतमनसः अंजसा अयासेनयथासिद्ध्येत्तथाऽजसास्तुबोध
यथातथामेब्रूहि १ सुदुश्चरतांप्रपंचयति प्रायशइतिमनोयुंजतोनिगृह्णंतः सीदंतिक्लिश्यंति कुतः असमाधाना
त् अनिग्रहात् कथंचिन्मनसोनिग्रहेचकर्शिताः श्रांताः संतः २ यस्मादेवंकेवलंविषीदंति अथातस्त्वमेववयंहंसा

श्रीउद्धवः सुदुश्चरामिमांमन्येयोगचर्यामनात्मनः यथांजसापुमान्सिद्ध्येत्तन्मेब्रूह्यंजसाच्युत १ प्रायशः
पुंडरीकाक्षयुंजतोयोगिनोमनः विषीदंत्यसमाधानान्मनोनिग्रहकर्शिताः २ अथातआनंददुघंपदां
बुजंहंसाः श्रयेरन्नरविंदलोचन सुखंनुविश्वेश्वरयोगकर्मभिस्त्वन्माययामीविहतानमानिनः ३

सारासारविवेकचतुराः तेत्वानंददुघंसमस्तानंदपरिपूरकंतवपदांबुजमेव सुखंयथाभवति तथाश्रुति
श्रयेरन्सेवंते अमीतुत्वन्माययाविहताः केयेयोगकर्मभिर्मानिनः संतोनश्रयंते यद्वा अमीबहुकाः
त्वन्माययानविहताः अतएवयोगकर्मभिः कृत्वामानिनोनभवंति अन्येतुत्वन्माययामोहिताः संतोवयंयो
गत्वावयंकर्मकुशलाइतिकेवलंगर्विताभवंतिनतुसुखंतरंत्यर्थः ३ ॥

कार्यार्थं कृतं भविष्यतीति चेत्तत्राह स्वयमिति। ३।

श्री भाग॰ टी॰ ९२

तदेकाः तत्प्रसादेन कृतार्था भवंतीति नातिचित्रमित्याह किमिति अनन्यशरणेषु दासेषु यच्चात्मसात्त्वं तदधीन
त्वं यद्यस्मात् दरोपी बलिप्रभृतिषु एतत् किंचित्रं नाश्चर्यमित्यर्थः यतो यो भवान् श्रीरामरूपेण मृगैर्वानरैः स
ह साहित्यं सख्यमिति यावत् अरोचयत् प्रीत्या कृतवान् कथंभूतः ईश्वराणां ब्रह्मादीनां यानि श्रीमंति किरीटा
नि तेषां तटान्यग्राणि तैः पीडितं विलुलितं पादपीठं यस्य स्वयं तथाभूतोपि सन् ४ अतस्त्वां परित्यज्य को ना
मान्यं संश्रयेदित्याह तत्त्वेति तमेवंभूतं त्वां को नु विसृजेत् कथंभूतः स्वकृतवित् बलिप्रह्लादादिकृतं याच्ञात
मनुग्रहं जानन् यद्वा स्वस्मिन्नेवानतर्यामितया कृतमुपकारं विद्वांस्तदेवाह अखिलात्मदयितेश्वरमखिलस्य

किं चित्रमच्युत तवैतदशेषबंधो दासेष्वनन्यशरणेषु यदात्मसात्त्वं यो रोचयत्सह मृगैः स्वयमीश्वराणां
श्रीमत्किरीटतटपीडितपादपीठः ४ तं त्वाखिलात्मदयितेश्वरमाश्रितानां सर्वार्थदं स्वकृतविद्विसृजेत
को नु को वा भजेत्किमपि विस्मृतयेनु भूत्यै किं वा भवेन्न तव पादरजोजुषां नः ५
त्व

जगतः आत्मानं वेत्तारं आत्मत्वादेव दयितं प्रेष्ठं तत्त्वेश्वरं ईश्वरत्वादेव प्रार्थनीयं किं वाश्रितानां सर्वार्थदं त
हि किं फलोद्देशेनाह सेवातः नहि न हि किमपि अनिरूप्यं तिरिक्तं स्वर्गादि त्वया दत्तं मयि को वा भजेत्सेवेत कथं
भूतं तद्यत्केवलं भूत्यै इंद्रियभोगाय अनु अनंतरमेव तन्महिस्मृतये भवति यद्वा तद्व्यतिरिक्तं किमपि देवतांतरं प
र्युपासनादि साधनं वा भूत्यै ऐश्वर्याय संसारस्य विस्मृतये मोक्षाय वा को वा भजेन्न कोपि ननु तत्साधनं विना भोग
मोक्षादि फलं कथं स्यात्तत्राह किं चेति तव रजोयावे साधनसंपत्तिः पुरुषार्थचतुष्टयेन यावितात तदाश्रीतिनरोना

४ स्कंधचतुर्दशाध्यायः

राम॰ ९२

न

आत्मा मन्यमत्तनवार्तानकृतोपकारस्य तस्यात्मनिवेदनेनैव निष्कृतिर्नास्त्येवेत्याह नैवेति अपचितिं प्रत्युपकारं आनृण्य मितियावत् कवयो ब्रह्मविदोऽपि नैवशक्नुवन्ति यतस्त्वत्कृतमुपकारं स्मरन्तः ऋद्धमुदः उपचितपरमानन्दाः उपकारमे वाह यो भवानन्तर्बहिराचार्यचैत्यवपुषा गुरुरूपेणान्तर्यामिरूपेण च अशुभं विषयवासनां विधुन्वन्निरस्य

नैवोपयन्त्यपचितिं कवयस्तवेश ब्रह्मायुषापि कृतमृद्धमुदः स्मरन्तः योऽन्तर्बहिस्तनुभृतामशुभं विधुन्वन्नाचा र्यचैत्यवपुषा स्वगतिं व्यनक्ति ९ श्रीशुकः इत्युद्धवेनात्यनुरक्तचेतसा पृष्टो जगत्क्रीडनकः स्वशक्तिभिः गृहीतमूर्तित्रय ईश्वरेश्वरो जगाद सप्रेममनोहरस्मितः १ श्रीभागवते तु एव इति तेवर्णिता ये इमामिमं धर्मा नत्र मंगलान् यान्श्रद्धया चरन्मर्त्यो मृत्युं जयति दुर्जयं ८ ॥ ॥ श्रीरामाय नमः ॥ ॥

न्वगतिं निजं स्वरूपं प्रकटयति तस्य तव ९ ईश्वरेश्वरत्वे हेतुर्जगत्क्रीडनकं क्रीडोपकरणं यस्य सः अनन्तजगत्स्रष्टृत्वादि ना ब्रह्मादयः क्रीडन्तीति तत्राह स्वशक्तिभिः सत्त्वादिभिर्गृहीतं मूर्तित्रयं येन सः सप्रेमं मनसाहितं मनोहरं स्मितं यस्य सः सप्रेम यथा तथा जगाद इति वा १ तदेव कथयिष्यति हन्तेति सदम्बसंबोधनं ते मंगलान् सुखरूपान्

धर्मानेवाह कुर्यादिति त्रयोदशभिः मां स्मरन् शनकैः असंभ्रमतः कुर्यात्तदाह मयीति अर्पिते मनश्चित्ते संकल्पविकल्पानुसंधानात्मके ये
न अत एव मद्धर्मेष्वेवात्ममनसो रतिर्यस्य सः ९ पुण्यदेशलक्षणमाह मद्भक्तैरिति देवादिषु ये मद्भक्तास्तेषामाचरितानि कर्माणि
वाश्रयेत १० सत्रेण संभूय वा ११ अन्तरंगां भक्तिमाह मामिति त्रिभिः सर्वभूतेष्वात्मनि चात्मानमीश्वरं स्थितं मामेवेक्षेत कथ
मेकस्य सर्वेषु स्थितिरित्यत आह बहिरन्तः पूर्णमित्यर्थः तत्कुतः अपावृतमनावरणेनाच्छादनेन तदपि कुतः यथा खमसंग
नादित्यर्थः १२ हे महाद्युते अतिप्राज्ञ इत्यनेन प्रकारेण केवलं ज्ञानरूपां दृष्टिमाश्रितः सन् सर्वाणि भूतानि मद्भावेन

कुर्यात्सर्वाणि कर्माणि मदर्थं शनकैः स्मरन् मय्यर्पितमनश्चित्तो मद्धर्मात्ममनोरतिः ९ देशान्पुण्या
नाश्रयेत मद्भक्तैः साधुभिः श्रितान् देवासुरमनुष्येषु मद्भक्ताचरितानि च १० पृथक्सत्रेण वा मह्यं पर्वया
त्रामहोत्सवान् कारयेद्गीतनृत्याद्यैर्महाराजविभूतिभिः ११ मामेव सर्वभूतेषु बहिरन्तरपावृतं ईक्षेतात्म
नि चात्मानं यथा खममलाशयः १२ इति सर्वाणि भूतानि मद्भावेन महाद्युते सभाजयन्मन्यमानो
ज्ञानं केवलमाश्रितः १३ ब्राह्मणे पुल्कसे स्तेने ब्रह्मण्येऽर्के स्फुलिंगके अक्रूरे क्रूरके चैव समदृक्पण्डितो मतः १४

मन्यमानः सभाजयन्पंडितो मत इत्यन्तरेणान्वयः १३ ननूत्तमाधममध्यमेष्वेकरूपेण सभाजनमपाण्डित्यमेव स्या
त्पूज्यपूजादिव्यतिक्रमादित्याशंक्य तामेव ज्ञानदृष्टिं प्रपंचयति ब्राह्मण इति विषमेष्वपि समदृक् समं मामेव पश्यन्
न् वैषम्यमेव चतुर्धा दर्शयति ब्राह्मणपुल्कस इति जातितो वैषम्यं पुल्कसोऽन्त्यजातिविशेषः स्तेने ब्रह्मस्वहारिणि
ब्रह्मण्ये ब्राह्मणेभ्यो दातरीति कर्मतः अर्के विस्फुलिंग इति गुणतः अक्रूरे क्रूरके चेति स्वभावतः १४ ॥

नरेष्वीश्वरदृष्टिं कुर्वतः सद्यः फलविशेषमाह नरेष्विति समोत्तमहीनेषु स्पर्द्धादयः स्वस्मिन्नहंकारश्च हि निश्चितं वियं
ति नश्यंति १५ अतोंतर्यामीश्वरदृष्ट्या सर्वान्प्रणमेदित्याह विसृज्येति स्मयमानान्हसतः स्वान्स्वीस्लयादैहिकीं

नरेष्वभीक्ष्णं मद्भावं पुंसो भावयतोचिरात् स्पर्धासूयातिरस्काराः साहंकारा वियंति हि १५ विसृज्य स्म
यमानान्स्वान्दृशं व्रीडां च दैहिकीं प्रणमेद्दंडवद्भूमावाश्वचंडालगोखरं १६ यावत्सर्वेषु भूतेषु मद्भा
वो नोपजायते तावदेवमुपासीत वाङ्मनःकायवृत्तिभिः १७ ॥ ॥

दृशमहमुत्तमः सन्नीचइति दृष्टिं तया दृशा या व्रीडा लज्जा तां च विसृज्य श्वचंडालादीनपि व्याप्य प्रणमेत् नविरो
धं कुर्यादित्यर्थः १६ एवं पंचभिः श्लोकैः कृत्यायाः समदृष्टेरवधिमाह द्वाभ्यां यावदिति १७ ॥ ॥ ॥ ॥ ॥

श्री भाग॰ टी॰ ११२९

तस्यैवंकुर्वतःपुंसःसर्वंब्रह्मात्मकमेवभवति कुतः आत्ममनीषया सर्वत्रेश्वरदृष्ट्या याविद्या तया अतःपरितोब्रह्मैवपश्यन्नु
सर्वतःक्रियामात्रादुपरमेत् १८ किमयमेवोपायः अस्तिवान्योपीत्यपेक्षायांसतिबहुषु समीचीनस्त्वयमेवेत्याह अयंही
ति १९ भागवद्धर्मलक्षणोपायस्यसमीचीनत्वमेवोपपादयति ध्वंसोनास्तीति अंगहेउद्धव अनाशिषोनिष्कामस्यमद्धर्म

सर्वंब्रह्मात्मकंतस्यविद्ययात्ममनीषया परिपश्यन्नुपरमेत्सर्वतोमुक्तसंशयः १८ अयंहिसर्वकल्पानांस
ध्रीचीनोमतोमम मद्भावःसर्वभूतेषुमनोवाक्कायवृत्तिभिः १९ नह्यंगोपक्रमेध्वंसोमद्धर्मस्योद्धवाण्वपि मया
व्यवसितःसम्यङ्निर्गुणत्वादनाशिषः २०

स्य उपक्रमेसति अणुरपि ईषदपि वैगुण्यादिभिर्नाशोनास्त्येव यतोमयैवनिर्गुणत्वाद् अयंधर्मःसम्यग्व्यवसितोनि
श्चितः नतुमन्वादिमुखेनकथंचित् २० ॥ ॥

राम ११२९

किं च यो य इति अयमर्थः किं वक्तव्यं मद्धर्मस्य ध्वंस इति यतो लौकिको पि यो यो निरर्थः व्यर्थ आयासः सो पि मयि प
रे निष्फलाय चेत्कल्प्यते निष्कामतयार्पितश्चेत्तर्हि स धर्म एव स्यात् निरर्थायासे दृष्टान्तः यथा भयशोकादिहेतोः प
लायनाक्रन्दनादिलक्षण आस्तहृत २१ अतो मद्भजनमेव बुद्धेर्विवेकस्य मनीषायाश्चातुर्यस्य च फलमित्याह एषेति
नामेव दर्शयति सत्यममृतं च मां मां अनृतेनासत्येन मर्त्येन विनाशिना मनुष्यदेहेन इहास्मिन्नेव जन्मनि प्राप्नोति

यो यो मयि परे धर्मः कल्प्यते निष्फलाय चेत् तदायासो निरर्थः स्याद्भयादेरिव सत्तम २१ एषा बुद्धिमतां
बुद्धिर्मनीषा च मनीषिणां यत्सत्यमनृतेनेह मर्त्येनाप्नोति मामृतं २२ एष तेभिहितः कृत्स्नो ब्रह्मवादस्य सं
ग्रहः समासव्यासविधिना देवानामपि दुर्गमः २३ अभीक्ष्णशस्ते गदितं ज्ञानं विस्पष्टयुक्तिमत् एतद्विज्ञाय
मुच्येत पुरुषो नष्टसंशयः २४ सुविविक्तं तव प्रश्नं मयैतदपि धारयेत् सनातनं ब्रह्मगुह्यं परं ब्रह्माधिगच्छति
२५ य एतन्मम भक्तेषु संप्रदद्यात्सुपुष्कलं तस्याहं ब्रह्मदायस्य ददाम्यात्मानमात्मना २६

ति यत्सैव बुद्धिर्मनीषा चेति बुद्धिर्विवेकः मनीषा चातुर्यं २२ महाप्रकरणार्थमुपसंहरति एष त इति द्वाभ्यां समासव्यास
विधिना संक्षेपविस्तारप्रकारेण किं चाभीक्ष्णशस्ते ज्ञानं एतदनुसंधानकथनपठनश्रवणपराणामप्येतदेव फलं भव
तीत्याह चतुर्भिः २४ सुविविक्तमिति मया सुविविक्तं तवेमं प्रश्नं एतद्व्याख्यानमपि यो धारयेत् अनुसंदध्यात् ब्रह्मगु
ह्यं वेदरहस्यं २५ सुपुष्कलं यथा भवति तथा ब्रह्मदायस्य ब्रह्म ददातीति तथा तस्य ज्ञानोपदेष्टुः २६ ॥ ॥

समधीयेन उच्चैः पठेत् परमं शुचि अन्येषामपि श्रोतृकं रूपेण शृणुयात् १७ १८ सम्यक् ज्ञानानान्वितो पुनरूपदेक्ष्यामीत्याश्रीयेन पृच्छति अपि कच्चिदुपधारितमाकलय्याह १९ नैनं दिनिशाठाय वंचकाय २० शूद्राणां योषितां च यद्भिभक्तिः स्यात्तेर्हि बूयात् २१ एवं ज्ञानेव यत्र मा नूह नाशो भवतीत्याह नैनं दिनि अत्र दृष्टांतमाह पीत्वेति पीयूषं स्वादु २२ ननु संति बहु

यएतत्समधीयेत पवित्रं परमं शुचिः सम्प्रयेनाहं ह मोंज्ञानदीपेन दर्शयन् १७ यएतच्छृणुयान्नित्यमव्यग्रः शृण्वन्नाद्यः मयिभक्तिं परां कृत्वा कर्मभिर्नैव बध्यते १८ अपि हृवत्वया ब्रह्म सर्वं समुपधारितं अपि ते विगतो मोहः श्रोतव्यो मनो भवः १९ नैतत्त्वया दांभिकाय नास्तिकाय शठाय च अशुश्रूषोरभक्ताय दुर्विनीताय दीयतां २० एते दोषविहीनाय ब्रह्मण्याय प्रयाय च साधवे शुचये ब्रूयाद्भक्तिः स्यात् शूद्रयोषितां २१ नैतद्विज्ञाय जिज्ञासो ज्ञातव्यमवशिष्यते पीत्वा पीयूषममृतं पातव्यं नावशिष्यते २२ ज्ञानेकर्मणि योगे च वार्तायां दंडधारणे यावानर्थो नृणां तात तावांस्ते हं चतुर्विधः २३

नि ज्ञेयानि तत्र तत्फलसाधनानि सत्यं सत्यं भक्तानां भक्तस्य तु सर्वं अहमेव नान्यो मदेकशरणो भवेत्याह ज्ञान इति ज्ञानादीयावान्धर्मादिलक्षणश्चतुर्विधार्थस्तावान्सर्वोपि ते हमेव तत्र ज्ञाने मोक्षः कर्मणि विहिते धर्मः कर्मणैव स्वाभाविके तु कामः योगे त्वणिमादि सिद्धयः वार्तायां कृष्यादावर्थः दंडनीतावैश्वर्यमिति सिद्धो ऐश्वर्ययोगपिकामात

श्री भा० टी० ४८

गीताव्याख्यानम् ३३

राम ४८

ऽतऽहमतस्त्वाहमर्त्यं इति यदात्मनस्समस्तवाग्मोसमन्येनिवेदितात्माभवति तदासौमे विचिकीर्षितः विशिष्टकर्तुमिष्टो भवति ततस्त्वाभूतत्वंमोदत्वंप्रतिपद्यमानोमयात्मभूयायमहैकायमत्वमानैश्वर्यायेतियावत्कल्पतेयोग्योभवति वैधुर्व २४ स्वादर्शितोयोगमार्गोयस्यसः २५ एवंश्रण्यैतवचूर्णितोमितचित्तैधैर्येणविष्टभ्यैकमन्यमानः स्वात्मानंहताघमन्यमानः २६ मयायःमोहस्त्वाश्रितस्त्वासीत् सतवसंनिधानेनैवविद्रावितःप्रभवति किंतु

मर्त्योयदात्यक्तसमस्तकर्मानिवेदितात्माविचिकीर्षितोमे तदामृतत्वंप्रतिपद्यमानोमयात्मभू
यायचकल्पतेवै २४ श्री कः सएवमादर्शितयोगमार्गस्तदुत्तमश्लोकवचोनिशम्य बद्धांजलिः
प्रीत्युपरुद्धकंठोनकिंचिदूचेस्रुपरिप्लुताक्षः २५ विष्टभ्यचित्तंप्रणयावघूर्णंधैर्येणराजन्बहुम
न्यमानः कृतांजलिःप्राहयदुप्रवीरंशीर्ष्णास्पृशंस्तच्चरणारविंदं २६ उद्धवः विद्रावितोमोहमहा
धकारोयआश्रितोमेतवसन्निधानात् विभावसोःकिंनुसमीपगस्यशीतंतमोभीःप्रभवंत्यजाद्य
२७ प्रत्यर्पितोमेभवतानुकंपिनाभृत्यायविज्ञानमयःप्रदीपः हित्वाकृतज्ञस्तवपादमूलंकोन्यत्स
मीयाच्छरणंत्वदीयं २८ राम ॥

वात्ययास्मसर्वांभवंतित्यजाद्यब्रह्मणोपिजनक २७ किंचयद्यपितवसंनिधानादेवगतस्तथाप्यनुकंपिनाभव
ताविज्ञानमयःप्रदीपश्चप्रत्यर्पितःस्वमायायापहृतःपुनःसमर्पितः अतस्तवकृतज्ञोयस्तवयाकृतमनुग्रहंजा
नातिसःकोनामतदीयंपादमूलंहित्वाऽन्यच्छरणंसमीयादाश्रयेत २८ ॥ ॥ ॥ ॥ ॥ ॥

श्री भा॰ ए॰ टी॰ २४१

किंच दाशार्हादिषु त्वया यः स्वमायया स्नेहपाशः प्रसारितः स त्वेवात्मतत्वज्ञानशास्त्रेण छिन्नः ३९ एवं यद्यपि त्वया
बद्धरुद्धं तं तथापि तावत्प्रार्थयेन मोस्त्विति अनुशाधि अनुशिक्षय अनुशासनीयमाह यथेति मुक्तावप्यनपायिनी
४० तदेवं क्रमोमित्यंगीकृत्य तत्र यापि मयादिष्टो लोकसंग्रहार्थमेतावत्कुर्वित्याह गच्छेति आदिष्टो नियुक्तः ४१ स्ना

वृक्णश्च मे सुदृढः स्नेहपाशो दाशार्हवृष्ण्यंधकसात्वतेषु प्रसारितः सृष्टिविवृद्धये त्वया स्वमायया ह्या
त्मसुबोधहेतिना ३९ नमोस्तु ते महायोगिन् प्रपन्नमनुशाधि मां यथा त्वच्चरणांभोजे रतिः स्याद
नपायिनी ४० श्रीभगवानुवाच गच्छोद्धव मयादिष्टो बदर्याख्यं ममाश्रमं तत्र मत्पादतीर्थोदे स्नानोप
स्पर्शनैः शुचिः ४१ ईक्षयालकनंदाया विधूताशेषकल्मषः वसानो वल्कलान्यंग वन्यभुक् सुखनिः
स्पृहः ४२ तितिक्षुर्द्वंद्वमात्राणां सुशीलः संयतेंद्रियः शांतः समाहितधिया ज्ञानविज्ञानसंयुतः ४३
मत्तोनुशिक्षितं यत्ते विविक्तमनुभावयन् मय्यावेशितवाक्चित्तो मद्धर्मनिरतो भव अतिव्रज्य गतीस्ति
स्रो मामेष्यसि ततः परम् ४४ ॥

नादेः पूर्वमेव मत्पादतीर्थोद्भूतायामलकनंदायां गंगायाः ईक्षया वसानः परिधानः वन्यभुक् पथ्याशभोजी ४२ द्वं
द्वमात्राणां शीतोष्णादिविषयाणां सुशीलः आर्जवादिस्वभावः ४३ तेन त्वया विविक्तं स्वविचारितं तिस्रः त्रिगुणा
त्मिका गतीरतिक्रम्य ४४ श्रीरामायनमः राम श्रीरामायनमः ॥ ॥

राम २४१

हरिमेधसाऽसि संहरति मेधा यस्मात्तेन श्रीकृष्णेन गृहेहृदपरोऽपि स खड्गः खविनिर्मुक्तोऽपि प्रपन्नोऽमे निरर्गमसमये ७५ स
दुस्त्यजः स्नेहोदयस्मिन् तेन वियोगात् कातरोऽभीतः अतएव तत्परिहातुमशक्नुवन्नातुरो विह्वलः सन् हे कृष्ण कृष्णेत्यथो
प्राप ७६ ततस्तु भर्तृ पादुके तेनैव कृपया दत्ते मूर्ध्नि बिभ्रदिति निर्बंधः कृपया तदाज्ञया ते पुनः पुनः नमस्कृत्य यथो
क्तं च पृष्ठतोऽनुगमं भर्तुः पादविश्लेषणाद्भयात्मात्मीयस्य योऽपक्रमोऽक्रान्तु मार्गे एवं बदरिकाश्रमं गच्छन् भगव
तः प्रभासयात्राप्रपञ्चान्य स्थानैः पृष्टतो गतः सन्नुपसंहृतानि निजकुलं भगवन्तमेकान्ते दृष्ट्वा तत्कालप्राप्तेन मैत्रे

श्री कृ॰ स एवमुक्तो हरिमेधसोद्धवः प्रदक्षिणं परिसृत्य पादयोः शिरो निधाय साश्रुकलाभिराईधी
र्न्यषिंचदद्वंद्वपरोऽप्युपक्रमे ७५ सुदुस्त्यजस्नेहवियोगकातरो न शक्नुवंस्तं परिहातुमातुरः कृच्छ्रं
ययौ मूर्द्धनि भर्तृपादुके बिभ्रन्नमस्कृत्य ययौ पुनः पुनः ततस्तमंतर्हृदि संनिवेश्य गतो महाभागवतो
विशालां यथोपदिष्टां जगदेकबंधुना तपः समास्थाय हरेरगाद्गतिं ७७ य एतदानंदसमुद्रसंभृतं ज्ञा
नामृतं भागवताय भाषितं कृष्णेन योगेश्वरसेवितांघ्रिणा सच्छ्रद्धयासेव्य जगद्विमुच्यते ७८ ॥

येन सह पुनः कृपया भगवतोपदिष्टं तत्त्वमाकलय्य तदाज्ञातो यथाविविद्यवदं विशालां बदरिकाश्रमं गतः स
न् हरेर्गतिमगात् कथं भूतं तेनैव जगदेकबंधुनाऽयथो मदिष्टान्तराम् तत्र प्रतिपद्यमानो मया त्वं च यायुचकल्प
तेवं प्रतिबन्धनानीति सोमामेष्यसि ततः परमित्येवमुक्तप्रकारेण ७७ आनंदसमुद्रो भगवद्भक्तिमार्गस्तस्मिन्संभृत
मेकीकृतमेतत् यः सच्छ्रद्धया आसेव्य ईषदपि सेवितावर्तते समुच्यत इति किं वक्तव्यं तत्संगाज्जगदपि विमुच्यते

श्री
भाग
टी
१७२

एवं कृष्णोपदेशं ज्ञात्वा कृतं प्रणमति भवमिति भवः संसारः भयं च जरारोगादिनिमित्तं तदुभयं निहन्तॄणां च प्रहन्तॄणां च भृत्यव
र्गाणां यथायोगमव हन्तुं यो भूत्वा दयया पद्मजस्य उद्धृतवान् नवेदवाह्यवेदसारमेकं किं तत् ज्ञानविज्ञानरूपं च तत्सारं श्रेष्ठं
च भृङ्गा वहवो गोप्यश्च पुष्पमकरन्दं पयस्त्रैवामृतं तमुपसंहरन्ति तथा स्वयं स्वभक्तेभ्यो वेदान्तसारं लैवतद्दधि तस्मै कं तच्चामृतं यथा
यथं भृत्यवर्गानपाययत् तं नतोस्मीति ४९ येनानुकंपितं विष्णुरुद्धवप्रश्ननिर्णयेः तं वंदे परमानंदं नंदनंदनमुद्धवि

भवभयमपहन्तुं ज्ञानविज्ञानसारं निगमकृदुपजह्रे भृङ्गवद्वेदसारं अमृतमुदधितश्चापाययद्भृत्यवर्गा
न्पुरुषमृषभमाद्यं कृष्णसंज्ञं नतोस्मि ४९ इति श्रीभागवते एकादशे भगवदुद्धवसंवादे योगप्रवेशो नामै
कोनत्रिंशोऽध्यायः॥ राजोवाच ततो महाभागवत उद्धवे निर्गते वनं द्वारवत्यां किमकरोद्भगवान्भूतभावनः
१ ब्रह्मशापोपसंसृष्टे स्वकुले यादवर्षभः प्रेयसीं सर्वनेत्राणां तनुं स कथमत्यजत् २ ३ ४ ॥ ॥

णां ५ इति एकादशे एकोनत्रिंशोऽध्यायः॥ त्रिंशे तु प्रभासे दिवसमौसलकहमतो हरिः स्वधामगंतुमनिच्छन् संजहार निजं
कुलं १ विरागाय प्रह्लादोरमपतिमंगहि मौसलं कथावमाने तत्रैव विष्णोः पदमेष्यतीति २ ततः श्रुतिस्त्रिभिः १ ब्रह्मशापोप
संसृष्टे कुले सति निजपभावः भगवति ततहि प्रतापः प्रभवति यादवनानुकरणां युसोपि कथं चिन्मान्यां अतः किमकरो
दिति तदेव तदुक्तं कथमत्यजदिति सर्वनेत्राणामिति सर्वेंद्रियोपलक्षणं २ ३ ४ ॥ ॥ ॥ ॥

राम
१७२

नमयं चयति प्रत्याकृष्टुमिति यस्मिन्नूपे लग्नं नयनं परावर्तयितुमबला न शेकुः यच्च कर्णरंध्रेण प्रविष्टं न तत्सता
मात्मनि लग्नं लिखितमिव तिष्ठति ततो न सरति न निर्गच्छति यस्य श्रीः शोभा संकीर्त्यमाना कवीनां वाचां रतिमुल्ला
सविशेषं जनयति तेषां मानं जगत्पूज्यमानं जनयतीति किं तु वक्तव्यं यच्चाविलोः रूपं जिष्णोरर्जुनस्य रथे स्थितं दृष्ट्वा

प्रत्याकृष्टं नयनमबलायत्रलग्नं न शेकुः कर्णाविष्टं न सरति ततो यत्सतामात्मलग्नं यच्छ्रीर्वाचां जन
यति रतिं कीर्त्यमाना कवीनां दृष्ट्वा जिष्णोर्युधि रथगतं यच्च तत्साम्यमीयुः ३ ऋषिरुवाच ॥ दिवि भुव्यन्तरि
क्षे च महोत्पातान्समुत्थितान् दृष्ट्वासीनान्सुधर्मायां कृष्णः प्राह यदूनिदं ४ श्रीभगवानुवाच ॥ एते घोरा
महोत्पाता द्वारवत्यां यमकेतवः मुहूर्तमपि न स्थेयमत्र नो यदुपुंगवाः ५ स्त्रियो बालाश्च वृद्धाश्च शंखोद्धारं व्रजन्त्वितः वयं प्रभासं यास्यामो यत्र प्रत्यक्सरस्वती ६
तत्राभिषिच्य शुचय उपोष्य सुसमाहिताः देवताः पूजयिष्यामः स्नपनालेपनार्हणैः ७ ब्राह्मणांस्तु म
हाभागान्कृतस्वस्त्ययना वयं गोभूहिरण्यवासोभिर्गजाश्वरथवेश्मभिः ८ ॥

युधि कृतास्तत्साम्यं सारूप्यं ईयुः प्राप्ताः न केनचिद्रूपेणात्यजदित्यन्वयः ३ दिवि स्वर्गे परिवेषादीन् भुवि भूकंपादीन् अंत
रिक्षे दिग्दाहादीन् महोत्पातादीन् स्वयमेवोत्पादितत्वादन्यैः प्रतीकारान् ४ यमस्य केतवो ध्वजा इव मृत्युसूचकाः
इत्यर्थः नः अस्माभिः ५ प्रत्यक् पश्चिमवाहिनी ६ अभिषिच्य स्नात्वा ७ ब्राह्मणांस्तु नैः कृतपूर्णांतिकाः गवादिभिः

द्वारकामा॰ ८

श्री भा० ए० टी० १७२

विधिरिति। मंगलायनं च किं च हि द्विजदेवगवां पूजा उद्भवहेतुः देवलोके परम उद्भवो भविष्यतीति भावः ९ मधुद्विषो वा
क्यमाकर्ण्य नौभिरुत्तीर्य समुद्रं १० सर्वश्रेयोपबृंहितमित्यत्र संधिरार्षः भगवतानुज्ञैरपि सर्वैः श्रेयोभिः सहितं

विधिरेष ह्यरिष्टघ्नो मंगलायनमुत्तमं देवद्विजगवां पूजा भूतेषु परमो भवः ९ इति सर्वे समाकर्ण्य यदुवृद्धा
मधुद्विषः तथेति नौभिरुत्तीर्य प्रभासं प्रययू रथैः १० तस्मिन्भगवतादिष्टं यदुदेवेन यादवाः चक्रुः परमया
भक्त्या सर्वश्रेयोपबृंहितं ११ ततस्तस्मिन्महापानं पपुर्मैरेयकं मधु दिष्टविभ्रंशितधियो यद्द्रवैर्भ्रश्यते मतिः
१२ महापानाभिमत्तानां वीराणां दृप्तचेतसां कृष्णमायाविमूढानां संघर्षः सुमहानभूत् १३ युयुधुः क्रोधसंर
ब्धा वेलायामाततायिनः धनुर्भिरसिभिर्भल्लैर्गदाभिस्तोमरर्ष्टिभिः १४ ॥ ॥ ॥

चक्रुः ११ पीयत इति पानं मैरेयकं मदिराविशेषं मधुरसं दिष्टेन दैवेन विभ्रंशिता धियः नष्टा यथा तस्मिन्पानेन तद्रुचि
तामिति भावः यद्द्रवैः रसैः १२ कृष्णमायाविमूढानामिति मुख्यो हेतुः संघर्षः कलहः १३ ततो युयुधुः १४ ॥ ॥

राम १७२

पतंत्यः पताका येषु तैः रथादिभिर्मिथः समेत्य न्यहन् न्यघ्नन्नित्यर्थः दद्भिर्दंतैरिव १५ मिथः समेत्येत्य
स्य प्रपंचः प्रद्युम्नसांबादिद्वंद्वैः गदो हि कृष्णभ्राता कः पुत्रश्चापरस्तौ सुमित्रासुरथाविति निर्देशो माघे त्रस्तु रथना
मा वा कश्चित् १६ मदांधेन मदनमस्ता बलात्कारिता १७ दाशार्हादयो नव तत्तद्देशपाः अर्बुदा माथुराः शूरसेना ह

पतत्पताकै रथकुंजरादिभिः खरोष्ट्रगोभिर्महिषैर्नरैरपि मिथः समेत्याश्वतरैः सुदुर्मदा न्यहन् शरै
र्दद्भिरिव द्विपा वने १५ प्रद्युम्नसांबौ युधि रूढमत्सरावक्रूरभोजावनिरुद्धसात्यकी सुभद्रसंग्रामजि
तौ सुदारुणौ गदौ सुमित्रासुरथौ समीयतुः १६ अन्ये च ये वै निशठोल्मुकादयः सहस्रजिच्छत
जिद्भानुमुख्याः अन्योन्यमासाद्य मदांधकारिता जघ्नुर्मुकुंदेन विमोहिता भृशं १७ दाशार्हवृष्ण्यंधकभो
जसात्वता मध्वर्बुदा माथुरशूरसेनाः विसर्जनाः कुकुराः कुंतयश्च मिथस्ते सुविसृज्य सौहृदं १८ पुत्रा
स्त्वयुध्यन् पितृभिर्भ्रातृभिः स्वस्रीयदौहित्रपितृव्यमातुलैः मित्राणि मित्रैः सुहृदः सुहृद्भिर्ज्ञातीं
स्त्वहन् ज्ञातय एव मूढाः १९ शरेषु हीयमानेषु भज्यमानेषु धन्वसु शस्त्रेषु हीयमानेषु मुष्टिभिर्जह्रुरे
रकाः २० ता वज्रकल्पा ह्यभवन् परिघा मुष्टिना भृताः जघ्नुर्द्विषस्तैः कृष्णेन वार्यमाणास्तु तं च ते
२१ प्रत्यनीकं मन्यमाना बलभद्रं च मोहिताः हंतुं कृतधियो राजन्नापन्ना आततायिनः २२ ॥

अतत्तद्देशीयाः १८ भ्रातृभिश्चेति भ्रात्रादिशब्दानां सप्रतियोगिकत्वाद्भ्रातरो मातुलादयस्त्वादिशेषं मित्रैश्च मित्रा
णि च सुहृदः सुहृद्भिः १९ धन्वसु भज्यमानेषु जह्रुः २० परिघाः लोहबद्धदंडाः भृताः धृताः ततश्च श्रीकृष्णमपि प्रत्यनीकं प्रतिप

वं २५

श्री भाग टी ४७

एरकामुष्टिदृष्टिपि वत्रिंशाबुद्धयस्य २२ स्पर्धानिमित्तः क्रोधः कुलसंहतयं नित्ये २४ २५ यो हृद्यं योगं परमपुरुषध्यानलक्षणं
तमेवाह संयोज्येति मानुष्यं लोकं भूर्लोकं मनुष्यरूपतां वा २६ धरोपस्थे भूतले २७ भ्राजिष्णुरूपं २८ तद्देवानुवर्णय

अथ तावपि संक्रुद्धावुद्यम्य कुलनंदन एरकामुष्टिपरिघौ चरंतौ जघ्नतुर्युधि २२ ब्रह्मशापोपसृष्टानां
कृष्णमायावृतात्मनां स्पर्द्धाक्रोधः क्षयं निन्ये वैणवोऽग्निर्यथा वनं २४ एवं नष्टेषु सर्वेषु कुलेषु स्वेषु
केशवः अवतारितो भुवो भार इति मेनेऽवशेषितः २५ रामः समुद्रवेलायां योगमास्थाय पौरुषं तत्या
ज लोकं मानुष्यं संयोज्यात्मानमात्मनि २६ रामनिर्याणमालोक्य भगवान्देवकीसुतः निषसाद धरोप
स्थे तूष्णीमासाद्य पिप्पलं २७ बिभ्रच्चतुर्भुजं रूपं भ्राजिष्णु प्रभया स्वया दिशो वितिमिराः कुर्वन् विधूम इ
व पावकः २८ श्रीवत्सांकं घनश्यामं तप्तहाटकवर्चसा कौशेयांबरयुग्मेन परिवीतं सुमंगलं २९
सुंदरस्मितवक्त्राब्जं नीलकुंतलमंडितं पुंडरीकाभिरामाक्षं स्फुरन्मकरकुंडलं ३० कटिसूत्रब्रह्मसू
त्रकिरीटकटकांगदैः हारनूपुरमुद्राभिः कौस्तुभेन विराजितं ३१ वनमालापरीतांगं मूर्तिमद्भिर्निजायुधैः
कृत्वोरौ दक्षिणे पादमासीनं पंकजारुणं ३२

ति श्रीवत्सांकमिति चतुर्भिः २९ सुंदरस्मितं वक्त्राब्जं यस्मिंस्तत् पुंडरीकवदभिरामे सुंदरे अक्षिणी यस्मिन् ३०-३१ व
नमालया परीतान्यंगानि यस्मिंस्तत् निजायुधैरुपरीतं पंकजारुणं वामपादं दक्षिणे ऊरौ कृत्वा आसीनं रूपं बिभ्रत्

राम ४७ व ३२

श्रावैंद १

नराणामकश्चिल्लुब्धकोमृगयुर्मृगस्यास्यमिवाकारोयस्यतेवधम् ३३ ३४ ३५ ३६ ३७ कस्यपापस्त्वनमेनन्नतवापू
रायद्व तिचेदतआह यस्यतवात्मयोगेरचितंस्वाधीनमायारचितेविविधः अस्यननयारुद्रादयश्चयेचान्येगिरी
पतयोवेदद्रष्टारस्तेपिनविदुःतस्यते अचिन्त्यमायस्य पतद्धुम पापादि अजसानिश्चयंअक्षद्भनयः पापयोन

नुसल्लावधेघायः एवंउक्तेतेषुल्लुब्धकोजरा मृगास्याकारचरणंविध्याथमृगशंकया ३३ चतुर्भुजंतं
पुरुषं दृष्ट्वास्मकृतनकिल्विषः भीतः पपातशिरसापादयोरसुरद्विषः ३४ अज्ञानताकृतमिदंपापेन
मधुसूदन क्षन्तुमर्हसिपापस्यउत्तमश्लोकमेनघ ३५ यस्यानुस्मरणंनृणामज्ञानध्वान्तनाशनं वदं
तितस्यतेविलोमयासोपुकृतवप्रभो ३६ तन्माशुजहिवैकुंठपापानंमृगलुब्धकं यथापुनरहंत्वेवंनकु
र्यासदतिक्रमं ३७ यस्यात्मयोगरचितेनविदुर्विरिंचोरुद्रादयोस्यतनयाःपतयोगिरांये त्वन्मायया
पिहितदृष्टयएतदंजः किंतस्यतेवयमसद्गतयोगृणीमः ३८ श्री भ गु व मभैर्जरेतमुत्तिष्ठकाम
एषकृतोहिमे याहित्वंमदनुज्ञातःस्वर्गंसुकृतिनांपदं ३९ श्री कः इत्यादिष्टोभगवताकृष्णेनेच्छा
शरीरिणा त्रिःपरिक्रम्यतंनत्वाविमानेनदिवंययौ ४० दारुकः कृष्णपदवीमन्विच्छन्नधिगम्य
तां वायुंतुलसिकामोदमाघ्रायाभिमुखंययौ ४१

योवधंकिंगृणीमः कथंवर्णयामः इतियावत् अतस्तदास्तात्माप्नुतरितंमामेवापरापकारिणंपापकर्मणंम
हापुरुषजनहीतिभावः ३८ इच्छाशरीरिणात्वस्याधंभावः शुद्धसत्वमयीनिजाच्छीमूर्तिः मेतदर्थाय नत्वातिष्ठत्वे
वंविडंबनमात्रमिति एतदेवस्फुटीकरिष्यति देवादयोब्रह्ममुख्याइत्यादिना ४० ४१ ॥ ॥ ॥

न पतितं तत्र दृष्ट्वा तस्य पादयोर्निपपात ४३ उदीक्षमाणस्य सूतस्य पश्यतः ४४ ४५ ४६ निर्याणं योगमार्गेण ४७ मद्दशामिति
ह्मशरीराभिप्रायेण अविनाशित्वान्मामेः इन्द्रप्रस्थं गमिष्यथेति ब्रूहीति पूर्वेणान्वयः ४८ मन्मायारचनामेतां विज्ञायेति नि

तं तत्र तिग्मद्युभिरायुधैर्वृतं ह्यश्वत्थमूले कृतकेतनं पतिं स्नेहप्लुतात्मा निपपात पादयो रथादवप्लुत्य सबा
ष्पलोचनः ४२ अपश्यतस्त्वच्चरणाम्बुजं प्रभो दृष्टिः प्रणष्टा तमसि प्रविष्टा दिशो न जाने न लभे च शान्तिं यथा
निशायामुडुपे प्रणष्टे ४३ इति ब्रुवति सूते वै रथो गरुडलाञ्छनः खमुत्पपात राजेन्द्र साश्वध्वज उदीक्षतः ४४
तमन्वगच्छन् दिव्यानि विष्णुप्रहरणानि च तेनातिविस्मितात्मानं सूतमाह जनार्दनः ४५ गच्छ द्वारवतीं सू
त ज्ञातीनां निधनं मिथः संकर्षणस्य निर्याणं बन्धुभ्यो ब्रूहि मद्दशां ४६ द्वारकायां च न स्थेयं भवद्भिश्च स्वबन्धु
भिः मया त्यक्तां यदुपुरीं समुद्रः प्लावयिष्यति ४७ स्वं स्वं परिग्रहं सर्वे आदाय पितरौ च नः अर्जुनेनावि
ताः सर्व इन्द्रप्रस्थं गमिष्यथ ४८ त्वं तु मद्धर्ममास्थाय ज्ञाननिष्ठ उपेक्षकः मन्मायारचनामेतां विज्ञायो
पशमं व्रज ४९ इत्युक्तस्तं परिक्रम्य नमस्कृत्य पुनः पुनः तत्पादौ शीर्ष्ण्युपाधाय दुर्मनाः प्रययौ पुरीं ५०

इति श्रीभागवते एकादशस्कंधे त्रिंशोऽध्यायः ॥ ॥ ॥

जश्रीमूर्तौ रतहितं तत्राहूय प्रोक्तं मात्रं वित्यर्थः ॥४९॥ उत्सलस्य विनष्टत्वात् दुर्मनाः ॥५०॥ इति श्रीभावार्थदीपिकायां ८

एकत्रिंशे स्वकं धाम जगाम भगवानितः तमेवानुययुः प्रीत्या वसुदेवादयस्ततः १ देवान्यहन्तिर्यग्यादो भूयो देवा निर्यय
वा श्रीहरेः स्वेच्छया धाम स्वतनैव समाविशत् २ मुनयः सनकादयः १ प्रजेश्वरा मरीच्यादयः द्विजा गरुडलोकवा
सिनः पतिताः मैत्रेयादयो वा भगवतो निर्याणं द्रष्टुकामाः सन्तः परमोत्सुकाः सन्तः तत्रागमन् २ तेषां मौत्सुक्यहेतु
महोत्सवमाह गायन्त श्लोकेति ३ विभूतीः इन्द्रादीन्स्वप्रभुमेनेत्यमीलयदित्यन्वयः भावः सर्वब्रह्मादिभिः सलोका
न्लोकपालान्नः पाहि वैकुण्ठ किं करोतीति निपातिर्यैवादिदानीं च स्वस्वलोकं प्रति ते तु मागतत्वाहृषुयुच ते प्रुदास्ति एषा
नं च यितुं समाधिमिव कृत्वैव नेत्रे न्यमीलयदिति ४ योगिनामिव स्वच्छंदमृत्युर्धर्ममंवारयति ५ लोकाभिराममिति ६

श्रीशुकः अथ तत्रागमद्ब्रह्मा भवान्या च समं भवः महेन्द्रप्रमुखा देवा मुनयः सप्रजेश्वराः १ पितरः सि
द्धगन्धर्वा विद्याधरमहोरगाः चारणा यक्षरक्षांसि किन्नराप्सरसो द्विजाः २ द्रष्टुकामा भगवतो निर्याणं पर
मोत्सुकाः गायन्तश्च गृणन्तश्च शौरेः कर्माणि जन्म च ३ ववृषुः पुष्पवर्षाणि विमानावलिभिर्नभः कुर्वन्तः सं
कुला राजन् भक्त्या परमया युताः ४ भगवान् पितामहं वीक्ष्य विभूतीरात्मनो विभुः संयोज्यात्मनि चात्मानं
पद्मनेत्रे न्यमीलयत् ५ लोकाभिरामां स्वतनुं धारणाध्यानमङ्गलम् योगधारणयाग्नेय्यादग्ध्वा धामाविश

अयमर्थः योगिनो हि स्वच्छन्दमृत्यवः स्वतनुमाग्नेय्या योगधारणया दग्ध्वा लोकान्तरं प्रविशन्ति भगवांस्तु न तथा
किंतु अदग्ध्वैव स्वतनुसहित एव स्वकं धाम वैकुण्ठाख्यमविशत् तत्र हेतुः लोकानामभिरामः अभितो रमणं स्थिति
र्यस्मात् तां नानादाश्रयते न जगतोपि दाह प्रसंगादित्यर्थः किंच धारणाया ध्यानस्य मंगलं शोभनं विषयं इतरथा ध्यानयो
र्निर्विषयत्वं स्यात् ह पूर्वते चाग्न्याप्युपासकानां तथैव तद्रूपसालोक्यफलप्राप्तिः स्फुरतीति भावः इच्छाशरीराभिप्राये
णवा यथा आज्ञातमेवास्तु तत्रापि तु लोकाभिराममित्यादिविशेषणानामानर्थक्यप्रसंगात् तद्विस्तरदग्ध्वा अतिरो

भागवतटीकायां स्कं ४

ततश्चातुरं स्वस्वमेव लोकमागमिष्यतीति संभ्रमेण देवादिकृतः सर्वतो दुंदुभिनादपुष्पवृष्ट्यादिमहोत्सवोऽभवदित्या
ह दिवीति भूमेः सकाशात् श्रीकृष्णमनुययुः ७ तदा श्रीकृष्णे श्रीनिहिते सति ऊनेभान इति वितर्कयंतो ऽपि ब्रह्मसु
रद्वादेवादयः स्वधामनि विष्टा तं श्रीकृष्णं न ददृशुस्तत्र हेतुः अविज्ञातगतिमिति किंचित्किंचिद्ददृशुश्च ततोऽतिविस्मि
ताबभूवुरित्यर्थः ८ अविज्ञातगतित्वं दृष्टांतेन स्पष्टयति सौदामिन्यागतिर्यथा मर्त्यैर्न लभ्यते देवैस्तु लभ्यते त

द्विद्युद्दुःतेन पुतः सृमनसद्भावात् सत्यधर्मो धृतिर्भूमिः कीर्तिः श्रीश्चानुजग्मुः ७ देवादयो ब्रह्म
मुख्या न विष्टं तं स्वधामनि अविज्ञातगतिं कृष्णं ददृशुश्चातिविस्मिताः ८ सौदामिन्या यथाकाशे या
त्या हित्वाभ्रमंडले गतिर्न लक्ष्यते मर्त्यैस्तथा कृष्णस्य दैवतैः ९ ब्रह्मरुद्रादयस्ते तु दृष्ट्वा योगगतिं हरेः
विस्मितास्तां प्रशंसंतः स्वंस्वं लोकं ययुस्तदा १० राजन्परस्य तनुभृज्जननाप्ययेहा मायाविडंबनमवे
हि यथा नटस्य ॥

था भूमंडलं हित्वा गच्छतः श्रीकृष्णस्य देवैरपि न लक्ष्यते किं नु तत्मार्गे देवेरवेत्यर्थः ९ अपिप्रायापरिज्ञानतः
प्रथमंलिखितं दृष्टांतेन स्पष्टमुक्ते दृष्टं दृष्ट्वा पुनः स्तमेवार्थं प्रपंचयति राजन्निति त्रिभिः परस्य सर्वकारणस्य तनुभृ
त्सु यादवादिषु जननाप्ययेहा आविर्भावतिरोभावचेष्टा मायया अनुकरणमात्रमेवावेहि नटो यथा ऽविकृत
एव नानारूपैर्जन्मादीन्विडंबयति तद्वत् १० ॥